Printed by Ramchandra Yesu Shedge, at the 'Nirnaya Sagar' Press,
26-28, Kolbhat Street, Bombay 2.

Published by Dhirajlal Vrajdas Sanklia, B. A., LL. B., Advocate
at Khakhar Building, C. P. Tank, Bombay 4.

EDITORS' NOTE.

The publication of this great work, the Anu Bhashya together with the commentary Prakasha thereon by Shri Purushottamaji, the erudite Acharya of Vallabha Sampradaya, and the Rashmi on both of these by Goswami Shri Gopeshvarji, who flourished in the nineteenth century and who is known to have written various books and commentaries on Shuddhadwaita Philosophy and allied subjects, was undertaken under the auspices of the Trust of the Late Sheth Gordhandas Soondardas Mulji Jetha, by Mr. Mulchandra Tulsidas Telivalla. He began to publish these from the Third Adhyaya of Anu Bhashya, and published in February 1926, the First Pada of the said Adhyaya. The reader is referred to the introduction of the said Pada in which a short history is given of the author and the literature on the Anu Bhashya available in the Shuddhadwaita Sampradaya.

He published the Second and Third Padas of the Third Adhyaya, and the reader is referred to the Preface of the Third Pada published on 27-4-1927, in which is established the connection of Shri Krishnachandraji with the great work. By the impenetrable will of God, the Editor, Mr. Telivalla, died suddenly on 26-6-1927, to the utter dismay and consternation of us, his friends and collaborators.

Through extreme diffidence, and with the consent of the Trustees of Sheth Gordhandas Soondardas Trust, we took upon ourselves to continue the work left incomplete by our colleague. We are thankful to the Almighty for removing all difficulties and putting facilities in our way of completing this stupendous task.

In the middle of the task, we were deprived of the help of one of our colleagues, the late Mr. Gordhandas Pragji of the Editorial Staff of the Bombay Samachar. His enthusiasm and rigidity of purpose are still present in our minds. We may frankly mention that Shastri Kalyanji Kanji of Gondal has been chiefly instumental in getting the work carried through the Press. He deserves our thanks, and the Sampradaya will always remain indebted to him for this.

It was our intention to provide the reader with the comparative views of the different Bhashyakaras on the various Adhikaranas of the Brahma Sutras, which have been so lucidly given by Goswami Shri Purushottamaji, and with a view to have them in the Introduction to this publication, we requested Prof. G. H. Bhatt, M. A., Professor of Sanskrit in the Baroda

College, to take up the work, and he readily undertook to do it. Unfortunately, on account of other engagements, he could not find time to do it. We, however, wish that he may be able to do this as an Introduction to the Translation of the Anu Bhashya, which he has undertaken under the Gaekwar Oriental Series. In these circumstances and in view of the daily growing scarcity of paper and printing materials, we have thought it fit to give as Preface to this work the very clear analysis of the Adhikaranas made by Goswami Shri Purushottamaji himself in his Adhikaranamala, and to complete this work, without further delay.

We are thankful to H. H. Goswami Shri Gokulnathaji Maharaja of Bombay, for his favour of co-operation and consent for getting the work published, and it may be safely said that the present work sees the light of day through his good offices with the Trustees, and chiefly with the late Mr. Lalji Naranji, one of the Trustees.

Thus by the grace of God we have been able to complete the work left unfinished by our friend the late Mr. Mulchandra Telivalla, and we offer this fruit of our labour of love at the Lotus Feet of Lord Shri Krishna.

Bombay,
31st May 1942.

DHIRAJLAL VRAJDAS SANKALIA.
JAMNADAS KANJEE.
HIRALAL MOOLJEE.
PURUSHOTTAM KANJEE.

... ।य नमः ।

वेदान्ताधिकरणमाला ।

श्रीपुरुषोत्तमविरचिता ।

प्रथमोध्यायः ।

श्रीबालकृष्णमाचार्यान् प्रभून् श्रीविठ्ठलेश्वरान् । व्यासाचार्यांस्तद्वचांसि प्रणमामि पुनः पुनः ॥
भाष्यप्रकाशे विस्तीर्णोर्थोवगन्तुं न शक्यते । सर्वैरतोर्थं सङ्गृह्य न्यायमाला वितन्यते ॥ २ ॥

तत्र तावद् व्यासचरणैरज्ञजनानुग्रहार्थं सर्ववेदार्थरूपस्य ब्रह्मणः स्वरूपसाधनफलमतान्तरनिराकरणभेदेन **चतुर्धा** विचारोत्र शास्त्रे क्रियते । तत्र सर्ववेदार्थरूपं ब्रह्मैवेति ज्ञापयितुं चतुर्लक्षण्यां तत्सम्बन्धि सर्वं विचारितम् । तत्र **प्रथमे**ध्याये सर्वेषां वेदान्तानां ब्रह्मण्येव समन्वयः, वेदार्थनिश्चयश्च वेदान्तविचाराधीन इति सर्वोपि वेदो ब्रह्मण्येव **प्रमाण**मित्युक्तम् । **द्वितीये** च श्रुतीनां परस्परविरोधपरिहारेण विरुद्धस्मृतीनां दूषणेन च ब्रह्मैव **प्रमेय**मिति निर्णीतम् । ततस्तृतीयेन्तरङ्गं बहिरङ्गं च **साधनं** सोपकरणं विचारितम् । ततश्चतुर्थे फलप्राप्तिप्रकारस्तदनुभवप्रकारो ब्रह्मैव च फलमिति निर्णीतमिति **शास्त्रार्थसङ्ग्रहः** ।

तत्र **प्रथमे**ध्याये सर्वेषां वेदान्तानां ब्रह्मणि समन्वयश्चतुर्भिः पादैर्वक्तव्यः । तत्रासन्दिग्धेषु वेदान्तवाक्येषु विचारासञ्चारात्सन्दिग्धान्येव निर्णेतव्यानि । तानि चतुर्धा, कार्यप्रतिपादकानि, अन्तर्यामिप्रतिपादकानि, उपास्यरूपप्रतिपादकानि प्रकीर्णकानि चेत्यतश्चत्वारः पादाः ।

तत्र **प्रथमपादे** ब्रह्मसम्बन्धिविचारं प्रतिज्ञाय ब्रह्म लक्षयित्वा ततः कार्यवाक्यानि विचारितानि ।

तत्र **प्रथमे** एकसूत्रे **जिज्ञासाधिकरणे** षडङ्गैरेव वेदार्थनिश्चयस्य संभवादत्यन्तनिश्चयस्य तपःप्रभृतिभिरेव संभवात्तदर्थं किं वेदान्तविचारेणेत्याशङ्क्य, ऋषिभिर्नानाशास्त्राणां कृतत्वात्तच्छ्रवणेन बुद्धिदोषान्मन्दानां संदेहसम्भवे तन्निवारणार्थं विचारशास्त्रं कर्तव्यम् । तत्र यद्यपि 'सर्वे वेदा यत्पदमामनन्ति' इति, 'वेदैश्च सर्वैरहमेव वेद्य' इत्यादिश्रुतिस्मृतिभिर्ब्रह्मैव सर्ववेदार्थः, तथापीदं वाक्यं वेदान्ते श्रुतं 'त त्वौपनिषदं पुरुषं पृच्छामी'ति, पुरुषरूपता च तत्रैव श्रुता, 'वेदान्तविज्ञानसुनिश्चितार्था' इतिवाक्येन वेदान्तानामर्थनिश्चायकत्वं च तत्रैव श्रुतम्, अत इदानीं तपःप्रभृतीनामसंभवाद्वेदान्तविचारेणैव वेदार्थरूपब्रह्मस्वरूपनिश्चय इत्यभिसंधाय ब्रह्मसंबन्धिविचारः श्रीबादरायणाचार्यैः प्रस्तुत इत्युक्तम् । अतोग्रिमाणि यान्यधिकरणानि शास्त्रसमाप्तिपर्यन्तं तानि सर्वाण्यस्यैव विषय इति तेषामस्य च विषयविषयिभावः संगतिरित्यपि बोधितम् ॥ १ ॥

---

१ ग्रन्थे अस्मिन् प्रतिपाद्य को विषय इति प्रस्तावनाया वक्तव्यमावश्यक प्रकाशकानाम् । साधारणसंशोधको य सारमुद्धरेत् तदपेक्षया श्रीमदणुभाष्यप्रकाशकरै गो श्रीपुरुषोत्तमचरणै अणुभाष्याधिकरणतो सारमात्र सगृह्य अधिकरणमाला रचितास्ति सैवास्माभि ग्रन्थप्रतिपाद्यविषयतयात्र मुद्रापितास्ति । सा यद्यपि वेलीवालापण्डितै- संशोध्य पृथक् मुद्रितास्ति तथापि विपुलविस्तरार्थं पुनर्मुद्राप्यते इति न मोघास्य कृतिरिति विदाङ्कुर्वन्तु विद्वांस ।

ततो **द्वितीये** एकसूत्रे **जन्माद्यधिकरणे** ब्रह्म किंलक्षणकं किंप्रमाणकं चेत्याकाङ्क्षायां जगदुत्पत्तिस्थितिकारणं ब्रह्मेति सूत्रांशेन लक्षितम् । ततोंशान्तरेण वेदरूपशास्त्रप्रमाणकं ब्रह्मेत्युक्तम् । तेन कर्तृरूपं निमित्ततया सिध्यति ॥ २ ॥

ततस्तृतीये एकसूत्रे **समन्वयाधिकरणे** ब्रह्म जगतः कर्तृ निमित्तं चेति चेत्, किं जगतः समवायीत्याशङ्कायामनारोपितानागन्तुकरूपेण समनुगमाद्ब्रह्मैव जगतः समवायीति निर्णीतम् । तेनाभिन्ननिमित्तोपादानवादोस्मिन् शास्त्र इति बोधितम् ॥ ३ ॥

एवं त्रिसूत्र्या ब्रह्मणो जिज्ञासा ब्रह्मलक्षणं तद्विचारस्य कर्तव्यता च साधिता । ये पुनः कर्तृत्वे वैषम्यादयो दोषाः, समवायित्वे च विकृतत्वादयः, ते सर्वेऽग्रिमाध्याये परिहर्तव्याः, विचारकर्तव्यतायाः प्रतिज्ञातत्वात् । तत्र सच्चिदानन्दरूपत्वस्य ब्रह्मणः स्वरूपलक्षणत्वात्पूर्वोक्तं कार्यलक्षणं त्रिष्वप्यनुगतं वक्तव्यम्, अन्यथा लक्षणेऽव्याप्तिप्रसङ्गात् । अन्यतश्च निवारणीयम्, अन्यथातिव्याप्तिप्रसङ्गात् । असंभवश्च निवारणीयः ।

तत्र द्वाभ्यामधिकरणाभ्यां सद्रूपे तल्लक्षणं योजितम् । अतःपरं चिद्रूपेऽव्याप्तिनिवारणाय प्रकृतिपरमाण्वादावतिव्याप्तिनिवारणाय च **चतुर्थे सप्तसूत्रमीक्षत्यधिकरणमारभ्यते** । तत्र **प्रथमसूत्रे** 'यतो वाचो निवर्तन्ते'इत्यादिश्रुत्या ब्रह्मणः सर्वव्यवहारातीतत्वेन सर्वप्रमाणागोचरतया तज्ज्ञानासंभवाद्विचारो व्यर्थ इत्याशङ्क्य, ब्रह्म सर्ववेदान्तप्रतिपाद्यम्, 'सदेव सोम्येदमग्र आसीत्' इत्युपक्रम्य, 'तदैक्षत', 'बहु स्यां प्रजायेय' इत्यनेनेक्षणस्य बहुभवनस्य च श्रावणात् । अतः सृष्टेः पूर्वमव्यवहार्यत्वेपि तदनन्तरं तत्कर्तृत्वेन तदुपादानत्वेन च व्यवहार्यत्वं श्रुत्योच्यत इति तया तज्ज्ञानस्य संभवात्तद्विचारो न व्यर्थ इति बोधितम् । ईक्षणकर्तृत्वेन चेतने तस्मिन् पूर्वोक्तलक्षणसमन्वयाच्चिद्रूपे लक्षणाव्याप्तिरपि परिहृता । तेनैव प्रकृतिपरमाण्वादावतिव्याप्तिरपि निवारिता, असंभवश्च निवारितः । ततो **द्वितीयसूत्रे** तस्येक्षणकर्तुरात्मशब्दवाच्यत्वात्प्राकृतगुणवत्त्वं निवारितम् । ततस्**तृतीये** तदुपासकस्य मोक्षरूपफलकथनादपि तन्निवारितम् । ततश्**चतुर्थे** जगद्धेयत्वस्याकथनादपि तन्निवारितम् । एवं **चतुःसूत्र्यां** कार्यविधिमुखेन तद्विचार उक्तः । ततोग्रे **त्रिसूत्र्यां** कार्यनिषेधमुखेन तद्विचार्यते, निषेधश्च प्रलयात्मकः । तत्र **पञ्चमे** स्वाप्ययसूत्रे जीवस्य सुषुप्तिर्ब्रह्मसंबन्धेनोच्यते । सा च मोक्षभिन्नापि जाग्रदादिवत्कर्मसंबन्धरहितेति प्रलयतुल्या । सा च स्वसंबन्धेनैव जायत इति भगवतस्तत्कर्तृत्वम् । ततः **षष्ठे** मोक्षदशायां जीवस्य भगवत्तुल्यत्वं श्रुत्योक्तम् । तत्र मैत्रेयीब्राह्मण आदिमध्यावसानेषु ब्रह्मण एव बोधनात् तद्दातृत्वं ब्रह्मण एवेति बोधितम् । ततः **सप्तमे** सर्वप्रलये ब्रह्मैवावशिष्यत इति श्रुत्या बोध्यते । अतः प्रलयो ब्रह्मकर्तृक एवेति बोधितम् । एवमनेनाधिकरणेन चित्स्वरूपे कार्यलक्षणयोजनादव्याप्तिः परिहृता । चित्स्वरूपत्वबोधनात्प्रकृत्यादावतिव्याप्तिरपि परिहृता ॥ ४ ॥

ततः **पञ्चमेष्टसूत्र आनन्दमयाधिकरण** आनन्दे लक्षणयोजनेन तत्राव्याप्तिः परिह्रियते । तत्र **प्रथमसूत्रे**ऽविशेषेण पुनःकथनरूपादभ्यासादानन्दमयस्य ब्रह्मत्वं स्थापितम् । तत्र **प्रथमवर्णके** आनन्दस्यार्थतोभ्यासः शब्दतश्च । **द्वितीयवर्णके** तु 'तस्यैष एव शारीर आत्मा यः पूर्वस्ये'तिवाक्याभ्यास उक्तः । एवमभ्यासेन मयट्प्रवाहाद्भेदे साधिते आनन्दमयस्य ब्रह्मत्वम् । यथा पूर्वतन्त्रे यजत्यभ्यासात्कर्मणस्तद्वत् । ततो **द्वितीयसूत्रे** मयटो विकारार्थत्वादानन्दमयस्य न ब्रह्मत्वमिति

सूत्रांशेनाशङ्क्य, मयटः प्राचुर्यार्थकत्वात्र मयट्प्रत्ययेनाब्रह्मत्वं वक्तुं शक्यत इत्यंशान्तरेण समाहितम् । ततस्तृतीये सूत्रे आनन्दजनकत्वेन तत्कारणत्वान्मयटो विकारार्थत्वं निवारितम् । ततश्चतुर्थसूत्रे 'सत्यं ज्ञान'मितिमन्त्रे योर्थ उक्तः स एव संपूर्णे प्रपाठके प्रपञ्च्य गीयते, अत आनन्दमयो ब्रह्मैवेति निर्णीतम् । ततः पुनरग्रिमया चतुःसूत्र्यायमेवार्थो निषेधमुखेन निर्णीयते । तत्र **प्रथमेन** जीवस्यानन्दमयत्वं निराक्रियते, जीवे निरङ्कुशजगत्कर्तृत्वादिरूपस्य माहात्म्यस्यानुपपद्यमानत्वात् । **द्वितीये** 'चानन्दीभवती'त्यादिना जीवस्यानन्दनीयत्वमुच्यते, न त्वानन्दत्वम्, अतो भेदव्यपदेशादपि जीवस्य नानन्दमयत्वमित्युक्तम् । ततस्**तृतीये** 'सोकामयते'तिचेतनधर्मस्य कामस्य जडायां प्रकृतावनुपपद्यमानत्वात्सापि नानन्दमयीत्युच्यते । ततश्**चतुर्थेस्य** जीवस्यानन्दमये ब्रह्मणि योगमुपसङ्क्रमरूपं फलत्वेन कथयति श्रुतिः, तेन जीवापेक्षया उत्कृष्ट एवानन्दमयो, न तु जीवादपकृष्टः । तस्मादानन्दमयो ब्रह्मैवेति निरूपितम् । एवं **चतुःसूत्र्यां** जीवजडनिषेधमुखेनानन्दमयो विचारितः । एवमष्टसूत्र्यानन्दमयस्य ब्रह्मत्वे साधिते निरङ्कुशजगत्कारणत्वं तत्रैव पर्यवस्यतीत्यानन्देपि लक्षणसमन्वयात्तत्राव्याप्तिः परिहृता । जीवजडयोर्निवारणादतिव्याप्तिश्च **एवमधिकरणचतुष्टयेन** सच्चिदानन्देषु लक्षणसमन्वयादसंभवोप्यर्थादेव परिहृतः । तेन जन्माद्यधिकरणस्य शेषभूतमधिकरणत्रयमिति शेषशेषिभावः संगतिः ॥ ५ ॥

ततः **षष्ठे द्विसूत्रेन्तस्तद्धर्माधिकरणे** आदित्यान्तरक्ष्यन्तश्च विद्यमानो हिरण्मयः पुरुष उदित्यादिब्रह्मधर्मोपदेशाद्ब्रह्मैवेत्युक्तम् । ततो **द्वितीयसूत्रे** 'यमादित्यो न वेद'तिश्रुत्यादित्याद्भेदनिर्देशेनापि तस्य ब्रह्मत्वं स्थापितम् । तदज्ञाने सति, यदि तस्य ब्रह्मत्वं न विचार्येत तदा, तदज्ञाने सति, 'स यश्चायं पुरुषे यश्चासावादित्ये स एकः स य एवंविदि'त्युक्त्वाग्रे 'एतमानन्दमयमात्मानुपसङ्क्रामती'त्यनेन श्रावितं तद्विदोक्षरसायुज्यं परब्रह्मप्राप्तिश्च नोपपद्येत । तस्माद्धेतुतागर्भया प्रसंगसंगत्यैतद्विचारितम् ।

किंच, अयं जन्मादिसूत्रस्थविचारः सर्वस्याग्रिमविचारस्य मूलम् । तत्राग्रे 'फलमत उपपत्ते'रित्यनेन सर्वफलदाता भगवानेवेति वक्तव्यम् । ततोग्रे चतुर्थेध्याये निषेधमुखेन प्रतीकोपासना, विधिमुखेनाङ्गोपासनाश्चादित्यादिमतिसूत्रे वक्तव्याः । तत्र मतान्तरोक्तरीत्या प्रतीकोपासनानामब्रह्मपरत्वेपि तद्वाक्योक्तफलसिद्धिस्तत्तदन्तःस्थाद्ब्रह्मण एवेति ज्ञापनायाङ्गोपासनानां ब्रह्मपरत्वे तदुक्तमवान्तरफलं तत्क्रतुत्वरूपं मुख्यं फलं च भगवत एवेति ज्ञापनाय चाप्येतद् बोध्यम् ॥ ६ ॥

ततः **सप्तम एकसूत्रे तल्लिङ्गाधिकरणे, अष्टम एकसूत्रेतिदेशाधिकरणे** च ब्रह्मप्रकरणे आकाशप्राणादिशब्दैः ब्रह्मैवोच्यते, निरङ्कुशजगत्कारणत्वरूपब्रह्मलिङ्गादिति विचारितम् । तेन पूर्वोक्तलक्षणेतिव्याप्तिदोषः परिह्रियत इति पूर्वोक्तशेषभूतमिदमधिकरणद्वयम् । पञ्चमाद्यधिकरणद्वये प्रत्ययकृतसंदेहनिरासः, सप्तमाद्यधिकरणेषु तु प्रकृतिकृतसंदेहनिरास इति विशेषः, प्रकृतिप्रत्ययभेदेन शब्दस्य द्विविधत्वादिति । षष्ठाद्यधिकरणत्रयस्य विषयवाक्यान्युद्गीथविद्यास्थान्युक्तानि । तेन कर्माङ्गोपासनास्वपि ब्रह्मैव फलदम्, तज्ज्ञानेनैव च कर्मणो वीर्यवत्तरत्वमित्यपि बोधितम् । तेन प्रसङ्गोपि संगतिः ॥ ७ ॥ ८ ॥

ततो **नवमे चतुःसूत्रे ज्योतिश्चरणाधिकरणे** 'अथ यदितः परो दिवो ज्योतिर्दीप्यत' इतिवाक्ये ज्योतिःशब्देन ब्रह्मैवोच्यत इति निर्णीतम् । तत्र **प्रथमसूत्रे** 'एतावानस्य महिमे'तिमन्त्रे

भूतात्मकानां चरणानां ब्रह्मधर्मत्वाज्ज्योतिःशब्देन ब्रह्मैवोच्यत इति निर्णीतम् । ततो द्वितीयसूत्र एतत्संदर्भारम्भे गायत्रीछन्द एवोच्यत इति न चरणानां ब्रह्मधर्मत्वमिति सूत्रांशेनाशङ्क्यांशान्तरेण समाहितम् । भगवति चेतोर्पणार्थे संदर्भादौ गायत्री प्रस्तुता, तयोपासने ब्रह्मदर्शनं भवतीति तस्माद्ब्रह्मण एव पादाः, न गायत्र्या इत्युक्तम् । ततस्तृतीये गायत्रीछन्दो हि शब्दरूपम्, भूतपृथिवीशरीरहृदयान्यर्थरूपाणि । तेषां शब्दरूपछन्दःपादत्वं न संगच्छते । अतो ब्रह्मण एव पादा इत्युक्तम् । ततश्चतुर्थसूत्रे यद्यप्येवं पादानां ब्रह्मधर्मत्वमायाति, तथापि 'एतावानि'तिमन्त्रे 'दिवी'ति सप्तम्या पादानां द्युलोकाधारत्वकथनेन विवक्षितस्य ज्योतिषस्तदाधारत्वमुक्तम् । 'अथ यदतः परो दिव' इतिपञ्चम्यानाधारत्वमुच्यत इत्युपदेशभेदाज्ज्योतिर्न ब्रह्मेत्याशङ्क्य, यथा 'वृक्षे श्येनो वृक्षाग्रात्परतः श्येन' इतिविभक्तिभेदेपि यथैकार्थ्यप्रत्यभिज्ञा न विरुध्यते, तथात्रापीति न दोष इति समाहितम् । तस्मादत्र ज्योतिःशब्दवाच्यं ब्रह्मैवेति निर्णीतम् । यद्यपि पूर्वाधिकरणन्यायेन ज्योतिःशब्दस्य ब्रह्मवाचकत्वमायाति, तथाप्यत्र प्रकरणस्य लिङ्गस्य च संदिग्धत्वात्पुनर्विचारितम् । तेन सामान्यविशेषभावः पूर्वाधिकरणसङ्गतिः । एतेनान्या अपि पादसंबद्धाः प्रणवादिविद्या अपि ब्रह्मपरा इत्यपि बोधितम् ॥ ९ ॥

ततो दशमे चतुःसूत्रेनुगमाधिकरणे कौशीतकिब्राह्मणस्थ इन्द्रप्रतर्दनसंवादे 'प्राणोहमस्मि प्रज्ञात्मे'त्यादिनोच्यमानः प्राणो ब्रह्मैव, नासन्यो, नापि जीवः, तस्य ब्रह्मत्वाङ्गीकार एव वाक्योक्तपदार्थसंगतेरित्युक्तम् । तदुपपादितं च भाष्ये । ततो द्वितीयसूत्रे वक्त्रेन्द्रेण प्रतर्दनं प्रति स्वात्मैव प्राणत्वेनोपदिश्यत इति न तस्य ब्रह्मबोधकत्वमिति सूत्रांशेनाशङ्क्य, ततोंशान्तरेण समाधानायास्मिन् प्रकरणे ब्रह्मसंबन्ध एव भूयानुपलभ्यते, तस्मादत्र प्रतिपाद्यः प्राणः परमात्मेत्येवं प्रतिपादितम् । ततस्तृतीये यदि ब्रह्मैवात्र प्रतिपाद्यं तदा 'मामेव विजानीही'तिस्वात्मोपदेशस्य का गतिरित्याशङ्कायामयमुपदेशः शास्त्रदृष्ट्या, न तु लोकदृष्ट्या । शास्त्रे च ब्रह्मज्ञाने सति ज्ञातुर्ब्रह्माभेदेन सर्वभाव उच्यते । यथा श्रुत्यन्तरे वामदेवस्य सर्वात्मभाव उच्यते, 'तद्धैतत्पश्यन्नृषिर्वामदेव' इत्यादिना, तद्वदत्रापि ज्ञानेन ब्रह्मात्मभावात्स्वस्योपास्यत्वेनोपदेश इत्युक्तम् । ततश्चतुर्थे नन्वस्मिन्प्रकरणे जीवधर्मा मुख्यप्राणधर्माश्च भूयांस उपदिश्यन्त इति नास्य ब्रह्मप्रकरणत्वमिति सूत्रांशेनाशङ्क्यांशान्तरेण समाधानमाह । यदि जीवप्राणब्रह्मणां धर्मदर्शनात्त्रयाणां मुख्यत्वं स्वीक्रियेत, तथा सत्युपासनात्रयप्रसङ्गाद्वाक्यभेद आपद्येत । स तु दुष्ट इति न युक्तः । तथा सति योत्र जीवधर्माणां प्राणधर्माणां चोपदेशः, सोत्र जीवस्य ब्रह्माश्रितत्वात्, प्राणस्य तु तद्योगात् । तस्मात्ते सर्वे ब्रह्मधर्मा एवेति प्राणो ब्रह्मैवेति प्रतिपादितम् । इदं चाधिकरणं पूर्वोक्तसर्वनिगमनार्थम् । इदं यथा तथा भाष्यप्रकाशादवगन्तव्यम् । भाष्ये तु चिदचित्संश्लेषनिवारणार्थमित्युक्तम् । ब्रह्मवादे केवलस्यैव ब्रह्मणो जगत्कारणत्वेन चिदचिच्छरीरापेक्षाराहित्यादिति । तेन न पुनरुक्तिदोषः । कार्यप्रतिपादनद्वारा वाक्यानां स्वरूपपरत्वं नवस्वप्यधिकरणेषु स्पष्टम् ॥ १० ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीताम्बरात्मजपुरुषोत्तमस्य कृतौ
वेदान्ताधिकरणमालायां प्रथमाध्यायस्य प्रथमः पादः ॥

एवं प्रथमपादे कार्यप्रतिपादकानां वाक्यानां ब्रह्मणि समन्वयो विचारितः । प्रकृतिप्रत्ययभेदेन शब्दस्यान्यपरत्वसंदेहे तन्निवारणं च कृतम् । अतःपरं द्वितीयादिष्वर्थसंदेहो निवारणीयः । जीवजडतत्समुदायभेदेनार्थस्य त्रैविध्यात् । तत्र द्वितीयपादे जीवपुरःसरेणार्थसंदेहो निवारणीयः । अन्तर्यामिप्रतिपादकानां वाक्यानां ब्रह्मणि समन्वयो वक्तव्यः । तेन पादानामेककार्यत्वं संगतिः ।

तत्र प्रथमे चतुःसूत्रे सर्वत्र प्रसिद्धोपदेशाधिकरणे छान्दोग्यस्था शाण्डिल्यविद्या विचार्यते । तत्रास्यां विद्यायां 'मनोमयः प्राणशरीर'इत्यनेन विज्ञानमयस्य जीवस्य मनोमयत्वादिधर्मवैशिष्ट्ये तैरेव च धर्मैः कर्तृत्वनिर्वाहाद्ब्रह्मणो जगत्कर्तृत्वमपि नोपपद्यत इत्याशङ्कायां, जीवस्य ब्रह्मत्वेनोपासनं निवार्य, सर्ववेदान्तप्रसिद्धस्य ब्रह्मण एवोपदेशाद्ब्रह्मैवात्रोच्यत इति प्रथमसूत्रे आक्षेपनिवारणादाक्षेपोधिकरणसंगतिरित्युक्तम् । ततो द्वितीयसूत्रेस्यां विद्यायां फलत्वेन विवक्षिता ये गुणास्तेषां प्राप्तिर्भगवत्स्वरूपलाभात् तत्सारूप्यलाभाद्वोपपद्यते, अतोपि तथेत्युक्तम् । ततस्तृतीयसूत्रे तिरोहितानन्दत्वेन निराकारत्वादपि नात्र जीव उच्यते, किंतु ब्रह्मैवेत्युक्तम् । ततस्तुरीये ब्रह्मात्र ध्येयत्वेन प्राप्यत्वेन च व्यपदिश्यते, जीवस्तु प्राप्तृत्वेन ध्यातृत्वेन च व्यपदिश्यत इत्युक्तम् । तेनात्रान्तर्यामिभूत ब्रह्मैवोच्यत इति साधितम् ॥ १ ॥

ततो द्वितीये चतुःसूत्रे शब्दविशेषाधिकरणे वाजिशाखास्थं 'यथा व्रीहिर्वा यवो वे'त्यादिविषयवाक्यमुपन्यस्य, तत्रान्तरात्मन्युक्तो हिरण्मयः पुरुषो न जीवः, किंतु ब्रह्मैव, शब्देनोक्ताद्धिरण्मयत्वरूपाद्विशेषादित्युक्तम् । ततो द्वितीये सूत्रे 'ईश्वरः सर्वभूतानां हृद्देशेर्जुन तिष्ठती'ति गीतास्मृतेरपि हृद्देशे वर्तमानस्य ब्रह्मत्वमित्युक्तम् । ततस्तृतीयसूत्रे व्यापकस्येश्वरस्याल्पे हृदयस्थाने स्थितेरयुक्तत्वाच्छ्रुतौ व्रीह्यादितुल्यताश्रावणाच्च तस्य ब्रह्मत्वं न युक्तमिति सूत्रांशेनाशङ्कांशान्तरेण समाहितम् । हृदये निदिध्यासने कृते ब्रह्म ज्ञातुं शक्यते, तत्रैव साक्षात्कारात् । तस्माद् हृदयस्य स्थानत्वमुच्यते । अन्ये त्वत्र दृष्टान्तमप्याहुर्यथा सर्वलोकपतिरप्ययोध्यापतिरिति । तस्मान्न व्यापकत्वहानिः । यत्पुनर्व्रीह्यादितुल्यत्वकथनं तत्तु चतुर्विधभूतान्तरवर्तित्वज्ञापनार्थम् । अतो व्योमवत्सर्वत्र स्थितिर्बोध्यते । तस्मान्न दोष इत्युक्तम् । ततश्चतुर्थसूत्रे तस्य हृदये वर्तमानत्वे जीववत्सुखदुःखभोगोपि संभवतीति सूत्रांशेनाशङ्कांशान्तरेण समाहितम् । तस्य स भोगो न संभवति, तस्य सर्वरूपत्वानन्दरूपत्वादिरूपाणां विशेषाणां विद्यमानत्वादिति । तस्माद्ब्रह्मैवात्रोच्यते । इदं चाधिकरणमन्तर्यामिणो रूपनिश्चायनार्थं हिरण्मयपुरुषत्वेनान्तस्तद्धर्माधिकरणविषयवाक्योक्ताकारस्य मासाग्निहोत्रे नित्याग्निहोत्रधर्मवद्वक्तुं शक्यत्वादिति मम प्रतिभाति । संगतिरत्र प्रसङ्गो बोध्यः ॥ २ ॥

ततस्तृतीये द्विसूत्रे अत्ता चराचरेत्यधिकरणे 'यस्य ब्रह्म च क्षत्रं चे'तिकाठकवाक्योक्तं ब्रह्मक्षत्रात्तृत्वं न जीवस्य, किंतु ब्रह्मण एवेति निर्धारितम् । तत्र प्रथमसूत्रे चराचरग्रहणं हेतुः, चरो मृत्युरचरं कस्याप्यचाल्यम्, ब्रह्मक्षत्राणां संपद्यमानानां भोगः साधितः, सर्वरूपत्वात्मकं वैशेष्यं च । द्वितीयसूत्रे च प्रकरणं हेतुः । तथा च जीवाशक्यभोगस्य चराचरस्य ग्रहणरूपाल्लिङ्गादस्य वाक्यस्य ब्रह्मप्रकरणपठितत्वाच्चात्रोक्तं ब्रह्मैवेति सिध्यति । मोक्षापेक्षिब्रह्मक्षत्रप्राणानामुत्क्रमणाभावेनान्तःप्रकटे भगवत्येव लयादन्तर्यामित्वमपि सिद्धम् पूर्वाधिकरणे ब्रह्मणो जीवविलक्षणस्य भोगस्योक्तत्वात्तत्साधनायात्रोपोद्धातेनानन्दरूपाद्विशेष्यात्संपन्नजीवसाहाय्येन भोगो विचारितः, अन्तर्यामिधर्मविचारस्यैव प्रकृतत्वादिति ॥ ३ ॥

ततश्चतुर्थे द्विसूत्रे गुहां प्रविष्टावित्यधिकरणे 'ऋतं पिबन्ता'विति काठकवाक्यं विषयत्वेनोपन्यस्यात्र जीवद्वयं नोच्यते, किंतु जीवब्रह्मणी उच्येते । अत्र जीवब्रह्मणोरेव प्रतिपाद्यत्वदर्शनात् । इतः पूर्वं 'येयं प्रेते विचिकित्सा'इति 'अन्यत्र धर्मा'दिति वाक्यद्वयेन तयोरेव पृष्टत्वादिति पूर्वसूत्र उक्तम् । ततो द्वितीयसूत्रे पूर्वप्रकरणोक्तविशेषणबलादप्यत्र जीवब्रह्मणी एवोच्येते इति साधितम् । पूर्वाधिकरणोक्तब्रह्मक्षत्रभोगोत्रैवेतिज्ञापनार्थम् । तेनानुप्रसङ्गः संगतिः ॥ ४ ॥

ततः पञ्चमे पञ्चसूत्र अन्तर उपपत्तेरित्यधिकरणे छान्दोग्ये उपकोसलविद्यास्थं 'य एषोक्षिणि पुरुषो दृश्यत'इतिवाक्यं विषयत्वेनोपन्यस्य अक्षिपुरुषस्य ब्रह्मत्वं निर्धारितम् । तत्र प्रथमसूत्र आर्षदर्शनस्योपपद्यमानत्वान्न तत्र प्रतिबिम्बस्य ब्रह्मत्वेनोपासना विधीयते, किंतु ब्रह्मैवेत्युक्तम् । ततो द्वितीयसूत्रे सर्वलोकस्य मामवामनयनरूपस्थानादिव्यपदेशात्तदेव साधितम् । ततस्तृतीयेऽमृतादिपदकथनादपि तत्साधितम् । ततश्चतुर्थसूत्रे तदुपासकस्य ब्रह्मविद्गतिकथनादपि तत्साधितम् । ततः पञ्चमसूत्रे जीवो निवारितः । एवं चात्र पञ्चसूत्र्यां स्थानमाहात्म्यादिरूपं वैशेष्यं बोधितम् । अक्षिस्थितस्य भोगस्तु वाजिनां मण्डलब्राह्मणे प्रसिद्धः । एवमधिकरणत्रयेण भोगदोषासंसर्गहेतुभूतं वैशेष्यमक्षिस्थितस्य पुरुषस्यान्तर्यामित्वं च विचारितम् ॥ ५ ॥

ततः षष्ठे त्रिसूत्रे अन्तर्याम्यधिकरणे बृहदारण्यकस्थमन्तर्यामिब्राह्मणं विषयवाक्यत्वेनोपन्यस्तम् । अन्तर्यामी सर्वत्रैकः, अथवाधिदैवादिशब्दभेदाद्भिन्नः, तत्तदभिमानी जीवो वेत्याशङ्क्य प्रथमसूत्रे पृथिव्यादीनां तदभिमानिनां च ये धर्मास्तेषां भगवत्प्रयुक्तत्वबोधनादन्तर्यामी सर्वत्र भगवानेवेति निर्णीतम् । आधिदैवादिसञ्ज्ञोपि स एवेति च । ततो द्वितीयसूत्रेऽन्तर्यामी ब्रह्मवादे न प्रसिद्धः, जीवब्रह्मजडानामेव प्रसिद्धत्वात् । ततोऽन्तर्यामी साङ्ख्यपरिकल्पितः कश्चिद्भविष्यतीत्याशङ्क्य, नात्र साङ्ख्यमतम्, तद्धर्माणामनभिलापात्, अतोऽन्तर्यामी भगवानेवेति ब्रह्मवादसिद्ध इत्युक्तम् । ततस्तृतीयसूत्रेऽन्तर्यामी जीवो न संभवति, काण्वशाखायां 'यो विज्ञाने तिष्ठ'न्निति माध्यन्दिनीयशाखायां च 'य आत्मनि तिष्ठ'न्निति वाक्याभ्यां जीवाद्भेदस्य श्रावणादित्युक्तम् । अस्मिन्नधिकरणे स्थितिकर्तृत्वनिर्वाहकतयोपोद्घातेन सर्वनियमनं विचारितम् । गुहांप्रविष्टावित्यधिकरणे प्रतिगुहं भिन्नतया प्रवेशादन्तर्यामिणां भेदे प्राप्ते तदभावाय तस्यैक्यमत्र साधितम् । तेन रूपभेदाद्भिन्नोप्येक एवान्तर्यामी नामेत्युक्तं भवति ॥ ६ ॥

ततः सप्तमे त्रिसूत्रे अदृश्यत्वाधिकरणे 'अथ परा यया तदक्षरमधिगम्यत' इति मुण्डकस्थं वाक्यं विषयत्वेनोपन्यस्येयमुपनिषत् साङ्ख्यविद्या ब्रह्मविद्या वेत्याशङ्क्येयं ब्रह्मविद्यैव । यद्यप्यत्राक्षरं पुरुषश्चेत्युभयमुच्यते, पुरुषस्याक्षरात्परत्वं चोच्यते, एवं परापरभावेप्यक्षरं परमात्मैवेति निर्णीतम् । तत्र प्रथमसूत्रे अदृश्यत्वादिगुणकोऽक्षरत्वेनोक्तः परमात्मैव, विश्वजनकत्वरूपस्य ब्रह्मधर्मस्य तत्रोक्तेरित्युक्तम् । ततो द्वितीयसूत्रे अत्राक्षरपुरुषौ साङ्ख्यविद्यासिद्धप्रकृतिपुरुषावेवेत्याशङ्क्य, तौ नात्र संभवतः, अक्षरस्य सर्वज्ञत्वादिना पुरुषत्वेन च विशेषणात्, पुरुषस्य च दिव्यत्वादिना प्राणादिजनकत्वेन च विशेषणात् । न हीदं साङ्ख्ये सिध्यति । किंच, अत्र हि समासावादौ मध्ये च ब्रह्मविद्या इति विद्याविशेषणमुक्तम् । तस्मादपि नात्र साङ्ख्यसिद्धौ प्रकृतिपुरुषावित्युक्तम् । ततस्तृतीयसूत्रे 'अग्निर्मूर्धे'त्यादिना यद्रूपमुक्तं तद्विश्वकायस्य ब्रह्मण एव संगच्छते न तु साङ्ख्यसिद्धस्येत्युक्तम् । तेन सृष्टिपूर्वदशायामप्यक्षरनियामकत्वाद्भगवतोऽन्तर्यामित्वं नित्यमित्युपोद्घातने बोधितम् ॥ ७ ॥

ततोऽष्टमे नवसूत्रे वैश्वानराधिकरणे पूर्वाधिकरणोक्तं रूपं साङ्ख्यसिद्धकार्यैश्वरस्य कुतो न ? अक्षरपरमपुरुषयोर्भेदाभेदौ च कथमित्याकाङ्क्षायां, छान्दोग्यस्थां वैश्वानरविद्यां विषयवाक्यत्वेनोपन्यस्य, रूपस्य नित्यत्वं विरुद्धधर्माश्रयत्वं च तत्रोपोद्घातेन विचारितम्। तत्र **प्रथमसूत्रे** वैश्वानरशब्दवाच्यो हिरण्यगर्भादिः परमात्मा वेति संशये, हिरण्यगर्भादिबोधकसाधारणशब्दाद्यो विशेषः प्रादेशमात्रस्यैवामितो विगतमानत्वरूपः, तस्मादित्युक्तम्। ततो **द्वितीयसूत्रे** 'केचित्स्वदेहान्तर्हृदयावकाश'इत्यादिस्मृत्युक्तस्यानुमापकत्वम्। अतः प्रादेशमात्रो द्युमूर्धत्वादिविशिष्टः परमात्मैवेत्युक्तम्। ततस्तृतीयसूत्रे ननु प्रादेशमात्रस्मृत्या वैश्वानरपदस्य भगवत्परत्वं निर्णेतुं न शक्यम्, 'अहं वैश्वानरो भूत्वे'ति जाठराग्निपरत्वस्यापि स्मरणात्, समानप्रकरण 'एष वा अग्निर्वैश्वानर' इत्यग्निसमभिव्याहारेण श्रावणाद् भगवद्विभूतित्वाच्च। अत्राप्यग्नेः 'हृदयं गार्हपत्य' इत्यादिना त्रेताग्निकल्पनश्रावणात् पुरुषेऽन्तःप्रतिष्ठितत्वश्रावणाच्च न भगवत्परत्वं शक्यवचनमिति सूत्रांशेनाशङ्क्य, नात्र भगवत्परत्वं निषेद्धुं शक्यम्, भगवतो भोक्तृत्वं वक्तुं श्रुतावग्निदृष्ट्युपदेशाज्जाठरे द्युमूर्धत्वादिधर्माणामसंभवाच्च। नच तदुपासनार्थमिति शङ्क्यम्, वाजसनेयिभिः पुरुषत्वस्य श्रावणादित्येवमंशान्तरेण समाहितम्। तस्माद्वैश्वानरः परमात्मैव। ततश्चतुर्थे उक्तहेतुभ्य एव जाठरोऽग्निर्देवतारूपोऽग्निश्च न संभवतीत्युक्तम्। एवं चतुर्भिः सूत्रैर्वैश्वानरस्य ब्रह्मत्वं निर्णीतम्। ततोऽग्रिमैः **पञ्चभिः** सूत्रैस्तस्य परिमाणं विचार्यते, ब्रह्मित्वादिनिवृत्त्यर्थम्। तत्र **पञ्चमे** जैमिनिमतेन परिमाणविरोधपरिहारमाह, व्यापकस्य प्रादेशमात्रत्वं कल्पनां विना साक्षादपि संभवति, यथाकाशस्य। तथा च 'प्रादेशमात्रमभिविमान'मित्यत्र शब्दक्रमादर्थक्रमो बलिष्ठ इति जैमिनेराशयो बोधितः। ततः **षष्ठे** निराकारमेव ब्रह्म मायाजवनिकाच्छन्नं विष्ण्वादिदेवताधिष्ठितेन पुरुषाकारेणाभिव्यक्तः पुरुषविधोऽन्तर्यामी, न तु स्वाभाविकस्तस्याकार इत्याश्मरथ्यस्य मतमुक्तम्। ततः **सप्तमे**ऽनुस्मृतिवशात्पुरुषाकारो 'यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहाये'तिस्मृतेः साधकानुग्रहार्थमिति बादरिमतमुक्तम्। ततोऽष्टमे पूर्वोक्तं नियतपरिमाणवादबोधकं जैमिनिमतं तदेकदेशिनो, न तस्येतिबोधनार्थं पुनर्जैमिनिमतमाह। श्रुतौ 'प्रादेशमात्रमिह वै देवा' इत्यारभ्य अभिसंपादयिष्यामी'तिकथनात्सम्पत्तिनिमित्तं प्रादेशमात्रत्वम्, न तु वास्तवमिति तदाशय उक्तः। ततो **नवमे** 'आमनन्ति चैनमस्मि'न्नितिसूत्र 'एनं वैश्वानरमस्मिन्मूर्धचिबुकान्तराले' जाबालाः समामनन्ति 'एषोऽव्यक्त' इत्यादिना। तस्मात्प्रादेशमात्र एव व्यापकः, अतो वस्तुभावादेव विरुद्धधर्माश्रय इति वैश्वानरो भगवानेवेति स्वसिद्धान्त उक्तः। एवमस्मिन्पादे स्थितिरूपकार्यनिर्वाहार्थमन्तर्यामिप्रतिपादकानि वाक्यानि विचारितानि ॥ ८ ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां प्रथमाध्यायस्य द्वितीयः पादः ॥

अतःपरं मोक्षदातृत्वार्थमुपास्यरूपप्रतिपादकानि वाक्यान्यस्मिन्पादे विचार्यन्ते, साधनाध्याये गुणोपसंहारपादे तत्तन्मार्गभेदेनोपासनाया एव साधनत्वेन वक्ष्यमाणत्वात्।

तत्र **प्रथमे सप्तसूत्रे द्युभ्वाद्यधिकरणे** 'अस्मिन् द्यौः पृथिवी'तिमुण्डकवाक्यं विषयत्वेनोपन्यस्य, तत्र किं साङ्ख्यसिद्धं प्रधानमुच्यते, ब्रह्म वेति संशये, प्रधानं निरस्य ब्रह्मैवेति साध्यते।

तत्र प्रथमसूत्रे स्वशब्दो हेतुत्वेन, स च श्रुतिस्थ'स्वात्मान'मित्यात्मशब्दस्य वाचकः । तथा च द्युभ्वादीनां भारत्वं तदा स्याद्यदि तेषां सूत्रे मणिगणवत् प्रोतत्वं स्यात्, न तु तथा, तेषां कार्यतयैतदात्मकत्वेनैतत्स्वरूपान्तःपातित्वात् । न च सेतुत्वेन साधनत्वबोधनात्फलरूपत्वाभावे सति न ब्रह्मत्वमिति शङ्क्यम् । 'अमृतस्य सेतुरित्यत्र पष्ठ्याऽभेदबोधकत्वेन फलरूपत्वानपायात् । तस्माद् द्युभ्वाद्यायतनं ब्रह्मैव । ब्रह्मणो व्यापकत्वव्युत्पादनं तु पूर्वमन्त्रे 'लक्ष्यं सर्वगतं चैवे'त्यनेन ब्रह्मणः सर्वगतत्वकथनात् तद्बोधनार्थमित्युक्तम् । ततो द्वितीयसूत्रे ननु भवतु ब्रह्मत्वं तथापि तज्ज्ञानेन सर्वविज्ञानस्योपक्रान्तत्वादन्यवाग्विमोकः कथं संगत इत्याशङ्क्य, ब्रह्मणि मुक्तोपसृप्यत्वं वक्तुं शररूपस्य जीवस्य पूर्वमन्त्रे ब्रह्मणि योजनस्योक्तत्वात् तस्य निरध्यस्तत्वरूपं मुक्तत्वमन्यवाग्विमोकेन बोध्यत इति तदपि संगच्छत इत्युक्तम् । ततस्तृतीयसूत्रे एतत्प्रकरणे जडधर्मबाहुल्यस्य जडदृष्टान्तस्य चोक्तत्वादत्र प्रधानमेवाङ्गीकार्यमित्याशङ्क्य, तद्बोधकानां निःसंदिग्धानां धर्माणामदर्शनाद्ब्रह्मबोधकानामात्मसर्वज्ञानन्दरूपादिशब्दानां निःसंदिग्धानां दर्शनान्न प्रधानमङ्गीकर्तुं शक्यम्, किंतु परमात्मैवेत्युक्तम् । ततश्चतुर्थसूत्रे तर्हि जडजीवविशिष्टः साङ्ख्यवादोऽत्रास्त्वित्याशङ्क्य, तद्वाचकनिःसंदिग्धशब्दाभावात् न जीवो, नापि प्रधानम्, किंतु सर्वज्ञत्वादीनां ब्रह्मधर्माणां निःसंदिग्धानां दर्शनाद्ब्रह्मैव । ततः पञ्चमसूत्रे 'तमेवैकं जानथात्मान'मिति ब्रह्मणि ज्ञानकर्मत्वस्य जीवे ज्ञानकर्तृत्वस्य बोधनेन भेदव्यपदेशात् न जीवपरत्वं तस्येत्युक्तम् । ततः षष्ठे सूत्रे अस्य वाक्यस्य ब्रह्मप्रकरणपठितत्वादपि न जीवपरत्वमित्युक्तम् । ततः सप्तमे सूत्रे 'द्वा सुपर्णा'वितिश्रुतौ परमात्मनः शरीरे स्थितिमात्रं प्रकाशकत्वं च श्राव्यते, जीवस्य तु कर्मफलभोगोपीति स्थित्यदनाभ्यां ब्रह्मजीवौ पृथगेव निर्णीयेते । तस्मादपीदं ब्रह्मवाक्यमेव, न तु प्रधानजीवसंदेहात् साङ्ख्यपरमिति निर्णीतम् । तेन पूर्वपादोक्तमन्तर्यामिरूपमपि व्यापकत्वसर्वात्मकत्वादिगुणविशिष्टमेवोपासनीयमिति साधितम् । अत्र शरधनुर्न्यायश्रावणात्पृथगुपासनं ज्ञानमार्गीयाणामपि कर्तव्यत्वेन बोधितम् ॥ १ ॥

ततो द्वितीये द्विसूत्रे भूमाधिकरणे 'यो वै भूमा तत्सुख'मिति छान्दोग्यस्थसनत्कुमारनारदसंवादगतं वाक्यं विषयत्वेनोपन्यस्य, तत्र बाहुल्यं सुषुप्तिश्च नोच्यते किंतु ब्रह्मैवेति साधितम् । तत्र प्रथमसूत्रे सुषुप्तेः सकाशादाधिक्यस्य 'स एवाधस्तादि'त्यादिना बोधनात् मुख्यवृत्त्यात्मशब्दपरिग्रहसंभवाद् ब्रह्मणः सर्वशब्दवाचकत्वेन भाववाचकशब्दानामपि ब्रह्मपरत्वसंभवाच्च भूमा भगवानेवेत्युक्तम् । ततो द्वितीयसूत्रे 'नान्यत्पश्यती'त्यादिनोक्ता अन्या दर्शनादयो धर्मा अप्याविर्भूते परस्मिन् भगवति तद्दर्शनेन तदैक्यात्तदविभागाद्वा तदेकतानतायां संभवन्तीति भूमा ब्रह्मैवेति साधितम् । तेन नित्यनिरवध्यानन्दरूप एवान्तर्याम्युपास्य इति पृथगपि भक्तिमार्गीयैरुपास्य इति बुद्धिस्थं प्रसङ्गाद्बोधितम् ॥ २ ॥

ततस्तृतीये त्रिसूत्रे अक्षराधिकरणे बृहदारण्यकस्थ'मेतद्वै तदक्षरं गार्गी'तिवाक्यं विषयत्वेनोपन्यस्य, सूत्रद्वयेनाज्ञया पृथिव्याद्यम्बरान्तधारकत्वेनाक्षरस्य ब्रह्मत्वं साधितम् । ततस्तृतीये सूत्रे तस्य प्रशासनस्य जीवधर्मत्वव्यावृत्त्याक्षरज्ञानफलबोधनेन च ब्रह्मत्वम् । अत्र च पूर्वपादेऽदृश्यत्वाधिकरणे विचारितस्याक्षरस्य विरुद्धधर्मत्वबोधनमिति बुद्धिस्थोपोद्घातः संगतिः । अक्षरोपासनं च ज्ञानमार्गीयाणां केषाञ्चिन्मुख्यम्, 'ये त्वक्षरमनिर्देश्य'मित्यादिगीतावाक्यात् । भक्तिमार्गीयाणां त्वक्षरज्ञानमङ्गत्वेन प्रविशतीत्यग्रे 'अक्षरधिया'मित्यत्र वाच्यम् । तेनेदं मार्गद्वयोपयोगीति तदुभयोरन्तरं प्रसङ्गत उक्तम् । तेनात्र क्रमनियामिका प्रसङ्गः सङ्गतिः ॥ ३ ॥

ततश्चतुर्थे एकसूत्रे ईक्षतिकर्माधिकरणे प्रश्नोपनिषत्पञ्चमप्रश्नस्थ'मेतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कार' इतिवाक्यं विषयत्वेनोपन्यस्य, अत्र ध्येयः परमात्मैव, न तु विराट्, ब्रह्मा वा । 'परात्परं पुरिशयं पुरुषमीक्षते' इतिवाक्यशेषे ईक्षतिकर्मत्वेन जीवघनादक्षरात्परस्यैवोक्तत्वात् । अत्र ध्यानविषयस्येक्षतिकर्मत्वप्रतिपादनेनोपासनानां फलं साक्षात्कार इत्यप्यनेन साधितम् । तेन प्रसङ्गः संगतिरिति बोधितम् ॥ ४ ॥

ततः पञ्चमे अष्टसूत्रे दहराधिकरणे 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्मे'त्यादि छान्दोग्यस्थं वाक्यं विषयत्वेनोपन्यस्य, तत्र दहरशब्दवाच्य आकाशः परमात्मैव न जीव इति निर्णीयते । तत्र प्रथमसूत्रे उक्तछान्दोग्यवाक्ये वक्ष्यमाणेभ्यो हेतुभ्यो दहरः परमात्मैवेत्युक्तम् । ततो द्वितीयसूत्रे 'यथा सुवर्णनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तोपि न विदुः एवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ती'त्यनेनोक्तं प्रजाशब्दवाच्यानां जीवानां यद् ब्रह्मलोके गमनं सा गतिः 'एष आत्मापहतपाप्मा सत्यसङ्कल्प'इत्यत्रापहतपाप्मत्वादिविशिष्ट आत्मशब्दः पूर्वोक्तो ब्रह्मलोकशब्दश्च ताभ्यां हेतुभ्यां दहरः परमात्मैव । न च जीवपरमात्मनोस्ततो भेदाभावात्स्वप्नदशायामज्ञानकल्पितानामेव ब्रह्मलोकगमनमात्मशब्दश्च जीवसाधारण इति न ताभ्यां परमात्मसिद्धिरिति शङ्क्यम् । अत्र हि प्रजानां ब्रह्मलोके गच्छन्तीनां 'अनृतेन प्रत्यूढा' इति विशेषणं दृश्यते । तदर्थस्तु अनृतेन पिहितत्वम् । 'अनृतापिधाना' इतिश्रुत्यन्तरे तथादर्शनात् । तच्च सुषुप्तौ 'सुखमहमस्वाप्सम्, न किञ्चिदवेदिष'मित्यनुभवस्तासां प्रजानामज्ञत्वं साधयति, न त्वज्ञानकल्पितत्वम्, अज्ञानकल्पितत्वे सति ब्रह्मलोकगतिर्न संगच्छते, तथापहतपाप्मत्वादिविशेषणादात्मशब्दश्च न संगच्छते, अतो गतिशब्दयोर्ब्रह्मपरत्वाद्दहरः परमात्मैव । किं च, अत्र 'तद्य इहात्मानमननुविद्य व्रजन्ती'त्यात्माज्ञानं लोकक्षयहेतुत्वेनोच्यते । यद्यात्मा ब्रह्माभिन्नः ----------
स्वाज्ञानं न स्यात् । अत इदमज्ञानं जीवस्य ब्रह्मभिन्नत्वं ।
एवमपहतपाप्मत्वादिविशेषणान्यप्यात्मशब्दस्य ब्रह्मपरत्वे लिङ्गमिति प्रागेवोक्तम् । अतो दहरः परमात्मैवेति साधितम् । ततः तृतीयसूत्रे 'य आत्मा सेतुर्विधृति'रितिश्रुतेः सर्वलोकविधारकत्वात्स्वयं साधनीभूय संसारपारप्रापकत्वात् एकस्यैवाकाशद्यावापृथिव्यादेरन्तर्बहिःस्थापनेन तस्य सर्वलोकधारणस्य महिमरूपत्वात् तस्य महिम्नो विरुद्धधर्माश्रयत्वरूपतया श्रीयशोदादिभिरन्तर्बहिरुपलब्धश्च दहरः परमात्मैवेत्युक्तम् । ततश्चतुर्थे आकाशशब्दवाच्यत्वप्रसिद्धेरपहतपाप्मत्वादिप्रसिद्धेः प्रकरणोक्तसर्वधर्मप्रसिद्धेश्च दहरः परमात्मैवेत्युक्तम् । एवं चतुःसूत्र्या विधिमुखेन दहरस्य परमात्मत्वं विचारितम् ।

अतः परमग्रिमचतुःसूत्र्येतरनिषेधमुखेन तस्यैव परमात्मत्वं पुनः साधयति । ततः पञ्चमे अस्मिन् प्रकरण आदिमध्यावसानेषु सम्प्रसादादिशब्दैर्जीवस्य परामर्शाज्जीव एव दहर इति सूत्रांशेनाशङ्क्य, जीवे जगदाधारत्वादेरसंभवात् स न दहर इत्युक्तम् । ततः षष्ठ एतदनंतरमुक्त इन्द्रप्रजापतिप्रकरणे जीवस्यैवामृताभयत्वादिरूपेणोक्ततयात्रापि स एव परामृश्यतामिति सूत्रांशेनाशङ्क्य, तत्र प्रजापतिरुपदेशसमय आविर्भूतब्रह्मरूपो जातः, यथा नृसिंहोपासको नृसिंहाविष्टो भवति, अतस्तथाभूतत्वात्सर्वत्रात्मानं पश्यन्नुपदिष्टवान्, अतो न तत्र जीवः प्रकरणार्थः । अतस्तदनुरोधेनात्र जीवस्य ब्रह्माभिन्नत्वं न वक्तुं शक्यम् । तस्माद्दहरः परमात्मैव । ततः सप्तमे तर्हि तत्र जीवपरामर्शस्य किं

प्रयोजनमित्याकाङ्क्षायां पूर्वप्रकरणे सत्यनामकस्य ब्रह्मणो ज्ञानेन ब्रह्मसुखरूपं फलमुक्तम् । तदपेक्षायां तादृशं ब्रह्मज्ञानमावश्यकम् । तत्र सच्छब्देनामृतस्य जीवस्य, तिशब्देन मर्त्यस्य जडस्य, यशब्देनोभयनियामकस्य ब्रह्मण उक्तत्वात् । नियम्यद्वयज्ञानाभावे नियामकस्य ब्रह्मणो ज्ञानासंभवात् । तदर्थं शब्दोक्तस्य नियम्यस्य जीवस्य स्वरूपज्ञानाय जीवपरामर्शः, न तु प्रकरणित्वेनेत्युक्तम् । ततोऽष्टमे भवत्वेवं तथाप्यल्पे हृदयपुण्डरीके आकाशरूपस्य ज्यायसो ब्रह्मणः स्थितिर्न संभवतीत्यतो जीव एवोच्यतामित्याशङ्कायां 'निचाय्यत्वादेवं व्योमवच्चे'त्यत्र विरुद्धधर्माश्रयत्वेन ब्रह्मणः स्थितिर्वक्तुं शक्येत्युक्तम् । तादृशत्वस्यात्राप्यनुसंधेयत्वात्तेन तत्समाधिसिद्धिरिति दहरः परमात्मैव । अत्र बुद्धिस्थस्य विचारादुपोद्घातगर्भः प्रसङ्गः सङ्गतिः । किं च, परामर्शसूत्रे जीवस्य सर्वावस्थासु ब्रह्मनियम्यत्वस्यैव सिद्धत्वात्, अतो जीवस्य परममुक्तिदशायामपि ब्रह्मनियम्यत्वमेव सिध्यति । वेदस्तुतावपि 'अजनि च यन्मयं तदविमुच्य नियंतृ भवे'दित्यत्र तथैव सिद्धत्वाच्च ॥ ५ ॥

ततः षष्ठे द्विसूत्रे अनुकृत्यधिकरणे 'न तत्र सूर्यो भाती'ति कठवल्लीस्थं वाक्यं विषयत्वेनोदाहृत्य, लोकप्रकाशकानां सूर्यादीनां दहरांतःस्थत्वकथनात् कठवल्लीस्थमुक्तवाक्यं तद्विरुद्धमित्याशङ्क्य, तेषां स्वतो न प्रकाशकत्वम्, किंतु भगवदनुकारित्वाद्भगवत्प्रकाशेनैव प्रकाशकत्वं सर्वत्र सर्वदेतिप्रसङ्गान्निर्णीतम् । तेन जीवस्य मुक्तिदशायां तदनुकारित्वरूपमेव साम्यम्, न तु परमसित्यपि चोधितम् । अन्यथैतद्विचारस्यात्र निष्प्रयोजनत्वापत्तेरिति ॥ ६ ॥

ततः सप्तमे द्विसूत्रे शब्दादेव प्रमित इत्यधिकरणे कठवल्लीस्थमङ्गुष्ठमात्रवाक्यं विषयत्वेनोदाहृत्याङ्गुष्ठमात्रस्य भूतभव्येशानत्वं शब्दादेव प्रमीयते इति प्रथमसूत्रे निर्णीतम् । द्वितीये च तस्य तत्र स्थितिर्मनुष्याणामधिकारार्थेति निर्णीतम् । अत्रापि प्रसङ्ग एव सङ्गतिः । इदं च जीवस्य मुक्तिदशायां ब्रह्माविर्भावेन विरुद्धधर्माश्रयत्वे फलिष्यति ॥ ७ ॥

ततोष्टमेष्टसूत्रे तदुपर्यपीत्यधिकरणे प्रसङ्गाद्देवादीनां ब्रह्मविद्यायामधिकारो विचारितः । तत्र प्रथमे सूत्रे मनुष्येषु त्रैवर्णिकानामुपनयनादिसंस्कारवतां कर्माधिकाराद् ब्रह्मविद्यायामप्यधिकार इति पूर्वतन्त्रादेव सिध्यति । ततो मनुष्याद्धीनजातीयानां तु योग्यताऽभावादेव नाधिकारः । अतः परं मनुष्यादुत्कृष्टानां ब्रह्मविद्यायामधिकारः संभवादुक्तः । यद्यपि देवादीनामुपनयनादिकं न प्रसिद्धम्, तथापि यज्ञोपवीतमन्त्रे 'प्रजापतेर्यत्सहजं पुरस्तादि' तिश्रावणात्तन्न्यायेनान्यत्रापि जन्मानुग्रहविशेषतपःप्रभृतिभिर्मतङ्गविश्वामित्रादीनामिवाधिकारः संभवति । तस्मादप्यधिकार इत्युक्तम् । ततो द्वितीयसूत्रे पूर्वसूत्रोक्तस्य देवादीनामधिकारस्य विप्रतिपन्नतया तद्बलेन तेषु ब्राह्मण्यादेर्वक्तुमशक्यत्वात्, तेषां स्वर्गस्थत्वेन पृथिवीरूपदेशस्य, व्रीह्यादिरूपद्रव्यस्य तत्र सूर्यगत्यभावेन दर्शादिरूपकालस्य च, तदतिरिक्तदेवाभावेनोद्देश्यदेवतान्तरस्यापि वक्तुमशक्यतया तदभावेपि कर्मकरणे श्रुतिविरोध इति सूत्रांशेनाशङ्क्य, अंशान्तरेण प्रजापतिन्यायाद् वर्णसत्तायाः साधितप्रायत्वात्, 'इन्द्रो द्वात्रिंशद्वर्षाणि प्रजापतौ ब्रह्मचर्यमुवासे'तिश्रावणादाश्रमसत्तायाः, 'साध्या वै देवाः सुवर्गकामा एतꣳषड्रात्रमपश्यन् तमाहरन् तेनायजन्ते'तियज्ञकरणश्रावणाद्, 'देवा वै सत्रमासते'त्यादौ भूमावागत्य ऋषीन् वृत्वा यज्ञकरणश्रावणाच्चानेकधोपयोगो देवानां वेदे दृश्यते । भगवदवयवरूपा ये देवास्ते तेषामुद्देश्या अपि भवंति । 'उभौ वै देवानाꣳ शमितारौ अध्रगुश्चापापश्चे'त्यादौ ऋत्विजोपि श्राव्यंते । तस्मान्न श्रुतिविरोध इत्युक्तम् । ततस्तृतीये ननु वेदात् कर्म ज्ञात्वा पश्चात् कर्तव्यं देवैः, तत्र देवानां कर्म-

करणं वदन् वेदो देवानामधिकारं वदेत् । देवाश्च जन्या इति वेदार्थज्ञानसमये तेषामभावाद्, ज्ञप्तौ चात्माश्रय इति कर्मकर्तॄणां ज्ञातृत्वेन वक्तुमशक्यत्वात् कर्मकर्तृविरोधः । वेदश्च तेषां वृत्तान्तं वदन् स्वयं कथं नित्यो भवेत् । अतो वेदानित्यत्वापादकत्वादयं देवाधिकारपक्षो न सङ्गत इति सूत्रांशेनाशङ्क्य, अंशान्तरेण समाधिमाह, शब्दोक्ताः पदार्थाः सर्वे एवाधिदैविका भगवदवयवरूपाः, शब्द एव विद्यंते, नित्यास्तैः सह पदानां सम्बंधोपि नित्य इति न वेदस्यानित्यत्वम् । इदमेव चतुर्थेन सूत्रेण वक्तव्यम् । न च वैदिकपदार्थानामतिरिक्तत्वाङ्गीकारे प्रत्यक्षविरोधः शङ्क्यः । इदानीमपि यजमानर्त्विक्प्रभृतीनां वेदादेव सपरिकरकर्मावगतेर्वृद्धव्यवहारादिना दर्शनेन वैदिकपदार्थांतरेष्वपि तेनैवावगतिसम्भवात् । अतो यैर्भगवान् दृष्टस्तेषां तु तत्रैव सर्वपदार्थदर्शनात्तेष्वेव संकेतग्रहः, ततोर्वाचीनानामिदानीन्तनपर्यंतानां तूपमानात्तेषु संकेतग्रहः, भगवतः सर्वानुकारित्वात् । किं च, यथा 'जमदग्नीनां पञ्चावत्त'मित्यत्र स्वस्मिन् जामदग्न्य इति प्रत्यक्षज्ञानाभावेपि परोक्षानुभवो भवति, तथा वैदिकप्रपञ्चस्यापि परोक्षानुभवो भवत्येवेति वैदिकप्रपञ्चोतिरिक्त एव । तस्मान्न ज्ञाने कर्मकर्तृविरोध इति सूत्रद्वयेनोक्तम् । ततः पञ्चमे ननु भवत्वेवं वैदिकसृष्टिरतिरिक्ता, तथापि 'यतो वा इमानि भूतानि जायंते'इत्यादिषु सृष्ट्यादिरुच्यते इति तदनुरोधेनानित्यापि सृष्टिर्वेदे उच्यते इत्यङ्गीकार्यम् । तथा ये देवाः कर्म कुर्वंति तेप्यनित्या इति च । एवं सति वेदस्य तद्वाचकत्वे शब्दार्थयोर्नित्यसंबंधविरोधः, अतस्तदभावार्थमाकृतावेव संबंधो वक्तव्यः । तथासति किं जैमिनिमतदूषणेनेत्याशङ्क्य, लोकदृष्टिमङ्गीकृत्य तद्रीत्यापि समाधानमाह । यद्यपि सर्वस्य भगवद्रूपत्वादुत्पत्तिप्रलययोः सञ्चरप्रतिसञ्चररूपत्वेन वस्तुनित्यत्वाबाधकतया दर्शनादर्शनयोरेव नित्यानित्यत्वपर्यवसानम्, न तु वस्तुनीति न काचिदाशङ्का । तथापि लोकदृष्ट्या प्रपञ्चस्य देवादीनां चानित्यत्वाङ्गीकारे तत्तत्प्रवाहे एव शब्दसंबंधः । लोकेऽपि शरीरगङ्गाप्रभृतिषु प्रवाहे एव शब्दसंबंधदर्शनात् । अतो देवादीनां तत्कर्मणां चानित्यत्वेपि तत्प्रवाहस्य नित्यत्वात् तद्बोधके वेदेपि नानित्यत्वं शङ्कितुं शक्यते इति । ततः षष्ठसूत्रे ननु यद्यपि श्रुतिविरोधपरिहारेण कर्मण्युपासने च देवानामधिकारः प्रतिपादितस्तथापि छांदोग्ये 'असौ वा आदित्यो देवमध्वि'त्यादिनोक्तायां मधुविद्यायां स न सङ्गच्छते । तत्र मधुत्वेनोपवर्ण्यमानस्यादित्यस्य विद्याविषयत्वात् स कमन्यमादित्यमुपासीत । एवं संवर्गविद्यादिषु वाय्वादीनां विषयत्वात्तेषामप्यनधिकारो बोध्य इत्याद्युक्तम् । ततः सप्तमे 'अग्निः पुच्छस्य प्रथमं काण्ड'मित्यादिश्रुतिष्वग्न्यादीनां देवानां ज्योतिर्गणे विद्यमानत्वकथनात्तेषां च तत्र महाभोगकथनात्प्राप्तफलत्वेनोपासनायामधिकारो न संगत इत्येवं जैमिनिमतेनाशङ्कितम् । ततोऽष्टमे तत्परिहारमाह, वेदे हि प्रजापत्यादीनां कर्माधिकारो निरूप्यते, 'प्रजापतिरकामयत प्रजायेयेति', 'स एतमग्निहोत्रमिथुनमपश्यत्, तदुदिते सूर्येऽजुहोदि'त्यादिषु । तथा ज्ञानेपि श्रूयते, 'तद्यो यो देवानां प्रत्यबुध्यत स एव तत्तदभव'दित्यादिषु । अत्र च भूतार्थवादः, तेन स्वार्थे प्रमाणं न स्यात् तदा तादृशाग्निहोत्रहोमेन तादृशज्ञानेनान्यस्यापि फलं न स्यात् । अतः कर्मणि ज्ञाने चाधिकारोयमवश्यमभ्युपेयः । ये पुनरुपास्यत्वेन तत्रोक्तास्ते भगवदंशा एव । 'न ह वै देवा अश्नन्ति न पिबन्ती'त्यनशनतादिरूपाल्लिंगात् । इदं च पूर्वमेव साधितम्, तथापि जैमिनिमतनिराकरणाय पुनरुक्तम् । एवमष्टभिः सूत्रैर्देवानामधिकारो वेदनित्यत्वं च प्रसङ्गान्निर्णीतम् ॥ ८ ॥

---

१. आदित्यानामिति पाठः । २. विषयतया देवानामधिकार इति पाठः ।

ततो नवमे पञ्चसूत्रे शुगस्येत्यधिकरणे शूद्राणां ब्रह्मविद्यायामधिकारोनुप्रसङ्गान्निराकृतः। तत्र प्रथमसूत्रे छांदोग्यस्था संवर्गविद्या विषयत्वेनोपन्यस्ता । तत्र च जानश्रुतिं 'हा शूद्रे'त्येवं संबोध्य पश्चात् संवर्गविद्योपदिष्टा । तस्माज्जातिशूद्रस्याप्यधिकार इत्याशङ्कायाम्, नात्र शूद्रशब्दो जातिवाची, किंतु शुचा आद्रवतीति शूद्र इति यौगिकः । अतो योगेन जानश्रुतेर्मत्सरित्वं बोधयति । तेन पूर्वं धिक्कारः पश्चाच्चोपसरणेन मत्सरत्यागे विद्योपदेश इति नात्र जातिशूद्रस्याप्यधिकार इत्युक्तम्। ततो द्वितीयसूत्रे जानश्रुतिजातेः श्रुतावनुक्तत्वात् योगापेक्षया च रूढेः प्रबलत्वादत्र शूद्रशब्दो रूढ एव सन् जानश्रुतिजातिं बोधयतीति जातिशूद्रस्याप्यधिकारोस्त्वित्याशङ्कायां जानश्रुतेः क्षत्रियत्व-मुत्तरत्र प्रकरणान्तरे काक्षसेनिपदादवगम्यते । कक्षा स्पर्धास्थानं सेना रथा यस्येति कक्षसेनस्तस्या-पत्यं काक्षसेनिरिति क्षत्रियलिङ्गात् । यद्यपि तत् प्रकरणान्तरम्, तथापि छन्दोगानां द्विरात्रे 'एतेन वै चैत्ररथं कापेया अयाजय'न्निति श्रवणात् 'समानान्वयानां समानान्वया एव याजका भवन्ती'ति कापेयसंबंधेन काक्षसेनेः क्षत्रियत्वमवगतम् । अतो लिङ्गबलादस्य क्षत्रियत्वावगतेः जानश्रुतेः जाति-र्निर्धार्यते । तस्माज्जातिशूद्रस्य नाधिकारः । यत्र परम्परितब्रह्मविद्यायामपि नाधिकारस्तत्र साक्षाद्ब्रह्म-विद्यायां तु शङ्कितुमपि न शक्यते इत्युक्तम्। ततस्तृतीये श्रौतेषु साधनेषु सर्वत्रोपनयनसंस्कारपरा-मर्शाच्छूद्रे च तदभावान्नाधिकार इत्युक्तम् । ततश्चतुर्थे 'सत्यकामो ह जाबाल' इत्यत्र जाबाले शूद्र-त्वाभावनिर्धारण एव गौतमेन तस्मिन् शिष्यभावः प्रवर्तितः । तस्मादपि जातिशूद्रस्य नाधिकार इत्युक्तम् । ततः पञ्चमे शूद्रस्य वेदे श्रवणाध्ययनार्थज्ञानानां निषेधश्रावणात् स्मृतिष्वपि वेदाक्षर-विचारेण शूद्रस्य पातकथनाच्च नाधिकार इत्युक्तम् । एवमिदं प्रासङ्गिकमधिकरणद्वयम् ॥ ९ ॥

ततो दशमे एकसूत्रे कम्पनाधिकरणे कठवल्लीस्थं 'यदिदं किञ्च जगत् सर्व'मितिवाक्यं विषयत्वेनोदाहृत्य, किमत्रेंद्रः प्राणो ब्रह्म वा निरूप्यते इति संदेहे, प्राणेंद्रौ निवार्य, सर्वजगत्कंपना-हेतोर्ब्रह्मैवात्रोच्यते इति निर्धारितम् । तेनावतारदशायामपि भगवतो दण्डपाणित्वबोधनाय तत्र जीवानां सन्नतये च भगवत इदं कार्यं प्रसङ्गेनावसरेण वा विचारितम् ॥ १० ॥

तत एकादशे एकसूत्रे ज्योतिर्दर्शनाधिकरणे दहरविद्यास्थं 'परं ज्योतिरुपसंपद्ये'तिवाक्यं विषयत्वेनोपन्यस्य, ज्योतिःशब्देन महाभूतरूपं ज्योतिरुच्यते, उत ब्रह्म वेति संदेहे, महाभूतरूपं ज्योतिर्निवार्य, संपत्तिरूपादर्शनाद्ब्रह्मैवात्र निरूप्यते इति प्रसङ्गाद्विचारितम् । तत्प्रयोजनं तूपसंपत्त-व्यत्वोपसंपन्नस्वरूपाभिनिष्पादकत्वपूर्ववाक्यगतहृदयत्वोत्तरवाक्यगतसत्यपदोक्तमर्त्यामृतनियामकत्व-रूपाणां चतुर्णां धर्माणां निष्कर्षार्थत्वान्न ज्योतिश्चरणाधिकरणेन गतार्थता ॥ ११ ॥

ततो द्वादशे एकसूत्रेऽर्थान्तरव्यपदेशाधिकरणे छांदोग्यसमाप्तिस्थ'माकाशो वै नाम नामरूपयोर्निर्वहिते'तिवाक्यं विषयत्वेनोपन्यस्य, तत्र भूताकाशो ब्रह्म वेति संदेहे, भूताकाशस्य यत्प्र-योजनं वायुजननं तस्माद्भिन्नस्य प्रयोजनस्य नामरूपनिर्वाहकत्वरूपस्य कथनाद्, ब्रह्मादिश्रुतीनां च कथनाद्, ब्रह्मैवाकाश इत्युक्तम् । तेनान्यवाचकपदवाच्यस्य यत्रैव तद्धर्मातिरिक्तधर्म-कथनं तत्रान्यवाचकपदस्य ब्रह्मपरत्वमिति न्यायबोधकमिदमधिकरणमिति प्रसङ्गादुक्तम् । अतो न तद्धर्माद्यधिकरणादिना गतार्थता ॥ १२ ॥

ततस्त्रयोदशे द्विसूत्रे सुषुप्त्युत्क्रान्त्योरित्यधिकरणे बृहदारण्यकस्थं ज्योतिर्ब्राह्मणं शारीरब्राह्मणं चेत्युभयं विषयत्वेनोपन्यस्य, तयोः किं जीववाक्यत्वमुत ब्रह्मवाक्यत्वमिति संदेहे, उपक्रमस्यासञ्जातविरोधत्वेन प्राबल्यात्, तत्र च 'कतम आत्मे'तिप्रश्ने 'योयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुष' इति शारीरलिङ्गात्, 'योयं विज्ञानमयः प्राणे'ष्विति काण्वपाठे उपसंहारे च तादृशवाक्याद्, यद्यपि संसारी प्रतीयते, तथापि मध्ये 'ध्यायतीवे'त्यादिसंसारिधर्मनिराकरणादुपसंहारे च 'स वा एष महानज आत्मे'तिसंसारधर्मरहितपरमेश्वरात्मबोधनादन्यैश्च हेतुभिः परमात्माभिन्नो संसारी मुक्तो जीवः प्रतिपाद्यते इति पूर्वपक्षे, यदि मुक्तो जीवो ब्रह्माभेदेनात्र प्रतिपाद्यः स्यात्तदावस्थाभेदस्याप्रयोजकत्वात्सुषुप्तावुत्क्रांतौ च जीवं परमेश्वरान्न भिन्द्यात्, प्रतिपिपादयिषितेऽभेदे अवस्थया भेदकथनस्य निष्प्रयोजनतया वैयर्थ्यप्रसङ्गात्, जाग्रत्स्वप्नयोरज्ञत्वादिवैशिष्ट्यस्य प्रत्यक्षसिद्धत्वेन सुषुप्तिमरणयोस्तमोभिभवादज्ञानादिवैशिष्ट्याज्ञानेपि सौषुप्तिकस्मरणेन मृतानां भूतादिभावदर्शनेन चानुमानसिद्धतया तत्कथनवैयर्थ्यानपायाच्च । अतो यत् ज्ञायमानावस्थासिद्धं भेदमनुवदति तदसंसार्यवस्थायामपि भेदबोधनायैवानुवदति । 'यथोदकं शुद्धं शुद्धे आसिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतमे'ति काठकेपि तथैव श्रावणात् । न च तद्वुपक्रमाद्यनुरोधादसंसारी परमेश्वरसमानधर्मा जीवो वाच्योस्त्विति शङ्क्यम् । उपक्रमादिष्वपि तथार्थाभावात् । तथाहि । उपक्रमे 'किंज्योतिरयं पुरुष' इति प्रकाशकप्रश्ने 'आदित्याद्यनंतरमात्मज्योति'रित्युत्तरे संसारिणः पुरुषस्य प्रकाशापेक्षित्वेनाप्रकाशकत्वात् 'प्रकाशक आत्मा क' इत्याशयेन पृच्छति 'कतम आत्मेति ?' । तत्र स्पष्टतया वक्तव्येप्युत्तरे याज्ञवल्क्यो 'न वदिष्ये' इति स्वाभिसंधेर्वरदानस्य चानुरोधात् क्लिष्टमेवोत्तरं दत्तवान् । अतस्तद्विचारे 'अत्रायं पुरुषः स्वयंज्योतिर्भवती'ति निगमनवाक्ये परमात्मैव स्वयंपदवाच्यः सिध्यतीत्युपक्रमगतः प्रश्नः सामान्योप्युत्तरे तत्पर एव पर्यवस्यति । तथापि क्लिष्टप्रयोगात् जनकेन सोर्थः सम्यङ् न ज्ञातः, किंत्वेतावत् ज्ञातं संसारिव्यतिरिक्त आत्मा प्रकाशक इति । ततस्तत्संदेहवारणाय पृच्छति 'विमोक्षाय ब्रूही'ति । तदापि पूर्वोक्तानुरोधात् 'स वा एष एतस्मिन् संप्रसादे रत्वा चरित्वे'त्यादि क्लिष्टमेवोत्तरं दत्तवान् । तदा सुषुप्तौ जीवस्यासङ्गत्वे उक्तेपि जनकस्य संदेहो न निवृत्त इति पुनर्मोक्षाय पृच्छति । तदा पुनरपि तथैव वदन् मत्स्यादिदृष्टांतेन स्वप्नसुषुप्ती अवस्थे उक्त्वा, सुषुप्तौ असङ्गादपि जीवात् परमात्मानं भेदेनाह, संपरिष्वक्तस्त्रीपुंदृष्टान्तेन । तदापि जनकस्य प्रकाशकसंदेहो न निवृत्त इति पुनर्मोक्षाय पृच्छति । तदा पुनरपि क्लिष्टवाक्येनैवोत्तरे, पुनरपि मोक्षाय पप्रच्छ । तदा याज्ञवल्क्यो राज्ञो मेधावित्वाद्भीतः संसारिणो जीवस्य मरणावस्थां वदन् परमेश्वराज्जीवस्य भेदमाह । तदापि क्लिष्टप्रयोगात्तस्य संदेहो न निवृत्त इति तदानीमकामयमानस्य सद्योमुक्तिमाह । तत्र 'ब्रह्मैव सन् ब्रह्माप्येती'तिश्रुतेः 'प्राज्ञ आत्मा ब्रह्मैवे'ति च श्रुतेर्जीवस्य ब्रह्मभाव एव मुक्तिः । प्राज्ञ आत्मा ब्रह्म योस्ति स एव प्रकाशकस्तज्ज्योतिषैवायं जीवः सर्वं करोतीति ज्ञात्वा जनकः 'सोहं भगवते सहस्रं ददामी'त्युक्तवान् । तदा याज्ञवल्क्यः श्लोकैः सर्वं शास्त्रार्थमुक्त्वा 'स एष आत्मे'त्यादिना तमेवार्थं स्पष्टमुक्तवान् । तदा जनको विदेहान् स्वात्मानं च तस्मै दत्तवान् । याज्ञवल्क्योपि तथा विद्यां समापितवान् । अत उपक्रमोपसंहारयोः परमात्मन एव प्रकृतत्वसिद्ध्या तस्यैव प्रकरणित्वम्, न तु ब्रह्मभावापन्नस्य जीवस्येति सिध्यति, समाप्तौ पत्यादिशब्देभ्यश्च । तस्मादिदं ब्रह्मवाक्यमेवेति ।

अत्र पादे उपास्यरूपाण्याधाररूपाणि च विचार्य ब्रह्मातिरिक्तानामनुकारित्वं च विचार्य समासौ यत् जीवब्रह्मणोर्भेदः साधितः, तेन मुक्तिदशायामपि जीवस्यानुकारित्वमेव, तदात्मकत्वात्, न त्वत्यन्ताभेदः, सर्वथा तौल्यं वेति प्रसङ्गादुपोद्घाताद्वेति विचारितम् ॥ १३ ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदांताधिकरणमालायां प्रथमाध्यायस्य तृतीयः पादः ॥

अतीतेषु पादेषु **प्रथमे** कार्यरूपवाक्यानि, **द्वितीये** अन्तर्यामिवाक्यानि, **तृतीये** उपास्यरूपवाक्यानि विचार्य, सर्वेषां वेदांतानां ब्रह्मणि समन्वयः प्रतिपादितः। तद्दार्ढ्यार्थं प्रकीर्णकानि वाक्यानि विचार्यंते। तेषां च जीवजडसमुदायात्मकार्यनिरूपकतया कापिलमतश्रौतताभ्रमजनकत्वं प्रकीर्णत्वमिति तद्भ्रमनिरासायोपोद्घाततया तेषां विचारः।

तत्र प्रथमस्य सप्तसूत्रस्यानुमानिकाधिकरणस्य प्रथमसूत्रे 'इंद्रियेभ्यः परा ह्यर्था' इति काठकवाक्यं विषयत्वेनोपन्यस्य। तत्र ज्ञानकर्ममयाणि दशेंद्रियाणि भूतमात्राभेदभिन्ना दशार्था मनोबुद्ध्यहङ्कारमहत्तत्वाव्यक्तपुरुषाः साङ्ख्यमतसिद्धाः पदार्थास्तत्रोच्यंते इति कापिलमतमपि श्रौतमिति 'आनुमानिकमप्येकेषामिति चेदि'तिसूत्रांशेनाशङ्क्य, अंशांतरेण समाधानमाह। नात्र तन्मतसिद्धाः पदार्था उच्यंते, किंतु पूर्व'मात्मानं रथिनं विद्धी'त्यादिना शरीररूपकं यदुक्तं तत्रत्या ये रथादिभावेन पदार्था निविष्टास्ते एवात्रास्मिन् वाक्ये गृह्यंते। एतद्धि जीवप्रकरणम्। अत्र च तस्य मुक्त्युपायो निरूप्यते। 'योग्यं शरीरमारुह्य हरेः पदं गच्छे'दिति। तत्र योग्यं शरीरं रथः, आत्मा रथी, इंद्रियाणि हयाः, बुद्धिः सारथिः, मनः प्रग्रहः, भगवदीया विषयाः, तेषां हयानामात्मरूपाः सम्यक्त्वेन भावितत्वात्। बुद्धेरात्मा ब्रह्मविषयं विज्ञानं तन्महत्तत्त्वेनोच्यते। अव्यक्तं तु भगवत्कृपैव, पुरुषस्तु भगवानेवेति ब्रह्मवाद एवात्र सिध्यति, न साङ्ख्यमतम्। यतोग्रे 'एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभि'रितिमन्त्रेणात्मदर्शनपरिकरतयैव त उच्यंते। तस्माद्ब्रह्मवाद एवात्रेत्युक्तम्। ततो **द्वितीये सूत्रे** अव्यक्तशब्देन भगवत्कृपा वक्तुं न शक्यते, अत्र धर्मिप्रवाहमध्ये धर्मरूपायास्तस्या वक्तुमशक्यत्वादित्याशङ्क्य, अत्राव्यक्तशब्देन सूक्ष्ममुच्यते, तच्च ब्रह्मैव, धर्मधर्मिणोश्चाविनाभावेन स्थितत्वादभेद इति तदभिन्ना कृपैवात्रोच्यते इत्यदोष इत्युक्तम्, योग्यताबलात्। तथा च न प्रायपाठविरोध इत्युक्तम्। ततस्तृतीये ननु यद्युक्तयुक्त्या कृपाया ब्रह्मत्वम्, तदाऽभिन्नत्वे ब्रह्मभिन्नत्वमसङ्गतम्। अथ कयाचिद्युक्त्या तस्या धर्मत्वम्, तदा धर्मिप्रायपाठविरोध इत्युभयथापि दोषात्पूर्वसूत्रोक्तमसङ्गतमित्याशङ्क्य, कृपाया ब्रह्माभिन्नत्वेपि ब्रह्माधीनत्वाद्ब्रह्मभिन्नत्वम्, ब्रह्मभिन्नत्वात् ब्रह्मनियम्यत्वम्। अतो यथैकरूप्येण ग्रहणमभेदे युक्तिः, तथा नियम्यनियामकभावोपि भेदे युक्तिरित्युभयथाप्युपपन्नम्। न चाभेदेनैकत्वे नियम्यनियामकभावानुपपत्तिरिति शङ्क्यम्। 'ब्रह्मविदाप्नोति पर'मित्यत्रैकस्यैव ब्रह्मणः सच्चिद्रूपेण विषयत्वम्, आनंदरूपेण फलत्वमितिवदुपपत्तेः। तथा च कृपाविष्टः साधनम्, आनंदरूपः फलम्। अथवा, अव्यक्तं सच्चिद्रूपमक्षरम्, आनंदरूपः पुरुष इति तयोर्भेदेपि परापरभावो युक्तः। अदृश्यत्वाद्यधिकरणे तथा साधितत्वात्। तस्मा'दिन्द्रियेभ्यः परा' इतिवाक्ये आनुमानिकं न किंचिदस्तीत्युक्तम्। एवं त्रिभिः सूत्रैर्वाक्यानां पूर्वापरसंबंधेन मतांतरं निराकृत्य ब्रह्मवादः प्रतिपादितः। इदानीं तु केव-

लैतद्वाक्यविचारेण मतांतरं निराकरोति । ततश्चतुर्थेऽस्मिन् वाक्येऽव्यक्तं ज्ञेयत्वेनोच्यते । कापिलमते तु 'गुणपुरुषान्तरज्ञानात्कैवल्य'मितिप्रवचनसूत्रात् प्रकृतिपुरुषयोरन्तरं मोक्षार्थं ज्ञेयम्, न त्वव्यक्तरूपा प्रकृतिः । अतो ज्ञेयत्वावचनादपि नात्र तन्मतसिद्धिरित्युक्तम् । ततः पञ्चमे ननु ज्ञेयत्वावचनमसिद्धम्, एतदुत्तरवाक्ये 'अशब्दमस्पर्शमरूपमव्यय'मित्यत्राव्ययस्य 'महतः परमव्यक्त'मित्यत्र महतः परस्याव्यक्तस्य ज्ञानान्मुक्तिश्रावणादितिसूत्रांशेनाशङ्क्य, अंशांतरेण समाधानमाह । अत्र संदर्भे श्रुतिलिङ्गवाक्यानां संदिग्धत्वान्न निर्णायकत्वम्, अतो 'महतः पर'मितिवाक्यस्या'शब्दमस्पर्श'मितिवाक्यस्य चेति द्वयोरेकवाक्यत्वम्, नान्येषामित्यत्र नियामकाभावेन प्रकरणस्यैव निर्णायकत्वं वक्तव्यम् । तच्च 'ऋतं पिबन्ता'वित्यारभ्य 'नाचिकेतमुपाख्यान'मित्यंतमेकं प्रकरणम् । तत्र चात्मानावेव परामृश्य जीवात्मनो रथित्वं तदुपकरणं फलं चोक्त्वा, अग्रे 'एष सर्वेषु भूतेष्वि'त्यारभ्यासमाप्ति परमात्मैव ज्ञेयत्वेन परामृश्यते इति मृत्युमुखात्प्रमोक्षरूपं फलं चोच्यते । अतः प्राज्ञः परमेश्वर एवात्रार्थः, नाव्यक्तं प्रधानम् । अतो ज्ञेयत्वावचनं नासिद्धमित्युक्तम् । तेन प्रकरणस्य नियामकत्वादशब्दवाक्यमपि भगवत्परमेवेत्युक्तम् । ततः षष्ठे ननु नेदमेकं प्रकरणम्, किंत्वि'न्द्रियेभ्यः परा' इत्यारभ्य 'नाचिकेतमुपाख्यान'मित्येकं भिन्नं प्रकरणम् । तत्र प्रथमं पदार्थान्निर्दिश्य, ततोग्रे पुरुषज्ञानं चोच्यते इति साङ्ख्यमतस्यापि निरूपणात्तस्याश्रौतत्वमसंगतमित्याशङ्क्य, तत्र परिहारमाह । अत्र हि त्रयः प्रश्नाः, अग्निजीवब्रह्मविषयकाः । तेषामुत्तराणि च त्रीणि । तत्र 'स त्वमग्नि'मितिप्रश्ने 'प्रतिब्रवीमी'त्याद्युत्तरम्, ततो 'येयं प्रेते' इतिजीवप्रश्ने 'देवैरत्रापी'त्याद्युत्तरम् । ततो'न्यत्र धर्मादि'तिब्रह्मप्रश्ने 'सर्वे वेदा' इत्याद्युत्तरम् । अतस्त्रय एव प्रश्नाः त्रीण्येवोत्तराणि च यदि साङ्ख्यमत'मिंद्रियेभ्य'इत्यादि स्यात्तदा चतुर्थे प्रश्नोत्तरे स्याताम् । ते तु न स्त इति नात्र तन्मतसिद्धिरित्युक्तम् । ततः सप्तमे ननु मतान्तरेन्यत्र प्रसिद्धाः शब्दा ब्रह्मवादे ब्रह्मपरतया कथं योजयितुं शक्या इत्याशङ्क्य, महद्दृष्टांत उक्तः । यथा महच्छब्दो 'महांतं विभुमात्मान'मित्यादौ ब्रह्मपरः, तथाव्यक्तशब्दोप्यक्षरपरः । तस्मादिंद्रियादिवाक्येन न साङ्ख्यमतसिद्धिः, किंतु ब्रह्मवाद एवात्र सिध्यतीत्युक्तम् ॥ १ ॥

ततो द्वितीये त्रिसूत्रे चमसवदित्यधिकरणे 'अजामेका'मित्यादीनि श्वेताश्वतरवाक्यानि विषयत्वेनोपन्यस्य, एतेषु मन्त्रेष्वजादिशब्दैः प्रकृतिः परामृश्यते, मुक्तामुक्तभेदेन जीवद्वैविध्यमजायाः प्रकृतेरेकत्वमग्रे कपिलस्य नाम च पठ्यते । यद्यपि किंकारणेत्युपक्रमाद्ब्रह्मविद्यात्वेनोपनिषत् प्रतीयते, तथापि पूर्वकाण्डे यथा प्रणवादिमन्त्राणां नानास्थले विनियोगान्न प्रकरणानुरोधः, तथैतेष्वपि मन्त्रेषु कपिलमतप्रत्यभिज्ञानान्नोपक्रमाद्यनुरोध इति साङ्ख्यमतमपि वैदिकमितिशङ्कायाम्, पूर्वसूत्रेण समाधिमाह । यथा 'अर्वाग्बिलश्चमस' इतिबृहदारण्यकमन्त्रे कर्मविशेषः । तत्रार्वाग्बिलं चमसं यशोरूपं सोमं सप्त होतारो भक्षयेयुरिति कल्पयितुं न शक्यते, तथा प्रकृतमन्त्रे लोहितशुक्लादिशब्दैः रजःसत्त्वादि कल्पयित्वा तद्बलेन सर्वमेव मतं कल्पयितुं न शक्यते, विशेषाभावात् । कपिलवाक्येपि कपिलशब्देन ब्रह्मैवोच्यते, न त्वनित्यर्षिः, नित्यानित्यसंयोगप्रसंगादित्युक्तम् । ततो द्वितीये सूत्रे ननूक्तस्य चमसमन्त्रस्य व्याख्यानं 'शिरश्चमस' इत्यादिना श्रुतौ क्रियते, तथात्र मन्त्रव्याख्यानाभावात्तद्दृष्टांतोत्र न युक्त इत्याशङ्कां तुशब्देन परिहरन्नजाशब्दार्थकथनमुखेन समाधत्ते । अत्राजाशब्देन ज्योतिरुच्यते, प्रथमकार्यरूपत्वाच्चतुर्मुखाजत्वन्यायेन । यथाजात्पदोग्ध्री, तथैवेयं नश्वरफलदात्रीतिबोधनाय चाजाशब्देनोच्यते । सत्यकामब्राह्मणेग्निसोमसूर्यविद्युद्रूपचरणरूपतया हंसेनोक्तश्चतुष्कलो यो ब्रह्मणः पादस्तद्रूपत्वात् ज्योतीरूपा त्रिवृत्कृतत्वात्त्रिवर्णा ज्योतिरेवाजाशब्देनोच्यते । अत्रोपक्रमे ब्रह्मणः प्रकृत-

त्वात् 'तदेवाग्निस्तद्वायुस्तदादित्यस्तदु चन्द्रमा' इतिकथनाच्च। सा च चेतनाधिष्ठिता, मध्ये 'द्वासुपर्णे'ति मन्त्रकथनात्, अजद्वयं च जीवब्रह्मरूपं ताभ्यामधिष्ठिता । सा च प्रथमसृष्टिरवादिजननेन बहुप्रजास्रष्ट्री चेति । एतच्छंदोगशाखायामधीयते । अतस्तदनुसारेणायमेवार्थः, न तु मतांतररूप इत्युक्तम् । ततस्तृतीये ननु शब्दस्य वृत्तिद्वयं योगो रूढिर्वा । तत्र न जायते इति योगः प्रथमसृष्टौ न सङ्गच्छते, जननात् । रूढिस्तु छाग्याम्, साप्यत्र न सङ्गच्छते, तदाकाराभावात् । अतः कथमजाशब्देन प्रथमसृष्टिप्राप्तिः । साङ्ख्यमते तु प्रधानस्य जननानङ्गीकाराद्योगो निर्बाधः । तस्मात्साङ्ख्यमतमेवादर्तव्यमित्याशङ्कायां समाधिमाह । अत्र हि किंचित्कार्यार्थं परोक्षवादेनाजाशब्दस्तस्यां कल्पनयोपदिश्यते । यथाजावर्करसहिता सवत्सा स्वामिहिता, तथेयं जीवविशिष्टा कार्यवती भगवल्लीलोपयोगा-येति भगवतः परोक्षप्रियत्वाच्चेति । तथा च यथा मध्वादिविद्यायां 'असावादित्यो देवमध्वि'-त्यादौ (कल्पना; तथैवात्र) । अतो गौण्या तथोपदिश्यते । तस्मान्नाजामन्त्रेण साङ्ख्यमतसिद्धि-रित्युक्तम् ॥ २ ॥

ततस्तृतीये त्रिसूत्रे **न सङ्ख्योपसङ्ग्रहाधिकरणे** 'यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठित' इतिवाक्यं विषयत्वेनोपन्यस्य, तत्र 'पञ्च पञ्चजना' इतिशब्दे पञ्च च ते पञ्च च पञ्चपञ्च, तादृशाश्च ते जनाश्च पञ्चपञ्चजना इत्येवं समस्य, अनेन शब्देन पञ्चविंशतिसङ्ख्यासङ्ग्रहादत्र साङ्ख्यसिद्धानि पञ्चविंशतितत्त्वान्युच्यंते इति साङ्ख्यमतसिद्धिरित्याशङ्क्य निषेधति । अत्रानेन समासेन पञ्चानां समूहानां पञ्चतया तदुक्ता सङ्ख्या सिध्यति, न त्वन्यथा । तेषां तु न समूहाः पञ्च । 'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुष' इति-भिन्नप्रकारेण सङ्ख्याव्युत्पादनात् । मन्त्रे आकाशस्यात्मनश्च ततोतिरेकेणोक्तत्वाच्च । तस्मान्न तन्मतसिद्धिरिति **प्रथमसूत्र** उक्तम् । ततो **द्वितीयसूत्रे** तर्हि को वा मन्त्रार्थः, किं च, तत्र प्रमाणमित्याकाङ्क्षायां बुद्धेः संशयाद्याः पञ्च वृत्तीर्जनयंतीति पञ्चजनास्तादृशा ये प्राणादयः पञ्च तेऽत्र पञ्च पञ्चजनशब्देनोच्यंते । अत्र 'प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदु'-रितिवाक्यशेषः प्रमाणम्, 'संदिग्धेषु वाक्यशेषा'दितिन्यायात् । तस्मान्न तन्मतसिद्धिरित्युक्तम् । ततस्तृतीयसूत्रे ननु वाक्यशेषे कण्वशाखायां 'अन्नस्यान्न'मिति पाठाभावात् पञ्चवृत्तिजनकानां प्राणादीनां पञ्चसङ्ख्याकत्वं नास्तीति न वाक्यशेषस्य निर्णायकत्वमितिशङ्कायाम्, 'तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृत'मिति पञ्चमस्य ज्योतिषः पाठात्तेन सङ्ख्यापूर्तिरिति वाक्यशेषस्य निर्णायकत्वमक्षुण्णम् । तस्माद्ब्रह्मवाद एवात्र, न साङ्ख्यमतसिद्धिरित्युक्तम् । एवमेतैस्त्रिभिरधिकरणैः श्रुतीनां ब्रह्मणि समन्वयार्थमुपोद्घातेन साङ्ख्यमतस्य श्रौतत्वं निराकृतम् ॥ ३ ॥

अतः परमग्रिमैः श्रुतिविप्रतिषेधं निराकरोति । तत्र चतुर्थे एकसूत्रे **यथाव्यपदिष्टाधिकरणे** ननु श्रुतौ सृष्टिप्रकारा बहुधा दृश्यंते, क्वचिदाकाशादिका, क्वचित्तेजआदिका, क्वचिच्च युगपत् सर्वसृष्टिः । तत्रैकस्य पदार्थस्य नानाप्रकारतया वक्तुमशक्यत्वात्सृष्टिवाक्यानामर्थवादत्वेन ब्रह्मस्वरूपमात्रज्ञापकत्वं वक्तव्यम्, न तु सृष्टौ तत्प्रकारे वा तात्पर्यम् । अतोध्यारोपापवादेन ब्रह्मणस्तटस्थत्वसिद्ध्या न पूर्वोक्तरूपं कारणत्वं सिध्यतीति श्रुतिं विहाय कपिलस्मृत्युक्तप्रकारेणैव जगद्व्यवस्थाङ्गीकार्येत्याशङ्कायाम्, आकाशादिवाक्येषु यद्यपि क्रमादिविप्रतिपत्तिः, तथापि ब्रह्मणः कारणत्वविप्रतिपत्तिर्नास्ति । एकत्र यादृशं ब्रह्मोच्यते तादृशमेव सर्वेषु सृष्टिवाक्येषु कारणत्वेनाभिप्रेयते । क्रमप्रकारादिभेदस्तु माहात्म्यस्यैव सूचकः । तस्मात् श्रुत्यैव निर्णय इति कारणत्वांशे स्मृतिर्न आद्येत्युक्तम् ॥ ४ ॥

ततः पञ्चमे एकसूत्रे समाकर्षाधिकरणे ननु श्रुतौ क्वचित्सतः कारणत्वमुच्यते, क्वचिदसतः, क्वचिदुभौ निषिध्य तमसः, क्वचिदव्याकृतस्येत्येवं विप्रतिषेधाद् ब्रह्मणोपि कारणत्वं न सिध्यति । तस्मात्स्मृतिरेव कारणबोधिका ग्राह्येत्याशंकायाम्, असदादिशब्देषु न निरात्मकत्वाद्यर्था उच्यंते, किंतु ततः समाकृष्य सर्वैः शब्दैर्ब्रह्मैवोच्यते । सर्वेषां शब्दानां प्रणवविकृतित्वेन प्रणवार्थे एव पर्यवसानात् । प्रणवस्य च ब्रह्मवाचकत्वात् । तस्मान्न विप्रतिषेध इत्युक्तम् । एवं द्वाभ्यां श्रुतौ शब्दविप्रतिषेध उपोद्घातेन परिहृतः ॥ ५ ॥

ततः षष्ठे त्रिसूत्रे जगद्वाचित्वाधिकरणे कौषीतकिब्राह्मणषष्ठाध्यायस्थं बालाक्यजातशत्रुसंवादं विषयत्वेनोपन्यस्य तत्र किं ब्रह्मसहितो जीवः कर्तृत्वेनोच्यते, उत ब्रह्मैव वेतिसंदेहे, ब्रह्मसहितस्य जीवस्यैव कर्तृत्वमाशङ्क्य, 'यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वै तत्कर्म स वै वेदितव्य' इत्यजातशत्रुणा सिद्धांतकथनोपक्रमे एतच्छब्देनादित्यमण्डलादिजडोल्लेखात्पुरुषशब्देन च जीवोल्लेखात् जीवजडात्मकं जगद्यत्कर्तृकं तस्य वेदितव्यत्वकथनेन श्रुत्यंतरसिद्धब्रह्मण एव कर्तृत्वम्, न प्रकृत्यभिमानिजीवस्येति प्रथमसूत्रे उक्तम् । ततो द्वितीयसूत्रे जीवमुख्यप्राणलिङ्गदर्शनान्न ब्रह्मणः कर्तृत्वमितिसूत्रांशेनाशङ्क्य, अंशांतरेण पूर्वमनुगमाधिकरणे उक्तं समाधानं स्मारयामास । जीवस्य ब्रह्माश्रितत्वान्मुख्यप्राणस्य च ब्रह्मयोगादत्र तथात्वेन कथनं न स्वेन रूपेण । तस्माद्ब्रह्मैव कर्त्रित्युक्तम् । ततस्तृतीये सूत्रे प्रकृत्यभिमानिजीवस्य कर्तृत्वमप्यस्मिन् वाक्येऽनभिमतम्, जीवब्रह्मयोर्ब्रह्मप्रतिपत्त्यर्थत्वात् । प्रश्नव्याख्यानाभ्यां तथावसायात् । वाजसनेयिनामेतत्समानप्रकरणेपि तथावसायाच्चेत्युक्तम् । एवमत्र जीवब्रह्मवादनिराकरणेन जीवविशिष्टा प्रकृतिरेव कारणमित्येतदुपोद्घातेन निराकृतम् ॥ ६ ॥

ततः सप्तमे चतुःसूत्रे वाक्यान्वयाधिकरणे जीवब्रह्मवादनिराकरणेन प्रकृतिकारणवादो निराक्रियते । तत्र बृहदारण्यकस्थं मैत्रेयीब्राह्मणद्वयं विषयत्वेनोपन्यस्य, तत्र जीवस्य प्रकरणित्वं ब्रह्मणो वेति संशये, वेदरूपमहावाक्यस्य ब्रह्मण्येवान्वयदर्शनात्, सुखरूपभगवदन्वयेनैव जीवस्यापि प्रियत्वात्, सर्वोपनिषदनुरोधेनास्यापि वाक्यस्य ब्रह्मण्येवान्वयादत्रापि ब्रह्मैवोच्यत इत्युक्तम् । ततो द्वितीयसूत्रेऽस्मिन् वाक्ये ब्रह्मैवोच्यते इत्यत्रान्येषां ब्रह्मवादैकदेशिनां संमतिं वक्तुं प्रथममाश्मरथ्यमतेनाह । तन्मते हि ब्रह्मणा स्वस्य भोगनिष्पत्त्यर्थं विस्फुलिङ्गवत्प्रकटीकृतः स्वांशो जीवः, तेन जीवेनोपक्रमः, तस्यैव प्रियत्वेन संसूचनात्, उपक्रमस्य च बलिष्ठत्वात् जीवात्मैव प्रकरणीति स एव ज्ञेयत्वेनोपदिश्यते इतिशंकायाम्, नात्र जीवात्मनो ज्ञेयत्वेनोपदेशः, किंतु परमात्मन एव । जीवेनोपक्रमस्तु 'आत्मनि वा विज्ञाते सर्वमिदं विज्ञातं भवती'तिप्रतिज्ञायाः सिद्धिः तस्या लिङ्गम्, यदि हि जीवः परमात्मनः सकाशाद्भिन्नः स्यात्, तदा परमात्मज्ञाने तदज्ञानादात्मज्ञानेन सर्वज्ञानप्रतिज्ञा न सिध्येत् । अतस्तदर्थमुपक्रमे जीवः परामृश्यते, न तु प्रकृतिसंसृष्टस्य जीवस्य कारणत्वार्थमित्याश्मरथ्यमतमुक्तम् । ततस्तृतीये सूत्रे, यदत्रोपक्रमे गौणप्रियवैराग्यार्थं जीवकथनं, तत्त्वनादिसिद्धस्यापि जीवस्य संसारभावादुत्क्रमिष्यतो मुक्तौ जीवो भगवानेव भविष्यतीति बोधनार्थं लिङ्गम्, न तु प्रकृतिसंसृष्टजीवस्य कारणत्वार्थम् । तस्मान्नात्र प्रकृतिसंसृष्टजीवकारणवाद इत्यौडुलोमिमतमुक्तम् । ततश्चतुर्थे सूत्रे कयाचिदवस्थयावस्थितं ब्रह्मैव जीवः । अतः संसारदशायामपि जीवो ब्रह्मैवेति ज्ञापनार्थं तदुपक्रमो, नतु प्रकृतिसंसृष्टस्य जीवस्य कारणत्वार्थमितिकाशकृत्स्नमतमुक्तम् । तस्माद्ब्रह्मैवात्र कारणत्वेनोच्यते ॥ ७ ॥

त्वात् 'तदेवाग्निस्तद्वायुस्तदादित्यस्तदु चन्द्रमा' इतिकथनाच्च । सा च चेतनाधिष्ठिता, मध्ये 'द्वासुपर्णे'ति मन्त्रकथनात्, अजद्वयं च जीवब्रह्मरूपं ताभ्यामधिष्ठिता । सा च प्रथमसृष्टिरवादिजननेन बहुप्रजास्रष्ट्री चेति । एतच्छंदोगशाखायामधीयते । अतस्तदनुसारेणायमेवार्थः, न तु मतांतररूप इत्युक्तम् । ततस्तृतीये ननु शब्दस्य वृत्तिद्वयं योगो रूढिर्वा । तत्र न जायते इति योगः प्रथमसृष्टौ न सङ्गच्छते, जननात् । रूढिस्तु छाग्याम्, साप्यत्र न सङ्गच्छते, तदाकाराभावात् । अतः कथमजाशब्देन प्रथमसृष्टिप्राप्तिः । साङ्ख्यमते तु प्रधानस्य जननानङ्गीकाराद्योगो निर्बाधः । तस्मात्साङ्ख्यमतमेवादर्तव्यमित्याशङ्कायां समाधिमाह । अत्र हि किंचित्कार्यार्थं परोक्षवादेनाजाशब्दस्तस्यां कल्पनयोपदिश्यते । यथाजावर्करसहिता सवत्सा स्वामिहिता, तथेयं जीवविशिष्टा कार्यवती भगवल्लीलोपयोगायेति भगवतः परोक्षप्रियत्वाच्चेति । तथा च यथा मध्वादिविद्यायां 'असावादित्यो देवमध्वि'त्यादौ (कल्पना, तथैवात्र) । अतो गौण्या तथोपदिश्यते । तस्मान्नाजामन्त्रेण साङ्ख्यमतसिद्धिरित्युक्तम् ॥ २ ॥

ततस्तृतीये त्रिसूत्रे **न सङ्ख्योपसङ्ग्रहाधिकरणे** 'यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठित' इतिवाक्यं विषयत्वेनोपन्यस्य, तत्र 'पञ्च पञ्चजना' इतिशब्दे पञ्च च ते पञ्च च पञ्चपञ्च, तादृशाश्च ते जनाश्च पञ्चपञ्चजना इत्येवं समस्य, अनेन शब्देन पञ्चविंशतिसङ्ख्यासङ्ग्रहादत्र साङ्ख्यसिद्धानि पञ्चविंशतितत्त्वान्युच्यंते इति साङ्ख्यमतसिद्धिरित्याशङ्क्य निषेधति । अत्रानेन समासेन पञ्चानां समूहानां पञ्चतया तदुक्ता सङ्ख्या सिध्यति, न त्वन्यथा । तेषां तु न समूहाः पञ्च । 'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुष' इतिभिन्नप्रकारेण सङ्ख्याव्युत्पादनात् । मन्त्रे आकाशस्यात्मनश्च ततोतिरेकेणोक्तत्वाच्च । तस्मान्न तन्मतसिद्धिरिति **प्रथमसूत्र** उक्तम् । ततो **द्वितीयसूत्रे** तर्हि को वा मन्त्रार्थः, किं च, तत्र प्रमाणमित्याकाङ्क्षायां बुद्धेः संशयाद्याः पञ्च वृत्तीर्जनयंतीति पञ्चजनास्तादृशा ये प्राणादयः पञ्च तेत्र पञ्च पञ्चजनशब्देनोच्यंते । अत्र 'प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदु'रितिवाक्यशेषः प्रमाणम्, 'संदिग्धेषु वाक्यशेषा'दितिन्यायात् । तस्मान्न तन्मतसिद्धिरित्युक्तम् । **ततस्तृतीयसूत्रे** ननु वाक्यशेषे कण्वशाखायां 'अन्नस्यान्न'मिति पाठाभावात् पञ्चवृत्तिजनकानां प्राणादीनां पञ्चसङ्ख्याकत्वं नास्तीति न वाक्यशेषस्य निर्णायकत्वमितिशङ्कायाम्, 'तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृत'मिति पञ्चमस्य ज्योतिषः पाठात्तेन सङ्ख्यापूर्तिरिति वाक्यशेषस्य निर्णायकत्वमक्षुण्णम् । तस्माद्ब्रह्मवाद एवात्र, न साङ्ख्यमतसिद्धिरित्युक्तम् । एवमेतै**स्त्रिभिरधिकरणैः** श्रुतीनां ब्रह्मणि समन्वयार्थमुपोद्घातेन साङ्ख्यमतस्य श्रौतत्वं निराकृतम् ॥ ३ ॥

अतः परमग्रिमैः श्रुतिविप्रतिषेधं निराकरोति । तत्र **चतुर्थे एकसूत्रे यथाव्यपदिष्टाधिकरणे** ननु श्रुतौ सृष्टिप्रकारा बहुधा दृश्यंते, क्वचिदाकाशादिका, क्वचित्तेजआदिका, क्वचिच्च युगपत् सर्वसृष्टिः । तत्रैकस्य पदार्थस्य नानाप्रकारतया वक्तुमशक्यत्वात्सृष्टिवाक्यानामर्थवादत्वेन ब्रह्मस्वरूपमात्रज्ञापकत्वं वक्तव्यम्, न तु सृष्टौ तत्प्रकारे वा तात्पर्यम् । अतोध्यारोपापवादेन ब्रह्मणस्तटस्थत्वसिद्ध्या न पूर्वोक्तरूपं कारणत्वं सिध्यतीति श्रुतिं विहाय कपिलस्मृत्युक्तप्रकारेणैव जगद्व्यवस्थाङ्गीकार्येत्याशङ्कायाम्, आकाशादिवाक्येषु यद्यपि क्रमादिविप्रतिपत्तिः, तथापि ब्रह्मणः कारणत्वविप्रतिपत्तिर्नास्ति । एकत्र यादृशं ब्रह्मोच्यते तादृशमेव सर्वेषु सृष्टिवाक्येषु कारणत्वेनाभिप्रेयते । क्रमप्रकारादिभेदस्तु माहात्म्यस्यैव सूचकः । तस्मात् श्रुत्यैव निर्णय इति कारणत्वांशे स्मृतिर्न ग्राह्येत्युक्तम् ॥४॥

ततः पञ्चमे एकसूत्रे समाकर्षाधिकरणे ननु श्रुतौ क्वचित्सतः कारणत्वमुच्यते, क्वचिदसतः, क्वचिदुभौ निषिध्य तमसः, क्वचिद्व्याकृतस्येत्येवं विप्रतिषेधाद् ब्रह्मणोपि कारणत्वं न सिध्यति । तस्मात्स्मृतिरेव कारणबोधिका ग्राह्येत्याशंकायाम्, असदादिशब्देषु न निरात्मकत्वाद्यर्था उच्यंते, किंतु ततः समाकर्ष्य सर्वैः शब्दैर्ब्रह्मैवोच्यते । सर्वेषां शब्दानां प्रणवविकृतित्वेन प्रणवार्थे एव पर्यवसानात् । प्रणवस्य च ब्रह्मवाचकत्वात् । तस्मान्न विप्रतिषेध इत्युक्तम् । एवं द्वाभ्यां श्रुतौ शब्दविप्रतिषेध उपोद्घातेन परिहृतः ॥ ५ ॥

ततः षष्ठे त्रिसूत्रे जगद्वाचित्वाधिकरणे कौषीतकिब्राह्मणषष्ठाध्यायस्थं बालाक्यजातशत्रुसंवादं विषयत्वेनोपन्यस्य तत्र किं ब्रह्मसहितो जीवः कर्तृत्वेनोच्यते, उत ब्रह्मैव वेतिसंदेहे, ब्रह्मसहितस्य जीवस्यैव कर्तृत्वमाशङ्क्य, 'यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वै तत्कर्म स वै वेदितव्य' इत्यजातशत्रुणा सिद्धांतकथनोपक्रमे एतच्छब्देनादित्यमण्डलादिजडोल्लेखात्पुरुषशब्देन च जीवोल्लेखात् जीवजडात्मकं जगद्यत्कर्तृकं तस्य वेदितव्यत्वकथनेन श्रुत्यंतरसिद्धब्रह्मण एव कर्तृत्वम्, न प्रकृत्यभिमानिजीवस्येति प्रथमसूत्रे उक्तम् । ततो द्वितीयसूत्रे जीवमुख्यप्राणलिङ्गदर्शनान्न ब्रह्मणः कर्तृत्वमितिसूत्रांशेनाशङ्क्य, अंशांतरेण पूर्वमनुगमाधिकरणे उक्तं समाधानं स्मारयामास । जीवस्य ब्रह्माश्रितत्वान्मुख्यप्राणस्य च ब्रह्मयोगादत्र तथात्वेन कथनं न स्वेन रूपेण । तस्माद्ब्रह्मैव कर्त्रित्युक्तम् । ततस्तृतीये सूत्रे प्रकृत्यभिमानिजीवस्य कर्तृत्वमप्यस्मिन् वाक्येऽनभिमतम्, जीवलयोद्गमयोर्ब्रह्मप्रतिपत्त्यर्थत्वात् । प्रश्नव्याख्यानाभ्यां तथावसायात् । वाजसनेयिनामेतत्समानप्रकरणेपि तथावसायाच्चेत्युक्तम् । एवमत्र जीवब्रह्मवादनिराकरणेन जीवविशिष्टा प्रकृतिरेव कारणमित्येतदुपोद्घातेन निराकृतम् ॥ ६ ॥

ततः सप्तमे चतुःसूत्रे वाक्यान्वयाधिकरणे जीवब्रह्मवादनिराकरणेन प्रकृतिकारणवादो निराक्रियते । तत्र बृहदारण्यकस्थं मैत्रेयीब्राह्मणद्वयं विषयत्वेनोपन्यस्य, तत्र जीवस्य प्रकरणित्वं ब्रह्मणो वेति संशये, वेदरूपमहावाक्यस्य ब्रह्मण्येवान्वयदर्शनात्, सुखरूपभगवदन्वयेनैव जीवस्यापि प्रियत्वात्, सर्वोपनिषदनुरोधेनास्यापि वाक्यस्य ब्रह्मण्येवान्वयादत्रापि ब्रह्मैवोच्यत इत्युक्तम् । ततो द्वितीयसूत्रेऽस्मिन् वाक्ये ब्रह्मैवोच्यते इत्यत्रान्येषां ब्रह्मवादैकदेशिनां संमतिं वक्तुं प्रथममाश्मरथ्यमतेनाह । तन्मते हि ब्रह्मणा स्वस्य भोगनिष्पत्त्यर्थं विस्फुलिङ्गवत्प्रकटीकृतः स्वांशो जीवः, तेन जीवेनोपक्रमः, तस्यैव प्रियत्वेन संसूचनात्, उपक्रमस्य च बलिष्ठत्वात् जीवात्मैव प्रकरणीति स एव ज्ञेयत्वेनोपदिश्यते इतिशंकायाम्, नात्र जीवात्मनो ज्ञेयत्वेनोपदेशः, किंतु परमात्मन एव । जीवेनोपक्रमस्तु 'आत्मनि वा विज्ञाते सर्वमिदं विज्ञातं भवती'तिप्रतिज्ञायाः सिद्धिः तस्या लिङ्गम्, यदि हि जीवः परमात्मनः सकाशाद्भिन्नः स्यात्, तदा परमात्मज्ञाने तदज्ञानादात्मज्ञानेन सर्वज्ञानप्रतिज्ञा न सिध्येत् । अतस्तदर्थमुपक्रमे जीवः परामृश्यते, न तु प्रकृतिसंसृष्टस्य जीवस्य कारणत्वार्थमित्याश्मरथ्यमतमुक्तम् । ततस्तृतीये सूत्रे, यदत्रोपक्रमे गौणप्रियवैराग्यार्थं जीवकथनं, तत्त्वनादिसिद्धस्यापि जीवस्य संसारभावादुत्क्रमिष्यतो मुक्तौ जीवो भगवानेव भविष्यतीति बोधनार्थं लिङ्गम्, न तु प्रकृतिसंसृष्टजीवस्य कारणत्वार्थम् । तस्मान्नात्र प्रकृतिसंसृष्टजीवकारणवाद इत्यौडुलोमिमतमुक्तम् । ततश्चतुर्थे सूत्रे कयाचिदवस्थयावस्थितं ब्रह्मैव जीवः । अतः संसारदशायामपि जीवो ब्रह्मैवेति ज्ञापनार्थं तदुपक्रमो, नतु प्रकृतिसंसृष्टस्य जीवस्य कारणत्वार्थमितिकाशकृत्स्नमतमुक्तम् । तस्माद्ब्रह्मैवात्र कारणत्वेनोच्यते ॥ ७ ॥

ततोऽष्टमे पञ्चसूत्रे प्रकृतिश्चेत्यधिकरणे प्रकृतिः समवायिकारणम्, ब्रह्म तु निमित्तादिकारणमित्येवमाशंक्य, प्रकृतिशब्दवाच्यं ब्रह्मैवेति साधितम् । छांदोग्ये एकविज्ञानेन सर्वविज्ञानं यत् प्रतिज्ञातं, मृत्पिण्डादिदृष्टांतत्रयं च यदुक्तं, तदनुपरोधादितिहेतुश्च प्रथमसूत्रे उक्तः । तथा च यदि मूलकारणे ब्रह्मणि समवायिकारणत्वरूपं प्रकृतित्वं न स्वीक्रियेत, तदा प्रतिज्ञादिसामञ्जस्यं न स्यात्, अतस्तथेत्युक्तम् । ततो द्वितीयसूत्रे सृष्टौ भगवत्कृतमभिध्यानं 'बहु स्यां प्रजायेये'ति स्वस्य बहुरूपत्वेन उच्चनीचभावेन च यद्विचारणं तद्धेतुत्वेनोक्तम् । तेन स्वयमेव तत्तद्रूप इति सिध्यति । किंच, 'सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीत' इत्येवमुपासनाप्युपदिश्यते । अतोपि प्रकृतिशब्दवाच्यं ब्रह्मैव । ततस्तृतीये 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यंते । आकाशं प्रत्यस्तं यंती'तिश्रुत्या ब्रह्मणः प्रपञ्चोत्पत्तिलयाधारत्वं साक्षादेवोच्यते । तच्च समवायित्वस्यैव लिङ्गम् । अतोपि प्रकृतिशब्दवाच्यं ब्रह्मैव । ततश्चतुर्थे 'तदात्मानं स्वयमकुरुते'तिश्रुतिः ब्रह्मणः परिणाममाह । परिणामश्चोपादानसमसत्ताककार्यापत्तिरूपः । अतोपि ब्रह्मैव प्रकृतिशब्दवाच्यम् । ततः पञ्चमे ननु जडस्य समवायिकारणं ब्रह्मास्तु, यत्तु चेतनाधिष्ठितं शरीरं तस्य शुक्रशोणितजन्यत्वदर्शनात् तत्र ब्रह्मणो निमित्तत्वम्, प्रधानस्य तु समवायित्वमित्यस्त्वित्याशङ्कायाम्, 'सदेव सोम्येद'–मित्यादिषु सृष्टिबोधकश्रुतिष्ववधारणदर्शनात् ब्रह्मैवोभयरूपम्, अन्यथावधारणविरोधापत्तेः । किंच, 'कर्तारमीशं पुरुषं ब्रह्मयोनि'मित्यादिषु योनित्वमपि ब्रह्मण एवोच्यते, पुरुषत्वं च । तस्मादक्षरपुरुषमावनोभयरूपो भगवानेव, योनिर्वीजं च । अतः कथंचिदपि न प्रकृतिप्रवेशः । एवं त्रिभिरधिकरणैरुपोद्घातेनार्थविप्रतिषेधः परिहृतः । अतः साङ्ख्यमतमशब्दमेव ॥ ८ ॥

ततो नवमेधिकरणे एकसूत्रे अन्येपि स्मार्ता वादाः येषु ब्रह्मणः सर्वविधं कारणत्वं नोच्यते, ते सर्वे अश्रौता एवेत्यतिदिष्टम् । तदेवाग्रिमाध्याये विस्तरेण वक्ष्यते ॥ ९ ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां प्रथमाध्यायस्य चतुर्थः पादः ।

प्रथमाध्यायः समाप्तः ।

द्वितीयोध्यायः ।

प्रथमाध्याये सर्वासां श्रुतीनां ब्रह्मणि समन्वयः प्रतिपादितः । स तदा स्थिरो भवति यदा श्रुतीनां परस्परविरोधः परिह्रियते, अन्ये विरुद्धाः स्मार्ता वादाश्च निराक्रियंते । अतस्तदर्थं द्वितीयेऽध्याये श्रुत्यविरोधं प्रतिपादयति, विरुद्धवादांश्च निराकरोति ।

तत्र प्रथमे पादे युक्त्या श्रुतिविरोधपरिहारः । ततो द्वितीयपादे स्मृतीनां वेदबोधकत्वाभावेपि ताभिः स्वातन्त्र्येण कश्चित् पुरुषार्थः सेत्स्यतीत्याशङ्कानिवृत्त्यर्थं बाह्याबाह्यमतान्येकीकृत्य तेषां निराकरणम् । एकीकरणं च भ्रान्तेस्तुल्यत्वबोधनार्थम् । तृतीयपादे प्रथमं भूतानामुत्पत्तिस्वरूपमुत्पत्तिक्रमश्च विचार्यते, ततो जीवात्मस्वरूपं तद्धर्माश्च । चतुर्थे च इन्द्रियोत्पत्तिक्रमतत्स्वरूपादिकं च विचार्यते ।

तत्र प्रथमाध्याये 'अपि स्मर्यते, स्मृतेश्चे'तिकथनेन स्मृतिप्रामाण्याङ्गीकारात् तयैव श्रुत्यर्थनिर्णयः कार्यः, अन्यथा तद्वैयर्थ्यप्रसंग इत्याशङ्कानिवृत्त्यर्थं प्रथमं सूत्रत्रयेण साङ्ख्ययोगस्मृत्यो-

र्नित्यानुमेयश्रुतिमूलकत्वाभावाय प्रामाण्यमुपोद्घातेन निराकृतम्। ततः **प्रथमे सूत्रे** साङ्ख्यस्मृतेर्मोक्षैकोपयोगित्वात् तत्प्रामाण्यमङ्गीकृत्य तदनुरोधेनैव श्रुतिविप्रतिषेधः परिहार्यः, अन्यथा तद्वैयर्थ्यप्रसङ्गादितिसूत्रांशेनाशङ्क्य, तत्प्रामाण्याङ्गीकारे 'अहं सर्वस्य जगतः प्रभवः प्रलयस्तथे'त्यादिगीतास्मृतिविरोधः। तदप्रामाण्याङ्गीकारे च ब्रह्मकारणत्वबोधकश्रुतिविरोधः। अतो गीतास्मृतिप्रामाण्यमावश्यकम्। तेन श्रुतिविप्रतिषेधनिराकरणे कपिलस्मृतेर्न प्रामाण्यमित्युक्तम्। ततो **द्वितीये सूत्रे** प्रकृतिव्यतिरिक्तानां महदादीनां लोके वेदे चानुपलम्भात् तदुक्तयुक्तीनामप्रयोजकत्वमित्युक्तम्। ततस्तृतीये **सूत्रे** पूर्वोक्तश्रुतिस्मृतिविरोधाद् योगस्मृतिरपि साङ्ख्यवत् प्रधानकारणत्वांशेऽप्रमाणमित्युक्तम्। एतेषु पूर्वपादोक्तस्यैवार्थस्य परामर्शात् तदुपोद्घातगर्भः प्रसंगः संगतिः। एवमग्रेऽपि बोध्यम्। त्रीण्येतानि प्रत्येकमधिकरणानीति भाष्यप्रकाशादवगंतव्यम् ॥ १,२,३ ॥

ततश्चतुर्थे त्रिसूत्रे **न विलक्षणत्वाधिकरणे प्रथमसूत्रद्वयेन** पूर्वः पक्षः। एकेनाग्रे सिद्धांतः। तत्र **प्रथमसूत्रे** चेतनं ब्रह्म जगदुपादानं न भवति, जगतो जडत्वेन ब्रह्मणस्तद्विलक्षणत्वात्। विलक्षणत्वस्य 'विज्ञानं चाविज्ञानं चे'तिश्रौतशब्दादेव प्रतीतेरित्युक्तम्। ततो **द्वितीये सूत्रे** ननु 'मृदब्रवी'दितिश्रुतौ मृदादेर्वक्तृत्वादिकथनेन मृदादिष्वपि चेतनत्वस्य श्रुत्यभिप्रेतत्वात् जगतोपि चेतनतया ब्रह्मसालक्षण्याद् ब्रह्मकार्यत्वमिति सिद्धांतिनाशङ्किते, अत्र मृदाद्यभिमानिनी देवतैव वक्तृत्वादिरूपेण व्यपदिश्यते, 'अन्यथा विज्ञानं चाविज्ञानं चे'तिचेतनाचेतनविभागरूपो विशेषो नोच्येत। 'अग्निर्वाग् भूत्वा मुखं प्राविश'दितिश्रुतौ देवताप्रवेशो वागादिषु नोच्येत। तस्माच्चेतनाचेतनात्मकं जगत् न ब्रह्मोपादेयमिति सूत्रद्वयेन पूर्वपक्ष उक्तः। ततस्तृतीये समाधिमाह। कार्यकारणयोर्वैलक्षण्यं लोके गोमयवृश्चिकादौ देहकेशादौ च दृश्यते। अतो विलक्षणत्वेन हेतुना जगति ब्रह्मोपादेयत्वबाधनं न शक्यवचनम्। सदंशस्य कार्यकारणयोस्तुल्यत्वेन सालक्षण्याच्च। तस्मान्न जगतो ब्रह्मकार्यत्वप्रतिषेधः ॥ ४ ॥

ततः **पञ्चमे पञ्चसूत्रे असदिति चेदित्यधिकरणे** असत्कारणत्वसत्कारणत्वबोधकश्रुत्योः परस्परविरोधः परिह्रियते। तत्र **प्रथमे सूत्रे** 'असद्वा इदमग्र आसी'दितिश्रुतावसतः कारणत्वमुच्यते। 'सदेव सोम्येद'मित्यग्रे च सतः कारणत्वमुच्यते, तयोः कथं विरोधपरिहार इत्याशङ्क्य, उक्तश्रुतौ 'असदि'ति यत् कथनं तत् छांदोग्ये 'कथमसतः सज्जायंते'ति कथनात् असतः कारणत्वनिषेधार्थम्। यत् पुनस्तैत्तिरीये तथावचनं तत् स्रक्ष्यमाणापेक्षया पूर्वसृष्टस्यासाधुत्वार्थम्, असाधुन्यप्यसदितिप्रयोगात्। कार्यस्थूलरूपसत्ताभावार्थं वा। अतो न श्रुत्योर्विरोध इत्युक्तम्। ततो **द्वितीये सूत्रे** ब्रह्मकारणवादे पूर्वपक्ष उच्यते। ब्रह्मकारणवादे यदा कार्यस्य ब्रह्मणि लयः, तदा कार्यधर्माः परिच्छिन्नत्वाशुद्धत्वादयो ब्रह्मणि भविष्यंतीत्यसंगतं ब्रह्मकारणत्वमित्येवं शंकाकरणात्। ततोग्रिमेषु तत्परिहार उक्तः। ततस्तृतीये ब्रह्मकारणवादो नासंगतः। कार्यस्य कारणे लये कार्यधर्मा न कारणे दृश्यंते, शरावरुचकादीनां मृदि लये शरावादिधर्मादर्शनादित्युक्तम्। ततश्चतुर्थे प्रतिबंदी उक्तः। तवापि सत्कार्यवादित्वात्सविशेषस्य कार्यस्य ये धर्माः परिच्छिन्नत्वव्यक्तत्वादयस्ते अव्यक्ते प्रधाने भविष्यंति। अतो न वयं पर्यनुयोक्तव्या इत्युक्तम्। ततः **पञ्चमे** सावद्यतर्कस्याप्रतिष्ठितत्वात्प्रतिवादिना तदनङ्गीकारेण दोषादविमोक इत्युक्तम् ॥ ५ ॥

ततः **षष्ठे एकसूत्रे एतेनेत्यधिकरणे** सांख्यनिराकरणेनान्येपि वादा निराकृता इत्युक्तम् ॥ ६ ॥ इदं कश्चिन्न मनुते, अष्टाधिकरण एव पाद इति मते।

ततः सप्तमे एकसूत्रे भोक्त्रापत्तेरित्यधिकरणे ननु प्रलये सर्वस्य कार्यस्य कारणरूपतया एकरूपत्वे जाते पुनरुत्पत्तिदशायां भोग्यस्य स्रक्चंदनादेः भोक्तृत्वापत्तिः, भोक्तुश्चेतनस्य भोग्यत्वापत्तिरित्येवमविभागः स्यादितिसूत्रांशेनाशंक्य, अंशांतरेण समाहितम् । यथा लोके कटकमुपमृद्य रुचके क्रियमाणे कटकत्वं न भवति, तथोत्पत्तिदशायां भोग्यस्य भोग्यत्वेनैवोत्पत्तिः, भोक्तुर्भोक्तृत्वेनैवेति न विभागाभावः । कारणस्य चेतनत्वेन तस्य तस्य तथैवोत्पादनादित्युक्तम् । तेन 'विज्ञानं चाविज्ञानं चे'ति श्रुतौ कार्ये विभागाभावरूपो दोषः परिहृतः ॥ ७ ॥

ततोष्टमे त्रिसूत्रे तदनन्यत्वाधिकरणे छांदोग्यस्थे वाचारंभणवाक्ये कार्यस्य कारणाभिन्नत्वं प्रतिपादितम्, न तु कार्यमिथ्यात्वमित्युक्तं प्रथमसूत्रे । ततो द्वितीयसूत्रे कार्यस्य घटादेर्विद्यमानत्व एवोपलम्भः । नत्वविद्यमानत्वे । अतः श्रुत्यविरुद्धं प्रत्यक्षमपि कार्यस्य कारणानन्यत्वे प्रमाणमित्युक्तम् । ततस्तृतीये प्रपञ्चस्य सदैव सत्त्वम्, 'सदेव सोम्येदमग्र आसी'दित्यादिश्रुतौ परिदृश्यमानबोधकादिदंपदात् । 'तदेतदक्षयं नित्यं जगन्मुनिवराखिलम् । आविर्भावतिरोभावजन्मनाशविकल्पव'दितिविष्णुपुराणवाक्याच्च । एवमनेनाधिकरणेन श्रुतिप्रत्यक्षाभ्यां कार्यस्य सदात्मकत्वेन ब्रह्मानन्यत्वं साधितम् ॥ ८ ॥

ततो नवमे चतुःसूत्रे असद्व्यपदेशाधिकरणे असत्कार्यवादो निराकृतः । ततः प्रथमसूत्रे 'असद्वा इदमग्र आसी'दितिश्रुतौ कार्यमसदितिव्यपदेशात् असत्कार्यवाद आस्थेय इतिसूत्रांशेनाशंक्य, सूत्रांशेन समाहितम् । एतद्वाक्यशेषे 'स आत्मानं स्वयमकुरुते'तिश्रावणात् कार्यस्य प्रागुत्पत्तेरात्मत्वेनैव रूपेण सत्त्वम्, नतु व्याकृतस्वरूपेण । तस्मादसत्त्वमुच्यते, न त्वसत्त्वेनेत्युक्तम् । ततो द्वितीयसूत्रे सत्कार्यवादस्थाभिर्युक्तिभिरात्मानमितिशब्दांतराच्च नासत्कार्यवाद आस्थेय इत्युक्तम् । युक्तयस्तु भाष्यप्रकाशादवगंतव्याः । ततस्तृतीये पटदृष्टांत उक्तः । यथा पटः संवेष्टितो न तावान् प्रतीयते, तथा कारणे कार्यं सूक्ष्मरूपत्वान्न प्रतीयते, प्रकटं तु प्रतीयत इत्युक्तम् । ततश्चतुर्थे प्राणादिदृष्टांत उक्तः । यथा प्राणादीनां नियमने जीवनमात्रम्, अनियमने त्वाकुञ्चनादिः संभवति, तथा जगदपि कारणे प्रविष्टं सन्मात्रं तिष्ठति, बहिःप्रकटं कार्यं करोति । अतोऽसत्कार्यवादो न प्रामाणिक इत्युक्तम् ॥ ९ ॥

ततो दशमे त्रिसूत्रे इतरव्यपदेशाधिकरणे चेतनकारणतायां प्राप्ता दोषाः परिह्रियंते । तत्र प्रथमे चेतनस्य जीवस्यापि ब्रह्मत्वात्सृष्टौ तस्य प्रवेशे दुःखित्वादिकं भवति । तच्च ब्रह्मणो हिताकरणत्वादिदोषप्रसक्त्या असंगतमित्याशंक्य, अग्रिमसूत्रद्वये परिहारमाह । तत्र द्वितीये ब्रह्म जीवादधिकम्, न तु जीवमात्रम्, तेन तद्दोषेपि न दुष्यति । यथा सुवर्णखण्डस्यान्यमेलनेन दुष्टत्वेपि न सुवर्णस्य दुष्टत्वम्, तद्धिताहितं च करोति, लोके स्वदेहेपि नखनिकृंतनकेशप्रसाधनादिदर्शनात् । जीवपरमात्मनोर्भेदस्तु विज्ञानानंदप्राधान्यभेदात् । आनंदस्याधिक्यं तु भूमविद्यायां तत्रैव ज्ञेयत्वस्य पर्यवसानात् । ततस्तृतीये यथा पार्थिवत्वाविशेषेपि हीरकपाषाणयोश्चंदननिंबयोश्च स्वभावभेदः, तथा जीवानामपि । तथा च ब्रह्मवादे लोकन्यायेन प्रत्यवस्थानं नोचितमिति साधितम् ॥ १० ॥

तत एकादशे षट्सूत्रे उपसंहारदर्शनाधिकरणे तत्रैकस्यैव ब्रह्मणः सर्वविधकारणत्वे दोषास्ते परिह्रियंते । तत्र प्रथमसूत्रे लोके मृत्कुलालचक्रचीवरादीनामुपादानकर्तृनिमित्तांग-

राणां परस्परभिन्नानां दर्शनादेकस्यैव सर्वविधकारणत्वमसंगतमिति सूत्रांशेनाशंक्य, क्षीरं यथा यदा दध्याकारेण परिणमति, तदा नान्यत्किञ्चिदपेक्षते, तथा ब्रह्मापीत्यंशांतरेण समाहितम्। ततो द्वितीयसूत्रे यथा देवर्षिपितर इतरनिरपेक्षा योगबलेन सर्वं कुर्वंति, तथा ब्रह्मापीच्छयेति समाधानांतरमुक्तम्। ततस्तृतीये ब्रह्मण उपादानत्वे कृत्स्नप्रसक्त्यादिदोष आशंकितः। ततश्चतुर्थे ब्रह्मणः स्वरूपं कारणत्वं च न लोकगम्यं येनैवमाशंक्येत, किंतु श्रुत्येकसमधिगम्यम्। सा च स्वत एव प्रमाणम्। सा च यथा वदति, तथैवांगीकार्यमित्येवं समाहितम्। ततः पञ्चमे ब्रह्मणः सर्वविधकारणत्वेपि देशकालाधिकरणापेक्षा त्वावश्यकीत्याशंक्य, 'परास्य शक्ति'रिति श्रुतेर्ब्रह्मणो विचित्रशक्तित्वाद्देशकालाद्यनपेक्षा युक्ता। 'आत्मन्येवात्मनात्मानं सृजेहमनुपालय' इत्यात्मन्यपि सृष्टिश्रुतेत्युक्तम्। ततः षष्ठे प्रधानकारणवादेपि ते दोषास्तुल्या ये ब्रह्मकारणवादे दीयंते। तस्मात्पर्यनुयोगो न युक्त इत्युक्तम्॥ ११॥

ततो द्वादशेष्टसूत्रे सर्वोपेता इत्यधिकरणे भगवतः कर्तृत्वे दोषान् परिहरति। तत्र 'स विश्वकृ'दिति श्रुतौ कर्तृत्वं बोध्यते, निर्वाहकाभावे तत्कथं संगच्छत इत्याकांक्षायां प्रथमसूत्रे सर्वशक्तियुक्तत्वं साधितम्। ततो द्वितीये सूत्रे ब्रह्मणो निरिंद्रियकत्वात्कथं कर्तृत्वम्। ततस्तृतीयसूत्रे ब्रह्मणः प्रयोजनाभावात्किमर्थं कर्तृत्वमित्येवमाशंकितम्। ततश्चतुर्थे लोकवल्लीलया समाहितम्। ततः पञ्चमे ब्रह्मणः सृष्टिकरणे जीवानां सुखदुःखसंभवात् वैषम्यनैर्घृण्ये स्यातामित्याशंक्य, जीवकर्मसापेक्षत्वान्न ब्रह्मणि दोष इत्युक्तम्। कर्मसापेक्षत्वेपि नेश्वरत्वहानिरिति चोक्तम्। ततः षष्ठे जीवानां प्रपञ्चप्रलयदशायां ब्रह्माविभागात्कथं कर्मसत्तेति सूत्रांशेनाशंक्य, बीजाङ्कुरवत्प्रवाहानादित्वादिति सूत्रांशेन समाहितम्। ततः सप्तमे उपपत्त्या श्रुतिस्मृत्योस्तदुपलम्भाच्च जीवस्यानादित्वं समर्थितम्। ततोष्टमे ब्रह्मणः सर्वसमर्थत्वात्सर्वं संगच्छत इत्युक्तम्। एवं चास्मिन्पादे पूर्वाध्यायचतुर्थपादस्थितं हृदिकृत्य सर्वं चिंतितम्। तेन बुद्धिस्थानात्मकोपोद्घातात्तद्धर्मः प्रसंगः संगतिरिति॥ १२॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीताम्बरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां द्वितीयाध्यायस्य प्रथमः पादः॥

अथ द्वितीयपादे वेदविरुद्धा बाह्या अबाह्याश्च स्मृतयो दूष्यंते, तासां न परमफलसाधकत्वमिति ज्ञापनार्थम्।

तत्र प्रथमे षट्सूत्रे रचनानुपपत्तेरित्यधिकरणे प्रधानस्य कर्तृत्वं दूष्यते। तत्र प्रथमसूत्रे अचेतनस्य प्रधानस्य बुद्धिपूर्वकक्रियारूपा या रचना सा नोपपद्यते, प्रधानस्याचेतनत्वेन क्रियाकारणभूताया बुद्धेस्तत्र वक्तुमशक्यत्वादित्युक्तम्। ततो द्वितीये सूत्रे लोकरचना यथा केवलादचेतनान्नोपपद्यते, तथा शुक्रशोणितजन्या शरीररचनापि। तत्र मातापित्रोरुभयोश्चेतनयोः प्रवृत्तिदर्शनात्, अचेतने केवले तादृशप्रवृत्त्यदर्शनादित्युक्तम्। ततस्तृतीये ननु केवलाचेतनेपि दुग्धे फेनरचनादयो विचित्रा दृश्यंते, तादृशे नदीजले च स्यंदनादयः। तद्दृष्टांतेनाचेतनस्य केवलस्य प्रधानस्यापि रचनाकर्तृत्वं प्रवृत्तिश्चास्त्विति सूत्रांशेनाशंक्य, अंशांतरेण समाधत्ते। तत्रापि दोह-

१. चर्मसत्तेति मूले पाठः।

नाधिश्रवणयोश्चेतनकर्तृकयोर्निमित्तत्वेन दर्शनात्। नदीजले च मेघानां चेतनानां निमित्तत्वेन दर्शनादित्युक्तम्। ततश्चतुर्थे एवं त्रिभिः सूत्रैः केवलप्रधानस्य कर्तृत्वं दूषयित्वा केवलस्य तस्य परिणामं दूषयति। केवलं प्रधानं चेत् स्वतः परिणमेत्, सर्वदैव परिणमेत्, तथा सति प्रलयो न स्यात्। गुणाश्च साम्यावस्थयावस्थिताः स्वत एव संक्षुभ्येरन्, तदा सृष्टिस्थितिप्रलया युगपदेव स्युः, कार्यं च सात्त्विकादिभेदेन न विभज्येतेत्युक्तम्। ततः **पञ्चमे** ननु तृणपल्लवादयः पशुभक्षिताः स्वभावादेव क्षीरभावेन परिणमंते इत्याशंकायां समाधीयते। यदि तृणादिकं स्वभावत एव क्षीरभावेन परिणमेत, तदा शृङ्गेपि क्षीरं लभ्येत, तत्तु न लभ्यते, धेन्वादिकृता भक्षणक्रिया च तत्र सहकरोतीति न केवलस्य प्रधानस्य परिणामः शक्यवचन इत्युक्तम्। ततः **षष्ठे** 'तुष्यतु दुर्जन' इति न्यायेन केवलस्य प्रधानस्य परिणाममभ्युपगम्य पुनर्दूषयति। यदि केवलस्य प्रधानस्य परिणामोऽभ्युपगम्यते, तदापि स किमर्थः। न च पुरुषार्थ इति वक्तव्यम्। प्रयोजनप्रेक्षापूर्वकप्रवृत्तेश्चेतनधर्मत्वेन केवले प्रधाने सा न वक्तुं शक्यते। तस्माद् दूषणतादवस्थ्यम्। एवमनेनाधिकरणेन केवलप्रधानकारणवादो निराकृतः॥ १॥

ततो **द्वितीये चतुःसूत्रे पुरुषाश्मवदित्यधिकरणे** पुरुषप्रेरितप्रधानकारणवादो निराक्रियते। पंग्वारूढोन्धो यथा गच्छति, तथा पुरुषाश्लिष्टं तत्प्रेरितं प्रधानं महदादिसृष्टिं करोतीत्येकं मतम्। अन्यच, यथा अयःकान्तसन्निधौ लोहस्य क्रिया, तथा पुरुषसन्निधानमात्रेण प्रधानस्य महदादिकर्तृत्वमिति द्वितीयम्। तत्पुनः सूत्रांशेनाशंक्य, अंशांतरेण दूषयति। प्रधानपुरुषयोर्व्यापकत्वेन संसर्गस्य सन्निधेश्च सार्वदिकत्वात्पूर्वोक्तदोषस्तदवस्थः। अनिर्मोक्षश्चाधिकः। तस्मान्मतद्वयमप्यसंगतमिति पूर्वसूत्रे उक्तम्। ततो **द्वितीयसूत्रे** प्रधानपुरुषयोर्मध्ये किं पुरुषस्यांगित्वं प्रधानस्य वा। तत्र नाद्यः, सर्वेषां पुरुषाणां समत्वेनैकस्य नियामकत्वम्, नान्येषामिति विभागो न स्यात्। न द्वितीयः, स्वतन्त्रेण प्रधानेन पुरुषाय स्वदोषा न प्रदर्शनीयाः। तथा सति दुःखाभावेन वैराग्याभावात् मोक्षार्थं प्रयत्न उच्छिद्येत। तस्मादंगित्वमनुपपन्नमित्युक्तम्। **ततस्तृतीये** ननु गुणा एवं विभागशः प्रवृत्तिमंतः, चलस्वभावत्वात्, चलदलदलवदित्येवमनुमाने पूर्वोक्ताः सर्वे दोषाः निराकृताः स्युरित्याशङ्क्य, तत्र दूषणमाह। एवं प्रकारांतरेणानुमितावपि न दोषपरिहारः, कार्यक्रमानुपपत्त्यादिदूषणग्रासात्। नहि गुणैः कालो ज्ञायते, येन प्रथमं रजः क्षुभ्यति, ततः सत्त्वम्, ततस्तम इति। अतो गुणेषु ज्ञानशक्तिवियोगात् सर्वमसमञ्जसमित्युक्तम्। **ततश्चतुर्थे** सांख्यमतवर्तिनां नानाविधानि मतानि लोके दृश्यंते। एकादशस्कंधे उद्धवप्रश्ने भगवता चानूदितानि। अतः परस्परविरोधादपि तन्मतमसंगतमित्युक्तम्। एवं दशभिः सूत्रैरधिकरणद्वयेन प्रधानकारणवादो निराकृतः॥ २॥

ततस्तृतीये सप्तसूत्रे महद्दीर्घवद्वेत्यधिकरणे न्यायवैशेषिकादिमतमवसरसंगत्या दूष्यते। ते हि परमाणूनां समवायित्वमंगीकृत्य, ईश्वरकृतात्तत्संयोगाद्भूतादिसृष्टिमंगीकुर्वंति। तत्र संयोगप्रकारो दूष्यते। परमाणूनां स्वरूपं ह्रस्वं परिमण्डलं च। तयोर्यद्युपर्युपरि संयोगः, तदा कार्यं यष्टिवन्महत्स्यात्। यदि तिर्यक्, तदा नौकादिवद्दीर्घं स्यात्। पुञ्जसंयोगस्तु तैर्नेष्यते। अतस्तन्मतमसंगतमिति प्रथमसूत्रेणोक्तम्। ततो **द्वितीयसूत्रे** परमाणुद्वयसंयोगः सार्वदेशिको वैकदेशिको वा। नान्त्यः। प्रदेशांगीकारे प्रदेशवत्त्वस्य सावयवत्वव्याप्यत्वात्परमाणोः सावयवत्वमनित्यत्वं चापद्येत। नाद्यः। संयोगस्याव्याप्यवृत्तित्वनियमात्। किंच, कर्मजोऽवयवजश्च संयोगो द्विविधः।

तत्र निरवयवत्वान्नावयवज इत्युक्तम्। अथ कर्मजः। तत्र किं स्वभावादुत्पद्यते, ईश्वरसिसृक्षया वा। तयोरुभयोरपि नित्यत्वात्सर्वदा सृष्टिप्रसंगः। तस्मान्न स वक्तुं शक्यते इत्युक्तम्। ततस्तृतीये समवायो दूष्यते। स हि संबंधः, संबंधिद्वयनिरूप्यः। तथा सति द्व्यणुकस्य पूर्वमभावेन स कथं वक्तुं शक्यत इत्युक्तम्। ततश्चतुर्थे, किंच, परमाणोः समवायिन ईश्वरेच्छाजीवादृष्टयोर्निमित्तयोश्च सृष्टिप्राक्काले सत्त्वात् सामग्रीसमवधानजन्यस्य परमाणुकर्मणस्तज्जन्यस्य संयोगस्य च सर्वदा आपत्त्या तयोरपि नित्यत्वापत्तिरित्युक्तम्। ततः पञ्चमे परमाणुनित्यत्वं दूष्यते। परमाणुषु तैः रूपाद्यंगीक्रियते। यच्च रूपादिमत्, तदनित्यं लोके दृष्टम्। अतः परमाणुरनित्य इत्युक्तम्। ततः षष्ठे यदि परमाणुषु रूपादिकं नांगीक्रियते, तदा द्व्यणुकादिषु रूपाद्यभावापत्तिः। कारणगुणाः कार्यगुणारंभका इति तन्नियमात्। अतो रूपाद्यंगीकारे तदनंगीकारे च दोषादसंगतः परमाणुकारणवाद इत्युक्तम्। ततः सप्तमे सर्ववैदिकानादृतत्वादप्यसंगतः परमाणुकारणवाद इत्युक्तम्॥ २॥

ततश्चतुर्थे दशसूत्रे समुदाय उभयहेतुकेपीत्यधिकरणे। एकोनविंशतिसूत्रैर्बौद्धमतान्यवसरसंगत्या निराक्रियंते। तत्र सौगताश्चतुर्विधाः वैभाषिकसौत्रांतिकविज्ञानवादिमाध्यमिकभेदात्। तत्र पूर्वं वैभाषिकमतं निराक्रियते। तेषां मते समुदायद्वयं जीवभोगार्थं संहन्यते। तत्र पृथिव्यादिपरमाणुसमुदाय एकः। रूपादिस्कंधसमुदायश्चापरः। रूपविज्ञानवेदनासंज्ञासंस्कारनामकाः पञ्चस्कंधाः। तदुभयसंबंधे जीवस्य संसारः, तदपगमे मोक्ष इति तेषां मतं प्रथमसूत्रे दूषयति। जीवस्य क्षणिकत्वेन तदुभयसमुदायाप्राप्तिः, तेन तदुक्तः संसारप्रकारो मोक्षश्चासंगत इत्युक्तम्। ततो द्वितीये क्षणिकत्वदूषणपरिहारं सूत्रांशेनोद्भाव्य, अंशांतरेण दूषयति। तन्मते प्रत्ययः कारणसमुदायः। तत्र संस्कारः। सर्वक्षणिकत्वेपि मध्यपातिभ्योऽविद्यादिभ्यः स्कंधप्रत्ययेभ्यो जन्मादयः जन्मादिभ्यः प्रत्ययेभ्यश्चाविद्यादय इत्येवं चक्रवत्परिवृत्तावपि न कारणव्यक्तिं प्रति कार्यव्यक्तेः प्रत्ययता, किंतु पूर्वपूर्वप्रत्ययस्योत्तरोत्तरप्रत्ययं प्रति कारणत्वम्। उत्तरोत्तरक्षणिकविज्ञानसंततेरेव जीवत्वम्, तादृशार्थं संततेरेव जडत्वम्। अतः क्षणिकविज्ञानसंतत्यात्मकस्य जीवस्य क्षणिकार्थं संतत्यात्मकसविषयेन्द्रियशरीराख्यरूपस्कंधसंबंध इति संसारः। रागादिरूपसंस्कारस्कंधविरामादेव तदभावरूपो मोक्षः। अतो न काप्यनुपपत्तिरितिसूत्रांशेनाशंक्य, अंशांतरेण तद्दूषयति। ये हि प्रत्यया उक्तास्ते सदृशीं संततिमुत्पाद्य नश्यंति। तथा सति विज्ञानसंततिरूपस्य जीवस्य पूर्वकालीनप्रियाप्रियसंस्पर्शाननुसंधानात् कथं वेदनादिस्कन्धात्मसंसारसिद्धिः, कथं च तदभावसिद्धिः, स्थिरस्य कस्याप्यभावात्। तस्मादसंगतं तन्मतम्। ततस्तृतीये। किंच, तन्मते स्थितिक्षणस्याभावात्प्रथमक्षणे उत्पत्तिः, द्वितीयक्षणे नाश इति प्रत्ययत्वस्यैवासंभवः, संघातस्य चासंभव इत्युक्तम्। एवं त्रिभिः सूत्रैः पुञ्जस्य कारणता दूषिता। ततश्चतुर्थे। असत्ये हेतौ फलोत्पत्तिरित्याकस्मिकत्वपक्षं दूषयति। तेषां हि प्रतिज्ञाद्वयम्। एका तु सर्वं क्षणिकमिति प्रतिज्ञा। द्वितीया तु आलंबनप्रत्ययसमनंतरप्रत्ययाधिपतिप्रत्ययसहकारिप्रत्ययाख्यांश्चतुर्विधान् हेतून् प्राप्य विज्ञानस्कंधात्मकं चित्तं वेदनास्कंधात्मकाश्चैत्ता उत्पद्यंत इति। तत्र द्वितीयांगीकारे वस्तुनः क्षणांतरसंबंधात्प्रथमप्रतिज्ञा नश्यति। द्वितीया चेन्नांगीक्रियते, तदा प्रतिनियतहेत्वभावात्सर्वं सर्वतो युगपदेव स्यात्। तस्मात्तदसंगतमित्युक्तम्। ततः पञ्चमे एवं तदुक्तमुत्पत्तिप्रकारं दूषयित्वा नाशप्रकारं दूषयति च। तत्र तेषां मते पञ्चपदार्थाः। एनं नाशयामीति बुद्धिपूर्वको विनाशः प्रतिसंख्यानिरोधः। तां विना यो नाशः स अप्रतिसंख्यानिरोधः। आकाशश्च। एतत्त्रयं निरुपाख्यम्। अवस्त्विति

यावत् । तत्राकाशस्वरूपं तद्दूषणसूत्रे वाच्यम् । क्षणिकं संस्कृतं चेति पञ्च । तत्र क्षणिकं संस्कृतं चेति द्वयं पूर्वसूत्रेषु दूषितम् । अधुना निरोधद्वयं दूष्यते । तन्मते पदार्थाः सर्वे क्षणिकाः सदृशसंतानजननस्वभावाः । क्षणिकानां च नाशकसंबंधो न पूर्वदृष्ट इत्यन्त्यानामपि पदार्थानां नाशकसंबन्धाभावात्पूर्ववदेव संततिप्रतिबंधाभाव इत्यविच्छेदादित्युक्तम् । एवमत्र कार्यविचारेण निरोधद्वयं दूषितम् । ततः षष्ठे तद्द्वयस्वरूपविचारेण तद्दूषयति । तत्र वैभाषिकाः सौत्रांतिकाः योगाचाराश्च उक्तनिरोधैकदेशभूतेऽविद्याविनाशे मोक्षस्वदर्शनोक्तरीतिको भवतीति मन्यंते । तदसंगतम् । अविद्या(या)निर्हेतुके नाशेंगीक्रियमाणे तन्मतीयसाधनविधायकशास्त्रवैफल्यम् । सहेतुकनाशांगीकारे निर्हेतुकत्वप्रतिज्ञाहानिरित्युभयथापि दोष इत्युक्तम् । एवं सूत्रद्वयेन तदुक्तनाशप्रकारो दूषितः । ततः सप्तमे आकाशं दूषयति । तेषां मते आवरणाभाव एवाकाशः । सोपि निरूपाख्यः । तादृशेपि भूतांतरवद्वस्तुत्वव्यवहारस्याविशिष्टत्वात् । अत्र गृध्रः, अत्र श्येन इत्यादिव्यवहारस्य तत्रापि दर्शनात् । अवकाशरूपेण प्रत्यक्षत्वाच्चावस्तुत्वमसंगतमित्युक्तम् । ततोऽष्टमे पुनः संक्षेपेण क्षणिकवादं निराकरोति । सर्वत्र स एवायमिति प्रत्यभिज्ञा दृश्यते । क्षणिकत्वे तु तस्य नष्टत्वात्कालान्तरे प्रत्यभिज्ञा बाध्येत । तस्मादसंगतः क्षणिकवाद इत्युक्तम् । ततो नवमे तदभिमतामभावाद्भावोत्पत्तिं निराकरोति । ते हि बीजोपमर्दं विनांकुरोत्पत्तिं, दुग्धोपमर्दं विना दध्युत्पत्तिमपश्यंतो नष्टेभ्य एव बीजादिभ्यस्तत्तदुत्पत्तिं पश्यंतः केवलादभावादेव भावोत्पत्तिं मन्यंते । तथाचालीकादेवोत्पत्तिरिति सिध्यति । तदसंगतम् । दृष्टविरोधात् । यदि ह्यलीकादभावादेव केवलात्कार्यं स्यात्तदा बीजाद्दधि स्यात्, दुग्धादंकुरं च । तत्तु न दृश्यते । तस्मान्नाभावाद्भावोत्पत्तिरित्युक्तम् । ततो दशमे यद्यभावादेव सर्वं स्यात्, तदा तस्य सर्वत्र सुलभत्वात् कृषिहलादिसाधनरहितानामपि धान्यादिः सिध्येत् । तत्तु न दृश्यते । अतोपि नाभावाद् भावोत्पत्तिरित्युक्तम् । एवं दशभिः सूत्रैः वैभाषिकसौत्रांतिकयोर्मतं निराकृतम् ॥ ४ ॥

ततः पञ्चमे पञ्चसूत्रे **नाभाव उपलब्धेरित्यधिकरणे** कारणांशे पूर्वं निराकृतोपि विज्ञानवादी कार्यांशे निराक्रियते । विज्ञानवाद्येव योगाचारः । स हि बाह्यं प्रपञ्चं नीलं पीतं घट इत्येतत्सर्वं विज्ञानाकारं मन्यते, न तु बाह्यार्थोस्तीति । अनादिवासनयैव च भासत इति तन्मतम् । एवं यस्तेन बाह्यार्थाभाव उक्तः, स न युक्तः । यदि सर्वं ज्ञानाकारमेवानादिवासनया भासेत, तदा वासनाया अन्तः विद्यमानत्वात् सर्वं सर्वदा सर्वत्र भासेत । तत्तु नास्ति । अतः कदाचित्क्वचिदुपलंभात् बाह्यार्थोस्तीति मंतव्यमित्युक्तम् । ततो द्वितीये उपलब्धिमात्रेण वस्तुसत्त्वं चेत्तदा स्वप्नमायाभ्रमादिषु ये उपलब्धास्तेपि सत्याः स्युः । तस्मान्नोपलब्धिमात्रेण वस्तुसत्त्वं वक्तुं शक्यमित्याशङ्क्य निराकरोति । बाह्यः प्रपञ्चः स्वप्नादिविलक्षणः, बहुकालस्थायित्वात् । नहि तथा स्वप्नादिषु दृश्यते । तस्मात्तद्दृष्टान्तोप्यसङ्गत इत्युक्तम् । ततस्तृतीये यत्तैर्बाह्यार्थं विनैव वासनया ज्ञानवैचित्र्यमंगीक्रियते, तत्र बाह्यार्थं विना वासनैवानुपपन्ना, बाह्यार्थस्यैव वासनाजनकत्वात् । तस्य च तन्मतेऽभावादित्युक्तम् । ततश्चतुर्थे वासनाया आधारभूतस्य, अहमित्याकारो रूपादिविषय इंद्रियादिजन्योयं क्षणिकविज्ञानसंतानः कर्ता भोक्तेत्यभिमानवान् आलयविज्ञानाख्यः, तस्य क्षणिकत्वाद्वासनायाः आधारोपि न वक्तुं शक्यः । तस्मादपि तन्मतमसङ्गतमित्युक्तम् । ततः पञ्चमे सर्वथानुपपन्नत्वादपि तन्मतमसंगतम् । तेन माध्यमिकोप्यसंबद्धभाषित्वादुपेक्षित इत्यपि सूचितम् । एवं पञ्चदशभिः सौगता निराकृताः ॥ ५ ॥

ततः षष्ठे चतुःसूत्रे **नैकस्मिन्नसंभवादित्यधिकरणे** विवसनस्य स्याद्वादिनो निराकरणम् । स हि स्यादस्ति, स्यान्नास्ति, स्यादस्ति नास्ति, स्यादवक्तव्यः, स्यादस्ति चावक्तव्यः, स्यान्नास्ति चावक्तव्यः, स्यादस्ति नास्ति चावक्तव्य इत्येवं सप्तभंगीं मन्यते । सप्तभंगी नाम सप्तानां भंगानां समाहारः । सा च सार्वत्रिकी । तदिदं प्रत्यक्षविरुद्धम् । न ह्यस्तिनास्त्यादिभंग एककालं सर्वेषां दर्शनगोचरीभवतीति । तस्मादसंभवन्नसंगतः । किंचेयं सप्तभंगी सार्वत्रिकीति तदुक्तसाधनेषु तदुपदेष्टृषु तीर्थंकरेषु तदुक्ते मोक्षरूपे फले चानुवर्तमाना सर्वेष्वेव तदुक्तेष्वनाश्वासं जनयतीत्यतोऽप्यसंगतस्तद्वाद इत्युक्तम् । ततो **द्वितीयसूत्रे** तदुक्तमात्मस्वरूपं दूष्यते । स हि आत्मानं कृत्स्नं मन्यते । सृष्टिं च परमाणुभ्योंऽगीकरोति । मोक्षे च निरावरण आत्मा तिष्ठतीति । तदिदं दूष्यते । परमाणुभ्य एव सृष्ट्यंगीकारेणात्मनो वस्तुपरिच्छेदांगीकारादकारुर्ये सर्वत्वं न भवति । तथा च मोक्षदशायामवलोकाकाशवर्तित्वेन तत्कृतावरणसंभवान्निरावरणप्रतिज्ञाहानिः । किंच, सर्ववस्तुष्वात्माभावादात्मनामस्तिकायत्वप्रतिज्ञाहानिश्चेत्यर्थ इत्युक्तम् । ततस्तृतीये तदभ्युपगतो देहपरिमाणात्मवादो दूष्यते । स हि देहपरिमाण आत्मेति मन्यते । सूक्ष्मदेहे सूक्ष्मः । स एव स्थूलदेहे स्थूल इति । एवं पर्यायेण तत्तत्परिमाणांगीकारे अवयवोपचयापचयाभ्यामात्मनोपि विकारापत्तिः । संकोचविकाशेपि विकारस्य दुःपरिहारत्वादित्युक्तम् । ततश्चतुर्थे तदुक्तमात्मपरिमाणमेव दूष्यते । स हि मोक्षावस्थावस्थितजीवस्य परिमाणं नित्यं वदति । तदग्रे देहाभावात् । संसारावस्थायां त्वनित्यम् । तथा सति संसारावस्थायां चार्वाकवदात्मन अनित्यत्वापत्तिः । तथा सति मोक्षः कस्य स्यात् । अतः संसारावस्थायामपि तस्य नित्यं परिमाणमंगीकार्यम् । अणु वा महद्वा । तथा सति देहपरिमाणात्मवादस्त्वसंगत इत्येवं दूषितमित्युक्तम् ।

एतेषु षट्स्वप्यधिकरणेषु ब्रह्म जगदुपादानं न वेति संदेहः, तत्तन्मतविरोधः संदेहबीजम्, नेति पूर्वः पक्ष, सर्वसमयानामयुक्तत्वाद् ब्रह्मैवोपादानमिति सिद्धांतो ज्ञेयः । षष्ठे तु ब्रह्मैव विरुद्धधर्माधारम्, नेतरदिति नियमो युक्तो न वेति संदेहे, स्याद्वादिभिः सर्वत्र तथाभ्युपगमान्नेति पूर्वः पक्षः, स्याद्वादस्यासंगतत्वाद्ब्रह्मैव तथेति नियमो युक्त एव, श्रुत्या भक्तप्रत्यक्षेण च प्रमितत्वादिति सिद्धांत इति प्रकारांतरमधिकं ज्ञेयम् ॥ ६ ॥

ततः सप्तमे पंचसूत्रे **पत्युरसामंजस्यादित्यधिकरणे** नैयायिकवैशेषिकहैरण्यगर्भपातंजलकापालिककालामुखपाशुपतशैवा ईश्वरस्य निमित्तमात्रत्वं मन्यंते, न तूपादानत्वम्, तद्दूषयति । यदीश्वरः निमित्तमात्रं स्यात्तदा केषांचित्सुखं केषांचिद्दुःखं ददद्विषमो निर्घृणश्च स्यात् । अतो सामंजस्यात्तन्मतमसंगतम् । ततो **द्वितीये** तन्मते जीवब्रह्मणोर्विभुत्वादजसंयोगस्य वक्तुमयुक्तत्वेन पतित्वानुपपत्तिः । यजि च संबंधोंगीक्रियेत, तदापि विभुत्वनित्यत्वाभ्यां तुल्यत्वापत्त्या नियम्यनियामकभावानुपपत्तेः संबंधानुपपत्तिरित्युक्तम् । ततस्तृतीये ईश्वरः शरीरं किंचिदाधारं चाधिष्ठाय करोति, तद्विना वा । आद्ये तन्नित्यमनित्यं वा । आद्ये परमाणुपुंजरूपस्य तस्य कार्यानिर्वाहकत्वम्, अवयवित्वाभावात् । द्वितीये तु जन्यत्वम् । तथा सति तत्कर्तुर्निर्वक्तुमशक्यत्वादनवस्थापत्तिः । अथाशरीर एव करोतीति मतम्, तदा तु मुक्तानामिव तस्यापि कर्तृत्वानुपपत्तिः । अतोधिष्ठानानुपपत्त्या तन्मतमसंगतम् । ततश्चतुर्थे यथा जीवोऽशरीर एवेंद्रियादीनि करणान्यधितिष्ठति, नियमयति, तथेश्वरोप्यशरीर एव जीवान् नियमयिष्यतीति सूत्रांशेनाशंक्य, सूत्रांशेन समाहितम् । यदि जीवदृष्टांतेन तथांगीक्रियते, तदा तद्दृष्टांतेनैव तस्य सुखदुःखभोगाद्यापत्तिः । (ततः पंचमे तैर्जड-

जीवनियमनार्थं हीश्वरोऽभ्युपगम्यते। नियमनं चेयत्तायां संभवति। ततश्च तेषामियत्तापत्तिः। तथा सति तेषामंतवत्त्वम्। इयत्तापरिच्छिन्नेषु घटादिष्वंतवत्त्वस्य दृष्टत्वात्। एतद्दोषपरिहाराय जीवानां व्यापकत्वमसंख्येयत्वं चांगीक्रियते, तदा असंख्येयत्वस्य सर्वाज्ञेयत्वनियमात् सर्वतद्विषयकज्ञानस्येश्वरेऽभावेनासर्वज्ञता स्यात्।) तदनापत्तौ नियामकाभावादित्युक्तम्। तेनेश्वरविषयेपि तन्मतमसंगतमित्युक्तं भवति ॥ ७ ॥

ततोऽष्टमे **चतुःसूत्रे उत्पत्त्यसंभवादित्यधिकरणे** पाञ्चरात्रमते योंशो हि श्रुतिविरुद्धः सोंशो दूष्यते। पंचरात्रस्य भगवत्प्रणीतत्वेपि तावतोंशस्य बुद्धिपूर्वकमेव गौतमशप्तानामृषीणामर्थे स्थापनात्। सोंशस्त्वयम्। ते हि परब्रह्मणो वासुदेवात् संकर्षणस्य जीवस्य, तस्मात्प्रद्युम्नस्य मनसः, ततोऽनिरुद्धस्याहंकारस्योत्पत्तिं वदंति। तेषां चतुर्णां व्यूहतां च वदंति। तदेतच्छ्रुतिविरुद्धम्। एवमुत्पत्तौ व्यूहत्वासंभवात्। व्यूहत्वे चैवमुत्पत्त्यसंभवात्। जीवोत्पत्तौ मोक्षस्याप्यसंभवात्। तस्मादयमंशो विरुद्ध इति पूर्वसूत्रे दूषितः। ततो **द्वितीये** संकर्षणात्प्रद्युम्नोत्पत्तिर्दूष्यते। कर्तुर्जीवात् करणस्य उत्पत्तिर्लोकविरुद्धा; मनसः करणादहंकारोत्पत्तिरपि तथा। अतः प्रद्युम्नादनिरुद्धोत्पत्तिरप्यसंगता। ततस्तृतीये तेषां सर्वेषां परमेश्वरत्वं चेदंगीक्रियते, तदा अनेकेश्वरत्वापत्तिरित्युक्तम्। ततश्चतुर्थे शांडिल्यश्चतुर्षु वेदेषु परं श्रेयः अलब्ध्वा इदं शास्त्रमधीतवान्। तथा तप्तचक्रादिधारणं च तत्र विहितम्। तदेतच्छ्रुतिविरुद्धम्। तप्तचक्रादिधारणस्य पुराणेषु शूद्रधर्मत्वेनोक्तत्वात्। वेदेषु परमश्रेयोलाभाभावकथनस्यापि तथात्वात्। तस्मादेतत्सूत्रचतुष्टयोक्तं दूष्यं यत् तद्वेदविरुद्धम्। एवं स्मृतिषु वेदविरुद्धांशदूषणेन सर्वाण्येव वेदविरुद्धानि शास्त्राण्युपलक्षणविधया दूषितानि ज्ञेयानि ॥८॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां द्वितीयाध्यायस्य द्वितीयः पादः ॥

अथ ततस्तृतीये पादे पूर्वं क्रमसृष्टौ भूतोत्पत्तिप्रकारस्तत्स्वरूपं च विचार्यते।

तत्र **प्रथमे सप्तसूत्रे न वियदित्यधिकरणे** आकाशोत्पत्तिर्विचारिता। तत्र छांदोग्ये तेजआदिका सृष्टिः, तैत्तिरीयके आकाशादिका, तत्रासृजतेति पदाभावादाकाशस्योत्पत्तिः संदिग्धा। तत्र प्रथमसूत्रे आकाशस्योत्पत्तिः छांदोग्ये न श्रूयते। तस्मान्नोत्पत्तिरित्याशंकितम्। ततो **द्वितीये** तैत्तिरीये द्वितीये सृष्टिप्रकरणे 'इदं सर्वमसृजते'ति श्रावणात् पूर्वं 'चात्मन आकाशः संभूत' इति कथनादस्त्युत्पत्तिरित्युक्तम्। तेन छांदोग्येपि तत्सृष्टिरनुमातव्येति सिध्यति। ततस्तृतीये आकाशस्य निरवयवत्वेन व्यापकत्वेन चाकाशस्योत्पत्तिर्न संभवति। तस्मादाकाशोत्पत्तिर्गौणीत्याशंकितम्। ततश्चतुर्थे 'वायुश्चांतरिक्षं चे'ति श्रुतावमृतत्वश्रवणादपि नोत्पत्तिः संभवतीत्युक्तम्। ततः **पंचमे** ननु तैत्तिरीये संभूत इतिपदस्य सर्वत्रानुवृत्तिदर्शनादेकत्र गौणी, अन्यत्र मुख्या, संभूतिपदस्य वृत्तिरिति न वक्तुं शक्यम्। युगपद्वृत्तिद्वयविरोधादित्याशंक्य, यथा 'तपसा ब्रह्म विजिज्ञासस्व, तपो ब्रह्मे'तिश्रुतौ एकस्यैव ब्रह्मशब्दस्यैकत्र मुख्या, तपसि गौणी, तथात्रापि पदावृत्त्या विरोधाभावो भविष्यतीत्युक्तम्। एवं त्रिभिः सूत्रैः पूर्वपक्षमुक्त्वा, **षष्ठे सप्तमे** च समाधानमाह। तत्र स्यादेवं यदि छांदोग्योक्ता एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा न बाध्येत। तत्रैकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय दृष्टांते कार्यकारणभावेन तदुपपादितम्। तदनंगीकारे तद्बाध्येत। तस्मादाकाशोत्पत्तिरंगीकार्यैवेत्युक्तम्। ततः

सप्तमे ननु निरवयवत्वादीनां बाधकानामुक्तत्वात्सा कथं संभवतीत्याशंकायाम्, आकाशो नोत्पद्यते, निरवयवत्वादित्येवं साधने, उत्पद्यते लौकिकव्यवहारविषयत्वादित्येवं साधने, उत्पद्यते, लौकिकव्यवहारविषयत्वादित्येवं सत्प्रतिपक्षत्वेन युक्तीनामप्रयोजकत्वमुक्तम्। तस्माच्छ्रुत्युक्ता आकाशोत्पत्तिरंगीकार्येत्युक्तम् ॥ १ ॥

ततो **द्वितीये एकसूत्रे एतेन मातरिश्वेत्यधिकरणे** एवमेव वायूत्पत्तिरिति साधितम् ॥ २ ॥

ततोग्रिमसूत्रे ब्रह्मणोप्युत्पत्तिरस्त्विति वितंडयाशंक्य, मूलभूतस्य सतः नित्यत्वव्यापकत्वयोर्निरंकुशत्वादुत्पत्तिर्न संभवतीत्युक्तम् ॥ ३ ॥

ततश्चतुर्थे **एकसूत्रे तेजोत इत्यधिकरणे** वायुतस्तेजस उत्पत्तिः समर्थिता ॥ ४ ॥

ततः **पंचमे एकसूत्रे आप इत्यधिकरणे** तेजस अपामुत्पत्तिः समर्थिता ॥ ५ ॥

ततः **षष्ठे एकसूत्रे पृथिव्यधिकारेत्यधिकरणे** छांदोग्ये अद्भ्यः सकाशादन्नोत्पत्तिरुक्ता, तैत्तिरीये च पृथिव्युत्पत्तिरिति विरोधपरिहारार्थमन्नशब्देन पृथिव्येवोच्यते । छांदोग्ये भूताधिकारात् 'यत्कृष्णं तदन्नस्ये'ति नीलरूपकथनात्तैत्तिरीये अद्भ्यः पृथिवीति शब्दांतराच्चेत्युक्तम् ॥ ६ ॥

ततः **सप्तमे एकसूत्रे तदभिध्यानादेवेत्यधिकरणे** आकाशभावापन्नात्परमेश्वराद्वायोरुत्पत्तिः, एवं वाय्वादिभावापन्नादग्रेपि तेजआदीनां ज्ञेया । सर्वकर्तृत्वस्य ब्रह्मलिंगत्वादित्युक्तम् ॥ ७ ॥

ततोष्टमे एकसूत्रे विपर्ययेणेत्यधिकरणे प्रसंगात्प्रलयप्रकारो विचारितः । क्रमसृष्टौ येन क्रमेणोत्पत्तिस्तद्विपरीतक्रमेण प्रलय इत्युक्तम् ॥ ८ ॥

ततो **नवमे द्विसूत्रे अंतरा विज्ञानमनसीत्यधिकरणे** विज्ञानशब्देन जीवः मनश्च एतयोरपि क्रमेण मध्ये उत्पत्तिरिति सूत्रांशेनाशंक्य, अंशांतरेण समाहितम् । विज्ञानमयो जीवात्मकः, मनोमयस्तु वेदात्मकस्तैत्तिरीये उक्तः । अतस्तयोरुत्पत्तिर्न वेदाभिप्रेता । नामरूपव्याकरणात्मिकायां सृष्टौ जीवस्य करणत्वेन वेदस्य च द्वारत्वेन तत्पूर्वभावितया सृष्ट्यावुत्पत्त्यभावात् । यद्यपि न्यूनांशपूरणाय प्राणेंद्रियमनसां क्वचिदुत्पत्तिर्वक्तव्येति चेत् ? पुराणानां श्रुत्युपबृंहणत्वात्तदनुसारेणाकाशात्पूर्वमेव तत्कारणभावापन्नाद्ब्रह्मण एवेति जानीहि । ततो **द्वितीये** ननु विज्ञानमयस्य जीवस्यानुत्पत्तौ सर्वव्यवहारोच्छेदप्रसंग इत्याशंक्य, जीवस्यापि स्थावरजंगमशरीरे समागमरूपोत्पत्तिस्तु भवत्येव, न तु स्वरूपोत्पत्तिरूपा । अतो न व्यवहारोच्छेद इत्युक्तम् । तेन जीवोत्पत्तिर्भाक्तेति सूचितम् ॥ ९ ॥

ततो **दशमे एकसूत्रे नात्माऽश्रुतेरित्यधिकरणे** जीवस्य स्वरूपत उत्पत्तिर्निवारिता । देवदत्तो जात इत्यादौ देहोत्पत्तेरेव श्रवणेन जीवोत्पत्त्यश्रवणात् । 'न जायते न म्रियते वा विपश्चि'दित्यादिषु जन्ममरणाभावश्रावणेन नित्यत्वबोधनाच्चेति ॥ १० ॥

तत **एकादशे एकसूत्रे ज्ञोत एवेत्यधिकरणे** जीवो ज्ञानस्वरूपो ज्ञानधर्मा च विज्ञानमयः, 'विज्ञानं यज्ञं तनुते' इत्यादिस्वरूपबोधकश्रुतिभ्यः । 'न पश्यो मृत्युं पश्यति', 'द्रष्टा श्रोता मंते'त्यादिज्ञानधर्मत्वबोधकश्रुतिभ्यश्चेत्युक्तम् ॥ ११ ॥

ततो **द्वादशे दशसूत्रे उत्क्रांतिगत्यागतीनामित्यधिकरणे** तत्र जीवस्य नित्यत्वेन मध्यमपरिमाणस्य वक्तुमशक्यत्वात्परमाणु वा परिमाणं महद्वा संभवति । तत्र किं युक्तमित्या-

कांक्षायां परिमाणं विचारितम् । तत्र प्रथमसूत्रे 'स यदास्माच्छरीरादुत्क्रामती'ति, 'ये के चास्माल्लोकात्प्रयांती'ति तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मण' इति श्रुतिषु उत्क्रांतिगत्यागतिश्रावणात् जीवोऽणुरित्युक्तम् । ततो द्वितीये 'ऊर्णनाभिर्यथा तंतून्सृजते हरत्यपि, जाग्रत्स्वप्ने तथा जीवो गच्छत्यागच्छते पुन'रिति श्रुताविंद्रियरहितस्य केवलस्यैव गत्यागतिश्रवणादपि तथेत्युक्तम् । ततस्तृतीये जीवोऽणुर्भवितुं नार्हति, 'स वा एष महानज आत्मा योयं विज्ञानमयः प्राणेष्वि'ति विज्ञानमयस्य जीवस्य महत्त्वश्रावणात् जीवो नाणुरिति सूत्रांशेनाशंक्य, अंशांतरेण समाहितम् । उक्तश्रुतेर्ब्रह्मप्रकरणपठितत्वान्न तथा जीवमहत्त्वसिद्धिरित्युक्तम् । ततश्चतुर्थे 'स्वयं विहत्य स्वयं निर्माये'ति स्वप्नविषयकश्रुतौ स्वशब्दः जीवस्याणुत्वं बोधयति । स्वप्ने शरीरमध्ये तावत्परिमाणस्य व्यापकस्य च विहारकर्तृत्वासंभवात् । 'वालाग्रशतभागस्य शतधा कल्पितस्य तु । भागो जीवः स विज्ञेयः स चानंत्याय कल्पते' इतिश्रुतौ जीवमुपक्रम्य तत्परिमाणबोधनाच्चाणुरित्युक्तम् । ततः पञ्चमे अणोर्जीवस्य सर्वशरीरव्याप्तिः कथं संगच्छते इत्याशंकायां यथा स्वल्पश्चंदनखंडः महाकटाहे तप्ततैले निक्षिप्तस्तैलं शीतलं करोति, तथा जीवोपि सामर्थ्यात्करोतीति व्याप्तौ युक्तिरुक्ता । ततः षष्ठे ननु चन्दनस्यावस्थानं प्रत्यक्षतो निश्चितम्, तेन तस्य तथात्वम् । जीवस्य स्थितिस्तु नैकत्र निश्चितेति स दृष्टांतो न वक्तुं शक्यते इति सूत्रांशेनाशंक्य, 'गुहां प्रविष्टा'वितिश्रुत्या जीवस्य हृदि स्थितिः शास्त्रान्निश्चितेति न दृष्टांतवैषम्यमित्युक्तम् । ततः सप्तमे जीवस्य यो गुणश्चैतन्यं तेन जीवः सर्वशरीरं व्याप्नोति । यथा मणेः कांतिर्बहुदेशव्यापिनी, तद्वदित्युक्तम् । ततोऽष्टमे चैतन्यगुणस्य स्वाश्रयाधिकदेशवृत्तित्वं चंपकादिगंधवदवगंतव्यमित्युक्तम् । ततो नवमे चैतन्यगुणेन सर्वशरीरव्याप्तौ कौशीतकिब्राह्मणे 'हिता नाम पुरुषस्य नाड्य' इत्यादिना तासां नाडीनामणुत्वं तासु जीवस्य स्थितिं चाभिधाय, स एष इह प्रविष्टः 'आलोमभ्य आनखाग्रेभ्य' इत्यनेन व्याप्तिं प्रदर्शयति । तस्मात्सामर्थ्येन गुणेन च व्याप्तिरुपपन्नेत्युक्तम् । ततो दशमे 'प्रज्ञया शरीरं समारुह्ये'ति श्रुतौ प्रज्ञायाः करणत्वनिर्देशात्स्वरूपचैतन्याद्भिन्नं गुणरूपं चैतन्यं निरूपितम् । अतो गुणेन व्याप्तिरुपपन्नेति साधितम् ॥ १२ ॥

ततस्त्रयोदशे चतुःसूत्रे तद्गुणसारत्त्वादित्यधिकरणे जीवे ब्रह्मत्वव्यपदेशो मुख्यो गौणो वेत्याशंकायाम्, सुषुप्तिसाक्षिणि प्राज्ञे यथा ब्रह्मत्वव्यपदेशो गौणस्तथा 'प्रज्ञानघनस्तत्त्वमसी'-त्यादावपि ब्रह्मगुणसारत्वाद्ब्रह्मत्वव्यपदेशो गौण इत्युक्तम् । ततो द्वितीये ननु नीचस्यात्युत्कृष्टत्वव्यपदेशो न युक्तः । न च प्राज्ञवदिति वाच्यम् । तथा सति प्राज्ञवत्तत्तिरोहितं स्यात् । तथा सति किं व्यपदेशेनेत्याशंक्य, समाधानमाह । यावदात्मा वर्तते, तावत्सर्वोत्कृष्टत्वं तस्य स्फुरति । अर्थादात्मा नित्य इति सर्वदैव स्फुरति । तस्मान्न दोष इत्युक्तम् । ततस्तृतीये (ननु) जीवे आनंदांशाभिव्यक्तया ब्रह्मधर्माविर्भाव इत्युक्तम् । तन्न युक्तम् । आनंदांशस्य पूर्वमसत्त्वेन पश्चाज्जन्यत्वात्, जन्यत्वेन नश्वरत्वेन च व्याप्त्या तस्य नश्वरत्वप्रसंगादित्याशंक्य, यथा बालकस्य सदेव पुंस्त्वं यौवनेऽभिव्यज्यते, तथा पूर्वं सूक्ष्मरूपेण वर्तमान एवानंदो ब्रह्मभावे सत्यभिव्यज्यते । अतो न तस्य नश्वरत्वमित्युक्तम् । ततश्चतुर्थे नन्विदानीं सचिदांशावेव प्रकटौ, मोक्षे त्वानंदांशोपि प्रकटो भवतीत्येवमवस्थाभेदेन विभागे को हेतुरित्याशंक्य, तत्र हेतुमाह । यदीदानीमप्यानंदः प्रकटः स्यात्तदा सचिदंशवदिदानीमप्यानंद उपलभ्येत, संसारश्च न स्यात् । यदि कदापि न स्यात्तदा मोक्षावस्था विरुध्येत । नित्यनिरतिशयसुखाभिव्यक्तेरेव मोक्षत्वात् । यदि जीवो निरानंद एव, ब्रह्मैवानंदमय-

मिति नियमोऽङ्गीक्रियते, तदा 'ब्रह्मैव सन् ब्रह्माप्येती'तिश्रुतिर्विरुध्येत । अतः प्रमाणाद्यविरोध एवमंगीकारे हेतुरित्युक्तम् ॥ १३ ॥

ततश्चतुर्दशेऽष्टसूत्रे **कर्ता शास्त्रार्थवत्त्वादित्यधिकरणे** जीवस्य कर्तृत्वं व्यवस्थापितम् । सांख्यैः प्रकृतिगतमेव जीवे तत् प्रतीयत इत्यंगीक्रियते, तन्निवृत्त्यर्थम् । तत्र **प्रथमसूत्रे** शास्त्रार्थवत्त्वं हेतुरुक्तः । वेदादिषु जीवमेवाधिकृत्याभ्युदयनिःश्रेयसफलकानां यज्ञोपासनारूपाणां कर्मणां विज्ञानदर्शनादित्युक्तम् । ततो **द्वितीये** जीवस्य स्वतः कर्तृत्वाभावेपि संसारदशायां प्रकृतिसंसृष्टत्वेन विवेकाग्रहात्प्राकृतकर्तृत्वग्रहणेपि न शास्त्रानर्थक्यमित्याशंक्य, विहारोपदेशादिति हेतुरुक्तः । विहारः स्वेच्छाक्रीडात्मकभोगरूपो दहरविद्यायामुपदिश्यते, स च दहरविदः कर्तृत्वमाक्षिपतीति जीव एव कर्ता इत्युक्तम् । ततस्तृतीये 'तदेषां प्राणानां विज्ञानेन विज्ञानमादाये'तिश्रुतौ विज्ञानादानकथनेन जीवस्य स्वातन्त्र्यबोधनात्तस्यैव कर्तृत्वमित्युक्तम् । ततश्चतुर्थे 'विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि चे'तिश्रुतौ साक्षादेव कर्मकर्तृत्वव्यपदेशात् । तच्चेन्नांगीक्रियते, तदा श्रुतौ प्रथमानिर्देशो विरुध्येत । प्रथमानिर्देशाद्विपरीतस्तृतीयाविभक्तिनिर्देशश्चापद्येतेत्युक्तम् । ततः **पंचमे** यदि जीवस्य कर्तृत्वं स्यात्तदा स्वतंत्रत्वात्स्वाहितं न कुर्यादित्याशंक्य, यथा चक्षुषेष्टमनिष्टं चोपलभते, तथैवेंद्रियैः कर्म कुर्वन्निष्टमनिष्टं चाप्नोति । तथा च सांख्यवत् केवलभोक्तृत्वांगीकारेप्ययं दोषस्तुल्य इति कर्तृत्वे पर्यनुयोगो न कार्य इत्युक्तम् । ततः **षष्ठे** ननु स्वतंत्रश्चेदीश्वरवत् स्वार्थमन्यथा न कुर्यादित्याशंक्य, अस्य शक्तिस्तिरोहितेति तथा करोति । तावता न कर्तृत्वहानिरित्युक्तम् । ततः **सप्तमे** जीवस्य शक्तितिरोभाव एव कुत इत्याशंक्य, जीवस्य क्रियाज्ञानशक्तियोगेन घृतद्रवत्ववत् सिध्यति । अतस्तदभावाच्छक्तितिरोभाव इत्युक्तम् । ततोऽष्टमे ननु कर्तृत्वभोक्तृत्वयोर्भिन्नधर्मत्वं दृष्टम्, यथैको गृहं निर्मिमीते, अन्यस्तु तद्भुंक्ते, तस्मान्नेदं साधीय इत्याशंक्य, यथा तक्षा रथं पीठं वा निर्माय तमारूढो विहरति, तथा तयोरैकाधिकरण्यस्यापि दर्शनान्न दोष इत्युक्तम् । एवमनेनाधिकरणेन जीवस्य कर्तृत्वं साधितम् ॥ १४ ॥

ततः **पंचदशे द्विसूत्रे परात्तु तच्छ्रुतेरित्यधिकरणे** जीवस्य कर्तृत्वं स्वतो वा भगवतो वेत्याशंकायां भगवद्दत्तमेव कर्तृत्वं भगवदंशत्वाज्जीवे भासते । 'एष एव साधु कर्म कारयती'तिश्रुतेः । ब्रह्मणः सर्वरूपत्वान्न वैषम्यनैर्घृण्यादिदोष इति **प्रथमसूत्रे** उक्तम् । ततो **द्वितीयसूत्रे** क्रीडार्थं यो भगवता उद्यमः कृतो वर्तते, तदपेक्ष एव भगवान् स्वांशं जीवं तत्र तत्र तथा प्रवर्तयतीत्युक्तम् । दोषपरिहारस्तु सर्वरूपत्वादेव कृतः ॥ १५ ॥

ततः **षोडशे एकादशसूत्रे अंशो नानाव्यपदेशादित्यधिकरणे** जीवस्य ब्रह्मसंबंधिरूपमुच्यते तत्र **प्रथमसूत्रे** जीवो ब्रह्मणोंश एव । 'सर्व एवात्मानो व्युच्चरंति, कपूयचरणा रमणीयचरणा' इतिश्रुतौ बहुत्वेन व्यपदेशाद् 'ब्रह्मदाशा ब्रह्मदासा ब्रह्मेमे कितवा उते'तिश्रुतौ ब्रह्मत्वेन च व्यपदेशाच्च । नह्येकस्य जीवस्य बहुत्वं ब्रह्मरूपत्वं चेत्युभयमंशत्वं विना संगच्छते । तस्मादंश इत्युक्तम् । ततो **द्वितीये** 'पादोऽस्य विश्वा भूतानी'तिमंत्रवर्णे जीवस्य पादत्वादप्यंशत्वमित्युक्तम् । ततस्तृतीये 'ममैवांशो जीवलोके जीवभूतः सनातन' इति स्मृतौ कंठत एवांशत्वमुक्तम् । एवं त्रिभिः सूत्रैर्जीवस्य ब्रह्मसंबंधिरूपमुक्तम् । ततश्चतुर्थे जीवस्य ब्रह्मांशत्वे तद्द्वारा ब्रह्मण्यपि या दोषसंबंधशंका सा द्वाभ्यां परिहृता इति न वक्तुं शक्यम् । जीवस्य दुःखित्वेन तदंशिभूते ब्रह्मण्यपि दुःखित्वादिप्रसंगात् । पाददुःखे पुरुषदुःखवदित्याशंक्य, तस्य परिहार उक्तः । तथाहि प्रकाशादीनां दुष्ट-

प्रकाश्यसंसर्गेपि न सूर्यादेर्दुष्टत्वम्, तथा ब्रह्मणोपि। वस्तुतस्तु दुष्टप्रकाश्यसंसर्गेपि प्रकाशस्यापि न दुष्टत्वम्। कुतः सूर्यादेः, तथा जीवस्य ब्रह्मणश्चेत्यदोष इति। ततः पंचमे स्मृत्यादिदोषपरिहार उक्तः 'तत्र यः परमात्मा हि स नित्यो निर्गुणः स्मृतः। न लिप्यते फलैश्चापि पद्मपत्रमिवांभसे'ति। 'कर्मात्माप्यपरो योसौ मोक्षबंधैः स युज्यते' इति जीवस्य दोषसंसर्गो, न ब्रह्मण इति। ततः पष्ठे ननु जीवस्य यदि ब्रह्मांशत्वम्, तदा विधिविषयत्वाभावात्कर्मसंबंधाभावः फलासंबंधश्चेत्याशंक्य, जीवस्यापि न स्वतो विध्यादिविषयत्वम्, किंतु देहयोगादेव विधिनिषेधाधीनत्वमपि। तत एव यथा शवाग्निश्चंडालोदकं तद्घटादिश्च परिह्रियते, शिष्टसंबंधिनस्ते गृह्यंते, एवं जीवस्य देहसंबंधकृतौ गुणदोषौ न स्वत इत्युक्तम्। तेनैव फलसंबंधश्चेत्यपि साधितम्। ततः सप्तमे जीवस्य देहसंबंधाद्गुणदोषसंसर्गकथनं न युक्तम्, कालिकनित्यप्रलयेन देहस्य प्रतिक्षणमन्यान्यत्वादाधानकाले ब्राह्मण्यस्य वक्तुमशक्यत्वेन कर्मानधिकारप्रसक्तेर्जीवैक्यमादायाधिकारसाधने तु देहांतरेपि तदापत्तेरित्याशंक्य, देहांतरे पूर्वदेहसंतत्यभावान्न पूर्वदैहिककर्माद्यापत्तिः। एकस्मिन् देहे तु संततिसामान्यात्कर्माधिकारः सुघटः। ततः सिद्धे देहसंतत्यैक्ये तद्द्वारा जीवस्य गुणदोषसंसर्गौ न दुर्घटावित्युक्तम्। ततोऽष्टमे सच्चिदानंदस्य ब्रह्मणोंशोपि तादृश एव वक्तव्यः, तथासति कथं तस्य देहसंबंध इत्याशंक्य, जीवो ब्रह्माभास इत्युक्तम्। यथा अनाचारी ब्राह्मणो ब्राह्मणाभासः, अखिलब्राह्मणधर्माणामभावात्, एवमानंदांशस्य तिरोधानेन ऐश्वर्यादीनां ब्रह्मधर्माणामभावात् तादृशाकारस्य चाभावात् जीवोपि ब्रह्माभासः। तथा चानंदांशाभावाद्देहसंबंध इत्युक्तम्। एवं त्रिभिः सूत्रैर्जीवस्य स्वतो निर्दुष्टत्वे देहसंबंधाद्दोषसंबंधो देहसंबंधहेतुश्च साधितः।

ततोग्रिमेषु त्रिषु यन्नैयायिकादिभिर्भोगव्यवस्थया जीवनानात्वं व्यापकत्वं चांगीकृतं तद्दूष्यते। तत्र प्रथमे तेषामात्मनां व्यापकत्वेन सर्वमनइंद्रियदेहसंबंधाद्येनकेनचित्करणग्रामेण यत् कर्म क्रियते, तज्जन्यादृष्टस्य सर्वत्र तुल्यत्वाददृष्टनियमो न स्यात्। तस्मात्तदुक्तप्रकारेण जीवव्यापकत्वनानात्वस्थापनमसंगतमित्यर्थः। ततो द्वितीये विलक्षणमनःसंयोगेन पूर्वोक्तं सर्वं साधयंति। तद्दूष्यते। तत्र दृष्टादृष्टकारणकलापसामान्ये एकस्यैव वैलक्षण्यम्, नान्यस्येत्यत्र हेतोर्वक्तुमशक्यत्वादिति बोधितम्। ततस्तृतीये जीवस्य व्यापकत्वेपि प्रदेशभेदान्न दोष इति ते वदंति। तद्दूष्यते। यदि तथांगीक्रियते, तदा यत्र कर्मकरणेन यस्मिन्प्रदेशेऽदृष्टमुत्पन्नं, तस्य प्रदेशस्य देशांतरेऽभावात् तत्रोत्पन्नानां वस्तूनां भोगो न स्यात्, अदृष्टस्याचंचलत्वात्। तस्मान्न तदुक्तरीत्या तन्मतसिद्धिरिति त्रिभिः सूत्रैरुक्तम्। एवमेकादशभिः सूत्रैर्जीवस्य ब्रह्मसंबंधिरूपमुक्तम्॥ १६॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां द्वितीयाध्यायस्य तृतीयः पादः॥

पूर्वपादे जीवस्य स्थूलशरीरनिष्पादकानां भूतानां स्वरूपमुत्पत्त्यादिकं च विचारितम्। अस्मिन् पादे इंद्रियादीनां तदवसरसंगत्या विचार्यते।

तत्र प्रथमे पंचसूत्रे तथा प्राणा इत्यधिकरणे इंद्रियाणां भूतवत् कार्यत्वं वा, जीववदंशत्वं वेति संदेहे जीववदंशत्वमिति निर्णीतम्। तत्र प्रथमसूत्रे पूर्वपादे निरूपितजीवस्य ये

१. स्मृ इति पाठः।

चिदंशत्वातिरिक्ता धर्मा उत्क्रांत्यादयस्ते सर्वेतिदिश्यंते। ततो द्वितीये ननु प्राणेषु नित्यत्वाश्रवणादुत्क्रांत्यादिश्रुतिर्गौणी भविष्यतीत्याशंक्य, एकैव श्रुतिर्जीवे मुख्या, प्राणादौ गौणीति वक्तुं न शक्यत इत्युक्तम्। ततस्तृतीये सृष्टेः पूर्वमपि प्राणादीनां स्थितिः श्रूयते। 'असद्वा इदमग्र आसी'-दित्यारभ्य, 'प्राणा वा ऋषय' इत्यंतेन तन्निगमनात्। ततश्चतुर्थे मनःपूर्वो वागुत्तर' इतिश्रुतेर्मनसो वाक्पूर्वरूपत्वात्। वाचश्च वेदरूपाया 'वाचा विरूपनित्यये'ति श्रुत्या नित्यत्वश्रावणात्तत्पूर्वरूपस्य मनसः कथमनित्यत्वं भवेत्। ततः पंचमे 'तमुत्क्रामंतं प्राणोऽनूत्क्रामती'तिश्रुतौ सप्तानां गतिभिर्जीवगतिर्विशेष्यते। अतो जीवसमानयोगक्षेमत्वात्तेषामपि जीवतुल्यत्वमित्युक्तम्॥ १॥

ततो द्वितीये एकसूत्रे **हस्तादय इत्यधिकरणे** उत्क्रांतिश्रुतौ प्राणानां जीवेन सहोत्क्रमणकथनात् तेषां नित्यत्वमंशत्वं चांगीकृतम्। अतःपरं ते कतीति विचार्यंते। श्रुतौ क्वचित् सप्तोक्ताः, क्वचिदष्टौ, क्वचिन्नव, क्वचिद्दश, क्वचिदेकादशेति नानापक्षाः श्रूयंते। तद्विप्रतिषेधपरिहारार्थं विचारः। तत्र 'हस्तौ चादातव्यं चे'ति श्रुतौ हस्तोपस्थपायुपादानां सप्तभ्योधिकानां कथनात् चक्षुस्त्वग्घ्राणरसनश्रवणमनोवाचां सप्तानां पूर्वं कथनाच्चैकादश, न तु सप्तैवेत्युक्तम्। तेषु पंच ज्ञानेंद्रियाणि, पंच कर्मेंद्रियाणि, उभयनायकमंतःकरणं मन इत्येवं तेषां विभागो ज्ञेयः॥ २॥

ततस्तृतीये एकसूत्रे **अणवश्चेत्यधिकरणे** तेषां जीववत् परमाणुपरिमाणं विचारितम्।

ततश्चतुर्थे द्विसूत्रे **श्रेष्ठश्चेत्यधिकरणे** मुख्यप्राणस्याणुत्वं विचारितम्। 'आनीदवातं स्वधया तदेक'मितिश्रुत्या अननात्मकत्वेन सृष्टेः पूर्वं सत्ता च प्रदर्शिता। ततो **द्वितीयसूत्रे** वायुर्वा, इंद्रियक्रिया वा, मुख्यः प्राणोस्त्वित्याशंक्य, 'एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च, खं वायुर्ज्योतिरापः पृथ्वी विश्वस्य धारिणी'तिश्रुतौ वायुभिन्नत्वेन पृथगुपदेशात्। वृत्तिवृत्तिमतोरभेदेन क्रियाया इंद्रियांतःपातित्वे सिद्धे तेभ्योपि प्राणस्य पृथक्त्वात् भिन्न एवासन्य इति साधितम्॥ ४॥

ततः पंचमे चतुःसूत्रे **चक्षुरादिवत्त्वित्यधिकरणे** प्राणः स्वतंत्रः, परतंत्रो वेति शंकायाम्, मुख्यः प्राणोपि आसन्यत्वाद्भगवदधीनः। व्यवहारे तु जीवाधीनः। श्वेताश्वतरे इंद्रियादिजयवत् तज्जयस्याप्यनुशासनादित्युक्तम्। ततो **द्वितीये** प्राणश्चेज्जीवाधीनः, तदा करणवत् किंचिद्व्यापारं कुर्वन् जीवोपकरणरूपो भवेत्। तत्तु न करोतीति कथं तस्य जीवोपकरणत्वमित्याशंक्य, मुख्यप्राणस्य यः व्यापाराभावः सः करणत्वाभावात्। उपकरणत्वं तु देहस्थितिरूपकार्यस्य करणात्। अतो व्यापाराभावेपि तस्य जीवोपकरणत्वं न विरुद्धमित्युक्तम्। ततस्तृतीये ननु व्यापाराभावे तस्य जीवोपकारित्वमसमंजसमित्याशंक्य श्रुतौ 'अहमेवैतत् पंचधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामी'ति व्यपदिश्यते। अतो यथा मनसो द्वारभेदेन स्वरूपत एकादशवृत्तयस्तथा प्राणेपि पंचवृत्तयो व्यपदेशप्रामाण्यादंगीक्रियंते। ताभिरेव देहं स्थापयञ्जीवस्योपकरणं संभवतीत्युक्तम्। ततश्चतुर्थे तस्याप्यणुत्वं साधितम्॥ ५॥

ततः षष्ठे एकसूत्रे **ज्योतिराद्यधिष्ठानं त्वित्यधिकरणे** वागादयः किं देवताधिष्ठानेन स्वस्वकार्ये प्रवर्तंते, स्वत एवेत्याशंक्य, आधिभौतिकाः आध्यात्मिकास्ते स्वस्वाधिदैविकाधीना इत्यग्न्यादिस्वस्वदेवताधिष्ठानेनैव प्रवर्तंते, न तु स्वत इति निर्णीतम्॥ ६॥

ततः सप्तमे द्विसूत्रे **प्राणवतेत्यधिकरणे** अग्न्यादिदेवताः किं स्वत एव केवला वागादीनधितिष्ठंति, मुख्यप्राणसहिता वेत्याशंक्य, मुख्यप्राणसहिता एवाधितिष्ठंति। 'सोऽयमग्निः परेण

मृत्युमतिक्रांतो दीप्यत' इतिश्रुतेरित्युक्तम् । ततो द्वितीये प्राणस्य तत्संबंधस्य च नित्यत्वमुक्तम् । तेन प्राणसहिता एव देवा वागादीनधितिष्ठंति । तेनैव जीवस्य भोगसिद्धिः, तेषां जीवोपकारकत्वं च सिद्धमित्युक्तम् ॥ ७ ॥

ततोऽष्टमे त्रिसूत्रे **इंद्रियाणि तद्व्यपदेशादित्यधिकरणे** इंद्रियाणां प्राणाधीनसर्वव्यापारत्वात् प्राणशब्दवाच्यत्वाच्च प्राणवृत्तिरूपाणींद्रियाणीत्याशंक्य, तत्त्वांतराणीति सिद्धांतितम् । 'एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि चे'ति तत्त्वोत्पत्तिबोधकश्रुतौ प्राणाद्भिन्नतयेंद्रियत्वेन व्यपदेशात् । नन्वेवं व्यपदेशमात्रेण भेदे सति प्राणापानादिव्यपदेशभेदादासन्योपि प्राणादिभ्यो भिन्नः स्यादिति नाशंकनीयम् । प्राणादिशब्दानां पाचकपाठकादिवदासन्ये यौगिकत्वान्न तद्भेदकत्वम् । इंद्रियशब्दस्य तु न यौगिकत्वम् । अतो नैतद्दृष्टान्तेनाशंकनीयमित्युक्तम् । ततोऽग्रिमसूत्रद्वये हेत्वंतरमित्युक्तम् । यत्रापि प्राणशब्दप्रयोगस्तत्रापि भेदेन श्रूयते । 'तमुत्क्रामंतं प्राणोऽनूत्क्रामती'ति, 'प्राणमुत्क्रामंतं सर्वे प्राणा अनूत्क्रामंती'ति । वैलक्षण्यं च, प्राणस्य चेंद्रियाणां च । 'सुप्तेषु वागादिषु प्राणो जागर्ति । स्वामिसेवकवच्चानेकं वैलक्षण्यम्' ॥ ८ ॥

ततो नवमे एकसूत्रे **संज्ञामूर्तिक्लृप्तिरित्यधिकरणे** भूतभौतिकसृष्टिः परमेश्वरादेवेति निर्णीय, नामरूपव्याकरणमपि परमेश्वरादेवेति निर्णीयते । तत्र नामरूपव्याकरणं लोके जीवानामेव दृष्टमिति हिरण्यगर्भादेव तद्व्याकरणमित्याशंक्य, नामरूपव्याकर्ता परमेश्वर एव । छांदोग्ये 'हंताहमिमास्तिस्रो देवताः अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी'तिश्रुतौ नामरूपव्याकर्तृत्वेन त्रिवृत्कुर्वतः परमेश्वरस्यैवोक्तत्वात् । नामव्याकरणं हि वाक्साध्यम् । रूपव्याकरणं क्रियासाध्यम् । वाक्क्रिये च शरीरं विना जीवस्य न संभवतः । शरीरं नामरूपव्याकरणोत्तरं भावि । तस्मान्न जीवस्तत्कर्ता, किंतु परमेश्वर एव तत्कर्तेत्युक्तम् ॥ ९ ॥

ततो दशमे द्विसूत्रे **मांसादिभौममित्यधिकरणे** 'एतस्माज्जायते प्राण' इतिश्रुतौ प्राणस्येंद्रियाणां च भगवतः सकाशात्सृष्टिरुक्ता । छांदोग्ये तु 'अन्नमशितं त्रेधा विधीयत इतिश्रुतौ मनःप्राणवाचां भौतिकत्वं श्राव्यते । 'अन्नमयं हि सौम्य मनः, आपोमयः प्राणः, तेजोमयी वागि'त्यनेन, 'एतस्माज्जायत' इतिश्रुत्युक्ताया उत्पत्तेः परम्परयाप्युपपद्यमानत्वात् । 'अन्नमय'मित्यादिश्रुतेस्तु मांसादिसाहचर्येण विशेषबोधकत्वात् । मनआदीनां भौतिकत्वमेवेति **प्रथमसूत्रेणाशंक्य, द्वितीयसूत्रे** तेषां तत्त्वांतरत्वमेवेति स्थापितम् । मनःप्रभृतीनामन्नमयत्वादिकं तु अन्नादिपोषितत्वेनाप्युपपद्यते । 'पंचदशाहानि माशी'रित्याद्युपपादकदर्शनात् । सर्ववाक्ये साक्षात्सृष्टेरुक्तत्वेन तत्र परंपरायाः प्रवेष्टुमशक्यत्वात् । तस्मात्तत्त्वरूपाणि तानि भगवत एवेति सिद्धांतितम् । एवमस्मिन्नध्याये सर्वोपि विरोधः परिहृतः ॥ १० ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां द्वितीयाध्यायस्य चतुर्थः पादः ।

द्वितीयाध्यायः समाप्तः ।

तृतीयोऽध्यायः ।

तृतीयाध्यायस्याधिकरणार्थसंग्रहः । ततस्तृतीयेऽध्याये जघन्यमध्यमाधिकारिणां साधनसंपच्चायुपनिषदां विद्याजनकता, अन्यथा तु सत्संप्रदायेपि परोक्षज्ञानजनकतैवेत्यतः **प्रथमे** पादेऽधि-

...कारिणो जन्मनिर्धारः क्रियते। तत्र पंचाग्निविधया निष्पन्नदेहः स्वरूपतोऽधिकारीति तदर्थं तद्वि-...आस्थाः पंचाप्याहुतयो विचार्यंते। तत्र ब्रह्मसंबंधिविचारविशेषरूपत्वाच्छास्त्रसंगतिः। साधनविचार-...रूपत्वादध्यायसंगतिः। तत्राष्टावधिकरणानि।

तत्र **प्रथमेऽधिकरणे** जीवेंद्रियाणां होमाभावेनाशुद्धिमाशंक्य, तेषामपि शुद्ध्यर्थं जीवस्येतो लोकांतरगमनावसरे संस्कृतभूतसूक्ष्मेंद्रियसाहित्यं सप्तभिः सूत्रैः साध्यते। तत्र **प्रथमसूत्रे** संस्कृत-भूतसूक्ष्मैः संपरिष्वक्त एव परलोकं गच्छतीत्युच्यते। ततो **द्वितीये सूत्रे** श्रुत्युक्तप्रश्ननिरूपणाभ्या-मद्भिः संपरिष्वक्त एव गच्छतीति ज्ञायते, ननु भूतांतरसंपरिष्वक्त इत्याशंक्य, अपां भूतत्रयात्मकत्वं साध्यते। **ततस्तृतीयसूत्रे,** प्राणस्यापि गमनं बोध्यते। ततश्चतुर्थे प्राणगमनस्याग्न्यादिभावश्रुत्या बाधमाशंक्य, तन्निवारणेन प्राणानां परलोकगतिः साध्यते। ततः **पंचमे** श्रुतौ श्रद्धापदान्नापां होम ...त्याशंक्य, श्रद्धापदेनाप एवोच्यंते इति निर्धार्यते। ततः **षष्ठे सूत्रे,** सर्वे जीवास्तथा गच्छंति, उत ज्ञानोपयोगिन एवेत्याशंक्य, ज्ञानोपयोगिनो यज्ञादिकृतो गच्छंतीति निर्णीयते। ततः **सप्तमे** तेषां होमेन सोमभावेऽनिष्टमाशंक्य, तन्निवार्यत इति। एवं प्रथमाहुतिः सफला विचारिता भवति॥ १॥

ततो **द्वितीये चतुःसूत्रे कृतात्ययाधिकरणे**ऽवसरसंगत्या सोमभावोत्तरं वृष्टिभावं प्राप्नो-तीति द्वितीयाहुतिर्विचार्यते। तत्र **प्रथमसूत्रे** सानुशयो वृष्टिभावं प्राप्नोतीति बोधनार्थमनुशयो विचार्यते। अनुशयो द्विविधः। 'यद्यत्र नः स्वर्गसुखावशेषित'मिति श्रीभागवतवाक्याद्भोगसाधक-सामग्रीशेषरूपं यत् फलं तदात्मकः सुखलेशरूप एकः, कर्मशेषरूपो द्वितीय इति निर्णीतम्। ततो **द्वितीयसूत्रे** आचरणात्तत्तद्योनिप्राप्तिमाशंक्य, चरणस्य पूर्वजन्मीनकर्मोपलक्षकत्वम्, नत्वग्रिम-जन्मनि समीचीनकरणाहेतुत्वम्। तस्मादग्रिमार्थं कर्मशेषरूपोऽनुशयोऽवश्यमपेक्षणीय इत्युच्यते। **ततस्तृतीयसूत्रे** चरणस्य पूर्वजन्मीनकर्मोपलक्षकत्वे प्रयोजनाभावेन चरणश्रुतेरानर्थक्यप्राप्तौ तस्या जन्मविधायकत्वमंगीकर्तव्यम्। तथा सति कर्मशेषरूपानुशयवैयर्थ्यमित्याशंक्य, निष्कामसकामभेदेन द्विविधानां कर्मिणां मध्ये निष्कामस्य पूर्वोक्तफलशेषरूपोनुशयः। द्वितीयस्य तु सुकृतदुःकृतकर्मशेष-रूप इति तस्य दुःशरीरप्राप्तिः, 'सुखानन्तरं दुःख'मितिन्यायेनोपपद्यते, तन्निवारणार्थं चरणश्रुत्या शरीरप्राप्तिरिति बोध्यत इति दुःशरीरनिषेधार्थं सा धूममार्गमुपक्रम्योक्ता। अतो धूममार्गस्य तदपे-क्षत्वान्न सा कर्मशेषरूपानुशयप्रतिषेधिका। तस्मान्न सोमभावापन्नस्य वृष्टिभावबाधः, अन्यथा तादृश-शरीरप्राप्तेराकस्मिकता स्यात्, अतोनुशय आवश्यक इति निर्णीयते। ततश्चतुर्थे द्विविधकर्मशेष-रूप एवानुशय इति बादरिमतम्। तेन मोक्षपर्यंतमनुशयानुवृत्तिरिति बोध्यते। एवं द्वितीयाहुतिः सफला विचारिता॥ २॥

ततो**ऽनिष्टादिकारिणामिति पञ्चसूत्रे तृतीयाधिकरणे** इष्टादिकारिव्यतिरिक्तानां पंचाहुतिधूममार्गयोः संबंध इति **प्रथमसूत्रे** आशंक्यते। तेन सर्वेषां सोमभावप्राप्त्यनंतरं जन्मेत्याशं-क्यते। ततो **द्वितीयसूत्रे** तन्निषिध्यते। यदि सर्वेषां स स्यात्तदा यमगतिश्रुतिर्विरुध्येत। तस्मान्न सर्वेषां सोमभावः। ततः सूत्रद्वयेन स्मृत्यापि यमगतिः स्थाप्यते। ततः **पञ्चमे सूत्रे** चित्रगुप्तादी-नामपि यमसेवकत्वं निर्णीयते। तेन यमगतेरपि सत्त्वान्न सर्वेषां सोमभावः, किंतु मार्गद्वयस्थानामेवे-त्युपोद्घातप्रसंगाभ्यां निर्णीयते॥ ३॥

ततश्चतुर्थे चतुःसूत्रे विद्याकर्मणोरित्यधिकरणे । सर्वेषां चंद्रलोकप्राप्तिः श्रुता । पंचाग्निविद्याप्रस्तावे यमगतिस्तु नोक्ता । अतो विद्यया कर्मणा सोममार्ग इति न यममार्ग इति आशंक्य, वेदांते गौणमुख्यफलभेदार्थं तत्कारणत्वेन विद्याकर्मणोरुक्तत्वान्न तृतीयमार्गबाधकत्वमिति **प्रथमसूत्रे** निर्णीयते । ततो **द्वितीये सूत्रे** 'जायस्व म्रियस्वे'तिश्रुत्युक्तस्य तृतीयमार्गत्वमाशंक्य, तस्मिन्मार्गे पुण्यपापभोगस्यातिस्वल्पत्वान्न तेन यममार्गबाध इत्युक्तम् । अयं च पंचाहुतिनियमो मर्यादामार्गे एव, न सर्वत्र चेति निर्णीतम् । ततः सूत्रद्वये स्मृतिलौकिकदर्शनाभ्यां यममार्गसत्ता साधिता । तेन 'जायस्वे'ति मार्गो विवेचकसापेक्षत्वात् यममार्गे एव प्रविशतीति साधितम् ॥ ४ ॥

ततः **पञ्चमे त्रिसूत्रे तृतीयशब्दावरोध इत्यधिकरणे** । वृष्टेरन्नभावस्तृतीयाहुतेः फलम् । तत्र बीजावापं विना केवलवृष्टेरन्नासंभवात्प्रत्यक्षविरोधमाशंक्य, तृतीयाहुतौ देवहोमात्कारणभूतमेव जलं वर्षतीत्युच्यते । तस्माच्चान्नं श्रुतावेवोक्तम् । 'ता आप अन्नमसृजंते'ति । तस्मात्प्रत्यक्षस्य लौकिकत्वात्तद्विरोधो न दोषायेत्युक्तम् । ततो **द्वितीयसूत्रे**, 'वायुर्भूत्वा धूमो भवती'तिश्रावणात्ते वाय्वादयो जन्या इति तदनंतरभाविनी वृष्टिरपि जन्या, अपामिवेति कारणभूतं जलं न वक्तुं शक्यत इत्याशंक्य, वाय्वाद्याकृतिमात्रेण स्वरूपान्यथाभावाभावाद्वायुभवनाद्युक्तिर्गौणी । अतस्तदनुरोधेन वृष्टौ जन्या आपो वक्तुमशक्याः । तस्मात्कारणभूता एव ता आप इति निर्बाधमित्युक्तम् । ततस्तृतीये सूत्रे, शीघ्रमेव वृष्टेः सकाशादन्नरूपो भवतीत्युक्तम् । तेन तृतीयाहुतिः सफला विचारिता ॥ ५ ॥

ततः **षष्ठे द्विसूत्रे, अन्याधिष्ठित** इत्यधिकरणे, अन्नाद्रेतोभवनरूपा चतुर्थी आहुतिर्विचार्यते । तत्रान्नस्य कंडनपाकादौ क्रियमाणे जीवस्यापगमात्कथं जीवस्य रेतोभाव इत्याशंक्य, उप्ते बीजे पापिजीवांतराधिष्ठितेऽन्नरूपेण जायमाने पश्चाद्वृष्टौ देवहुतौ जीवोऽन्ने प्रविश्यातिथिवन्निरभिमानस्तत्र तिष्ठतीति न तस्य कंडनादिक्लेशः, किंतु पापिन एव सः । न च तस्यापगमः शंकनीयः । सिद्धान्नादेर्बहुकालपर्युषितत्वे कृमिभावदर्शनात् । एवं तस्यान्नस्य भक्षणेपि पापिन एवान्नभूतस्य जरणादिक्लेशः, नास्य निरभिमानस्येति तस्य रेतोभावो युक्त इत्युक्तम् । ततो **द्वितीये सूत्रे** तस्मिन्नन्ने पापिजीवसहभावादन्नस्याशुद्धौ कथं तेन योग्यदेहसंपत्तिरित्याशंक्य, यथा वैदिकेन प्रोक्षणादिसंस्कारेण लौकिकव्रीहीणां शुद्धिः, तथा वैदिकेन देवकृतहोमरूपसंस्कारेण तस्यान्नस्य शुद्धिरिति । तेन योग्यदेहनिष्पत्तिः निष्प्रत्यूहेत्युक्तम् ॥ ६ ॥

ततः **सप्तमे एकसूत्रे रेतःसिगधिकरणे**, रेतसः पुरुषभावो विचारितः ॥ ७ ॥

ततोष्टमे एकसूत्रे योनेःशरीरमित्यधिकरणे, गर्भस्य न पुरुषत्वम्, किंतु बहिर्निर्गतस्यैव पुरुषत्वमिति निर्णीतम् । अत्र सर्वत्रावसर एव संगतिरिति बोध्यम् ॥ ८ ॥

तेन जघन्याधिकारिणो देहनिष्पत्तिविचारः, मध्यमस्य च योगादिना देहसंपत्तौ पुनर्विचालनाभावाय वैराग्यविचारः पादार्थत्वेन सिध्यति । मुख्याधिकारिणां तु वरणादेव तत्सिद्धिरिति नात्र तद्विचार इति बोध्यम् ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां तृतीयाध्यायस्य प्रथमः पादः।

अथ द्वितीये पादे जीवस्य स्वरूपतो मुक्तियोग्यता विचार्यते । प्रथमपादोक्ताया योग्यताया ज्ञानोक्तिरूपे साधने एव पर्यवसानात् । तदुत्तरं विषयनिश्चयश्च क्रियते । तेनाधिकारसिद्ध्यनंतरं विषयस्य निश्चयो वेदांतार्थरूपब्रह्मस्वरूपस्य शाब्दं परोक्षज्ञानं हृदि स्थिरीभवतीत्येतदर्थं पादारंभः । तथा सति पादयोरेककार्यत्वं संगतिः । आनंतर्यनियामक उपजीव्योपजीवकभावश्चेति बोध्यम् । अत्रैकादशाधिकरणानि । तत्र प्रथमैस्त्रिभिः जीवस्य स्वप्नसुषुप्तिजाग्रदवस्था मुक्तियोग्यताज्ञापनार्थमुपोद्घातेन विचार्यंते । अंतिमैरष्टभिः ब्रह्मस्वरूपम् ।

तत्र प्रथमे षट्सूत्रे संध्याधिकरणे द्वाभ्यां स्वप्नसृष्टिर्भगवतस्तत्कर्तृत्वं च यद्बृहदारण्यके काठके च श्रावितं तत्सृष्टिसंबंधो जीवस्य भवतीति निरूपिता शुद्धिर्व्यर्थेत्याशंक्य, तृतीये तस्याः सृष्टेः मायामात्रत्वेन मिथ्यात्वं साध्यते । तेन जीवस्य तत्कृतगुणदोषसंबंधाभावान्न पूर्वोक्तशुद्धिनिरूपणस्य वैयर्थ्यम् । ततश्चतुर्थे स्वप्नसृष्टेर्मिथ्यात्वे तत्करणस्य किं प्रयोजनमित्याकांक्षाया स्वप्नस्य क्वचित् शुभाशुभसूचकत्वात्फलतः सत्यत्वम्, अन्यत्र तु तादृशभगवल्लीलाप्रदर्शनमात्रं प्रयोजनमित्युच्यते, तच्च वैराग्याय फलिष्यति । ततः पंचमे जीवस्यापि भगवदंशत्वात्कथं स्वप्ने दुःखसंबंधः, दुःखाद्यभिमानो वेत्याकांक्षायां भगवदभिध्यानात् जीवस्यैश्वर्यादिषड्धर्मतिरोभावेन जीवस्य बंधो भगवद्धर्मविपरीतधर्मवत्त्वं च भवति । तेन दुःखित्वादिकं तदभिमानश्च । ततो भगवदिच्छया कथंचिन्मोक्षश्चेति स्वमतमुक्तम् । ततः षष्ठे देहयोगाद्वा ऐश्वर्यादितिरोभावो बंधदुःखादिकं चेति मतांतरमुक्तम् । अस्मिन्पक्षे देहवियोगे सत्यैवैश्वर्याद्याविर्भावः, पूर्वस्मिन्पक्षे तु देहसद्भावेऽपि भगवदिच्छया ऐश्वर्याद्याविर्भावो बंधाभावश्चेत्यैश्वर्याद्याविर्भावदशायां दुःखित्वादिसर्वदोषाभावाद् मुक्तियोग्यता निष्प्रत्यूहेति सिद्धम् ॥ १ ॥

ततो द्वितीये एकसूत्रे तदभावो नाडीष्वित्यधिकरणे जीवस्य द्विविधा सुषुप्तिः । एका नाडीषु, द्वितीया सत्संपत्तौ । तत्र प्रथमायां दुःखाभावमात्रम्, द्वितीयायां तु सुखमपीति द्विविधायामपि सुषुप्तौ न प्रपंचसृष्टिरिति प्रसंगाद्विचारितम् ॥ २ ॥

ततस्तृतीये त्रिसूत्रे अतःप्रबोध इत्यधिकरणे प्रथमसूत्रे जाग्रदवस्थापि भगवत एव भवतीति, यत्र स्वपिति तत्रैव जागर्ति, पश्चाद्धृदयं समागच्छति चेति निरूपितम् । ततो द्वितीये सूत्रे स एव जीवः समायाति, अन्यो वेत्याशंक्य, कर्मानुस्मृत्यादिभिर्हेतुभिः स एव समायातीति निर्णीतम् । ततस्तृतीये सूत्रे मूर्च्छाविशेषेऽतिमुग्धे कर्मानुस्मृत्यादयो न संभवंति । तत्र स एवान्यो वेत्याशंक्य, तत्र स वाऽन्यो वेति संदेह एव पर्यवस्यतीति सिद्धांतितम् । अयं च विचारः प्रसंगानुप्रसंगायात एव ।

एवमधिकरणत्रयेण स्वप्नसुषुप्तिजाग्रद्रूपावस्थात्रयं भगवत्कृतमेव । तत्र जाग्रति जीवस्य मायासंसर्गवारणार्थमुपनिषदर्थनिश्चय आवश्यक इति सूचितम् । एताश्च गुणतो बुद्ध्यवस्थाः । तत्र स्वप्नो राजसः, सुषुप्तिः तामसी, जाग्रदवस्था सात्त्विकी । जीवस्तु देहयोगेन स्वस्मिन्नभिमन्यते, तस्मादेक एव जीवः स्वप्नादिदोषसंबंधरहितस्तादृशजन्मयुक्तो भगवज्ज्ञानरहितो ज्ञानाधिकारीति त्रिभिरधिकरणैः सिद्धमिति ज्ञेयम् ॥ ३ ॥

ततश्चतुर्थे त्रिसूत्रे उभयलिंगाधिकरणे ब्रह्मणः साकारत्वं निराकारत्वं चेत्युभयं सर्वत्र श्रूयत इति स्थानोपाधिकं तत्तदवच्छेदभेदेन च न वक्तुं शक्यत इत्युच्यते । न चोक्तप्रकारेण ब्रह्मभेदेंगीकृते न दोष इति वक्तुं शक्यम्, सर्वत्र ब्रह्मण एकस्यैव कथनाद्, भेददर्शने दोषकथनाच्च ।

१. दोषसंबंधाभावादसंगत्वादिति पाठः ।

एवमुभयलिङ्गविरोधे सिद्धे उपनिषदां पूर्वाध्यायद्वयोक्ता ब्रह्मबोधकता वक्तुं न शक्यत इत्याक्षेपसंगत्योक्तम् ॥ ४ ॥

ततः **पंचमे पंचमसूत्रे अरूपवदेव** हीत्यधिकरणे एकदेशिमतेन समाधानमुच्यते । सत्यमुभयलिंगविरोधस्तथापि 'सर्वकामः सर्वगंधः' इत्यादयो जडजीवधर्मा ब्रह्मण्युपदिश्यमाना उपासनार्था भवंति । न च जडस्य भगवत्कार्यत्वाज्जीवस्य भगवदंशत्वात्तद्धर्मा अपि भगवद्धर्मा एवेति कथमुपासनार्थत्वमिति शंक्यम् । 'बहु स्या'मितीच्छया भगवत एव कार्यरूपतयांशरूपतया चैकदेशेन भवनात्कारणरूपस्य ततो भिन्नतया तस्मिन् रूपे जडजीवधर्मनिषेध एव युक्तः । तथा चाद्वैतपक्षे जडजीवधर्माणामपि ब्रह्मात्मकत्वाद् ब्रह्मत्वमेव, न तु ब्रह्मधर्मत्वम्, अतः सर्वकर्मत्वादीनां ब्रह्मण्युपचार एव, अरूपवतः सर्वप्रपञ्चविलक्षणस्यैवास्थूलादिवाक्यैः प्रधानत्वेन निरूपणात् । ततो **द्वितीयसूत्रे** एवं ब्रह्मणः सर्वव्यवहारातीतत्वे शास्त्रवैफल्यम्, 'मनसैवैतदाप्तव्य'मित्यादिश्रुतिविरोधश्चेत्याशंक्य, यथा सौरः प्रकाशो व्यवहार्योऽव्यवहार्यश्च स्वतो न कर्तुं शक्यते, आगते तु सूर्ये मेघाद्यभावेन सांनिध्यात् व्यवहर्तुं शक्यते, तथा लौकिकवाङ्मनोभिर्ब्रह्म स्वतो न व्यवहर्तुं शक्यते, ईश्वरसंनिधाने तु शक्यते, अतोऽसंनिधाने सर्वव्यवहारातीतत्वम्, संनिधाने तु धर्मवत्त्वेन व्यवहार्यत्वमिति न शास्त्रवैफल्यम् । नापि श्रुतिविरोधः । अन्यथा 'तं त्वौपनिषदं पुरुषं पृच्छामि', 'यतो वाचो निवर्तंत' इत्यादिष्वन्यतरवैयर्थ्यं स्यात् । अतः संनिधानासंनिधानाभ्यां सधर्मकत्वनिर्धर्मकत्वबोधनव्यवस्था मंतव्येत्युक्तम् । **ततस्तृतीयसूत्रे** 'आसीनो दूरं व्रजति,' 'अपाणिपादो जवनो ग्रहीते'त्यादौ परस्परविरुद्धा अलौकिकधर्माः अकारणककार्यवचनान्नित्याः श्राव्यंत इत्यव्यवहार्येपि तादृशधर्मसिद्ध्या शास्त्रवैफल्यनिरास इति किमर्थं संनिधानासंनिधानाभ्यां व्यवस्थांगीक्रियते, अलौकिकानींद्रियाण्येव कुतो नांगीक्रियंत इत्याशंक्य, बृहदारण्यके 'स यथा सैंधवघन' इत्यादिना कृत्स्नस्य ब्रह्मणः प्रज्ञानघनत्वश्रावणान्नेंद्रियाणि कल्पयितुं शक्यानि । न च क्रियाभावोपि । तत्रैव वेदानां निःश्वसितत्वस्य भूतसमुत्थानादेश्च श्रावणेन, तत्रैव निःश्वासोत्थानक्रिययोरुक्तत्वात् । अतो ब्रह्मैव सर्वाकारस्वरूपं, कृत्स्नत्वश्रावणात् । तस्मादिंद्रियकल्पनया विरोधपरिहारो न युक्त इत्युक्तम् । **ततश्चतुर्थे सूत्रे** नन्वभिन्ननिमित्तोपादानतया ब्रह्म जगत्कारणत्वेन सिद्धम्, कारणधर्मा एव च कार्ये भवंति, कामादयस्तु श्राव्यंते निषिध्यंते च, वेदवादिभिस्त्वण्वप्यन्यथा न कल्पनीयम्, अतः कथं विरोधपरिहार इत्याशंक्य, मूर्तामूर्तब्राह्मणे ब्रह्मणो रूपद्वयमुक्त्वा, 'अथात आदेशो नेति नेती'तिवारद्वयं कथनेन कार्यकारणयोः समानप्रकारनिषेधः कारणस्य ब्रह्मण एव त्वनिषेधश्च क्रियते । एवं रूपं निरूप्य 'सत्यस्य सत्य'मिति नाम च श्राव्यते, तेन प्रपंचातिरिक्तस्य ब्रह्मणो विद्यमानत्वात् तस्मिन् जडजीवधर्माणामौपचारिकत्वमेव युक्तम् । गीतास्मृतावपि 'सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जित'मिति 'अनादिमत्परं ब्रह्म न सत् तन्नासदुच्यते' इति चोच्यते । तेन श्रुतिस्मृतिभ्यां जडजीवधर्मरहितं ब्रह्मेति सिध्यतीत्युक्तम् । ततः **पंचमे** प्रपंचधर्मा ब्रह्मण्यौपचारिका इत्यत्र निदर्शनांतरमप्युच्यते, 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन्, उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मे'तिस्मृतौ उपाधिना रूपभेदकथनात्, 'सम सुपिणे'त्यादावपि निरुपमस्य भगवतो यत् पुष्पादिकमुपमानं तदप्युपाधिसंबंधादेव जलसूर्यन्यायेन संभवति । तस्मात् साकारेपि ब्रह्मणि ते धर्मा न संतीत्यौपचारिका मंतव्याः, उपासनार्थमिति नोभयलिंगविरोध इत्येकदेशिमतेन समाधानम् । एतस्य मतस्य किंचिदंशेनोपादेयत्वाय प्रसंगादुक्तम् ॥ ५ ॥

ततः **षष्ठे चतुःसूत्रे अंशुवदग्रहणादित्यधिकरणे** एकदेशिमतं दूषयित्वा समतेन विरोधः समाधीयते । यदुक्तं समवाय्यतिरिक्तस्य ब्रह्मणः समवेतजडजीवसंबंधात् सर्वकामत्वादयः प्रतिबिंबे बिंबधर्मवत् प्रतीयंते, तस्मादौपचारिका इति । तदयुक्तम् । तथाहि । समवाय्यतिरिक्तस्य ब्रह्मणो जडजीवेषु प्रतिबिंबो न वक्तुं शक्यः, तेषामस्वच्छत्वेन प्रतिबिंबाग्राहकत्वात् । ब्रह्मणो व्यापकत्वेन तत्र विद्यमानत्वाच्च । यदि ह्यस्वच्छे व्यापकस्य प्रतिबिंबः स्यात्, दारुण्याकाशस्य स्यात्, स तु न दृश्यत इति । तस्मादुक्तरीत्यौपचारिकत्वमंगीकृत्य समाधानमसंगतमिति **प्रथमसूत्रे** उक्तम् । ततो **द्वितीयसूत्रे** यथा व्यापकस्याप्याकाशस्य करकादिप्रवेशे वृद्धिह्रासभाक्त्वं, महानाकाशः स्वल्प आकाश इत्याद्यभ्रमप्रतीतेः । नच महत्त्वाल्पत्वादीनामौपाधिकत्वम् । करकादीनां व्यंजकत्वेन जनकत्वानंगीकारात् । तथा च यथाकाशे सदोदितव्यंग्यभेदेन व्यापकत्वाल्पत्वयोः सामंजस्यम्, तथा ब्रह्मणि निर्धर्मकत्वसधर्मकत्वयोरपि सामंजस्यात् ब्रह्मगता एव सर्वकामत्वादयो जडजीवाभ्यामभिव्यज्यंते । तस्मात्ते ब्रह्मगता एवेति आकाशधर्मवदुभयलिंगत्वविरोधपरिहारः । ततस्तृतीये **सूत्रे** दर्शनादपि विरोधपरिहारः क्रियते । न हि दृष्टेऽनुपपन्नं नाम, व्याघातात्, अतो विरुद्धधर्माश्रयमेव ब्रह्मेत्यवगंतव्यम् । दर्शनं च मृत्स्नाभक्षणोलूखलबंधनादिषु स्पष्टमिति परमार्थतः स्वरूपविचारेण ब्रह्मस्वभावादेव विरोधपरिहारः । ततश्चतुर्थे युक्त्यापि विरोधः परिह्रियते । प्रकृते ब्रह्मणि लौकिका जडजीवधर्माः निषिध्यंते । अस्थूलादिवाक्येषु स्थूलादिपर्युदासस्यैव दर्शनात् । तथा च पर्युदासः सदृग्ग्राहीति स्थूलसदृशं ब्रह्मेत्येवं सर्वत्र ब्रह्मस्वरूपं ग्राहयति । तथा सति सदोदितमेव तत् । न च व्यंग्यमेव तदिति वाच्यम् । यतो यत्रैव धर्मान् निषेधति, तत्रैवालौकिकान् वक्ति, यथाऽस्थूलादिवाक्ये 'एतस्यैवाक्षरस्य प्रशासने गार्गी'त्यादिनालौकिकं प्रशासितृत्वादिकं वदति, तथा सति तत्सहचरितत्वात् स्थूलत्वादयोप्यलौकिका एव सदोदिताः सेत्स्यंतीति लौकिकानां निषेधः, अलौकिकानां सत्ता, इति युक्त्या विरोधपरिहार इति मतेन शब्दबलविचारेण द्वेधा समाधानम् ॥ ६ ॥

ततः **सप्तमे द्विसूत्रे तदव्यक्तमाह हीत्यधिकरणे**ऽर्थबलविचारेण विरोधः परिह्रियते, अन्यथा अर्थबलेन विचारकाणामृषीणामाक्षेप उत्तिष्ठेदिति तन्निवारणायायमारंभः । तत्र सर्वाणि विरुद्धवाक्यान्युदाहृत्य चिंत्यंते, 'न चक्षुषा गृह्यते,' 'कश्चिद्धीरः प्रत्यगात्मानमैक्षत,' 'अपाणिपादः,' 'विश्वतश्चक्षु'रित्यादीनि विरुद्धवाक्यानि श्रौतत्वात् प्रमाणानि । वस्तुविचारे तु एकं वस्तु द्विरूपं न संभवति । अतः प्रमाणांतरानुरोधेन एकस्य स्वार्थे प्रामाण्यमन्यस्योपचरितार्थत्वं वक्तव्यम् । तत्र कस्य स्वार्थत्वं, कस्योपचरितार्थत्वमित्याकांक्षायां 'अगृह्यो नहि गृह्यते,' इति श्रुतिः प्रत्यक्षानुरोधिनी । नहि ब्रह्म केनचित् चक्षुषा वा मनसा वा दृष्टमस्ति, सर्व(स्व)रूपत्वे तु सर्वैर्द्रष्टुं शक्येत, तस्मात् सर्वधर्मवत्त्वेन प्रतिपादकानि वचनान्युपचरितार्थानि, अनुभवविरोधात्, अव्यक्तत्वबोधकानि तु स्वार्थप्रतिपादकानि, अनुभवसंवादादिति **प्रथमसूत्रे** पूर्वपक्षमुक्त्वा, **अपि संराधन** इति **द्वितीयेन** समाधानमाह । 'श्रद्धाभक्तिज्ञानयोगादवेहि,' 'यमेवैष वृणुते' इत्यादिश्रुतिभिः, 'भक्त्या त्वनन्यया शक्य' इत्यादिस्मृतिभिश्च साकारब्रह्मणो दर्शनमुच्यते । 'ततस्तु तं पश्यते निष्कलं ध्यायमान' इत्यनेन निष्कलस्यापि दर्शनमुच्यते । अतः प्रत्यक्षस्य रूपद्वयसाधारणत्वात् साकारमनंतगुणपरिपूर्णं निर्गुणं विरुद्धधर्माश्रयं ब्रह्मेति साक्षात्क्रियमाणार्थबलेन साक्षात्काररूपार्थबलेन वा निर्णय इति साधितम् ॥ ७ ॥

ततोऽष्टमे त्रिसूत्रे **प्रकाशादिवच्चेत्यधिकरणे** पूर्वोक्त एवार्थः प्रकारांतरेण स्थिरीक्रियते । तत्र यथा सूर्यचंद्रमणिप्रकाशादिपूष्णशीतौ उभयरूपाः स्पर्शाः प्रतीयमाना अपि तेजसि तावंतो नांगीक्रियंते, किंतूष्ण एव स्पर्शोंगीक्रियते, एवं हिमतप्तकुंडादिषु प्रतीयमाना अपि जले तावंतो नांगीक्रियंते, किंतु शीतस्पर्श एवांगीक्रियते, एवं सुवर्णे वर्णभेदा अपि, अतो न ते स्वाभाविकाः, तेजस्त्वादिस्वभावहानिप्रसंगात्, तथा ब्रह्मणोऽपि निर्विशेषत्वमेवांगीकर्तव्यं, सर्वत्र निर्विशेषं ब्रह्मेत्येव प्रसिद्धेः । अत एव 'अगृह्यो नहि गृह्यते' इत्यादिश्रुतयोऽपि संगच्छंते । न च पूर्वोक्तश्रुतिप्रत्यक्षादेः का गतिरिति शंकनीयम् । तपःप्रणिधानादिकर्मणि यथा तेषामुपासकानां कामस्तथा प्रकटीभवतीति तत्कामहेतुकं तादृशप्रत्यक्षम् । अत एव क्वचित्प्रत्यक्षं क्वचिदन्यथाप्रत्यक्षं च यद्येकवारमेकरूप एव प्रकटः स्यात्तादृशरूपमंगीक्रियेतापि, किंतु वारंवारं किंचिद्वैलक्षण्येन प्रकटीभवति । अतः प्रकाशोऽपि कृत्रिम एव, दीपप्रकाशवदित्येका शंका । तस्मान्न भक्तप्रत्यक्षेण निर्णय इति **प्रथमसूत्रे** उक्तम् । ततो **द्वितीयसूत्रे** एकस्य वस्तुनः निमित्तं विना प्रतिक्षणमन्यान्यादृशत्वं न वक्तुं शक्यते, अतोनंतरूपेणाविर्भावे भक्तकाम एव निमित्तम् । तथा सति तद्विग्रह एव, न तु ब्रह्मस्वरूपम् । अत एव 'यद्यद्धिया तु उरुगाय विभावयंति तत्तद्वपुः प्रणयसे सदनुग्रहाये'ति तृतीयस्कंधे ब्रह्मणाप्युक्तम् । अतस्तच्छरीरमेव, न तु ब्रह्मस्वरूपमिति द्वितीया शंका । तस्मान्न श्रुत्या निर्णयः, नापि भक्तप्रत्यक्षेणेति सूत्रद्वयेनाशंक्य, **तृतीयसूत्रेण** सिद्धांतमाह । नैवं केवलयुक्त्या लौकिकदृष्टांतेन निर्णयः कर्तुं शक्यः, शास्त्रवैयर्थ्यप्रसंगात् । अत्र हि वेदादेव ब्रह्मस्वरूपमवगम्यते, तत्कथं स्वरूपशक्त्यैकतरनिर्णयः, वेदे निर्गुणत्वेनानंतगुणपूर्णत्वेन च व्यपदेशात् । तर्ह्येकस्यानेकधाभानं कथमिति तु न शंक्यम् । यथा एक एव सर्प ऋजुरनेकाकारः कुंडलश्च भवति, तद्वदुभयरूपताया उपपत्तेः । न चैवं यथाश्रुतांगीकारे शास्त्रवैफल्यं शंक्यम्, नानास्वभावैः सूरिव्यामोहे तन्निवारणार्थत्वेन शास्त्रसाफल्यात् । तस्माच्छ्रुतिप्रत्यक्षाभ्यां यत्पूर्वं निर्णय उक्तः, स एव सिद्धांत इत्युक्तम् ॥ ८ ॥

ततो **नवमे त्रिसूत्रे प्रकाशाश्रयवद्वेत्यधिकरणे** धर्मस्वरूपविचारेण ब्रह्म सगुणं निर्गुणमिति पक्षद्वयमपि स्थाप्यते । तत्र धर्मा यदि ब्रह्मस्वरूपाद्भिन्नास्तदा कार्याः, यद्यभिन्नास्तदा ब्रह्मैवेत्याशंक्य, प्रकाशाश्रयवत् भिन्नाभिन्ना इति सिद्धांत उक्तः । यथा प्रकाशाश्रयाः सूर्यादयस्तेजःप्रकाशाद्भिन्नाः प्रकाशधर्मकत्वात्, अभिन्नाश्च तेजस्त्वात्, एवं 'परास्य शक्ति'रित्यादौ षष्ठीनिर्देशाद्भिन्नाः, सच्चिदानंदरूपत्वेनाभिन्नाश्च । तथा च धर्माणां भिन्नत्वेन ब्रह्मणोनंतगुणपूर्णत्वं, तेषामपि सच्चिदानंदरूपत्वेन ब्रह्माभिन्नत्वाद्ब्रह्मणो निर्गुणत्वमित्युभयमप्युपपन्नमिति स्वमतम् । ततः पूर्वं ब्रह्म निर्गुणमेव, पश्चादिच्छारूपेण, ततो धर्मरूपेण, ततः प्रपंचरूपेणाविर्भवतीत्युत्पत्तिविचारेण धर्माणां पश्चाद्भिन्नत्वेपि कार्यत्वाद्ब्रह्मत्वं कटककुंडलादीनां सुवर्णत्ववदित्येकदेशिमतमपि सूत्रद्वयेनांगीकृतम् । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया अत्राप्युपपत्तेरिति । एतयोः प्रथममेव ज्याय इति भाष्यप्रकाशादवगंतव्यम् । एतेषां पंचानामप्यधिकरणानामेककार्यकारित्वं संगतिरवगंतव्या । पंचभिरपि श्रुतेर्बोधकताप्रकारस्यैव निश्चायनात् ॥ ९ ॥

ततो **दशमे सप्तसूत्रे परमतः सेतून्मानेत्यधिकरणे**, 'य आत्मा स सेतुर्विधरण' इत्यादिभिः श्रुतिभिर्ब्रह्मणः सेतुत्वादिकमुक्तम्, ब्रह्मणस्तथात्वे परत्वं न संगच्छते, सेत्वादीनां साधनादि-

---

१. विरुद्धधर्माश्रयत्वरूपप्रत्यक्षप्रामाण्यं दृढीक्रियते । २. शीतानुभवरूपा इति पाठः ।

रूपत्वात् । अतो देशकालवस्तुस्वरूपकृतचतुर्विधपरिच्छेदरहितं ब्रह्मणोऽन्यदेव किंचित्परं वक्तव्यमिति प्रथमसूत्रे आशंक्य, द्वितीये 'सेत्वादिसामान्यात्सेत्वादिव्यपदेशार्थः । संसारसागरतरणोपायत्वात्सेतुत्वम्, निर्लेपत्वायाकाशत्वमित्यादिकं गौण्या व्यपदिश्यते । यथा कुंडपायिनामयने 'मासमग्निहोत्रं जुहोती'ति, तस्मात् गुणार्थमेव तदुक्तिः, न तु सर्वप्रकारकसाम्यार्थम् । अतः सेत्वादिदोषाभावात् ब्रह्मैव परम्, नान्यदिति समाहितम् । ततस्तृतीये यथा भूतादि पादवत्त्वेनोपासनीयम्, तथा गौण्यान्यसमानधर्मवत्त्वव्यपदेशस्य किं प्रयोजनमित्याकांक्षायां सेत्वादिधर्मवत्त्वेनोपासनीयमित्युपासनार्थत्वं प्रयोजनमुक्तम् । ततश्चतुर्थे स एवायमित्यतिदेशेप्युपासनासंपत्तेः किमर्थो धर्मातिदेश इत्याशंक्य, यथा चंद्रादित्याग्नितेजसां तेजस्त्वेनैक्येपि स्थानविशेषान्न समानप्रकाशकत्वम्, तथा स एवायमित्यतिदेशेऽपि न समानधर्मवत्त्वमिति ज्ञानसंभवात्, तन्निवृत्त्यर्थं धर्मातिदेश इति प्रयोजनमित्युक्तम् । तेन ब्रह्मैव सर्वत्रोत्कृष्टमिति साधितम् । ततः पंचमे ब्रह्मणोऽन्यत् परमितिमतस्य दूषणार्थं, यदि हि सत्यज्ञानाद्युक्तधर्मविशिष्टब्रह्मणोऽन्यत्किंचित्परं स्यात्, तदा येनकेनचित्प्रमाणेन प्रमितं स्यात्, यतो नैवमतो नैवमितिप्रमाणाभावरूपा युक्तिरुक्ता । ततः षष्ठे यथा ब्रह्मणि सेतुत्वादिकं श्रुत्योक्तम्, तथा 'न तत्समश्चाभ्यधिकश्च दृश्यते' इति श्रुत्या समाभ्यधिकनिषेधोप्युक्तः । यदि ब्रह्मणः सकाशादधिकं परमन्यत्स्यात्तदा तन्न निषेधेत्, यत एवमतो नैवमिति युक्त्यंतरमुक्तम् । तस्मात्सेत्वाद्युक्तिर्गौण्येवेति साधितम् । ततः सप्तमे ब्रह्मणोन्यस्य परत्वनिरासेन 'आकाशवत्सर्वगतश्च नित्य' इत्यादिश्रुतिभ्य एव ब्रह्मणः सर्वगतत्वम्, नत्वनुमानैकशरणम् । अनुमानं तु श्रुतिसंवादित्वात्प्रमाणमस्त्विति फलितमुक्तम् । तेन ब्रह्मण एव परत्वम्, नान्यस्य । यद्यपि समन्वयविचार एवैताः श्रुतीः विचार्य दोषाः परिहृताः, तथापि स्वरूपविरोधपरिहारप्रस्तावात्पुनरुच्यंते । सर्ववाक्यप्रतिपाद्यमेकमेव ब्रह्मेत्यपि अर्थबलविचारेण न सिद्धम्, अतो विशिष्टज्ञानोत्पादनार्थं पुनः अर्थबलेन विचारितम्; अतो न दोष इति ज्ञेयम् । अर्थबलं च समाभ्यधिकरहितं यत्स्वरूपं तद्बलम् । एवं सर्वोत्तमत्वनिरूपणेनोत्तमाधिकारिणां भजनीयत्वप्रयोजकं रूपं वक्ष्यमाणोपोद्घाततया निरूपितम् । एवमग्रेऽपि ॥ १० ॥

तत एकादशे चतुःसूत्रे फलमत इत्यधिकरणे जघन्यमध्यमानामर्थे ब्रह्मणः फलदत्वं सूत्रद्वयेनोच्यते । ततस्तृतीये श्रुत्युपपत्तिभ्यां जैमिनिमतेन धर्मस्य फलदातृत्वमाशंक्य, चतुर्थेन भगवत एव कर्मकारयितृत्वान्न धर्मस्य फलदाने स्वातंत्र्यम्, किंतु ब्रह्मण एव इत्येवं तन्मतं दूष्यते ॥ ११ ॥

एवमष्टभिरधिकरणैः श्रुतीनां बोधकताप्रकारविचारेण तत्तदधिकारिणं प्रति श्रुतीनां तादृशतादृशबोधजनकत्वमित्यस्मिन्पादे निर्णीतमिति बोध्यम् ।

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां तृतीयाध्यायस्य द्वितीयः पादः ।

अत्र पूर्वपादे श्रुतीनां बोधकताप्रकारनिरूपेण यथा परोक्षज्ञानजनकत्वं तथा निरूपितम् । अतःपरं यथा साक्षात्कारो भवति, तथा तत्साधनमुपासनारूपं वक्तव्यम् । उपासनायां च क्रियमाणायां धारणासिद्धौ मानसी मूर्तिरभिव्यक्ता भवति । तत उपासनापरिपाके साक्षात्कार इति तदर्थमस्मिन्पादे गुणोपसंहारांतरंगविचारेण कर्तव्यतया विचार्यते । तत्र किमंतरंगमित्याकांक्षायां 'योगा-

स्त्रयो मया प्रोक्ता' इति भगवदुक्तेषु त्रिषु साधनेषु ज्ञानभक्ती अंतरंगे । तत्र निर्विण्णाधिकारकत्वात् ज्ञानस्यांतरंगता । निर्वेदाभावेपि लौकिकात्यासक्तिरहिताधिकारकत्वाद्भक्तेरंतरंगतेति भेदः । कर्म तु कामाधिकारकत्वाद्बहिरंगसाधनम् । अतः कर्मोपसंहारात्पूर्वं ज्ञानभक्त्युपयोगित्वात् पूर्वं गुणोपसंहारो विचार्यते ।

स कथं कर्तव्य इत्याकांक्षायां ज्ञानभक्त्योः सविषयत्वात् पूर्वं विषयो विचारणीयः । तत्र विषयः पूर्वसिद्धं ब्रह्म, तदेव च फलदाने समर्थमिति द्वितीयपादांते स्थितम् । तदेतत्स्मारयितुमुपसंहारोपोद्घातत्वेन ज्ञानभक्त्योर्विषयतया ब्रह्मणः ज्ञानभक्तिषु युक्ततयोपासनायाश्च सर्ववेदांतप्रत्ययत्वं सूत्रद्वयेन विचारितम् । तेन ज्ञानाधिकारिभिस्तथैवोपासना कार्येति सेत्स्यति ॥ १ ॥

तत इदानींतनानां सर्वशाखाज्ञानाभावेन सर्ववेदांतप्रत्ययत्वस्यावधारयितुमशक्यत्वात्तेषामुपकाराय भक्तिमार्गीयोपासनोपकाराय काम्योपासनोपकाराय च तत्तच्छाखानुरुद्धशिष्टाचारमनुरुध्य, तत्तद्भक्तिमनुरुध्य, तत्तत्काममनुरुध्य च स्वाध्यायादिसूत्रद्वयेऽनुपसंहारहेतुकथनेन तत्तद्गुणोपसंहाररूपः संकोचो विचारितः ॥ २ ॥

ततो गुणोपसंहार एवास्य पादस्यार्थ इति बोधयितुमुपसंहारसूत्रेण सर्वोपसंहारतत्संकोचयोः काम्योपासनोपयुक्तोपसंहारस्य च बीजमुक्तम् । ततोऽन्यथात्वादिसूत्रत्रयमध्ये प्रथमेन सर्वोपसंहारपक्षेऽब्रह्मत्वरूपं बाधकं निवारितम् । ततो द्वाभ्यां संकोचपक्षे तदेव बाधकांतरेण भक्तिमार्गीयोपासकानामर्थे निवारितम् । ततश्च अनित्यत्वेन प्रतीयमानानां स्वरूपधर्माणामेकेन नित्यत्वं, तदग्रिमे तदुपपत्त्यर्थं भक्तनित्यत्वं, लीलापदार्थानां भगवदभेदश्चोपपादितः । एवं लीलापदार्थानां भगवदभेदे सति भगवत्तुल्यत्वं स्यादिति तन्निवृत्त्यर्थं पूर्णानंदत्वादीनां भगवदसाधारणधर्माणां तेष्वभाव आनंदादिसूत्रेण प्रतिपादितः । तेन भक्तेषु तदनुपसंहारः सिध्यति । ततः प्रियशिरस्त्वसूत्रे अधिकारिभेदेन स्वरूपोपासकस्य प्रियत्वादीनां शिरस्त्वादिरूपेणानुपसंहारस्तदुपसंहारश्च प्रतिपादितः । तत एकेनोपसंहारपक्षे बीजमुक्तम् । तत आध्यानादिसूत्रद्वये उपसंहारसंकोचे बीजमुक्तम् । एवमस्मिन्नधिकरणे पादार्थरूप उपसंहारप्रकारः सपरिकरो विचारितः । भगवतः कैवल्यरूपं मुख्यत्वरूपमैक्यं च समर्थितम् । ततोग्रे एतस्यैव प्रपंचः ॥ १ ॥

ततोग्रे चतुर्भिरधिकरणैरुपासनानियामकसंबंधिभेदे रूपात्मकः संबंधो विचार्यते । तत्रादौ **द्वितीये द्विसूत्रे आत्मगृहीत्यधिकरणे** तद्गुणोपसंहारनियमनाय तत्तद्विभूतिद्वारा ब्रह्मण एव फलदातृत्वसमर्थनाय भक्तिज्ञानमार्गोपकारकशांत्युत्पादनाय विभूतीनां ब्रह्मात्मकत्वभावनाय च अन्नमयादिषु विभूतिष्वानंदमयस्यैव शरीराभिमानित्वं विचारितम् ।

ततस्तृतीये षट्सूत्रे कार्याख्यानादित्यधिकरणे प्रथमसूत्रवर्णकद्वयमध्ये प्रथमवर्णकेन विभूत्युपासनेषु आनंदमयस्याध्यात्मिकरूपेणैव फलदातृत्वरूपविशेषसमर्थनाय पूर्वोक्तविभूतीनामन्नमयादीनां चतुर्णां पुरुषाणामाधिभौतिकत्वनिराकरणेनाध्यात्मिकत्वं समर्थितम् । द्वितीयेन वर्णकेन सर्वगुणोपसंहारायानाविर्भूतपुरुषोत्तमविग्रहस्यैवात्मत्वं ज्ञानभक्तिमार्गीयसाधारण्येन विचारितम् । ततो द्वितीयसूत्र आविर्भूतस्य श्रीकृष्णादिरूपस्याप्यात्मत्वमेवेति व्यापकत्वैकरसत्वसच्चिदानंदत्वादयः सर्वे धर्मा उपसंहर्तव्या इति केवलभक्तार्थं विचारितम् । **ततस्तृतीयसूत्रे** आवेशिनि गुर्वादावाविष्टे रूपे

१. प्रथमेति मूलपाठः । २. सर्ववेदांतप्रत्ययत्वेन ।

सर्वभगवद्गुणोपसंहारः ज्ञानिभक्तार्थं विचारितः । ततस्त्रिभिरावेशिनि गुरुप्रतिमादावाविष्टे रूपे तदनुपसंहारः केवलभक्तार्थं विचारितः ॥ ३ ॥

ततश्चतुर्थे एकसूत्रे **पुरुषविद्याया**मित्यधिकरणे उत्तमाधिकारिभिरशेषगुणपूर्णं परं ब्रह्मैवोपास्यम्, न विभूतिरूपमिति साधितम् । आध्यात्मिकेषु विभूतिरूपेषु सर्वगुणानुपसंहारेऽसाधारणगुणानामज्ञानरूपो हेतुश्चोक्तः ॥ ४ ॥

ततः पंचमे द्विसूत्रे **वेधाद्यधिकरणे** पूर्वसूत्रेणासन्यरूपे चेतनविभूतौ भगवत्संबंधाद्दोषाभावनिरूपणात्कैमुतिकन्यायेन मूलरूपस्य निर्दोषत्वं समर्थितम्, आधिभौतिकरूपाणां जीवानां सदोषत्वं च बोधितम् । ततो **द्वितीये सूत्रे** तत्सदोषत्वं भगवत्सकाशात् विभागदशायामेव, तथा सति मुक्तिदशायां तारतम्याभावे प्राप्ते भगवत्तुल्यतापि स्यादिति तन्निवारणार्थं तदापि न्यूनगुणकत्वं स्थापितम् । तेनाध्यात्मिकरूपेषु कतिपयगुणोपसंहारः, मूलरूपे सर्वगुणोपसंहारः । लौकिकरूपेषु मुक्तिदशायामेव निर्दोषत्वपरिमितगुणोपसंहारौ, न संसारदशायामिति निर्णीतम् । एवं चतुर्भिरधिकरणैः रूपभेदः प्रपंचितः ॥ ५ ॥

ततः षष्ठाधिकरणमारभ्य पंचदशभिरधिकरणैरुपसंहारनियामकस्तत्तन्मार्गरूपः संबंधिभेदस्तत्तदधिकारनियामकं मार्गतारतम्यं च निरूप्यते ।

तत्र **षष्ठे द्विसूत्रे संपराया**धिकरणे अंतरंगसाधनयोर्ज्ञानभक्त्योर्मूलरूपोपासनासंभवाद्विशेषे प्राप्तेवसरसंगत्या स्वरूपतो मर्यादाभक्तेर्ज्ञानाज्ज्यायस्त्वस्य भक्तौ दोषाभावस्य च निरूपणेनांतरंगतरत्वं निरूपितम् ॥ ६ ॥

ततः **सप्तमे एकसूत्रे गतेरर्थवत्त्व**मित्यधिकरणे हेतुबोधनेन तदेव दृढीकृतम्, मार्गभेदेन पुष्टिभक्तेरंतरंगतमत्वं च निरूपितम् ॥ ७ ॥

ततोष्टमे **उपपन्ना**धिकरणे पुष्टिभक्तेरंतरंगतमत्वं दृढीकृतम् । एवं त्रिभिरधिकरणैरंतरंगसाधनानां त्रैविध्ये निर्णीते पूर्वं 'इतरे त्वर्थसामान्या'दित्यादिसूत्रत्रयेणोपसंहारानुपसंहारबीजबोधने कृते किमीयोपासनायां के के गुणा उपसंहार्या इत्याकांक्षापि पूरिता । ज्ञानमार्गीयोपासनायां तदुपयोगिनः सर्वे, तत्तद्भक्तिमार्गीयोपासनायां तु तत्तदुपयोगिनस्ते ते इत्यर्थादेव सिद्धेरिति ॥ ८ ॥

ततो **नवमेऽनियमा**धिकरणे ज्ञानापेक्षयांतरंगाणां भक्तीनां मुक्तिसाधने समुच्चयविकल्पयोरनियमः प्रसंगेन विचारितः । पादार्थसंगतिस्तु पूर्वसिद्धैवात्रापि ॥ ९ ॥

ततो **दशमे आधिकारिका**धिकरणे आधिकारिकाणां मुक्तिसाधने प्रवृत्त्यर्थमाधिकारिकाणां भगवद्धर्माणां मुक्तिसाधनत्वाभाव उपोद्घातगर्भप्रसंगसंगत्या प्रतिपादितः । आधिकारिकाणां धर्माणां भगवत्संबंधितया साधनत्वप्राप्तावपवादसंगत्या उपोद्घातगर्भप्रसंगसंगत्या वा मुक्तिसाधनत्वाभावः प्रतिपादितः । उपसंहारस्तु ज्ञानादिमार्गानुरोधीति तदनुसारेणायातीति पादार्थेनापि संगतिः १०

ततः पूर्वं संपरायाद्यधिकरणेषु ज्ञानभक्त्योः स्वरूपतस्तारतम्यसाधनेपि विषयफलयोरविशेषादंतरंगतरत्वादिकस्याप्रयोजकत्वं प्राप्तमिति तन्निवारणार्थमेकादशे **द्विसूत्रेऽक्षरधिया**मित्यधिकरणे ज्ञानभक्तिसंबंधिविषयफलयोर्भेदबोधनात् भक्त्यपेक्षया ज्ञानस्यापकर्षबोधनेन भक्तावंतरंगतरत्वादिकं तयैव संगत्या दृढीकृतम् । उपसंहारस्तु तत्तदुपयोगी प्रागेव सिद्धः ॥ ११ ॥

---

१. भौतिक इति पाठः । २. भक्ति इति पाठः ।

६ ब्र. सू. र. प्र.

ततो द्वादशे त्रिसूत्रेंतरा भूतग्रामवदित्यधिकरणे श्रुतावहंग्रहोपासनस्य मुख्यत्वकथनात् ज्ञाने भक्तौ च तस्य तुल्यत्वादुभयोस्तौल्यस्य ज्ञानाधिक्यस्य वा प्राप्तौ तस्या उपासनाया भक्त्येकदेशत्वकथनेन ज्ञानापेक्षया मुख्यभक्तेर्विरहरूपांतरंगसाधनत उत्कर्षः पूर्वोक्तसंगत्या प्रतिपादितः ॥ १२ ॥

ततस्त्रयोदशे द्विसूत्रे सैव हीत्यधिकरणे प्रथमसूत्रेण विहिताविहितरूपाया द्विविधाया अपि मध्यमभक्तेः पूर्वोक्तसंगत्या साधनत उत्कर्षः प्रतिपादितः । द्वितीयसूत्रेण भगवद्विषयककामादीनामपि मुक्तिफलकत्वकथनेन मुक्तौ भगवद्विषयकत्वरूपसाक्षात्संबंधस्यैव मुक्तिसाधनतावच्छेदकत्वम्, न तु ज्ञानत्वं भक्तित्वं वेति निरूपितम् ॥ १३ ॥

ततश्चतुर्दशे द्विसूत्रे आदरादित्यधिकरणे कैमुतिकन्यायेन कर्मापेक्षया भक्तिसाधनानामुत्कर्षः कर्मिप्रत्यवस्थाननिवृत्त्यर्थं प्रतिपादितः ॥ १४ ॥

ततः पंचदशे एकसूत्रे तन्निर्धारणाधिकरणे स्वकृतवेदमर्यादारक्षार्थं विहिताविहितभक्तिमार्गीयस्य कर्मकरणाकरणयोर्हेतुफले बोधिते । द्वितीयपक्षेपि मुख्यभक्तेः पूर्वोक्तभक्तिद्वयादुत्कर्षः साधनतः फलतश्च प्रसंगात् प्रतिपादितः ॥ १५ ॥

ततः षोडशे प्रदानवदित्यधिकरणे सर्वात्मभावात्मकमुख्यभक्तेर्विहितयावत्साधनसाध्यत्वनिराकरणेन वरदानवत्प्राप्तिरित्युक्तम् ॥ १६ ॥

ततः सप्तदशे दशसूत्रात्मके लिंगभूयस्त्वाधिकरणे सर्वात्मभावात्मकमुख्यभक्तेः स्वरूपमंतरंगतमत्वकाष्ठाबोधनार्थं श्रुतिवाक्यैः प्रपंचितम् ॥ १७ ॥

ततोऽष्टादशे त्रिसूत्रे व्यतिरेकाधिकरणे ज्ञानिनां पूर्णाक्षरज्ञानाभावस्य प्रतिपादनेन अग्रिमसूत्रद्वये निदर्शनकथनेन च भक्तानां पूर्णतज्ज्ञानकथनात्सर्वात्मभावरूपमुख्यभक्तिफलस्य भोग्यस्य पुरुषोत्तमज्ञानमध्यमभक्तिफलरूपपुरुषोत्तमसायुज्यादाधिक्यमर्थतः प्रतिपादितम् ॥ १८ ॥

तत ऊनविंशे एकसूत्रे भूम्न इत्यधिकरणे फलविचारेण सर्वात्मभावस्य साधनदशायां दुःखरूपदोषः परिहृतः ॥ १९ ॥

एवं च पंचदशभिरधिकरणैः संबंधिरूपमार्गस्तत्तारतम्यं च निरूपितम् । एवं स्वरूपपरासूपासनासु तारतम्यबोधनेन तासु तासु तत्तज्ज्ञानोपयोगिनो गुणा उपसंहार्या इति पादार्थसंगतिः ।

ततो विंशे एकसूत्रे नानाशब्दादिभेदादित्यधिकरणे ततो न्यूनासु सत्त्वोपहितावताररूपोपासनासु नानात्वं विचारितम् ॥ २० ॥

ततोग्रिमे एकसूत्रे एकविंशे तासां तासां विकल्पो विचारितः । गुणोपसंहारस्तु तत्तज्ज्ञानोपयोग्येवेति पूर्वोक्तैव व्यवस्था ॥ २१ ॥

ततो द्वाविंशे काम्योपासनासु समुच्चयविकल्पौ यथाकामं विचारितौ, तेन तासु तत्तत्कामोपयोगी गुणोपसंहारो बोधितः ॥ २२ ॥

ततस्त्रयोविंशे द्विसूत्रे अंगेष्वित्यधिकरणे उपासनांगानां व्रतानामाश्रयनित्यत्वं प्रसंगाद्विचारितम् ॥ २३ ॥

ततोऽग्रिमे द्विद्विसूत्रे **सर्वाभेदादित्यधिकरणद्वये** ज्ञानमार्गीयोपासनासु सर्वगुणोपसंहारानुपसंहारावधिकारिभेदेन विचारतौ। तेन ज्ञानमार्गीयो विचार एवात्र मुख्यो, **भक्तिमार्गविचारस्तु भक्तौ भगवत्कृपारूपस्याधिकस्य साधनस्य प्रवेशान्न सर्वोपयोगी** यद्यपि, तथापि शास्त्रारंभे ब्रह्मसंबंधिजिज्ञासाप्रतिज्ञानुरोधात्कृतः, तत्प्रयोजनं त्वग्रिमपादे 'भक्तिमार्गप्रचारैकहृदयो बादरायण' इति श्लोकेन वक्तव्यमिति ॥२४,२५॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां तृतीयाध्यायस्य तृतीयः पादः ॥

वेदांतेषु कर्मांगभूता उद्गीथाद्युपासना उक्ताः। आचार्येणापि अंगेषु यथाश्रयभाव इत्यादिना पूर्वपादांते ता विचारिताः। भाष्यकारैरपि प्राचीनवृत्तिकारादिसंमतं पूर्वोत्तरकांडयोरैकशास्त्र्यमंगीकृतम्। तृतीयाध्यायारंभे च चतुर्थपादस्य कर्मोपसंहारोर्थ उक्तः। तथा सति ज्ञानेपि कर्मापेक्षास्तीति सिद्धम्। प्रकृतपादारंभे च प्रथमसूत्रेण स्वमतमुक्त्वा, ततः षट्सूत्रैरीश्वरस्य ज्ञानस्य च कर्मशेषबोधकं जैमिनिमतं पूर्वपक्षत्वेनोपन्यस्य, अधिकोपदेशादित्यादिभिर्नवभिः सूत्रैर्ज्ञानस्येश्वरस्य च यज्ञादिकर्मशेषत्वं निराकृतम्। ततः ऊर्ध्वरेतःसु चेति सूत्रेण ज्ञानस्य संन्यासाश्रमिणः कर्मशेषत्वमपि निराकृतम्। तेन ज्ञानस्य न कर्मशेषत्वम्। तेन पूर्वकांडवैयर्थ्यापत्तौ यज्ञादिकर्मणां यथाकथंचित्परंपरया मोक्ष एव फलत्वेन परामृश्यत इति नैकशास्त्र्यादिहानिरित्यभिसंहितम्। ततः परामर्शसूत्रे तदपवादं पूर्वपक्षीकृत्य, अनुष्ठेयसूत्रे ज्ञानसाधनत्वेन तत्करणमंगीकृत्य कर्मस्वातंत्र्यं निवारितम्। अग्रिमैः पंचभिः सूत्रैस्तदेव समर्थयित्वा ज्ञानस्योत्कृष्टत्वं साधितम्। एवं पंचविंशतिसूत्रात्मकेनाद्याधिकरणेन उपसंहारोपोद्घातत्वेन कर्मणः स्वातंत्र्यास्वातंत्र्ये विचारिते। तत्र भगवत्प्राप्तिरूपस्य पुरुषार्थस्य सर्वात्मभावरूपपुरुषोत्तमज्ञानैकलभ्यत्वमिति स्थितम् ॥ १ ॥

ततः कर्मणः किं परोक्षज्ञानसाधनत्वमपरोक्षज्ञानसाधनत्वं वेत्यपेक्षायां **सर्वापेक्षेति षट्सूत्रे द्वितीयाधिकरणे** साक्षात्कारस्य स्वरूपोपकारार्थं कर्मज्ञानभक्त्यपेक्षां प्रतिज्ञाय तत्तन्मार्गोक्तकर्मसापेक्षत्वं साधितम्। पूर्वपाद एवांतरंगसाधनविचारे ज्ञानभक्त्योरावश्यकताया निरूपितत्वात्। ततो द्वितीयसूत्रे शमदमादीनां सत्त्वशोधकत्वे तैरेव ज्ञानसिद्ध्या यज्ञादिकर्मनिरपेक्षत्वमाशंक्य, तेषां विशेषानुष्ठेयत्वम्, न तु कर्मनिवारकत्वमिति तदानीमपि यज्ञादिकर्म कर्तव्यमेवेति सिद्धांतितम्। ततः ज्ञानिनः सर्वान्नभक्षणस्यानुज्ञानात्कामतः सर्वभक्षणे प्राप्ते आहारशुद्ध्यभावेन शमाद्यसंभवात् पयोव्रताद्यभावेन यज्ञादेरप्यसंभवाद्यज्ञशमदमादीनां साक्षात्कारजनकत्वमसंगतमित्याशंक्य, सर्वान्नानुमतेः प्राणात्ययाद्यापत्तिविषयत्वेनान्यदा तदप्राप्त्या तदानीं कामचाराभावात् यज्ञशमदमादिसंभवेन तेषां ज्ञानप्रतिबंधनिवर्तकतया कारणत्वं निर्बाधम्। यद्यपि पूर्णस्य ज्ञानस्य कर्मनाशकत्वम्, तथापि साधनदशायां तदपेक्षास्तीत्युपसंहारहेतुतया सर्वान्नानुमत्यादिसूत्रचतुष्टये साधितम् ॥ २ ॥

ततस्तृतीयेऽष्टसूत्रे **विहितत्वाच्चाश्रमकर्मे**त्यधिकरणे प्रथमसूत्रद्वयेन जातज्ञानस्यापि ज्ञानमार्गीयस्याश्रमधर्माणां नित्यत्वेन प्रत्यवायपरिहारकतया शमदमादिसहकारितया च कर्तव्यत्वं निर्णीतम्। तेनैव कर्ममार्गीयस्य निष्कामतायामपि तदावश्यकत्वमित्यर्थादेव बोधितम्। ततोऽग्रिमैः **सर्वथापी**त्यादिभिः षड्भिः सूत्रैर्विहितानां भगवच्छ्रवणादीनां पूर्वोक्तेभ्यः सर्वेभ्य आधिक्यं, तदविरोधेनैवाश्रमधर्माणां कर्तव्यत्वं, भगवद्धर्मकर्तुरनभिभवं, आश्रमधर्माणां फलसिद्धावंतरायरूपत्वादविरोधेनैव कार्यत्वं, भगवद्धर्माणां भक्तेस्तत्फलस्य च ज्ञानादिफलाज्ज्यायस्त्वमंतरंगतरविचारेण निरूपितम्, तेन भगवद्धर्माविरोधेनैव ते कर्तव्या इत्युपसंहारप्रकारो दर्शितः ॥ ३ ॥

ततस्तत्फलं किं, कथं च तस्य ज्ञानफलादाधिक्यमित्याकांक्षायां चतुर्थे एकसूत्रे तन्नूनस्येत्यधिकरणे भगवद्धर्माणां साधनदशायामुत्कृष्टत्वेपि फलदशायां मुक्तिभवने फलतो न कश्चिद्विशेष इत्याशंक्य, नियमादिभिर्हेतुभिस्तस्य नित्यत्वं, भक्तानां मुक्त्यनिच्छया तत आधिक्यं च मुख्यभक्तिमार्गस्योत्कर्षार्थं प्रसंगात्प्रतिपादितम् ॥ ४ ॥

ततः पंचमे द्विसूत्रे न चाधिकारिकमित्यधिकरणे मर्यादापुष्टस्यापि यत् भगवदीयत्वरूपमंतर्निष्ठारूपं यत्फलं तन्नित्यं, ज्ञानमार्गीयमुक्तेः सकाशादधिकमित्यनुप्रसंगेन निरूपितम् । एवमधिकरणद्वयेन पूर्वोक्तकर्मोपसंहारप्रकारे बीजं बोधितम् ॥ ५ ॥

ततः षष्ठे चतुःसूत्रे बहिस्तूभयथेत्यधिकरणे सर्वविधस्य पुष्टिमार्गीयस्य आश्रमरूपसंन्यासधर्मानुपसंहारार्थं साधनत उत्कर्षबोधनायानुप्रसंगेन गृहत्यागो विचारितः । स च मध्यमाधिकारे एवेति फलति ॥ ६ ॥

ततः सप्तमे एकसूत्रे सहकार्यंतराधिकरणे गृहत्यागिनो मर्यादापुष्टिमार्गीयस्य शमादिकं भावनासहकारित्वेन कर्तव्यम्, पुष्ट्यंशबाहुल्ये तु तेनापि भावनामात्रमेव कर्तव्यमिति साधनव्यवस्थानुप्रसंगाद् दर्शिता ॥ ७ ॥

ततोऽष्टमे चतुःसूत्रे गृहिणोपसंहाराधिकरणे, प्रथमसूत्रेण पूर्वोक्तेभ्यो जघन्याधिकारिणां त्यागानुकल्परूपं गृहे स्थित्वा भगवद्भजनं कर्तव्यमिति विचार्य, द्वितीयादिभिस्तस्य करणप्रकारस्तदाधिक्यं, भगवद्भावस्य लोकेष्वप्रकटनं, भगवद्भजनव्यतिरिक्तसमये लौकिककरणं, गृहिणोपसंहारश्रुतिमनुसृत्यानुप्रसंगाद्विचारितम् । तेन विहितत्वाचाश्रमकर्मापीत्यनेन यत्पूर्वमुक्तं तस्य प्रकारो बोधितः ॥ ८ ॥

ततो नवमे एकसूत्रे एवं मुक्तिफलानियम इत्यधिकरणे तादृशस्य देहपातोत्तरं मुक्तिर्वा भगवदीयत्वं वेति संशये मुक्तिस्तु नियतैव, भगवदीयत्वं तु भगवत्कृपाधीनमित्यनियमो निर्णीतः । तेनानुकल्पोपि मर्यादामार्गादधिकः, निरवध्यानंदपुरुषोत्तमसायुज्यादिति ॥ ९ ॥

एवमस्मिन्पादे बहिरंगविचारेण सप्रकारः कर्मोपसंहारो दर्शितः । एवमस्मिन्नध्याये चतुर्भिः पादैः सर्वसाधनं सप्रकारमुपदिष्टम् ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां तृतीयाध्यायस्य चतुर्थः पादः समाप्तः ।

तृतीयाध्यायः समाप्तः ।

चतुर्थोध्यायः ।

अथ चतुर्थाध्यायेवसरसंगत्या फलं निरूप्यते । तच्च फलं ब्रह्मविद् इति चतुर्भिः पादैर्जीवतो म्रियमाणस्य गच्छतः प्राप्तफलस्य च क्रमेण तस्य यथाधिकारमवस्था निरूप्यंते ।

तत्र प्रथमपादस्य द्विसूत्रे प्रथमेधिकरणे प्रथमवर्णकेन श्रवणादीनामवांतरफलत्वाय तेषामावृत्तिः कर्तव्येत्युच्यते । तेन पूर्वपादांते गृहिणोपसंहारे सर्वेंद्रियाणामात्मनि प्रतिष्ठापनमुक्तम्, तत्प्रकारोत्र दर्शित इति पूर्वेण सह प्रकारप्रकारिभावः संगतिरिति बोध्यम् । द्वितीयवर्णकेन तु

ज्ञानभक्त्योः फलत उत्कृष्टत्वाय कर्ममार्गे आवृत्तिव्युत्पादनेन फलजघन्यत्वमपि बोधितम्। तेन कर्मणि तत्फले चानासक्तिरपि तत्प्रकारत्वेन बोध्यत इति सैव पूर्वेण सह संगतिरिति बोध्यम्॥ १॥

ततो द्वितीये त्रिसूत्रे **आत्मेतीत्यधिकरणे** प्रथमवर्णकेन ज्ञानफलं द्विविधं विचार्यते। मुख्यं स्वात्मप्रवेशरूपमनश्वरम्, द्वितीयं त्वधिकारिषूपस्थितेषु तेभ्यो ज्ञानोपदेशरूपमवांतरफलम्, भगवदाज्ञापरिपालनात्मकम्, न स्वाचार्यत्वकामनाकृतमित्युच्यते। द्वितीये ननु 'न स पुनरावर्तते' इतिश्रुत्युक्तो ज्ञानभक्त्योः फलरूपः पुनरावृत्त्यभावः किं सावधिक उत निरवधिक इत्याशंकायाम्, निरवधिक इति सिद्धांत उच्यते। नित्ये भगवद्रूप आत्मनि ब्रह्मविदो जीवात्मनः शुद्धजले जलस्येव प्रवेशेन तादृक्त्वस्यैव श्रुतावुक्तत्वादिति, भक्तिमार्गे च भगवतो मुक्तोपसृप्यत्वेन सेवार्थं तन्निकटस्थितेरपि नित्यत्वादिति। एवमात्मोपदेशस्यावांतरफलत्वं त्वत्रापि समानम्। ततो **द्वितीयसूत्रे** प्रतीकोपासकानां न मोक्षः, अतद्रूपे तत्त्वेनोपासनादिति। अतः सा न कर्तव्येति बोधितम्। **तृतीये** सर्वत्र ब्रह्मदृष्टिः कर्तव्येति बोधितम्। तथा च सर्वत्रात्मभावनात् तथा स्फुरणाच्च दुःखस्य निवृत्तेस्तस्याप्यवांतरफलत्वम्। पूर्वपाद उक्तानां गृहत्यागिनां यदांतरं बाह्यं च साधनं तदत्रोपदिश्यत इत्यत्रापि तेन सह प्रकारप्रकारिभाव एव संगतिरिति बोधितम्॥ २॥

ततस्तृतीये पंचसूत्रे **आदित्यादिमतय इत्यधिकरणे प्रथमसूत्रे** प्रतीकोपासना न कर्तव्या एव चेत्, ताः किमर्थमुपदिश्यंते, (नन्वेवमंगोपासना एव?) सिद्धांते प्रतीकोपासना इत्याकांक्षायाम्, अवसरसंगत्या सिद्धांते अंगोपासना एव प्रतीकोपासना इति तत्स्वरूपमुच्यते। ताश्चोपासना जघन्याधिकारिणां फलदानद्वारा माहात्म्यज्ञापनेन भक्तिद्वारा आधिभौतिकसर्वात्मभावरूपज्ञान एवोपकुर्वंतीत्युच्यते, अग्रिमसूत्रैस्तथैव प्रतिपादनात्। ततो **द्वितीयसूत्रे** भावनोत्कर्ष्ये बहिर्भगवदध्यासरूपं प्राकट्यं फलमुच्यते। ततस्तृतीये ध्यानात्मनो मानसीमूर्तिसिद्धिरूपं फलमुच्यते। ततश्चतुर्थे लीला अपि भगवान् तथा प्रकटयतीत्युच्यते। ततः **पंचमे** अधिकारैकत्वेन तेषां तत्रैव फलत्वं भासत इति श्रीभागवतोक्तस्मृतिबलेनोच्यते। तस्मात् तासां ज्ञानोपकार एव फलमिति सिध्यति॥ ३॥

ततश्चतुर्थे एकसूत्रे **यत्रैकाग्रतेत्यधिकरणे** बहिरंतर्भगवत्प्राकट्यवतोरुपासकयोर्न तारतम्यमिति सिद्धांतः प्रसंगेन क्रियते॥ ४॥

ततः **पंचमे एकसूत्रे आप्रायणेत्यधिकरणे** भगवत्प्राप्तिरूपपरमफलपर्यंतं तस्य सैवावस्था तिष्ठति। परमफलं च तस्य साक्षाद्भगवत्सेवनरूपं सिध्यतीत्यनुप्रसंगेन पुष्टिमार्गीयस्योक्तम्। इदमेव च पूर्वं तद्भूताधिकरणे प्रतिपादितमत्रांगोपासनाविषयेपि स्मार्यते। तेन पुष्टिमार्गीयस्य जीवत इदमवांतरफलमिति बोधितम्॥ ५॥

ततः **षष्ठे चतुःसूत्रे तदधिगम इत्यधिकरणे** मर्यादामार्गीयस्यावांतरफलमवसरसंगत्योच्यते। तत्र **प्रथमसूत्रे** (चित्तशुद्धौ) ज्ञानोदये सति पूर्वपापनाशः, तदनंतरं पापस्यानुत्पत्तिः। **द्वितीयसूत्रे** पूर्वपुण्यस्य नाशः, तदनंतरं तदनुत्पत्तिः। कदाचित् प्रारब्धवशाद्भगवदाज्ञाप्रच्युतौ उत्तरकर्मण उत्पत्तिरित्युक्तम्। ततस्तृतीये ज्ञानात् कर्मनाशे सति कर्मजन्यदेहस्यापि नाशादाचार्याभावेन ज्ञानादिसंप्रदायोच्छेद इत्याशंक्य, अनारब्धकार्याणामेव तेषां नाशः, न प्रारब्धकार्याणामिति, तेषां भोगैकनाश्यत्वादित्युक्तम्। ततश्चतुर्थे ब्रह्मविदोमिहोत्रादिकरणमपि प्रारब्धभोगरूप-

कार्यैव, येषामग्निहोत्रकरणरूपं प्रारब्धमस्ति तेषां तत्करणरूपेण भोगेन तन्निवृत्तेः, न तु तस्य कर्मणः संश्लेष इत्युक्तम् । तेन मर्यादामार्गीयस्य कर्मसंसर्गाभाव इत्यनेनाधिकरणेनावसराद्वा प्रसंगाद्वा साधितम् ॥ ६ ॥

ततः **सप्तमे त्रिसूत्रे अतोन्यापीत्यधिकरणे** पुष्टिमार्गीयस्य 'तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्याम् द्विषंतः पापकृत्या'मिति श्रुतिबलाद् विनैव भोगं प्रारब्धनिवृत्तिरिति **प्रथमसूत्र** उच्यते । ततो **द्वितीये** 'यदेव विद्यये'ति श्रुत्या ब्रह्मविदः कर्मकरणप्राप्तौ तत्संश्लेषमाशंक्य, इदं वाक्यं कर्मांगभूतोद्गीथोपासनाविषयम्, न तु ब्रह्मविद्याविषयम्, अतो न तस्य आपादयितुं शक्यते कर्मसंश्लेषो ब्रह्मविदः । किंच, यद्यनया कर्मकरणं प्रसक्तं क्रियते, तदा ब्रह्मवित्कर्ममोक्षायैव कर्म करोतीति तच्छ्लेषाभावायैव तत् फलिष्यतीति तु मर्यादामार्गरीत्या समाधानम् । पुष्टिमार्गीयस्तु केवलं भगवदासक्तः, भगवद्गुणानां च जीवगुणाः अंशाः, जीवनिष्ठं विद्यारूपं यज्ज्ञानं तद्भगवज्ज्ञानस्य अंश इति सिध्यति । तथा सति जीवनिष्ठविद्ययापि चेत् न मर्यादामार्गीयस्य कर्मश्लेषः, तदा भगवत्स्वरूपासक्तस्य पुष्टिमार्गीयस्य कर्मश्लेषः कैमुतिकन्यायेनैवापास्त इत्युक्तम् । **ततस्तृतीये** पुष्टिमार्गीयः पूर्वोक्तप्रकारेण स्थूललिंगशरीरे क्षपयित्वा ततो यथाधिकारं भगवत्साक्षात्कारादिरूपेण फलेन संपद्यत इति परमफलमुक्तम् । अत्र क्षपणं च कुरुक्षेत्रप्रसंगे व्रजभक्तानां जीवकोशध्वंसरूपम् । भोगश्च तदनंतरदर्शनादिरूपो जीवदशायामेव भवतीत्यवांतरफलपरिसमाप्तिरिति मम प्रतिभाति ।

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां चतुर्थाध्यायस्य प्रथमः पादः ॥

अथ **द्वितीयपादे** म्रियमाणस्य ब्रह्मविदोवांतरफलव्यवस्था अवसरसंगत्योच्यते ।

तत्र **प्रथमे चतुःसूत्रे वाङ्मनसीत्यधिकरणे** तत्र **प्रथमसूत्रे** 'अथाकामयमान' इति वाजसनेयिश्रुतिमालंब्य म्रियमाणस्य पुष्टिमार्गीयस्य म्रियमाणदशायां बहिर्मनसि वा दर्शनं वेणुनादश्रवणं वा भवति, तदा तस्य वाङ्मनसि संपन्ना भवतीत्युक्तम् । ततो **द्वितीयसूत्रे** पूर्वोक्तेनैव हेतुना अन्यान्यपींद्रियाणि मनसा सह संगतानि भवंतीत्युक्तम् । **ततस्तृतीये** सर्वेंद्रियविशिष्टं मनः प्राणे संगतं भवतीत्युच्यते । **ततश्चतुर्थे** तत्सर्वविशिष्टप्राणो हृदि वा बहिर्वा प्रकटे भगवति लीनो भवतीत्युच्यते । तथा चानेन क्रमेण तस्येंद्रियाणि भगवति लीयंते, आत्मापि लीयते, 'न तस्मात्प्राणा उत्क्रामंति, अत्रैव समवनीयंते ब्रह्मैव सन् ब्रह्माप्येती'ति श्रुतेरित्युच्यते । तस्यालौकिकदेहप्राप्तिश्चतुर्थे पादे वक्ष्यते ॥ १ ॥

ततो **द्विसूत्रे द्वितीये भूतेष्वित्यधिकरणे** म्रियमाणस्य मर्यादामार्गीयस्य व्यवस्था अवसरगर्भेण प्रसंगेनोच्यते । तत्र **प्रथमसूत्रे** तस्येंद्रियाणि भूतेषु लीयंत इत्युच्यते, स्वयं तु ह्येवं भगवंतं प्राप्य मुक्तो भवतीत्यपि तेन सूच्यते । ततो **द्वितीये सूत्रे** भक्तो ज्ञानी च मर्यादामार्गीयौ भवतः । तत्रोभयोरियं व्यवस्था, उत भक्तस्य पुष्टिमार्गे प्रवेश इत्याशंक्य, द्वयोरपीयं व्यवस्थेत्युच्यते ।

ततस्तृतीये नवसूत्रे समाना चासृत्युपक्रमादित्यधिकरणे उभयोर्मुच्यमानत्वेपि प्राणादिलयप्रकारे पुष्टिमर्यादास्थयोः कुत एवं (विशेषादेव) विशेष इति वक्तुं पुष्टिमार्गीयस्य मर्यादामार्गादाधिक्यमुपोद्घातेन विचारितम् । तत्र **प्रथमसूत्रे** साधनद्वारा मोचनेच्छा हि मर्यादामार्गीया मर्यादा,

विहितसाधनं विनैव मोचनेच्छा पुष्टिमार्गमर्यादा। अतस्तयोः संकरः कदापि न भवतीति विशिष्टेच्छया आधिक्यमुक्तम्। ततो द्वितीये पुष्टिमार्गीयमुक्तिदशायां मर्यादामार्गीयमुक्तेः संसारतौल्यव्यपदेश इत्युक्तम्, तेन पुष्टिमार्गस्याधिक्यं सूच्यते। ततस्तृतीये यदि तस्याः संसारतुल्यत्वं तदा तस्या हेयत्वं स्यात्, तद्बोधकश्रुतेः प्रतारकत्वं चेत्याशंकायाम्, पुष्टिमार्गीयं तत्त्वं दुर्ज्ञेयम्। अतस्तदज्ञानान्मर्यादामार्गीयमुक्तिर्येषामीप्सिता तान् प्रति तामेवोपादेयत्वेन श्रुतिर्वदति, रागिणः प्रति स्वर्गादि उपदिश्यते (तद्वत्। ततश्चतुर्थे तर्हि ब्रह्मविदामिव तादृशानां भक्तानामपि स्वमार्गोपदेशनं क्वचिच्छ्रूयेत), यतो नैवम्, अतो नैवमित्याशंकायाम्, तदनुपदेशने बीजमाह। पुष्टिमार्गीयाणां हि अवस्थाद्वयम्, विरहः प्रियसंगो वा। तत्राद्ये स्वास्थ्याभावान्नोपदेशः। द्वितीये तु भगवत्संनिधानेन तदर्थे धार्ष्ट्यस्य कर्तुमशक्यत्वान्नोपदेशः। अत उपदेशाभावान्न तस्यासत्ता वक्तुं शक्येत्युक्तम्। ततः पंचमे भगवदीयानां विरह एव कथमित्याशंकायाम्, पुष्टिमार्गे भगवतो रसात्मकत्वस्यैव प्राकट्यात् तेनैव तदुपपत्तिरिति युक्त्या समाहितम्। ततः षष्ठे विरहांगीकारे श्रुतिविरोधमाशंक्य, श्रुतौ शरीरसंबंधिन एव दुःखस्य निषेधो, न भगवद्विरहजन्यस्येत्येवं समाहितम्। ततः सप्तमे श्रुत्या, अष्टमे च स्मृत्या तद्दृढीकृतम्। ततो नवमे सर्वासां रसावस्थानां सत्ता श्रीगोकुल एव विद्यत इति श्रुत्या व्यवस्थापितम्। एवं पंचभिः सूत्रैः प्रमाणपूर्वकं रसावस्थास्थापनेन पुष्टिमार्गस्य सर्वोत्कृष्टत्वं व्यवस्थापितम्। अतः पुष्टिमर्यादायामुपदेशेऽपि न कश्चिद् दोष इत्यर्थात् सूचितं भवति॥ ३[1]॥

ततश्चतुर्थे एकसूत्रे **अविभागो वचनादित्यधिकरणे** प्रसंगात् पुष्टिमार्गीयस्य नित्यलीलारूपफलानुभवस्य नित्यत्वं मर्यादामार्गात् फलतो विशेषप्रतिपादनाय विचारितम्॥ ४॥

ततः पंचमे एकसूत्रे **तदोकोऽग्रज्वलनाधिकरणे** मर्यादामार्गीयस्य ब्रह्माण्डमध्ये सद्यो मुक्तिप्रकारो विचारितः। तदग्रिमे च अवसरसंगत्या मर्यादामार्गीयस्य जीवोत्क्रांत्यनंतरं क्रममुक्तिप्रकार उच्यते। तत्र साधारणस्यापि जीवस्य इंद्रियरूपाभिस्तेजोमात्राभिः सहैव येन केनचिद्द्वारेण निर्गमनम्, तथापि यस्य साधनेन (परमात्मा तुष्टः,) स जीवस्तु एकशतनाडीषु या शताधिका मूर्धन्या नाडी, तया ऊर्ध्वं त्य 'क्त्वा' निष्क्रामति, साधनेन तुष्टो यो हृदयवर्ती परमात्मा तदनुग्रहाद्विद्यासामर्थ्याच्च या भगवत्स्मृतिपरंपरा, तया तस्यानुग्रहः, तेन मूर्धन्यनाड्या निष्क्रमणमित्युक्तम्॥ ५॥

ततः षष्ठे चतुःसूत्रे **रश्म्यनुसार्यधिकरणे**। तत्र प्रथमसूत्रे यः क्रमेण मोक्षाधिकारी रश्म्यनुसारी मूर्धन्यनाड्या निःसरति तस्यापि हृदयाग्रे प्रकाश इत्युक्तम्। ततो द्वितीये तृतीये च रात्रिकृतोऽयनकृतो विशेषश्च नास्तीत्युक्तम्। ततश्चतुर्थे स्मृतौ धूममार्गस्याप्युक्तत्वात् तत्र च रात्रिदक्षिणायनादीनामुक्तत्वादर्चिरादिमार्गे च ज्योतिरुत्तरायणादीनामुक्तत्वान्मुच्यमानस्य कथं न विशेष इत्याशंक्य, स विशेषो योगिन एव, गती च ते स्मार्ते, अतो न ज्ञानिनः, तेन ज्ञानिन उत्क्रमणे सर्वोऽपि कालः समान इत्युक्तम्। एतस्य करणग्रामनिष्पत्तिस्तु यत्र प्रारब्धसमाप्तिस्तत्र भूतेष्वेव भविष्यतीति ज्ञेयम्। उपक्रमे तथैवोक्तत्वादिति॥ ६॥

---

१. विद्वांतर्गतफक्किका त्रुटितेति प्रतिभाति। २. इतः परं सूत्रत्रयं भिन्नाधिकरणत्वेन श्रीगोपेश्वरा इच्छंति, भावप्रकाशिकाकाराः श्रीकृष्णचंद्राश्च।

एवमस्मिन् पादे पुष्टिमर्यादामार्गीययोर्म्रियमाणावस्था विचारिता ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां चतुर्थाध्यायस्य द्वितीयः पादः ॥

अथ **तृतीयपादे** क्रममुक्त्यधिकारिणो ब्रह्मविदोर्चिरादिमार्गेण गच्छतो व्यवस्थावसरप्राप्तोच्यते ।

तत्र प्रथमे चतुःसूत्रे अर्चिरादीत्यधिकरणे ज्ञानमार्गीयस्य भक्तस्य चेत्युभयोरर्चिरादिमार्गेण गमनम्, उत सद्योमुक्तिरितिसंशये, यथा ज्ञानिनो नियमाभावस्तथा भक्तस्यापीति पूर्वपक्षे, पंचाग्निविद्यायां ज्ञानमार्गीयाणामेवोपक्रांतत्वात्तेषामेव तेन मार्गेण गतिः, न तु भक्तस्यापीति निश्चीयते। ततस्त्रिभिः सूत्रैस्तन्मार्गपर्वनिर्धारः क्रियते । श्रुतिभेदेन पर्वभेदानामनेकधोक्तत्वात् मार्गभेदे प्राप्ते देवयानस्य मार्गस्य श्रुत्यंतरे यदैक्यमुक्तं तद्विरोधसंभवात् । पर्वसु निर्धारितेषु तु यस्य यत्पर्वभोगो भावी तं प्रति तत् पर्व, अन्यं प्रत्यन्यत् । यथा महामार्गे नानाग्रामेषु सत्स्वपि कस्यचित् कस्मिंश्चिद् ग्रामे अवांतरनिवासः, अन्यस्यान्यस्मिन् ग्रामे सः, तद्वत् । एवं पर्वभेदेप्युपपत्तौ ब्रह्मलोकगमनस्यैक एवार्चिरादिमार्गो देवयानाख्यः सिध्यतीति निर्णीतम् ॥ १ ॥

ततो **द्वितीये त्रिसूत्रे आतिवाहिकाधिकरणे** तेन मार्गेण कथं गच्छतीत्याकांक्षायामवसरगर्भेण प्रसंगेन गमनप्रकारो निर्धार्यते । तत्र पर्वभूतविद्युल्लोकपर्यंतं विद्यासामर्थ्येनैव गच्छति । ततो विद्युल्लोके अमानवः पुरुषो ब्रह्मलोकगमयिता तत्रागत्य तं विद्युल्लोकस्थं गंतारं ब्रह्मलोकं प्रापयतीति श्रावितम् । एवं सति येषां विद्युल्लोकभोगोस्ति ते वरुणादिलोकं गच्छंति । तत्र सः ब्रह्मलोकप्रापयिता आयाति न वेति संशये, तत्राप्यायाति, श्रुत्यंतरे प्रजापतिलोकानंतरमपि ब्रह्मलोकस्योक्तत्वात्, ब्रह्मलोकप्रापयितॄणां पुरुषाणां च बहुत्वात्, यस्य यल्लोकभोगेन प्रारब्धसमाप्तिस्तं तत एव लोकाद्ब्रह्म प्रापयंतीति **प्रथमसूत्रे** निर्णीतम् । तेषां ब्रह्मलोकप्रापका ये पुरुषास्ते आतिवाहिकशब्देनोच्यंत इत्यपि । ततो **द्वितीये सूत्रे** अपुनरावृत्तिश्रुत्या देवयानं पंथानं प्राप्तानां ब्रह्मवित्त्वात्तेषां सद्योमुक्तिरेवोचितेति तेषामवांतरलोकभोगजनिका कामनैव कुतः । किंच, 'यत्कर्मभिर्यत्तपसे'ति भगवद्वाक्ये मर्यादाभक्तस्य या लोकांतरकामनोक्ता सापि कुतः । तेषां सद्योमुक्तेरेव प्रथमाधिकरणे निर्धारादित्याशंक्य, केषांचित् ज्ञानिनां मर्यादाभक्तानां व्यामोहितत्वात् सा । व्यामोहश्च लीलासिद्ध्यर्थं, येऽवांतर्लोकाः कृतास्तत्सृष्टिसार्थकत्वाय भगवतैव क्रियते । अतो नानुपपत्तिरित्युक्तम् । ततस्तृ**तीयसूत्रे** ये वरुणादिलोकं गतास्तेषां स्वत एव ब्रह्मप्राप्तिरस्तु । आतिवाहिकस्य विद्युल्लोकीयत्वश्रावणेन तेषु लोकेषु तदभावादित्याशंक्य, श्रुतावातिवाहिकस्य न विद्युल्लोकीयत्वमभिप्रेतम् । 'पुरुषोऽमानव एत्ये'ति श्रावणाद्ब्रह्मलोकीयत्वम् । वैद्युतत्वं तु तस्य विद्युल्लोकपर्यंतमागमनात् । अतो लोकांतरादपि ब्रह्मलोकप्राप्तावातिवाहिकापेक्षास्तीत्युक्तम् । किंच, वाजसनेयके 'ब्रह्मलोकान् गमयती'ति श्रावितम् । छांदोग्ये तु 'ब्रह्म गमयती'ति श्रावितम् । तेन मर्यादामार्गीयं भक्तं वैकुंठलोकान् गमयति । ज्ञानमार्गीयं त्वक्षरब्रह्म गमयतीत्यपि तत्र निर्णीतम् । एवमेतेन गमनप्रकारो निर्णीतः ॥२॥

ततस्तृतीये अष्टसूत्रे कार्यं बादरिरित्यधिकरणे पूर्वसूत्राधिकरणश्रुत्युक्तस्य प्राप्यस्य ब्रह्मणः किमविकृतब्रह्मत्वम्, उत कार्यब्रह्मलोकत्वमिति संशये, प्रथमं पंचसूत्रैर्यद्बादरिमतमुक्तम्, तत्राधिकृतस्य परब्रह्मणो व्यापकत्वादत्रोक्तं गमनं न संगच्छते तस्मात् । किंच, श्रुत्यंतरे 'ब्रह्मलोका'-निति 'तेषु वसंती'ति च बहुत्वेन वासाधिकरणत्वेन च विशेषितत्वादपि तथा। तत्र ब्रह्मत्वव्यपदेशस्तु ब्रह्मसामीप्यात् । कल्पसमाप्तौ कार्यब्रह्मलोकस्य नाशे चतुर्मुखेन ब्रह्मणा सह तस्यापि चतुर्मुखवत् परब्रह्मप्राप्तेः श्रुतौ स्मृतौ चाभिधानादपि प्राप्यब्रह्मलोकोऽपर एव, न तु परब्रह्मेति पूर्वपक्षत्वेनोक्तम् । **ततस्त्रिभिः सूत्रैर्जैमिनिमतं** सिद्धांतत्वेनोक्तम् । तत्र **प्रथमसूत्रे** ब्रह्मशब्दस्य बृहत्त्वादिगुणविशिष्टत्वेन परस्मिन्नेव मुख्यवृत्तत्वात् गौण्याऽपरब्रह्मांगीकारो न युक्त इत्युक्तम् । ततो **द्वितीये** कौषीतकिश्रुतौ प्रजापतिलोकाद्ब्रह्मलोकस्य पार्थक्येनोक्तत्वात् छांदोग्ये अर्चिरादिमार्गप्राप्यत्वेन समाप्तौ 'ब्रह्म गमयती'त्युक्तत्वात् प्रजापतिलोकादन्यस्य कार्यब्रह्मलोकस्य कुत्राप्यश्रवणाद्गमनस्य प्रारब्धहेतुकत्वेन विलंब्यप्राप्तेः संभवाच्च न गमनादिश्रुतिस्मृतिविरोध इत्युक्तम् । **ततस्तृतीये** 'ब्रह्मविदाप्नोति पर'मिति श्रुतौ परप्राप्तिर्या उक्ता सैवाग्रिमर्चा विव्रीयते । तस्यां च ब्रह्मणा सह सर्वकामभोगलक्षणा या प्रतिपत्तिरुच्यते, सा परेणैव सह । कुत्रापि श्रुतौ कार्यरूपे प्रतिपत्तेरनभिप्रेतत्वात् । अतो ब्रह्मशब्देन परब्रह्मैवोच्यत इति सिद्धांतितम् । एवमष्टभिः सूत्रैः गंतव्यब्रह्मस्वरूपं प्रसंगान्निरूपितम् ॥ ३ ॥

ततश्चतुर्थे **एकसूत्रे अप्रतीकालंबनाधिकरणे** पूर्वोक्तप्रकारेणातिवाहिकप्रापिता ब्रह्मप्राप्तिः किं सर्वेषामुपासकानाम्, उत केषांचिदेवेति संशये, अप्रतीकालंबनानेवातिवाहको नयतीति निश्चीयते । तत्र प्रतीकोपासका द्विधा । केचिदतस्मिंस्तत्त्वेनोपासकाः, अन्ये तु तदंगेषु तत्त्वेनोपासकाः । तत्राद्यानामुपासनैव व्यंग्या । 'योऽन्यथा संतमात्मान'मिति वाक्योक्तदोषप्रसंगात् । द्वितीयानां तूपासनाव्यंगत्वाभावेपि 'यावन्मनसो गतं तत्रास्य कामचारो भवती'त्यादिश्रावणेन तत्क्रतुन्यायतस्तत्रैव पर्यवसानेन तेषां ब्रह्मप्राप्तेरनभिप्रेतत्वात् । पंचाग्निविद्यायास्तु अंगोपासनात्वेन प्रतीकत्वेपि वाचनिकत्वात् तेषां नयनम् । तस्मात् ये परब्रह्मोपासकास्तानेव नयतीति ज्ञानमार्गीया व्यवस्था । भक्तिमार्गीयस्तु निष्कामांगोपासनकर्ता भक्तः सन् भक्तिबलादेवातिवाहिकं विनैव स्वयं गच्छतीति तत्क्रतुश्चेति सूत्रशेषेण निश्चीयत इत्युक्तम् । एवमत्र चतुर्भिरधिकरणैः सप्रकारा गच्छद्ब्रह्मविद्व्यवस्थोक्ता । संगतिस्तत्रावसर एव ॥ ४ ॥

ततः **पंचमे एकसूत्रे विशेषं च दर्शयतीत्यधिकरणे** भक्तिमार्गीयाणां ज्ञानमार्गीयाणां चाविशेषेणैव ब्रह्मप्राप्तिः, उत गमने विशेषात् फलप्राप्तावपि कश्चिद्विशेषोस्तीति संदेहे, 'ब्रह्मविदाप्नोति पर'मिति यजुर्व्याख्यानरूपायां 'सत्यं ज्ञान'मित्यस्यामृचि ज्ञानमार्गीयस्य अक्षरप्राप्तिरेव, भक्तिमार्गीयस्य तु 'यमेवैष वृणुते' इति श्रुत्युक्तवरणेन भक्त्या हृदि अक्षरब्रह्मप्रादुर्भावात्तत्र स्थितेन पुरुषोत्तमेन सह भोग उच्यते । तत्र भक्तिमार्गः पुष्टिमर्यादाकेवलपुष्टिभेदेन द्विविधः । तत्राद्यस्य यथाधिकारं पुरुषोत्तमानुभवरूपो भोगः । द्वितीयस्य तु यथाधिकारं ब्रह्मणा सह सर्वकामाशनरूप इति विशेषं श्रुतिर्दर्शयति । तस्माद् ब्रह्मप्राप्तावस्ति तयोर्विशेष इति प्रसंगगर्भया पूर्वोक्तसंगत्यैव निर्णीतम् ॥ ५ ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ वेदान्ताधिकरणमालायां चतुर्थाध्यायस्य तृतीयः पादः ।

ततश्चतुर्थे पादे पंचभिरधिकरणैः प्राप्तफलस्य ब्रह्मविदो व्यवस्था वक्तव्या । तत्र ब्रह्मविदो भक्तिज्ञानमार्गभेदेन द्विविधाः । भक्तिमार्गीया अपि मर्यादापुष्टिकेवलपुष्टिभेदेन द्विविधाः । अवांतरभेदास्त्वनेके । तत्र ज्ञानमार्गीयाः पुष्टिमर्यादामार्गीयाश्च प्रायशः क्रमेणैव मुच्यंते । अतिकृपया तु केचित् सद्योऽपि । पुष्टिमार्गीयास्तु सद्य एव । एवमेतेषु ब्रह्मवित्सु ज्ञानमार्गीया अक्षरोपासकत्वात्तत्रैव पर्यवसन्नाः सद्यः क्रमेण वा तमेव प्रविशंति । पुष्टिमर्यादामार्गीयास्तु सद्यः क्रमेण वा नित्यं ब्रह्मलोकं प्राप्नुवंति । तेषां लौकिक्यामेव गुहायामक्षरम् । तत्र स्थितं पुरुषोत्तमं चानुभूय पुरुषोत्तमस्वरूपे प्रविशंतीत्येतावत्पूर्वपादांते सिद्धम् । ये पुनः क्रमेण नित्यं भगवल्लोकं प्राप्नुवंति, ते तत्रैव भगवंतं भिन्नमीश्वरत्वेनानुभवंतो यथाधिकारं सेवौपयिकदेहं प्राप्नुवंतीत्यर्थात् सिध्यति । तदपि तृतीयस्कंधे 'अथो विभूतिं मम मायाविनस्ता'मिति कपिलदेववाक्यादवसीयते ।

अतःपरं पुष्टिमार्गीयस्य प्राप्तफलस्य 'सोऽश्नुते सर्वान् कामान्' इति श्रुत्युक्ता व्यवस्थावशिष्यते । सा विशेषदर्शनसूत्रे संक्षेपेण सिद्धास्मिन्पादे प्रपंच्यते ।

ततः **संपद्याविर्भाव इति चतुःसूत्रे प्रथमाधिकरणे प्रथमसूत्रे** भगवत्स्वरूपे लीनस्य पुष्टिमार्गीयस्य स्वलीलानुभावनार्थं भगवता बहिराविर्भावः क्रियते, अनुगृहीतत्वात् । स चाविर्भावो भगवत्स्वरूपबलेनैव लीलाधिकरणे भवति, न तु प्रपंच इति श्रुतिबलादुक्तम् । ततो **द्वितीये** तस्यैवमाविर्भावेपि मुक्तत्वं नापैतीत्युक्तम् । ततस्**तृतीये** एवं फलदातुः परमात्मत्वमेवेत्युक्तम् । ततश्चतुर्थे 'सत्यं ज्ञान'मित्यस्या ऋचः 'ब्रह्मविदाप्नोती'त्यनेनैकवाक्यत्वं व्याख्यानव्याख्येयभावादस्ति, तस्मादयमेवार्थ इति निर्धारितम् ॥

ततो **द्वितीये अष्टसूत्रे ब्राह्मेणेत्यधिकरणे** येन देहेनायं जीवो लीलानुभवं करोति तादृशो देह उपोद्घातेनावसरेण वा विचारितः । तत्र **प्रथमसूत्रे** सच्चिदानंदात्मकेनैव देहेन ब्रह्मणा सह भोगान् भुंक्त इति स देहस्तादृशो ब्रह्मणा संपादित इति साधितम् । तत्प्रकरणे ब्रह्मात्मकानामेवान्नमयादिविभूतीनामुपन्यासादिति जैमिनिमतकथनमुखेन तत्संपत्तिश्च प्रदर्शिता । ततो **द्वितीयसूत्रे** प्रज्ञानघनश्रुत्या केवलज्ञानात्मको ब्रह्मणो विग्रहो बोध्यते । अतस्तादृशेन सह भोगकर्त्रा ज्ञानात्मकेनैव भवितव्यम् । नचैवमानंदानुभवेन सर्वकामाशनबाधः शंकनीयः । भगवतः पूर्णानंदत्वात् तत्संबंधेनैवानंदानुभवः सिद्धः । तस्माद्विग्रहं विनैव केवलस्वरूपेण भुंक्त इत्यौडुलोमिमतमुक्तम् । ततस्**तृतीये सूत्रे** 'सत्यं ज्ञान'मित्यस्यामृचि गुहाया उक्तत्वात् तस्याश्च विग्रह एव संभवात् श्रुतौ विग्रहत्वेनैवोपन्यासः । ते च विग्रहा भगवद्धाम्नि पूर्वमेव वर्तंते भगवद्धर्मरूपाः । तेषु कस्मिंश्चिदयं चिन्मात्र एवाविद्याभिमानं कृत्वा भगवदिच्छानुरूपलीलात्मकान् भोगान् भुंक्ते । तस्मान्न चिन्मात्रत्वस्य नित्यविग्रहवत्त्वस्य च विरोध इति मतद्वयं संगृह्य तादृशविग्रहेणैव भुंक्त इति स्वमतमुक्तम् । ततश्चतुर्थे सूत्रे तादृशदेहप्राप्तौ भक्ते भगवदनुग्रह एव हेतुरित्युक्तम् । तेन तादृशो भोगो न सर्वेषाम्, किंत्वत्यंतभगवदनुगृहीतानामेवेति वरणश्रुत्या सिध्यति । ततः **पंचमसूत्रे** अतो हेतोः भगवाननन्याधिपतिः । अनन्याश्च त एव ये साधनत्वेन (फलत्वेन) च भगवंतमेव जानंति । तस्मात्तदर्थमेवं भगवतः संकल्प इत्युक्तम् । तेन तदेकतानतया तदाश्रयतया च ते सर्वदा तिष्ठंतीति सिध्यति । ततः **षष्ठे सूत्रे** मुक्तस्य देहांगीकारप्रतिकूलं बादरिमतमाह । 'यत्र हि द्वैतमिव भवती'त्यादिश्रुतिरमुक्तिदशायां द्वैतदर्शनमुक्त्वा 'यत्र त्वस्य सर्वमात्मैवाभू'दित्यादिना मुक्तस्य द्वैतदर्शनं

निषेधति । तथा सति द्वितीयदर्शनाभावे कामभोगवार्तैव दूरेति तदाक्षेप्यो देहोपि दूरतरः । एतन्मते 'ब्रह्मविदाप्नोति पर'मित्यादिश्रुतिः पूर्वकक्षाविश्रांता । ततः सप्तमे बादरिविरुद्धं जैमिनिमतमाह । जैमिनिस्तु मुक्तस्य देहसत्तां मन्यते । 'ब्रह्मविदाप्नोती'ति श्रुतिः पूर्वकक्षाविश्रांतेत्यत्र मानाभावान्न बादरिमतं साधीयः । अनेन श्रुतिविरोधापत्तेः । श्रुतौ हि 'ब्रह्मविदाप्नोती'त्यत्र ज्ञानस्य तत्प्राप्तिसाधनत्वमुच्यते, 'नायमात्मे'त्यत्र वरणैकप्राप्यत्वम् । अतः साधनबोधकश्रुत्योः परस्परविरोधः । 'सोश्नुत' इत्यादिना परप्राप्तिरुपन्यस्यते । 'ब्रह्मैव सन् ब्रह्माप्येती'त्यत्र ब्रह्मणि जीवस्य लय उच्यते । अतः फलबोधकश्रुत्योर्विरोधः । एवं विरोधे सति तदभावाय गतिरवश्यं कल्पनीया । तत्र पुष्टिमर्यादाभ्यां मार्गभेदस्य सिद्धत्वात् तत्तन्मार्गीयस्य तत्तदेव फलं परममिति व्यवस्थितविकल्प एव ज्यायानिति नैकतरादरणं युक्तमिति । ततोष्टमे भगवान् व्यासः स्वसिद्धांतमाह । लोके हि शरीरं भूतजन्यं भोगायतनं च दृष्टम् । मुक्तस्य तु शरीरतदभावावाक्षेपलभ्यौ न निवारयितुं शक्यौ । अतः शरीरमेव तादृशं कल्पनीयं येन श्रुत्यविरोधः । तत्र भूमविद्याया'मात्मतः प्राण' इत्युपक्रम्य 'आत्मत एवेदं सर्व'मित्यंतेन भगवत एव सकाशाद्भोगोपयोगिसर्वसामग्रीश्रावणान्मुक्तस्य शरीरं न भूतजन्यम्, तस्मादशरीरम् । तत्रैव 'आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानंद' इति श्रावणात्तच्छरीरं भोगायतनम् । तस्माच्छरीरमपि । एवमुभयविधत्व आश्रिते श्रुतीनां न कश्चिद्विरोधः ॥

ततस्तृतीये द्विसूत्रे **तत्त्वभावाधिकरणे** गुणोपसंहारपादोक्तं निर्दोषपूर्णगुणं भगवत्स्वरूपमेव फलमिति विचारितम् । तत्र पूर्वसूत्रे दोषरूपाणामज्ञत्वादीनां भगवति या प्रतीतिः, सा भ्रांता, स्वप्नवदर्थाभावेपि प्रतीयते । तस्माद् ब्रह्म निर्दोषमित्युक्तम् । ततो द्वितीये सूत्रे याः पौगंडादयोवस्थाः, ये च गुणास्ते सर्वे संत एव मायापसारणाद्भक्तानां प्रतीयंते । तस्माद् ब्रह्मानंतगुणपूर्णमवतारेपीत्युक्तम् । तथा चावसर एव संगतिरित्यर्थः ॥ ३ ॥

ततश्चतुर्थे द्विसूत्रे **प्रदीपवदित्यधिकरणे** फलानुभवोपकरणं प्रकृतत्वाद्विचार्यते । पूर्वाधिकरणयोः फलप्राप्त्युपकरणस्य फलस्वरूपस्य च विचारितत्वात् । अतोवसरोत्र संगतिः । तत्र **प्रथमसूत्रे** मुक्तस्य भगवत्कृपयाभिव्यक्ताभ्यां जैवज्ञानक्रियाभ्यां योगेपि न ताभ्यां भगवता सह कामभोगकरणसमर्थो भवति, किंतु यथा प्राचीनः प्रकृष्टो दीपः स्नेहयुक्तायामर्वाचीनायां वर्त्यां प्रविष्टस्तां समानकार्यक्षमां करोति, तथा भगवानपि स्वदत्ते मुक्तदेहे जीवेन सह प्रविष्टस्तं देहं स्वभोगरूपकार्यक्षमं करोति । यतो 'भर्ता स'न्निति भर्तृसूक्तारंभमंत्रे भगवतः क्रीडार्थं बहुधा आवेश उक्तः । तेनैवं ज्ञायते क्रीडोपयोगिभगवदावेश एव फलानुभवोपकरणमिति । ततो **द्वितीयसूत्रे** अस्थूलादिश्रुतेः सर्वकामभोगश्रुतेश्च यो विरोधः स सुषुप्तिमोक्षभेदेन भगवदाविर्भावप्रकारभेदात् परिहृतः ॥

ततः **पंचमे** पट्सूत्रे **जगद्व्यापाराधिकरणे** भोगप्रकारो विचारितः । तत्र **प्रथमसूत्रे** 'सोश्नुते सर्वान् कामा'निति श्रुतिर्मुक्तिप्रकरणस्था । तस्मात्तत्र न जगत्संबंधः । किंच, भगवल्लीला कालमायाद्यतीता । तेन प्राकृतं जगत् ततो दूरतरमिति न तत्संबंधः । अतो लौकिकव्यापाररहितमेव मुक्तस्य भोगकरणमित्युक्तम् । ततो **द्वितीयसूत्रे** 'सर्वं हि पश्यः पश्यती'तिश्रुत्युक्तप्रत्यक्षोपदेशेन तस्य जगद्व्यापारसाहित्यमाशंक्य, श्रुतौ सर्वपदेन न जगदुच्यते, किंतु लीलास्थाः पदार्था एवोच्यंते । तेषामेव दर्शनम् । अतो न श्रुतिविरोधः । किंच, पूर्वोक्तश्रुत्यनंतरं 'स एकधा भवती'ति भक्तस्य नानारूपबोधिकाश्रुतिः पठ्यते । तेन नानारूपैर्नानालीलां भगवदनुभावितामनुभवतीति न

लीलानामनित्यत्वम्, नापि काचिदन्यानुपपत्तिरित्युक्तम् । ततस्तृतीये सूत्रे 'आयास्' इत्यागमनभविष्यत्त्वबोधकभगवद्वाक्याल्लीलानां भक्तरूपाणां चानित्यत्वमाशंक्य, भगवल्लीला प्राकृतविलक्षणा भगवदिच्छयैवोपपद्यमाना न कुतर्कैरन्यथा भाव्या, किंतु श्रुत्या नित्यत्वेनोक्तत्वादलौकिकानुसरणमेव कर्तव्यमित्युक्तम् । ततश्चतुर्थसूत्रे अस्मिन् सूत्रे कुतर्केणान्यथाभावनं न कर्तव्यमिति यदुक्तं तदेव श्रुतिप्रत्यक्षाभ्यां साधितम् । ततः पंचमसूत्रे जीवस्य भोगमात्र एव भगवत्साम्यम्, न तु सर्वथेति 'न तत्समश्चाभ्यधिकश्च दृश्यते' इतिश्रुतेर्न विरोध इत्युक्तम् । एवमत्र पंचसूत्र्या भगवतः परमफलत्वमर्थादुक्तं भवति । ततः षष्ठे ईदृशं परमफलं प्राप्य भक्तानां ज्ञानिनां चावृत्तिर्नास्ति । तत्र प्रमाणं च शब्दः श्रुतिरूपः स्मृतिरूपश्चेत्युक्तम् । एवं षड्भिः सूत्रैर्फलभोगप्रकारो विचारितः ॥ ५ ॥

वेदांतीयन्यायमालामणुभाष्यानुसारिणीम् । सौकर्यायार्थबोधस्य चकार पुरुषोत्तमः ॥ १ ॥

इति श्रीवल्लभाचार्यचरणदासस्य श्रीपीतांबरात्मजपुरुषोत्तमस्य कृतौ
वेदान्ताधिकरणमालायां चतुर्थाध्यायस्य चतुर्थः पादः ।
चतुर्थाध्यायः समाप्तः ॥

श्रीकृष्णाय नमः ।

श्रीगोपीजनवल्लभाय नमः ।

श्रीमदाचार्यचरणकमलेभ्यो नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

भाष्यप्रकाश-रश्मि-परिबृंहितम् ।

अथ प्रथमोऽध्यायः ।

चतुर्थः पादः ।

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ १ ॥ (१।४।१)

एवं सर्वेषां वेदान्तानां ब्रह्मपरत्वे निर्णीते, केचिद् वेदार्थाऽज्ञानात् कचिद् वेदभागे कापिलमतानुसारिपददर्शनेन तस्यापि वेदमूलकत्वं वदन्ति । तन्निराकर-

---

भाष्यप्रकाशः ।

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ १ ॥ अतीतेषु पादेषु प्रथमेऽतिव्याप्तिजनकशब्दकृतसंदेहवारणाय कार्यनिरूपकाणि वाक्यानि विचार्य, द्वितीयतृतीययोश्च यथायथं जीवजडरूपार्थकृततत्संदेहवारणायान्तर्याम्युपास्यरूपनिरूपकाणि च वाक्यानि विचार्य सर्वेषां वेदान्तानां साक्षात् परंपरया च ब्रह्मणि समन्वयः प्रतिपादितः । स तदा दृढीभवति यदा श्रौतत्वेनाभिमन्यमानस्य मतान्तरस्य श्रौतता निराक्रियते । अतस्तदर्थं चतुर्थे पादे जीवजडसमुदायात्मकार्थनिरूपकतया मतान्तरश्रौतताभ्रमजनकानि प्रकीर्णानि वाक्यानि विचार्यन्त इत्युपोद्घातबोधनाय पूर्वपादत्रयसिद्धमर्थमनुवदन्त एतत्पादार्थमाहुः एवमित्यादि । तथा च तन्निराकरणं प्रयोजनं, तादृशवाक्यविचारश्चार्थ इत्यर्थः । नन्वदृश्यत्वाद्य-

रश्मिः ।

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ १ ॥ परंपरयेति जीवमुख्यप्राणलिङ्गादित्यत्र जीवमुख्यप्राणप्रतिपादकवेदान्तानां परंपरया समन्वय । उपोद्घात इति । तथाच प्रकृतः स च वेदान्तानां समन्वयः तत्सिद्ध्यर्थां चिन्तां मतान्तरनिराकरणचिन्तामुपोद्घातं बुधा विदुरिति । ननु सांख्यमतनिराकरणमाकस्मिकमिति चेन्न, षट्सु शास्त्रेषु वेदवेदान्तयोरङ्गाङ्गिभावः परस्परं, स आरम्भ एव विचारितः । अधुना तृतीयशास्त्रस्य विचारः प्राप्तावसरः क्रियत इति योगः प्रत्युक्त एव । द्वितीयेऽध्याये पञ्चरात्रविचारः पाशुपतमतदूषणं 'येऽप्यन्यदेवता भक्ताः' इत्यादिना गीतायां स्पष्टमेव । नास्तिकादिमतानि दूष्यत्वेन पुराणप्रसिद्धानि द्वितीये द्वितीयपादे प्रतिवक्तव्यानीति ज्ञेयम् । तादृशेति प्रकीर्णकवाक्यविचारः प्रकीर्णकत्वं कापिलमतश्रौतताभ्रमजनकत्वं कचिद्वेदभागे कापिलमतेत्यादिभाष्यात् । समन्वयानुकूलः मतान्तरश्रौतताभ्रमजनकवाक्यविचारः इत्यत्र विचारपदं तादृशसमन्वये लाक्षणिकं वा । समन्वयस्त्वभ्यापार्यः ।

णाय चतुर्थः पाद आरभ्यते । तत्र, ईक्षतेर्नाशब्दमिति सांख्यमतमशब्दत्वादिति निवारितम् । वेदेन प्रतिपादितमिति तत्राशङ्कते । आनुमानिकमप्येकेषाम् ।

एकेषां शाखिनां शाखासु सांख्यपरिकल्पितप्रकृत्यादि श्रूयते ।
'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥

भाष्यप्रकाशः ।

धिकरणे एतादृशमपि वाक्यं विचारितमेवेति, किमनेन विचारेणेत्याशङ्कां समादधानाः सूत्रांशमवतारयन्ति तत्र ईक्षतेरित्यादि । तथाच यद्यपि तद्वाक्यं विचारितं, तथापि तन्मतस्य सर्वथा अश्रौतत्वमेवेति नोपपादितमतो विचार इत्यर्थः । एतेनास्य पादस्य, ईक्षतिसमन्वयसूत्रप्रपञ्चरूपत्वं बोधितम् । नन्वत्र प्रकृतिनिराकरणमेवास्तु । मतस्य श्रौतत्वानिराकरणे किं गमकमित्या, काङ्क्षायामानुमानिकपदमेव गमकमित्याशयेन व्याकुर्वन्ति एकेषामित्यादि । तथा च पूर्वग्रन्थे- 'कामाच्च नानुमानापेक्षा,' 'नानुमानमतच्छब्दात्' इत्यादौ केवलानुमानपदादत्र च संबन्धितद्धितान्तानुमानिकपदात् सांख्यप्रवचनीये, 'संघातपरार्थत्वात् पुरुषस्य' इति सूत्रेऽनुमानेन प्रकृतिसंबन्धित्वेन सिद्धः पुरुषोऽपि संग्राह्यत्वेन गम्यते । तयोश्च निराकरणे तन्मतमेव निराकृतं भवतीति सौत्रं पदमेव गमकमित्यर्थः । केषां शाखायामित्याकाङ्क्षायां विषयवाक्यमुदाहरन्ति इन्द्रियेभ्य

रश्मिः ।

एतादृशमिति 'अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रम्' इत्यादिवाक्यं मायाप्रकृत्यविद्यावादानां श्रौतताभ्रमजनकम् । अवतारयन्तीति इदमुपलक्षणं तन्मतं पूर्वपक्षे निक्षेप्तुं शंकराचार्यमतेनावतारयन्ति स विचारितमिति । नन्वीक्षत्यधिकरणे तु शब्दाप्रतिपाद्यं न भवति ईक्षतेः श्रावणादित्युक्तं न प्रकृतिर्निवारिता शंकरभाष्ये तु निवारितेति चेन्न । प्रकृतिनिराकरणं सूचितार्थत्वेनाङ्गीकृत्य विचारितप्रायमित्यर्थः । नोपपादितमिति सूचितार्थपक्षे । एतेनेति सूचितार्थाङ्गीकारेण 'सर्वेषामेव शब्दानां व्यञ्जकत्वमपीष्यते' इति । बोधितमिति व्यञ्जनया बोधितं सूचितमिति यावत् । तथा चायं भाष्यार्थः । तत्रेति शांकरमतेसाकं सूचितार्थपक्षे । इतीति इत्येवं तयोः पक्षयोराशङ्कत इत्यर्थः । ननु शांकरमतपूर्वपक्षस्य पूर्वपक्षकरणे किं फलमिति चेन्न सिद्धान्तस्य पूर्वपक्षतुल्यत्वात् । तथा च शांकरभाष्यमेतत्सूत्रसमाप्तौ । तदेवं पूर्वापरालोचनायां नास्त्यत्र परपरिकल्पितस्य प्रधानस्यावकाश इति । परपरिकल्पितस्येति प्रधानविशेषणान्मायाङ्गीकारध्वननात् । पूर्वग्रन्थ इति आनन्दमयाधिकरणे द्युभ्वाद्यायतनाधिकरणे च । संबन्धीति अनुमानेन संबद्ध्यत इत्यानुमानिकं 'शेषे' इति ठक् । इति सूत्रे प्रथमाध्यायस्थे । अनुमानेनेति । ननु आनुमानिकेनेति वक्तव्ये अनुमानपदं कुतः इति चेन्न । अनुमानेन प्रकृत्या सिद्धः पुरुषः संग्राह्यत्वेन काठके गम्यते । प्रकृतिसंबन्धित्वेन संघातपरार्थत्वेन सिद्धः पुरुषः संग्राह्यत्वेन गम्यते इत्यपि पदादर्थात् । तथा च सूत्राणि 'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोहंकारात्पञ्चतन्मात्राणि उभयमिन्द्रियं स्थूलभूतानि पुरुष इति पञ्चविंशतिर्गुणाः' 'स्थूलात्पञ्चतन्मात्रस्य' 'बाह्याभ्यन्तराभ्यां तैरहंकारस्य' 'तेनान्तःकरणस्य' 'ततः प्रकृतेः' 'संघातपरार्थत्वात्पुरुषस्य' त्रयोरिति प्रकृतिपुरुषयोः । इन्द्रियेभ्य इत्यादीति तथा च काठकपदाद्यजुर्वेदे चरकानाम द्वादशविधा

महतः परमव्यक्तमव्यक्तात् पुरुषः परः ।
पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिः' ॥ इति काठके श्रूयते ।
तत्र बुद्धेरात्मा अहंकारः । ततो महान् महत्तत्त्वम् । ततोऽव्यक्तं प्रकृतिः । ततः पुरुष इति । न ह्यहंकारादयः पदार्था ब्रह्मवादे संभवन्ति । तस्मादेवंजातीयकेषु तन्मूलपदार्थानां श्रवणान्मायाप्रकृत्यविद्यावादा अपि श्रौता इति चेन्न ।

भाष्यप्रकाशः ।

इत्यादि । क्वात्र प्रकृत्यादीत्यतो व्याकुर्वन्ति तत्र बुद्धेरित्यादि । बुद्धेरात्मा अहंकार इति । पर इत्यनुषज्यते । बुद्धेः सकाशादात्मा । 'सर्वात्मनोऽन्तःकरणं गिरित्रम्' इत्यन्तःकरणत्वेन सिद्धस्य गिरित्रस्य, 'चन्द्रो मनो यस्य दृगर्क आत्मा अहं समुद्रो जठरं भुजेन्द्रः' इति स्वस्मिन्नात्मपदप्रयोगादात्माऽहंकारः पर इत्यर्थः । शेषं स्फुटम् । तथा चैवमत्र सांख्यमतप्रत्यभिज्ञानात् तन्मतं श्रौतमिति तदाहुः नहीत्यादि । अपिशब्दार्थमाहुः तस्मादित्यादि । एवंजातीयकेष्विति । वक्ष्यमाणेष्वजादिवाक्येषु । मायाप्रकृत्यविद्यावादा इति । मायां तु प्रकृतिं विद्यात्, पञ्चाशद्भेदां पञ्चपर्वामधीम' इत्यादिवाक्येष्वभिमन्यमानाः । एवं पूर्वपक्षांशमनूद्य तद्दूषकं

रश्मिः ।

भवन्ति चरकाह्वरकाः कठाः प्राच्यकठाः कपिष्ठलकठाश्चारायणीयाः वार्तन्तव्याः श्वेताः अश्वतराः औपमन्यवः पांता ऐरिनेयाः मैत्रायणीयाश्चेति । श्वेताश्वतरोपनिषदिति प्रसिद्ध्याकारो न वाचनीयः यथालिखितपाठक इति हि भाष्ये पाठकाधमेषु गणनात् । अतो द्वादश । यद्वा चरका इत्युद्देश्यं अग्रे द्वादशविधेयानि । तथा चायं भाष्यार्थः । एकेषां मुख्येभ्यः सामाथर्वशाखिभ्योऽन्येषां यजुर्वेदशाखिनां शाखासु चरकादिनाम्नीषु यद्वा एकेषां चरकाणां केवलानां शाखिनां शाखासु ह्वरकादिषु इति । कठशाखायामित्यर्थः । क्वात्रेति अत्र श्रुतिषु सांख्यसिद्धप्रकृत्यादि क्वेति प्रश्नः । सांख्यसूत्राण्युक्तान्येव । आत्मपदस्याहंकारवाचकत्वं बुद्धेः परत्वं च व्युत्पादयन्ति बुद्धेरिति । **सर्वात्मनः** पुरुषस्य । इदं द्वितीयस्कन्धेस्ति । अन्तःकरणत्वेनेत्यस्याहंकारत्वेनेत्यर्थः । **चन्द्रो मनः** । इदमुत्तरार्धे त्रिषष्टितमेध्याये शिवस्तुतावस्ति । **अहं** श्रीशिवः अहंकारः । आत्मेत्यात्मपदमहंकारवाचकम् । बुद्धेः परत्वमीश्वरस्य स्पष्टम् ।

'यश्च मूढतमो लोके यश्च बुद्धेः परं गतः ।
तावुभौ सुखमेधेते क्लिश्यत्यन्तरितो जनः' ॥

इति । भुजा इन्द्रः । स्वस्मिन्निति श्रीकपर्दिनि अहंकारे तथाच गिरित्रस्याहंकारस्य चन्द्रो मन इत्याद्युक्तरीत्या वाचकं यदात्मपदं तस्य प्रयोगात् कस्मिन्नित्यतः स्वस्मिन्नहंकाररूपे श्रीशिवे इति फक्किकान्वयः । चैत्रस्य गुरुकुलमित्यस्येवैकदेशान्वयः । **सांख्येति** तदिदं सांख्यमतं श्रुताविति सांख्यमतप्रत्यभिज्ञानम् । ननु वैदिकशब्दानां भिन्नत्वात्कथं श्रौतमिति चेन्न परमत ऐक्यात् अपीति मायाविद्यासमुच्चये रूपम् । ननु मायावादः शांकराणां प्रकृतिवादो निरीश्वरसांख्यानां अविद्यावादः सैषाऽविद्या जगत्सर्वमिति श्रीनृसिंहतापिनीयश्रुतेः तापिनीयशाखिनामनिर्णयकर्तृणामिति त्रयाणां भेद उक्तो भाष्ये तेषामैक्यं पूर्वपक्ष इति प्रमाणपूर्वकं तं पक्षमाहुः **मायां त्विति** । पञ्चपर्वाविद्या तासामभेदान्वयः आदिनाऽजादिवाक्यानि । श्रौता इति समस्ता अभेदान्वयान् नामभेदेन प्रवृत्ताः व्यस्ता । अभीति अभिमन्यन्ते ये वादास्तेभिमन्यमानाः 'लटः शतृशानचौ' 'आने मुक्' ।

शब्दसाम्यमात्रेण न तन्मतं सिद्ध्यति ।

'संदिग्धानां पदार्थानां पौर्वापर्येण निर्णयः ।
न तु संदिग्धवाक्येन सर्वव्याकुलतोचिता' ॥
अत्र हि पूर्वम् ।
'आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥
इन्द्रियाणि हयानाहुर्विषयाँस्तेषु गोचरान् ।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' ॥

तदनु चत्वारि वाक्यानि । 'यस्त्वविज्ञानवान्' इत्यादि । तदनु 'इन्द्रियेभ्यः

भाष्यप्रकाशः ।

हेतुमवधारयितुं निषेधं व्याकुर्वन्ति शब्देत्यादि । तन्मतमिति । अहंकारमहत्तत्त्वप्रकृतिपुरुषाणामुत्तरोत्तरं परत्वबोधकं सांख्यमतं कुतो न सिद्ध्यतीत्यतः कारिकया तद्धेतुमाहुः संदिग्धेत्यादि । पौर्वापर्येणेति पूर्वापरसंदर्भेण । संदिग्धा ह्यस्मिन् वाक्ये पदवाच्या अर्थाः । पदानि वाक्यावयवभूतानि, वाक्यं च महावाक्यस्य । अतो महावाक्यानुरोधेन तदर्थो निर्णयः । न तु संदिग्धपदघटितवाक्येनावयविभूतस्य महावाक्यस्य व्याकुलता युक्ता । तथा च तद्व्याकुलीभावादेतन्मतं न सिद्ध्यतीत्यर्थः । तदेतद् व्युत्पादयन्ति अत्र हीत्यादि । अत्रेति प्रकरणे । हिर्हेतौ । चत्वारीति । विज्ञानसारथिवाक्यस्य क्वचिदिन्द्रियेभ्यः परा इत्याद्यनन्तरं दर्शनाच्चत्वारि, विज्ञान-

रश्मिः ।

ननु 'कर्तरि कृत्' इति चेन्न घञादौ कर्तरि कृदित्यस्याप्रवृत्तिवदत्राप्यप्रवृत्तेरिति वैयाकरणभूषणसारे सिद्धान्तनिर्णय उक्तत्वात् । निषेधमिति सौत्रनकारार्थम् । महेति अवयवभूतम् । व्याकुलतेति उक्तशरीररूपकविन्यस्तगृहीतिपरित्यागेन सूक्ष्मदर्शनपरित्यागेन च स्थूलदृष्ट्या शब्दपीडा युक्तेत्यर्थः । हिरिति । परा इतीति हेतोः इत्यग्रेन्वयः । चत्वारीति ।

'यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सदा ।
तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः' ॥
'यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा ।
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः' ॥
'यस्त्वविज्ञानवान् भवत्यमनस्कः सदाऽशुचिः ।
न स तत्पदमाप्नोति संसारं चाधिगच्छति' ॥
'यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः ।
स तु तत्पदमाप्नोति यस्माद्भूयो न जायते' ॥

इति चत्वारि । वदतीति सूत्रे व्यासो वदति । भाष्ये । पूर्वेति आत्मानं रथिनमित्यादिसंबद्धः । एवकारेण सांख्यमतव्यवच्छेदः । तमिति पूर्वसंबद्धार्थम् । प्रकृते । ननु प्रथमसुबोधिन्यां काव्यवद्रूपकनिरूपणे स्पष्टोर्थो भवति यद्यपि तथापि भागवते तथाकथनमनुचितं सर्ववेदसारोद्धारत्वात् । रूपकादिकं तु बुद्धिपरिकल्पितमिति रूपककरणं भाष्ये कुतः इति चेन्न ईश्वरवद्वेदोपि कर्तुमकर्तुमन्यथयितुं समर्थ इति ज्ञापनाय क्वचिद्रूपककरणात् 'अत एव च नित्यत्वम्' इति व्याससूत्रात्

परा:' इति । तत्र पूर्वसंबन्ध एवार्थ उचितस्तमाह शरीररूपकविन्यस्तगृहीतेः । शरीरेण रूप्यन्ते ये शरीरेन्द्रियादयस्ते विन्यस्ता यत्र रूपकभावेन रथादिषु तेषामेवात्र गृहीतिर्ग्रहणम् । अन्यथा प्रकृतहानाप्रकृतपरिग्रहापत्तिः ।

जीवप्रकरणं ह्येतन्मुक्त्युपायोऽस्य रूप्यते ।
योग्यं शरीरमारुह्य गच्छेदिति हरेः पदम् ॥

तत्र जीवस्य ब्रह्मप्राप्तौ मुख्यं साधनं शरीरम् । स रथः । सर्वसामग्रीसहिताऽपराधीनयानत्वात् । रथस्तु हयाधीनः । हयाश्च स्वबुद्ध्यधीनाः । सा च

भाष्यप्रकाशः ।

सारथिवाक्यार्थस्त्वग्रे कारिकया वक्तव्यः । एवं संदर्भे यत् सिद्धं तद्वक्तुं हेतुं वदतीत्याहुः तत्रेत्यादि । तत्रेति इन्द्रियेभ्य इति वाक्ये । विष्णुधर्मोत्तरे तृतीयकाण्डे । 'उपमानेन तुल्यत्वमुपमेयस्य रूपकम्' इति रूपकलक्षणाद् रूप्यते यत् तद्रूपमिति कर्मणि घञि कृते, 'इवे प्रतिकृतौ' इति कनि च कृते रूपकमित्यलंकारनाम सिद्ध्यतीत्यभिसंधाय हेतुं व्याकुर्वन्ति शरीरेणेत्यादि । स्वस्य स्वज्ञापकत्वेऽपि दोषाभावाच्छरीरेण रूप्यन्ते ये शरीरेन्द्रियादयस्ते यत्र

रश्मिः ।

यद्वेदं समाधानम् 'काव्यादीनामसत्यत्वान्नोपयोगः कथंचन' इत्यनुपयोगाद्धर्मवाचकलुप्तोपमा रूपकमत्र न काव्योक्तमिति तदाहुः विष्णुधर्मेति । उपमीयतेऽनेन करणे ल्युट् । उपमानम् । उपमातुमर्हमुपमेयम् 'हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते' इत्यत्र हंसी उपमानं तद्वाचकं 'इव' पदम् । कीर्तिरुपमेयं उपमानेन तुल्यत्वं स्वर्गङ्गावगाहनं उपमानोपमेयसाधारणधर्मः इयं पूर्णोपमा 'कर्पूरन्ती दृशोर्मम' इति धर्मवाचकलुप्तोपमा कर्पूरमिवाचरन्तीत्यर्थे विहितस्य कर्पूरवदानन्दात्मकाचारार्थस्य क्विप इवशब्देन सह लोपात् धर्मलोपस्त्वैच्छिकः दृशोरानन्दात्मकतया कर्पूरन्तीति तदुपादानस्यापि संभवात् तथा चोपमेयसंबन्धिरूपकमिति भावः । अत्र शरीरेन्द्रियादयः उपमेयाः रथादीन्युपमानानि । घञीति कर्मणि घञि दीर्घत्वम् । रूप रूपकरणे चुरादिरिति । यद्वा रुशब्दः रुयते स्तूयते रूपं खष्पशिल्पेति सूत्रेण पप्रत्ययो दीर्घश्च निपातितः । ननु भाष्ये स्वार्थे कप्रत्ययो वक्ष्यते अत्रेवार्थे कुत उच्यते तत्राहुः अलमिति । अत्र भाष्ये शरीरेण पदेन रूप्यन्तेऽस्य परोक्षवादः रूप्यन्ते शब्द्यन्ते शरीरेन्द्रियादयः । ननु विषयाः कथं शरीरेण शब्द्यन्ते सत्यम् । जीवप्रकरणे मोक्षे निरूपणीये विषयाणां ब्रह्मत्वात् । 'सर्वेषां ब्रह्मता ततः' इति सिद्धान्तरहस्यात् तथा चात्मपदशक्तिर्विषयेषु । शरीरेन्द्रियादयः इत्यत्रादिपदेनानिन्द्रियं मनो वा आत्मन उपलक्षकम् । यद्वा सर्वे सर्वार्थवाचका इति शरीरस्य सर्ववाचकत्वेन शरीरेन्द्रियात्मवाचकत्वं यद्यपि तथापि अन्यावाचकत्वं दोषः स्यात् तद्वारणायात्मोपनिषदा शरीरस्यात्मत्वेन ग्रहणमिति शरीरेण त्रिविधात्मनापदेन रूप्यन्ते शब्द्यन्ते शरीरादयः शरीरद्वयात्मानः रथादिष्विति भाष्यात् । यत्रेत्यस्यार्थमाहुः रूपकेति रूपपदस्थले स्वार्थे कप्रत्ययेन सूच्यतेऽयमर्थः । तेषामिति रथादीनाम् । एतावतो हेतोः श्रुतौ सूत्रेण सांख्यमतनिराकरणाय प्रयुक्तेर्न विशेषणादिकृत्यमतिदुरूहम् । प्रकृते । एतदाहुः स्वस्येति । स्वस्य शरीरपदस्य स्वेषां प्रतिपाद्यत्वेन स्वीयानामर्थानां शरीरेन्द्रियादीनां ज्ञापकत्वेऽवबोधकत्वे . अपिरेवकारार्थे अवबोधकत्व एवपदजन्यपदार्थोपस्थितिरुक्ता । दोषः सर्वार्थवाचकत्वं तस्याभावात् । शरीरेण

प्रग्रहाधीना । स च सारथ्यधीनः । स च स्वबुद्ध्यधीनः । सा च मार्गाधीना । स

भाष्यप्रकाशः ।

वाक्ये रथादिषु रूपकभावेन अलंकारबोधितप्रतिकृतिभावेन विन्यस्ताः स्थापितास्तेषां सर्वेषां रथादिप्रतिकृतिभूतानामेवात्र गृहीतिर्ग्रहणम् । अतः शरीररूपा रूपकविन्यस्ताः । शरीररूपकविन्यस्ताः । रूपकविन्यस्तानां व्यावर्तकं शरीररूपत्वमित्युपसर्जनत्वात् तस्य पूर्वनिपातः । शाकपार्थिवादेराकृतिगणत्वाद् रूपपदलोपश्च । अतः शरीररूपकविन्यस्तानां गृहीतिर्ग्रहणं शरीररूपकविन्यस्तगृहीतिस्तस्मादित्यर्थः । तथा च स्यात् सांख्यमतापत्तिर्यद्यहंकारादीनां पदार्थानां तत्त्वेन गृहीतिः स्यात् सा तु नास्ति । यतः शरीरेण ये रूप्यन्ते शरीरेन्द्रियादयस्ते विन्यस्ता यत्र

रश्मिः ।

शरीरपदेन रूप्यन्ते रुयन्ते रुशब्दे परोक्षवादात् । शब्धन्ते शब्दव्यापारोभिधा तद्विषयीक्रियन्ते ये शरीरेन्द्रियादयः । ननु काव्यनिषेधेन रूपकस्य ।

'विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत् ।
रूपकं तु त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः ॥
अयं हि धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात् ।
अयमास्ते विना शंभुस्तार्तीयीकं विलोचनम् ॥
शंभुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टिताम् ।
अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना ॥
साध्वीयमपरा लक्ष्मीरसुधासागरोदिता ।
अयं कलङ्किनश्चन्द्रान्मुखचन्द्रोतिरिच्यते' ॥

विषय्युपमानभूतं पद्मादि विषयस्तु उपमेयं वर्णनीयं मुखादि । रूपकं द्विविधमभेदरूपकं ताद्रूप्यरूपकं च । अयं हीति सार्धेनाभेदरूपकाणि । अस्या मुखेन्दुनेति सार्धेन ताद्रूप्यरूपकाणि आधिक्यन्यूनत्वानुभयोक्त्युद्देशक्रमप्रातिलोम्येनोदाहृतानीत्येवंरूपस्य विवक्षां वारयितुमाहुः अलंकारेति अलंकारबोधितस्य सदृशभावेन धर्मवाचकलुप्तोपमात्वेन रूपकस्य विन्यस्ताः विशेषेण नितरामस्ताः प्रेरिताः स्थापिताः शरीरेन्द्रियादयः स्वाभेदसंबन्धेनान्यत्र गतिनिवृत्तियुक्ताः कृताः भवन्ति त इत्यन्वयः । एतेन तेषामिति भाष्यपदं व्याकृतम् । कीदृशामित्यत आहुः प्रतिकृतयः सदृशाः भूतानि शरीरेन्द्रियादीनि येषां तेषां रथादीनां तथा च रथादयश्च ते प्रतिकृतिभूता रथादिप्रतिकृतिभूतास्तेषां रथादिप्रतिकृतिभूतानां तेषामिति रथादीनाम् । समासमाहुः अत इति उक्तकारणात् । रूपकेति शरीरेन्द्रियादीनाम् । व्यावर्तकं विशेषणम् । ननु विशेषणं शरीररूपा इति न तु शरीररूपकत्वमितीति चेन्न कप्रत्ययेन स्वार्थिकेन शरीररूपा शरीररूपकाणीत्येतयोरेकार्थबोधकत्वेन विशेषाभावात् । इवार्थे कप्रत्ययस्यालंकारनामत्वार्थं रूपकपदसूचितार्थनिबन्धनत्वात् । पूर्वेति 'उपसर्जनं पूर्वम्' इति पूर्वनिपातः सूत्रे व्यासपादैः कृतः । आकृतीति गणपाठे नास्ति क्वाचित्कमाकृतिगणत्वम् । तत उपपदस्य रूपपदस्य लोपः । आकृतिगणत्वाभावे शरीररूपका विन्यस्ता यत्रेति भाष्यप्रोक्तो बहुव्रीहिः । तस्मादिति ननु तस्या इति वक्तव्ये तस्मादिति कुत इति चेन्न शरीररूपकविन्यस्तग्रहणादित्यर्थे तात्पर्यात् । गृहीतेर्ग्रहणादिति वक्ष्यन्ति तथा च सामान्ये नपुंसकमिति भावः ।

च प्राप्याधीन इति। एवं ज्ञात्वा युक्तसामग्रीकस्तद्देशं प्राप्नोति। तत्रेन्द्रियाणामात्मा विषयाः।

भाष्यप्रकाशः।

वाक्ये रूपकभावेन रथादिषु, आत्मानं रथिनं विद्धीत्यादिना, तेषामेवात्र गृहीतेर्ग्रहणात्। यदि ह्येवं नोपगम्येत तदा प्रकृतहानादिदोषावापद्येताम्। किंचेदं हीति निश्चयेन जीवप्रकरणम्। अत्रास्य मुक्त्युपायो, योग्यं शरीरमारुह्य हरेः पदं गच्छेदित्येवं विज्ञानसारथिमन्त्रेण रूप्यते। न ह्येतत् सांख्यमते संभवति। स्वरूपावस्थानातिरिक्तस्य भगवत्पदप्राप्तिरूपस्य मोक्षस्य तैरनङ्गीकारात्। अत इन्द्रियेभ्य इति वाक्ये अहंकारादितत्त्वरूपो नार्थः। किंतु वक्ष्यमाणप्रकारकः। तथाहि। तत्र मुक्त्युपायेषु बोधनीयेषु वक्तव्ये रूपके जीवः स्वतन्त्रत्वाद् रथी। जीवस्येत्यादिना विवृतं शरीरं रथः। तत्र हेतुः सर्वेत्यादि। सामग्री इन्द्रियादिरूपा। अपराधीनता तु स्वायत्ततया। तेन शरीरे रथरूपकम्। रथस्तु गमने हयाधीन इतीन्द्रियेषु हयरूपकम्। हयबुद्धिस्थानापन्नाऽत्रेन्द्रियदेवता देवताप्राधान्य एवेन्द्रियाणां भगवत्परत्वस्य, 'देवानां गुणलिङ्गानाम्' इत्यत्र तृतीयस्कन्धे सिद्धत्वात्। देवतासाहित्यस्यार्थतः प्राप्तत्वाच्च एवमग्रेऽपि बुद्धिस्थानापन्ना देवतैव। हयबुद्धिस्तु प्रग्रहाधीनेतीन्द्रियनियामकमनसि तद्रूपकम्। एवमेव बुद्धौ सारथिरूपकम्। सारथिबुद्धिर्मार्गाधीनेति विषयेषु गोचरपदेन मार्गरूपकम्। रथिस्वरूपबोधनायात्मेन्द्रियेत्यर्धश्लोकः। ततो, मार्गस्तु प्राप्याधीन इति तद्बोधनाय प्रापकसामग्री निगमनपूर्विका, यस्त्वविज्ञानवानित्यादयश्चत्वारः श्लोकाः। प्राप्यनिगमनाय पञ्चम इति बोधयितुम्, एवं ज्ञात्वेत्यादिना हयरूपकपर्यन्तग्रन्थस्य तात्पर्यकथनम्। इन्द्रियविषयेषु देशरूपकस्य तात्पर्यं वक्तुम्, 'इन्द्रियेभ्यः परा' इत्यादेस्तात्पर्यमाहुः तत्रेन्द्रियाणामित्यादि। आत्मेति 'घ्राणं च गन्ध' इति न्यायेन भगवदिन्द्रियरूपतया तदाधिदैविकत्वात् तेषां नियामकाः। श्रौतस्य परपदस्यायमर्थः। यद्यप्याकर्षकत्वान्नियामकत्वमुक्तं श्रीभागवते। 'इन्द्रियैर्विषयाकृष्टैरिति'। अनुभवश्च कामिनीकुचकुम्भादिदर्शने चक्षुराद्याकर्षस्य।

रश्मिः।

अन्यथेति भाष्यं विवृण्वन्ति स्म यदि हीति। कारिकार्थमाहुः किं चेति। योग्यमिति तत्तल्लीलायोग्यम्। मयूरादिरूपमपि। प्राप्तत्वाच्चेति एतेन भाष्ये एतदनुक्तावपि न क्षतिरिति द्योतितम्। पञ्चम इति।

'विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' ॥ इति।

भाष्येऽर्थपदार्थो विषयाः इत्युक्तम्। इन्द्रियाणामर्था विषया इति पाठे कचिदिन्द्रियाणामात्मा विषया इति पाठस्तमाहुः। प्रकृते। आत्मेति। घ्राणं च गन्ध इति अयं न्यायः द्वितीयस्कन्धे तु 'घ्राणोस्य गन्धो मुखमग्निरिद्धः' इति अस्यानन्तस्य गन्धो घ्राणग्राह्यो गुणो घ्राणेन्द्रियम्। तदाधीति इन्द्रियाधिदैविकत्वात्। तेषामिति इन्द्रियाणाम्। तथा च भाष्ये आत्माधिदैविकरूपा जसो डा। आचार्येषु भेदबुद्धेः अपराधेषु गणनात् तद्भाष्यस्य वेदतुल्यत्वात् सविसर्गो नकारः पतितो वा तथा चेन्द्रियाणां परा आत्मानः आधिदैविकाः अर्था विषया इति भाष्यार्थः। अयमिति नियामकरूपः। ननु न परपदस्यायमर्थः किं तु विषयपदस्येत्याहुः यद्यपीति। न विषयपदस्यार्थे

ते च मनसा सम्यक्त्वेन भावितास्तथा भवन्ति। विरक्तेन्द्रियाणामतथात्वात्। बुद्धेरात्मा विज्ञानम्, तद् ब्रह्मविषयकं महद् भवति। ततः परमव्यक्तं, न प्रकटं, भगवत्कृपैव। सा तु भगवदधीना, न साधनान्तराधीना। स च भगवान् स्वाधीन इति। एवमेवार्थस्तस्योचितः। किंच, दर्शयति स्वयमेवेममर्थम्।

'एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते।
दृश्यते त्वग्र्या बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः'॥ इति।

भाष्यप्रकाशः।

तथापि नात्र तदभिप्रेतम्। मोक्षप्रकरणत्वादित्यभिप्रेत्याहुः ते चेत्यादि। तथाच मोक्षप्रकरणे यदिन्द्रियेभ्यः परत्वं विषयाणामुच्यते, तद् भगवदीयतया मनसा सम्यक्त्वेन भावितानामेव। यथा नवमस्कन्धादावम्बरीषादिचरिते, 'स वै मनः कृष्णपदारविन्दयोः' इत्यादिश्लोकत्रयोक्तास्तादृशाम्। न तु सामान्यानाम्। नापि ज्ञानीन्द्रियविषयविवक्षया। विरक्तेन्द्रियाणां विषयानाकृष्टत्वात्। अतः 'तस्यारविन्दनयनस्य' इत्यादिवद् यत्र भगवदभिप्रायः सा मोक्षप्रणाड्यत्र विवक्षिता, न तु शुष्कज्ञानप्रणाडीति बोधनाय तदुक्तिरित्यर्थः। एतेन अर्थेभ्यश्च परं मन इत्यपि व्याख्यातप्रायम्। मनसा सम्यक्त्वेन भावन एव तेषां तथात्वादिति। मनसस्तु परा बुद्धिरिति सारथिभावादेव स्पष्टम्। बुद्धेरात्मेत्यादिकं व्याकुर्वन्ति बुद्धेरात्मेत्यादि। विज्ञानमिति तत्कार्यभूतं विशिष्टज्ञानम्। तस्य बुद्धिनियामकत्वं तु ब्रह्मविषयकत्वेन महत्त्वादित्यर्थः।

रश्मिः।

इत्याहुः तथापीति। नात्रेति किं तु 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इति श्रुत्युक्त आत्मेन्द्रियमनोयुक्तं भोक्ता विषयग्रहणेन सुखदुःखसाक्षात्कारवानित्याकर्षकत्वमभिप्रेतम्। ननु तद्वाक्यं हानोपादानबुद्धौ तु विशेष इत्युक्त्वा प्रस्थानरत्नाकरे व्याकृतम्। अत्र मोक्षप्रकरणे आत्मोपादानबुद्धौ[1] विशेषापेक्षायां कुतो नाभिप्रेतमिति चेन्न विषयोपादानबुद्धौ मनसा सम्यक्त्वेनाभावितत्वस्य मोक्षप्रकरणे प्रतिबन्धकत्वात्। ते च मनसा सम्यक्त्वेन भाविताः इति भाष्यात्। भावितानामिति गुरूपदेशादिना भगवदीयत्वादिना वा स्मृतानाम्। तादृशामिति क्रियाकलापं 'सर्वात्मभावं विदधन्महीमिमां तन्निष्ठविप्राभिहितः शशास ह' इति सर्वात्मभाववताम्। श्लोकत्रयार्थानुवादकोयं श्लोकः।

'एवं सदा कर्मकलापमात्मनः परेऽधियज्ञे भगवत्यधोक्षजे।
सर्वात्मभावं विदधन्महीमिमां तन्निष्ठविप्राभिहितः शशास ह'॥ इति।

तस्यारविन्देति तृतीयस्कन्धे सनकादिप्रसङ्गेस्ति। भगवदिति श्रुत्यभिप्रायः भगवत्पदस्य श्रुतिवाचकत्वं ब्रह्मपदवत्। तदुक्तं कृष्णोपनिषदि 'तस्मान्न भिन्ना एतास्ता आभिर्भिन्नो न वै विभुः' इति। अत्रेति आत्मानं रथिनमित्यादिश्रुतिषु। तदुक्तिरिति साधनोक्तिः। तेषामिति आधिदैविकानामर्थविषयाणाम्। तथात्वात् युक्तपदार्थत्वात्। एतेनैव विरक्तेन्द्रियाणामिति भाष्यमपि विवृतम्। अतथात्वात् अयुक्तपदार्थत्वात्। ननु शमदमाद्युपेतसूत्रे भक्तिमार्गीयस्य स्वतः शमाद्युक्तेः कुतो विरक्तेन्द्रियाणामतथात्वादिति भाष्यमिति चेन्न 'ततो भूय एव तमो ये संभूत्याꣳरताः' इति शारीरब्राह्मणात्। संभूत्यां विद्यायां पञ्चपर्वात्मिकायां वैराग्यादिरतौ सत्यां तमः प्रविशतीति कथनात्। महत्त्वादिति व्यापकधर्मस्य व्यापकत्वनियमात्। ननु ज्ञाने गुणे परिमाणं नास्ति गुणे गुणानङ्गीकारादिति चेन्न प्रकाशाश्रयन्यायेन ब्रह्माभेदपक्षेऽगुणे सत्त्वात्। एकं रूपं रसात्पृथगिति-

१. विषयोपादानबुद्धौ।

सूक्ष्मया उपनिषदनुसारिण्या बुद्ध्या । भगवज्ज्ञाने हि तत्प्राप्तिरिति । चकारात्, 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्' इति स्मृतिर्गृहीता । तस्मात्, साधनोपदेशान्न सांख्यमतमिह विवक्षितमिति ॥ १ ॥

भाष्यप्रकाशः ।

शेषं स्फुटम् । एवं हेतुं व्याख्याय दर्शनपदं व्याकुर्वन्ति किंचेत्यादि । इममिति पूर्वोक्तम् कथं दर्शयतीत्यत आहुः सूक्ष्मयेत्यादि । तथाच सूक्ष्मपदेन बुद्धेरुपनिषदनुसारित्वबोधनादुक्तरीत्या भक्तिप्रणाड्या प्राप्तिं दर्शयतीत्यर्थः । तेन श्रुतौ गम्यत इति गतिरिति प्राप्यत्वबोधनात्, स्मृतावपि, विशत इति पदेन तस्यैवार्थस्योपबृंहणादत्र प्राप्तिरूप एवार्थोऽभिप्रेतो दृश्यते, न तु रूक्षदर्शनरूपोऽतो नात्र सांख्यमतप्रत्यभिज्ञानमिति भावः ॥ १ ॥

रश्मिः ।

वद्वा । ब्रह्मगतपरिमाणस्य विज्ञाने भावात् ब्रह्मविषयकत्वमेव ज्ञाने वैशिष्ट्यम् । शेषमिति । ननु अव्यक्तपदस्य कृपायां शक्तिः कुत इति चेत्तत्राहुर्भाष्ये । नेति तथा च योग इति भावः । सत्त्वरजस्तमःसाम्यावस्थारूपा प्रकृतिः व्यक्ता स्वकार्यद्वारापि । ननु अव्यक्तोक्षर इति चेन्न पुरुषपदेनैव ग्रहणात् । पुरि शेते इति व्युत्पत्तेः । पूरक्षरः अस्फुटेप्यभिधेयवदिति विश्वः । तथा चाव्यक्तमिति सामान्ये नपुंसकम् । अव्यक्तमित्यत्राज्विकारो वा अव्यक्ता आम् अङ्गीकारे । 'अव्यक्तं महदादिके' इति विश्वात् कृपायां वा । न चैवं मायावज्जगद्वीजेपि स्यादुपनिषद्भाष्ये तस्यापि महदादित्वादिति शङ्क्यम् । मायावादमसच्छास्त्रमिति तस्याकिंचित्करत्वात् । न च कृपातुल्यो भक्तोऽव्यक्तपदवाच्य इति वाच्यम् । अव्यक्तमिति नपुंसकलिङ्गादत एव न विष्णुर्वाच्यः । तथा च विश्वः । 'अव्यक्तः शंकरे विष्णौ' इति अयं श्लोकः ।

'अव्यक्तः शंकरे विष्णौ अव्यक्तं महदादिके ।
आत्मन्यपि स्यादव्यक्तमस्फुटेप्यभिधेयवत्' ॥ इति ।

ननु वरणमेवाव्यक्तमस्तु तस्य कार्येण स्पष्टत्वात् । ऋत्विग्वत् । तथा च कोशाच्छक्तिग्राहकात् शक्तिग्रहोऽव्यक्तपदस्य कृपायामित्युक्तम् । तथा हि अव्यक्तं न प्रकटं भगवत्कृपैवेति भाष्यम् । तत्राव्यक्तपदविग्रहः सूक्ष्मं त्विति सूत्रभाष्ये सर्वप्रकारेण न व्यज्यते तदव्यक्तमिति सूच्यते तत्र न व्यज्यते व्यनक्तिकर्मत्वावच्छिन्नप्रतियोगिताकाभावोर्थः अत्र न प्रकटमित्यस्यान्वयः । अभावेन शब्दार्थाभावस्याभेदः संसर्गः कर्मणि ते प्रत्ययार्थभूते प्रकटस्याभेदान्वयः व्यनक्तिप्रकटकर्मत्वावच्छिन्नप्रतियोगिताकोभावः स भगवत्कृपाभिन्न इति भाष्यार्थः । तेनाव्यक्तमिति कर्मप्रत्ययान्तं कृपा न प्रकटे कर्तृप्रत्ययान्ते तेषां कथमन्वय इति कुचोद्यं निरस्तम् । **न साधनेति** । ननु साधनैः कृपा लोके दृष्टा कुतो न साधनाधीनेत्युच्यते इति चेन्न भक्तिहेतुग्रन्थे उपपादितप्रायत्वात् । तस्येति श्रुतिसंदर्भस्य । एवं शेषं स्फुटमित्यर्थः । **उपनिषदिति** । ननु सांख्यानुसारित्वं कुतो न बोधितमिति चेन्न शास्त्रान्तरे शास्त्रान्तरीयस्तुतेरनौचित्यात् । छान्दसः सा काष्ठा सा परा गतिरित्यत्र पुरुषविशेषणत्वेन कर्मणि क्तिन् इत्याहुः गम्यत इति । स्त्रियां क्तिन् भावे लोके वेदे विकल्पात् कर्मण्यपि कर्तरि तु न भावेन बाधात् । उपेति । गतिरिति गमनकर्म पुरुषः । मां विशते । इति विशेः कर्म पुरुष इत्युपबृंहणात् । अत्रेति । आत्मा दृश्यत इत्यत्र । अभिप्रेति तथा चागूढ

सूक्ष्मं तु तदर्हत्वात् ॥ २ ॥

नन्वव्यक्तशब्देन न भगवत्कृपा वक्तुं शक्या । धर्मिप्रवाहादित्याशङ्क्य परिहरति तुशब्दः । सूक्ष्मं तद् ब्रह्मैव । धर्मधर्मिणोरभेदात् । अव्यक्तशब्देन हि सूक्ष्ममुच्यते । तदेव हि सर्वप्रकारेण न व्यज्यते । अर्हत्वात् । तदेव अर्हं योग्यम् । उभयत्राप्ययं हेतुः । तस्माद्धर्मधर्मिणोरभेदाद् भगवानेव सूक्ष्ममिति तत्कृपैवाऽव्यक्तवाच्या ॥ २ ॥

भाष्यप्रकाशः ।

सूक्ष्मं तु तदर्हत्वात् ॥ २ ॥ उभयत्रेति अव्यक्तस्य ब्रह्मत्वे, भगवत्कृपात्वे च । अयमर्थः । 'बुद्धेरात्मा महान् परः' इत्यत्र, 'अथ परा यया तदक्षरमधिगम्यते' इति श्रुत्यन्तरोक्तं ज्ञानं बुद्धिनियामकत्वेन परामृष्टम् । तच्च नायमात्मेति श्रुत्यन्तराद्वरणाधीनम् । वरणं च कृपयैवेति ज्ञानात् परस्य विमर्शे योग्यताबलात् कृपैव तथात्वेन सिद्ध्यति । सा च भगवद्धर्मः । धर्मधर्मिणोश्चाविनाभावेन स्थितत्वादभेद इति तस्या अपि ब्रह्मत्वं योग्यताबलादेव सिद्ध्यतीति तथेति । तथाच न प्रायपाठविरोध इत्यर्थः ॥ २ ॥

रश्मिः ।

आत्मा प्राप्यत इत्यर्थः । न तु गूढः सूक्ष्म आत्मा दृश्यत इति प्रत्यभिज्ञानं तत्तेदंताप्रकारकं ज्ञानं प्रत्यभिज्ञा 'ये धातुशब्दा यत्रार्थे' इति पत्रावलम्बनात्पूर्वोक्तोर्थो धातूनामनेकार्थत्वादरेणासंभवीत्यतो गूढ आत्मा दृश्यते तदनन्तरं तं विशते इति पूर्ववद्विशतेः कर्म आध्याहारेण पूरयित्वा श्रुत्यर्थ इत्याहुः । भाष्ये । भगवदिति भगवज्ज्ञानं आत्मा दृश्यत इति तत्प्राप्तिस्त्वध्याहृत्य व्याकृता सैव । स्मृति-गीताष्टादशाध्यायस्था तेन मुख्यपक्षेण श्रुतिव्याकरणे संमतिरुक्ता अध्याहारे च । साधनेति सांख्ये तु 'मुक्तिरन्तरायध्वस्तेर्न परः' अन्तरायस्य निःसङ्गेप्युपरागस्याविवेकाज्जातस्य 'ध्यानधारणाभ्यासवैराग्यादिभिः निरोधोस्य' इति ध्यानादिसाधनैरन्तरायध्वस्तिः न निःसंगस्य सा साधनजन्या ॥ १ ॥

सूक्ष्मं तु तदर्हत्वात् ॥ २ ॥ भाष्ये । धर्मीति । ननु बुद्धेर्ज्ञानरूपायाः गुणत्वेन न धर्मिप्रवाह इति चेन्न मनोभेदत्वेनागुणत्वात् । प्रकृते । अत्राव्यक्तपदस्य योगेन कृपावाचकत्वेपि श्रुतौ क्वापि तद्वाच्यादर्शनात् कृपावाच्यानुपस्थित्या वरणोपस्थित्या वरणमहिम्ना कृपोपस्थितिमाहुः अयमिति । अपरं चात्मा विज्ञानमिति भाष्ये विज्ञानमपि बुद्धिरित्येकस्या नियम्यनियामकभावासंगतिरित्याहुः बुद्धेरिति । अथ परेति मुण्डके । नायमात्मेति श्रुतिर्मुण्डके । योग्यतेति यथा 'पातु वो दयितामुखम्' इत्यत्र मुखं सांमुख्यं न वदनं कामत्राणायोग्यत्वात् । यद्यपि चुम्बनादिना वदनमपि कामत्रायकं तदापि सांमुख्यमेव योग्यम् । असति तस्मिन् सर्वं वैरस्यायैवेति तस्यैवौचित्यम् । औचित्यं योग्यता । तथात्वेनेति विज्ञानात्परत्वयुक्तपदार्थत्वेन युक्तपदमव्यक्तपरम् । तथेति औकारस्य 'अव्ययादाप् सुपः' इति लुक् । अव्यक्तस्य ब्रह्मभगवत्कृपात्वे प्रकारौ । तथा चेति कृपाया ब्रह्मत्वेन धर्मित्वे च । भाष्ये । तस्मादिति प्रसिद्धात् । 'प्रकाशाश्रयवद्वा तेजस्त्वात्' इति व्याससूत्रात् धर्मधर्मिणोरभेदस्योक्तत्वात् । अव्यक्तपदवाच्या । प्रकृतमुच्यते इदं त्विह वक्तव्यम् । तद्वाच्यानुपस्थित्येत्यादि तदसिद्धम् । लिकुश्चीथा इत्यस्य वाच्यादर्शनेन योग्यार्थानुपस्थित्या पद-वैयर्थ्यमतोव्यक्तपदयोगेनार्थोऽदुष्टः । नाप्यत्र वरणोपस्थितिर्युक्ता । इदं श्रुतिद्वयं 'विद्यैव तु

तदधीनत्वादर्थवत् ॥ ३ ॥

ननु धर्मित्वे परत्वमनुपपन्नम् । अन्यथा पूर्वोक्तो दोष इत्यत आह अभेदेऽपि कृपायास्तदधीनत्वात् परत्वम् । तत्र दृष्टान्तः । अर्थवत् । अर्थः पुरुषार्थः फलं, तद्वत् । 'ब्रह्मविदाप्नोति परम्' इत्यत्र एकस्यैव ब्रह्मणः सच्चिद्रूपेण विषयत्वमानन्दरूपेण फलत्वमिति । तथैवाक्षरपुरुषोत्तमविभागोऽपि । स्वधर्मा अपि स्वाधीनाः । स्वयमपि स्वाधीन इति । तथा कृपाविष्टः साधनम्, आनन्दरूपः फलमिति ।

भाष्यप्रकाशः ।

तदधीनत्वादर्थवत् ॥ ३ ॥ उक्तं समाधिमाक्षिपति नन्वित्यादि । यदि पूर्वोक्तयुक्त्या कृपाया ब्रह्मत्वं, तदा धर्मित्वे तद्भिन्नत्वरूपं परत्वं युक्तिरहितम् । यदि कयाचिद्युक्त्या धर्मत्वं तदा धर्मिप्रायपाठविरोधरूपो दोष इति पूर्वोक्तः समाधिरसंगत इत्याशङ्कायामस्यापि समाधिमाहेत्यर्थः । समाधिं व्याचक्षते अभेदेऽपीत्यादि । तथाचाभेदे यथैकरूप्येण ग्रहणं युक्तिस्तथा भेदे नियम्यनियामकभावो युक्तिरित्युभयमप्युपपन्नमित्यर्थः । एकत्वेऽपि नियम्यनियामकभाव एव कथमित्यत आहुः तत्रेत्यादि । तथैवेति एकत्वेऽपि गणितानन्दत्वागणितानन्दत्वात्मकरूपभेदेनैव तथाच रूपभेदेन सोऽप्युपपन्न इत्यर्थः । एतदेव निगमयन्ति स्वधर्मा इत्यादि, फल-

रश्मिः ।

निर्धारणात्' इत्यत्र पुष्टिमार्गसद्योमुक्तिपरत्वेन वर्णितमत्र मर्यादामुक्तौ क्रममुक्तौ च कुत उपतिष्ठेत बुद्धेर्बुद्धिनियामकत्वं तु घ्राणं च गन्ध इति न्यायेनोपपन्नम् । कृपोपस्थितिस्त्वनुकृत्यधिकरणसिद्धा । अन्यथा इति भारतमाख्यानं कृपया मुनिः कस्मादनुकुर्यात् ।

'स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ।
कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह ।
इति भारतमाख्यानं कृपया मुनिना कृतम्' ॥

इति वाक्ये मुनिकृपया भारतीयपदैः वाक्यैश्च भारतार्थविज्ञानं स्त्र्यादीनां कृपया पदवाक्यैः भगवद्विज्ञानं भगवदीयमनुकरोतीति 'मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपि' इति भक्तविषयकं भगवदीयं ज्ञानमिति अन्यच्च व्यक्तं प्रपञ्चरूपमपि ज्ञानं भगवान् अव्यक्त ईपद्व्यक्तस्तद्धर्मः तत्त्वत्वात् । अव्यक्तः परमात्मा 'ईश्वरः पुरुषोऽव्यक्तः परमात्मेति गीयते' इति वाक्यात् ॥ २ ॥

तदधीनत्वादर्थवत् ॥ ३ ॥ परत्वमिति 'अव्यक्तात्पुरुषः परः' इत्यत्र परनिष्ठम् । कयेति तत्र सूर्यः प्रकाशः सूर्यस्य प्रकाश इति धर्मधर्मिणोर्भेदाभेदयोरनुभवसिद्धतया प्रकाशाश्रयन्यायेन । यथैकेति नीलमुत्पलमित्यत्र । नियम्येति राज्ञः पुरुष इत्यत्र । एकत्व इति । ननु सच्चिद्रूपेणाक्षरत्वमानन्दरूपेण फलत्वमिति भाष्योक्तः कुतो नार्थः भाष्यार्थोपलक्षणत्वादस्यार्थस्य । न चात्रार्थे विकृतत्वं निरवयवत्वशब्दकोपो वा स्यादिति वाच्यम् । विकृतत्वस्य समन्वयाद्यधिकरणे वारणाद् द्वितीयस्य तु 'श्रुतेस्तु शब्दमूलत्वात्' इति सूत्रेणेति । निगमयन्तीति स्वधर्मा इत्यत्र तस्मादिति पूरयित्वा एतद्वाक्यनिष्ठावयवविभाजकोपाधिमत्त्वं निगमनत्वं यथा तस्माद्वह्निमानित्यत्र । प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवा तन्निगमनं कुर्वन्तीत्यर्थः । स्वधर्माः सत्यत्वादयः कृपादयश्च स्वयमपि 'न रोधयति मां योगो न सांख्यं धर्म उद्धव' इत्यादिना स्वस्य सर्वात्मभावस्वाधीनः ।

अथवा अव्यक्तं सच्चिद्रूपमक्षरमेवास्तु । तस्मिन् सति विज्ञानस्य विषयाधीनत्वमर्थः ।

एतेनान्येऽपि सर्वसंप्लववादिनो निराकृता वेदितव्याः । असंबद्धाभिलापाच्च ।

भाष्यप्रकाशः ।

मितीत्यन्तम् । अस्मिन् पक्षे अव्यक्तपदस्य यौगिकत्वाच्छैथिल्यं शङ्कतेत्यरुच्या पक्षान्तरमाहुः अथवेत्यादि अक्षरमेव, 'अव्यक्तोऽक्षर इत्युक्तः' इति गीतावाक्यादव्यक्तमस्तु । नच लिङ्गविरोधः । 'अक्षरं ब्रह्म परमम्' इति ब्रह्मत्वविवक्षायां तत्रापि नपुंकसलिङ्गप्रयोगात् तस्य च भगवतः सकाशाद् भेदाभेदौ, गीतायाम्, 'एवं सततयुक्ता ये' इति प्रश्नोत्तरसंदर्भे स्फुटौ । धामत्वाद्भगवदधीनत्वं च स्फुटम् । अतस्तदधीनत्वादक्षरमेवाव्यक्तम् । अस्मिन् पक्षे यो दृष्टान्तस्तमाहुः तस्मिन्नित्यादि । तस्मिन्नक्षरे स्फुरिते सति, विज्ञानस्य बुद्धेर्यदक्षरात्मकविषयाधीनत्वं सोऽत्र दृष्टान्तभूतोऽर्थो ग्राह्यः । तथाच तद्विज्ञानं यथा अक्षरसारूप्येऽप्यक्षराद् भिन्नमक्षराधीनं च, तथा अक्षरमपि ब्रह्मसरूपं ब्रह्मणः परस्माद् भिन्नं तदधीनं चेत्यैक्येऽपि न परत्वानुपपत्तिप्रवाहविरोधावित्यर्थः ।

एवं त्रिसूत्रीव्याख्यानेनैकदेशिकृतं व्याख्यानान्तरमपि निराकृतमित्याहुः एतेनेत्यादि । अयमर्थः । मायावादिनो ह्यानुमानिकसूत्रे अव्यक्तशब्देन रथरूपकविन्यस्तं शरीरमङ्गीकृत्य तस्य कथमव्यक्तशब्दितत्वमित्याकाङ्क्षायां द्वितीयसूत्रे भूतसूक्ष्मस्याऽव्यक्तशब्दार्हत्वात् तत्कार्यस्य शरीरस्याव्यक्तशब्देन ग्रहणं यथा, 'गोभिः श्रीणीत मत्सरम्' इत्यत्र गोशब्देन पयस इत्युक्त्वा, तृतीयसूत्रे, तद् भूतसूक्ष्मं न स्वतन्त्रं येन प्रधानकारणवादः प्रसज्येत किंतु परमेश्वराधीनम् । तच्चावश्यकम् । शक्तिरहितस्य कर्तृत्वानुपपत्तेः । अतस्तदर्थवदित्युक्त्वा, अव्यक्तशब्दवाच्यामविद्यां वदन्ति । यथोक्तं तेषां भाष्ये । अविद्यात्मिका हि सा बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुप्तिर्यस्यां स्वरूपबोधरहिताः शेरते संसारिणो जीवास्तदव्यक्तं क्वचिदाकाशशब्दनिर्दिष्टम् । 'एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च' इति श्रुतेः । क्वचिदक्षरशब्दोदितम् । 'अक्षरात् परतः परः' इति श्रुतेः । क्वचिन्मायेति सूचितम् । 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इति मन्त्रवर्णादिति ।

रश्मिः ।

यौगिकत्वादिति योगस्य वेदान्ते मुख्यत्वेन पक्षान्तरोत्थाने तुष्यतु दुर्जनन्यायेन दोष उक्तः । इतिहासमतमाहुः । भाष्ये । अथ वेति । भेदाभेदाविति भेदोविभक्तकः 'अविभक्तं च भूतेषु विभक्तमिव च स्थितम्' इति गीतायाः । अत इति परत्वस्य नियामकत्वस्य प्रकरणात् । तदधीनत्वाद् ब्रह्माधीनत्वात् । आर्थिकस्तदधीनत्वादिति सूत्रार्थ उक्तः । दृष्टान्तोर्थवदित्यंशस्तं वक्तुमाहुः अन्यस्मिन् पक्ष इति । ननु भाष्ये दृष्टान्तत्वबोधकपदाभाव इति चेन्न अर्थ इति पदस्य बोधकत्वात् । अर्थस्तद्वदिति भाष्यार्थात् । पक्षान्तरे संपूर्णसूत्रार्थ उक्तः । अत्रेतिहासपक्षे एकमेव सूत्रम् । तत्पक्षस्यापि स्मृतेश्चेति सूत्रे कथनात् । क्वचिदेकार्थत्वेन क्वचित्पृथक्त्वेनेति । भूतेति शब्दरूपरसगन्धस्पर्शरूपस्य । तत्कार्येति पञ्चमहाभौतिकत्वाच्छरीरस्य । ग्रहणमिति लक्षणया ।

भाष्यप्रकाशः।

तदेतदसंगतम्। कारणग्रहणेनैव संभवति गत्यन्तरे कारणवाचिशब्देन कार्यग्रहणस्य लक्षणादोषयुक्तस्यानुचितत्वात्। 'द्वाविमौ पुरुषौ लोके' इति गीतोक्ते अक्षरे कारणत्वस्य श्रुत्यादिषु 'तन्मायाफलरूपेण' इत्याद्येकादशस्कन्धवाक्यैर्निर्द्धारणात्। अधीनत्वस्य धामत्वादेव सिद्धेश्च। तद्विहाय तत्प्रथमकार्यरूपमायापदवाच्यशक्तिग्रहणस्यानुचितत्वात्। 'यो वेद निहितं गुहायां परमे व्योमन्' 'ऋचो अक्षरे परमे व्योमन्' इत्यादिश्रुतावाकाशपदवाच्यत्वस्यापि तत्रैव स्पष्टत्वात्। 'अक्षरात् परतः परः' इत्यत्रापि परत इति विशेषणेन मायाशक्तिव्यावृत्त्या भगवद्धामरूपस्यैव तस्य सिद्धेः। अतो व्यासाशयविरुद्धत्वाद् अयमसंबद्धाऽभिलाप एव। जगद्वीजं तु भगवानेव। 'बीजं मां सर्वभूतानाम्' इति गीतावाक्यात्। अक्षरस्य कारणत्वं तु योनित्वात्। 'मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्' इति वाक्यात्। नच पुरुषत्वोक्तिविरोधः। 'त्वं स्त्री त्वं पुमान्' इत्यादिश्रुत्या सर्वरूपत्वेन सिद्धत्वादिति।

रश्मिः।

शक्यसंबन्धो लक्षणा, संबन्धः कार्यता, गोभिः पयोभिः मत्सरं सोमं श्रीणीत मिश्रितं कुर्वीत। तच्चेति। तदधीनत्वं शक्त्यधीनत्वम्। शक्तिरहितस्य परमेश्वरस्य नित्यस्य शुद्धबुद्धमुक्तस्वभावस्य। तदर्थवत् तदविद्याख्यं बीजं अर्थवत् न तेन विना परमेश्वरस्य स्रष्टृत्वं सिद्ध्यते शक्तिरहितस्य प्रवृत्त्यनुपपत्तेः। तद्रसमिति असंबद्धाभिलापाचेति भाष्यार्थ उक्तः। कारणेति भूतसूक्ष्मग्रहणेन। कार्येति शरीरग्रहणस्य। निर्धारेति चतुर्विंशे।

'तन्मायाफलरूपेण केवलं निर्विकल्पितम्।
वाङ्मनोगोचरातीतं द्विधा समभवद्बृहत्' ॥

इत्यत्र बृहत्पदात् 'गणितानन्दकं बृहत्' इत्यक्षरपदस्याक्षरे शक्तिः सिद्धान्तमुक्तावल्याम्। स्पष्टेति। व्योमन्नित्यत्र सप्तम्या लुक् व्योम्नि आकाश इत्यर्थः। परत इतीति अदृश्यत्वादिगुणकाधिकरणे मायावादिनोऽक्षरान्मायायाः परतः। परो भूतयोनिरिति व्याचक्रुः। स्वमते तु अक्षरात् कीदृशः परतः इदं विशेषणं सांख्ये प्रधानस्याक्षरत्वात् तद्वारणायेत्यदृश्यत्वाधिकरण उक्तम्। सांख्यमतसादृश्यान्मायावादेप्याहुः मायाशक्तीति। तथा चाक्षरमविद्यापरत्वं मायाप्रधानभिन्नत्वं तेनात्रैकः संप्लववादी। एतेनेति भाष्योक्तेतिहासमताङ्गीकारेणासंबद्धाभिलापेन च निराकृतः 'सम्यक् बाढप्रशंसयोः' इति विश्वात् सम्यक् प्रशस्तेङ्गीकृतो वा 'येप्यन्यदेवता भक्ताः' इति गीतोक्तेः। प्लवः शब्दः तेन तैर्वा वदितुं शीलमेषां ते संप्लववादिनः सर्वेषां संप्लववादिनः सर्वसंप्लववादिनः सर्वे च ते संप्लववादिनो वा। स्वस्ववादेन स्वीयदेवताप्राप्तेः। तत्र मायावादेन मायादेवताप्तिः तत्राधिकारिणां च कदाचित्कृष्णप्रसादयुक्तस्य मुक्तिरपि। अयं निराकृतः। इतिहासमतेनाक्षरेव्यक्तपदशक्तेर्मुख्ये संभवति गौणस्यान्याय्यत्वात्। असंबद्धाभिलापस्तु कारणग्रहणेनैवेत्यादिना प्रकाश एव कृतः। कारिकार्थैक्यं यथा अनेकेति। अनेकेषां रूढेः शब्दानां व्यापारव्यापारिभावः संबन्धः षष्ठ्यर्थः। वाच्यं ब्रह्मेति ॐमित्येकाक्षरं ब्रह्म सर्वं तस्योपव्याख्यानमिति प्रस्थानरत्नाकरे स्पष्टम्। एवकारो विशेषणसंगतोऽयोगव्यवच्छेदकः यथा शङ्खः पाण्डुर एवेत्यत्र। ब्रह्मत्वायोगव्यवच्छेदवद्वाच्यमिति। वाच्यं विशेष्यम्। ब्रह्म विशेषणं व्यावर्तकत्वात्। आर्थिकमाहुर्नापरमिति उत्तरार्धं

अनेकरूढिशब्दानां वाच्यं ब्रह्मैव नापरम्।
शाक्तास्तांश्चेत् तथा ब्रूयुस्ते सन्मार्गाद् बहिष्कृताः॥

भाष्यप्रकाशः।

तदेतत् सर्वमभिसंधायाहुः अनेकेत्यादि। शक्तित इति। जैमिन्युक्तं भाट्टप्रसिद्धं लोकवेदाधिकरणमाश्रित्य लौकिकशक्तितः। तथेति प्रकृतिवाचकत्वम्। शाक्तास्तां चेदिति क्वचित् पाठः। तदा तु, तां प्रकृतिं तथा जगद्बीजभूतां ब्रूयुरित्येवं योजना। तथाच, 'शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि'

रश्मिः।

व्याचख्युः जैमिन्यनुक्तमिति य एव लौकिकाः शब्दाः ते एव वैदिका इति वदन्ति तद्यदि जैमिन्युक्तं स्यात्तदा सर्वे विधयश्छन्दसि विकल्प्यन्ते इत्यादिपूर्वं व्याकृतेः स्फुटा इति कारिकांशव्याख्याने स्वरादिना भेदोपपादनं विरुद्धमिव भायात् अतो हि उत्पत्तौ वेत्यादिप्रथमपादाधिकरणमन्यथा व्याकरणीयं यल्लोकवेदाधिकरणमित्युच्यते। तर्हि शक्तितश्चेत्तथा ब्रुवाणा मीमांसकाः के इत्यत आहुः भाट्टेति तथा चाहुः जैमिनिन्यायमालाविस्तरे तदेवमधिकरणत्रये व्युत्पादनाय भाट्टप्राभाकरमतभेद उक्तः। अथ प्रायेण भाट्टमतमेवोपन्यस्यते इति चतुर्थाधिकरणावतरणे सप्तमाधिकरणकारिके।

'वेदवाक्यममानं स्यात् मानं वा नास्य मानता।
पृथक्संकेतवीक्षायामनपेक्षत्ववर्जनात्॥
वेदेपि लोकवत्तैव वाक्यार्थे संगतिः पृथक्।
ग्रहीतव्या ततो वाक्यं प्रमाणं नैरपेक्ष्यतः'॥ इति।

तथा च वृद्धव्यवहारेण लोके शक्तिग्रहः गृहीतशक्तिकः शब्दो वेदेपि बोधक इति इदं भाट्टमतं भाट्टप्रसिद्धम्। लौकिकशक्तितो वेदे व्यक्तपदे तथा प्रकृतिवाचकत्वं ब्रूयुः ते सन्मार्गादुक्तादोमित्येकाक्षरं ब्रह्मेत्यादि श्रौतान्मार्गाद्बहिःकृताः पाषण्डिन इति भावः। अत्रेतिहासमते रूढिशब्दान्तर्गतोऽव्यक्तशब्दोपि भवति। ननु पूर्वपक्षे यौगिकोऽव्यक्तशब्दः उक्तः वेदान्ते योगादरादितिहासे तु रूढिरव्यक्तपदस्याक्षरे। ननु योगोपि संभवीति चेन्न ज्ञानिनः प्रति व्यक्तत्वेन तदेव हि सर्वप्रकारेण न व्यज्यत इति भाष्यविरोधात्। अत एव न कोशोक्तशंकरादौ योगः। अत एव न योगरूढः शब्दः। ततो रूढ्यास्य वाच्यं ब्रह्माक्षरं ब्रह्मेत्यर्थः। विष्ण्वादयो वाच्या इति वदन्तः श्रौतान्मताद्बहिःकृताः विशिष्टाद्वैतवादिनोऽव्यक्तपदेनाक्षरग्रहणेनासंबद्धाभिलापेन च सर्वसंप्लववादिनो निराकरणं इदमयुक्तम्। 'आचार्यचैत्त्यवपुषा स्वगतिं व्यनक्ति' इति 'आचार्यं मां विजानीयान्नावमन्येत कंचन' 'सर्ववादानवसरं नानावादानुरोधि तत्' इति निबन्धे। तथापि नानावादानुरोधेन क्रीडतः क्रीडाप्रकाशपूर्वकनिर्दुष्टक्रीडानिरूपणं ज्ञेयमेवं पूर्वत्राग्रेपि बोध्यम्। यथा शंकराचार्यमतेऽव्यक्तपदेन शरीररूपमाया सैवाविद्या सोच्यते। एते तु शरीरमव्यक्तपदार्थमाहुः तत्र कोशः प्रमाणं तदपेक्षया गीताप्रमाणं प्रबलमिति नाव्यक्तवाच्यं शरीरमपि त्वक्षरमित्येतेनेति भाष्यार्थकृतनिराकरणं 'शरीरं रथमेव तु' इत्यत्र शरीरग्रहणेनानन्यलभ्यो हि शब्दार्थः इत्यसंबद्धाभिलापश्च। भास्कराचार्यमतेप्येवं अव्यक्तपदार्थः शरीरं असंबद्धाभिलाप भाष्यार्थकृतनिराकरणे पूर्ववत्। भिक्षुमतेपि ज्ञेयम्। माध्वमते तु अव्यक्तपदार्थो विष्णुरक्षरः। सोपि सत्त्वगुणोपाधिरतः सच्चिदक्षराद्भिन्नः इति गीताविरोधः

तस्मादिन्द्रियेभ्यः परवाक्ये नानुमानिकं किंचिदस्ति ॥ ३ ॥

ज्ञेयत्वावचनाच्च ॥ ४ ॥

पूर्वापरसंबन्धेनार्थः प्रतिपादितः । केवलैतद्वाक्यविचारेऽपि न तदभीष्टं प्रकृतिरूपमव्यक्तं सिध्यतीत्याह । अत्र हि वाक्ये अव्यक्तं ज्ञेयत्वेन नोक्तं, तेषां तु प्रकृतिपुरुषान्तरं ज्ञातव्यम् । न हि सिद्धवन्मात्रनिर्देशे तेषां मते पुरुषार्थः सिद्ध्यति । अपुरुषार्थसाधनत्वे वा असंबद्धार्थवाक्यत्वमेव स्यात् । परत्व-

भाष्यप्रकाशः ।

इत्यादि सश्रद्धाजाड्याद् वदन्तो वेदान्तविरुद्धवादित्वात्तथेत्यर्थः । सिद्धमाहुः तस्मादित्यादि ॥ ३ ॥

ज्ञेयत्वावचनाच्च ॥ ४ ॥ सूत्रमवतारयन्तः प्रयोजनमाहुः पूर्वेत्यादि । व्याकुर्वन्ति अत्र हीत्यादि । ज्ञातव्यमिति । 'गुणपुरुषान्तरज्ञानात् कैवल्यम्' इति प्रवचनसूत्रात् । विभूतिविशेषाप्तये प्रधानस्यापि ज्ञेयत्वस्मरणाच्च तथेत्यर्थः । परत्वेत्यादि । परापरभावो हि

रश्मिः ।

अक्षरस्य निर्गुणत्वात् मुख्यार्थस्य भाष्ये गीतोपन्यासेनोक्तवैष्णवमार्गस्यासंबद्धाभिलापत्वम् । शैवाचार्यमतेप्येवं ज्ञात्वा वक्तव्यम् । सिद्धमाहुः तथा चेति । शिव इति । सौन्दर्यलहरीस्थं शिवपदं ब्रह्मपरं शक्तिर्माया । वेदान्तेति ॐमित्येकाक्षरं ब्रह्मेत्युक्तवेदान्तविरुद्धवादित्वात् तथा ते सन्मार्गाद्बहिःकृतत्वेन प्रकारेण संपन्नाः । तस्मादितीति अत्र भाष्ये तस्मात् अव्यक्तपदस्याप्रधानवाचकत्वात् । परस्य वाक्यं परवाक्यं 'इन्द्रियेभ्यः परा ह्यर्था' इति वाक्यं तस्मिन् । ननु कस्मात्परवाक्यमित्यत आहुः इन्द्रियेभ्य इति । ननु इन्द्रियेभ्यः परा इति वाक्ये इति वक्तव्ये इन्द्रियेभ्यः परवाक्य इति विलम्बोपस्थितिकप्रयोगः कुत इति चेन्न सर्वशब्दत्वात् । आचार्याणां प्रयोगेऽतारतम्यात् ॥ ३ ॥

ज्ञेयत्वावचनाच्च ॥ ४ ॥ गुणेति गुणश्च प्रकृतिरूपः तदन्यः पुरुषश्च तयोर्ज्ञानात् । पुस्तकान्तरस्थं सूत्रं शंकरभाष्ये उक्तमिहोपन्यस्तं सूत्रं तु तदा सर्वावरणमपलापे तस्य ज्ञानस्यानन्त्यात् ज्ञेयमल्पमिति तदा पूर्वसूत्रोक्तसमाधिः ततः क्लेशकर्मनिवृत्तिः इति सूत्रं ततस्तदेति सूत्रमतस्तदा नाम समाध्यनन्तरं क्लेशकर्मनिवृत्तिकाले । विभूतीति 'मन्त्रौषधितपःसमाधिजाः सिद्धयः' इति सांख्यप्रवचनसूत्रात् । विभूतिविशेषाः परिणामत्रयसंयमादतीतानागतज्ञानमिति स्मरणम् । तथेति ज्ञातव्यत्वेन । परिणामत्रयसंयमो हि प्रधानरूपप्रधानकार्यज्ञानाधीनमस्त्येव श्रीभागवते चैकादशस्य पञ्चदशेऽध्याये क्वचित्स्मर्यते ।

'उदासीने मयि परे प्रकृतेर्गुणवृत्तिषु ।
चिन्मये धारयेच्चेतो द्वन्द्वैर्नैवाभिभूयते' ॥ इति ।

अत्र विभूतिविशेषो द्वन्द्वाभिभवाभावः । यद्वा गुण इत्यस्यायमर्थः सत्त्वादिगुणरूपात्प्रधानात्पुरुषस्यान्तरं भेदस्तज्ज्ञानादित्यर्थः । न हि शक्यमिति च वदद्भिः प्रधानं ज्ञेयत्वेन स्मर्यते इति । न केवलं प्रधानस्य भेदप्रतियोगितया ज्ञेयत्वं तैरिष्टं किं तु तस्योपासनयाऽणिमादिप्राप्त्येपीत्याहुः विभूतीति । भाष्ये । ननु 'ह्यव्यक्तात्पुरुषः परः' इति शब्दज्ञानविषयत्वमस्त्येव समाध्यनन्तरं

वचनं चासंगतम्। श्लिष्टत्वादुभयोरिति चकारार्थः। अयं हेतुः पूर्वमुक्तोऽप्यव-सरे स्मारितः। तस्मादव्यक्तं न प्रकृतिः॥ ४॥

भाष्यप्रकाशः।

विश्लेषेऽवगन्तुं शक्यते, न तु संश्लेषे। इदानीमज्ञानदशायां तु श्लेष एवेत्युदासीनतयोक्तौ पुरुषस्य परत्ववचनमप्यसंगतं स्यादित्यर्थः। अयमिति। चकारसूचितः। पूर्वमिति अदृश्य-त्वाद्यधिकरणे॥ ४॥

रश्मिः।

सिद्धयोपि भवन्ति इति ज्ञेयत्वेनोक्तमेव प्रधानं कथं ज्ञेयत्वेन नोक्तं इति भाष्यमित्याकाङ्क्षायामाहुः नहीति। मत इति तदुक्तं सांख्यप्रवचनसूत्रवृत्तौ 'प्रात्यहिकक्षुत्प्रतिकारवत् तत्प्रतिकारचेष्टनात् पुरुषार्थत्वम्' इति। 'निबन्धे

'वामा शाक्ताश्च योगे तु प्रकटाप्रकटे भिदा।
प्रकृतिस्तत्र संराध्या साध्यो योगश्चतुष्टये'॥

छलयोगो द्विविधसांख्यं शाक्तो मार्गश्च चतुर्थो वामः इति चतुष्टयम्। अत्र योगो पुरुषार्थः। 'अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः' इति सांख्यप्रवचनसूत्रवृत्तेः 'यद्वा तद्वा तदुच्छित्तिः पुरुषार्थस्तदुच्छित्तिः पुरुषार्थः' इति सूत्रवृत्तेः तदाहुरपुरुषार्थेति प्रधानस्य तथा वा पुरुषार्थेन हरेः पदे गमनेन संबद्धेष्वात्मानं रथिनमित्यादिवाक्येषु अस्य वाक्यस्यासंबद्धार्थोऽपुरुषार्थसाधनत्वं तस्य वाक्यत्वमेव स्यादेवकारेण मार्गान्तरत्वात् पुरुषार्थवाक्यत्वव्यवच्छेदः। प्रकृते। श्लेष इति 'असंगोयं पुरुषः' 'प्रधानाज्जगज्जायते' 'निःसंगेप्युपरागो विवेकात्' 'द्वयोरेकतरस्य वा औदासीन्य-मपवर्गः' इति। उदासीनतया अपवर्गे उदासीनतया। चकारेति वैयाकरणमतादरेण निपातानां द्योतकत्वमाहुः सूचितपदेन। अदृश्येति उभयोः संश्लिष्टत्वादयं हेतुः। पूर्वं प्रकृतिपुरुषयोः श्लिष्टत्वात् इति भाष्येणोक्तोपि 'अक्षरात् परतः परः' इति मुण्डके प्रकृतिपुरुषयोः श्लिष्टत्वात्परापर-भावासंगतिरित्यंशे वक्तव्येपि प्रतिबन्धकीभूतजिज्ञासा कथमदृश्यत्वादिगुणकस्याक्षरस्य परमात्मत्वा-दिकमिति तन्निवृत्तये अदृश्यत्वादिगुणकाक्षरस्य परमात्मत्वं त्रिसूत्र्योक्तम्। ततः पूर्वाधिकरणोक्तं रूपं सांख्यसिद्धस्य कार्येश्वरस्य कुतो न अक्षरपरपुरुषयोः भेदाभेदौ च कथमित्याकाङ्क्षायां वैश्वानराधिकरणं नवसूत्र्योक्तम्। द्वितीयपादः समापितः। अन्तर्यामिप्रतिपादकवाक्यानां द्वितीयपादे विचारणात्। तृतीयपाद उपास्यरूपप्रतिपादकानि वाक्यान्यन्तर्याम्यानन्दत्वेन मोक्षदातृप्रतिपादकानि स्मृतानि विचारयितुं द्युभ्वाद्यायतनाधिकरणम्। तत्र तस्मिन् द्यौः पृथिवीति मुण्डकवाक्यं विषयत्वेनोपन्यस्य तत्र किं सांख्यसिद्धं प्रधानमुच्यते ब्रह्म वेति संदेहे प्रधानं निरस्य ब्रह्मैवेति साध्यते सप्तसूत्र्या तेन पूर्वपादोक्तमन्तर्यामिरूपमपि व्यापकत्वसर्वात्मकत्वगुणविशिष्टमेवोपासनीयमिति साधितम्। ततो नित्यनिरवध्यानन्दरूप एवान्तर्याम्युपास्यः पृथगपि भक्तिमार्गीयैरुपास्य इति बुद्धिस्थं प्रसङ्गा-द्दोषयितुं द्वितीयं द्विसूत्रं भूमाधिकरणम्। ततो हि पूर्वपादेऽदृश्यत्वाद्यधिकरणेन विचारितस्याक्षरस्य विरुद्धधर्मत्वं पोषयितुं बुद्धिस्थोपोद्घातसंगत्या तृतीयं त्रिसूत्रमक्षराधिकरणम्। तत उपासना न फलं साक्षात्कार इति साधयितुं चतुर्थमेकसूत्रमीक्षतिकर्माधिकरणम्। ततः प्रसङ्गसंगत्या जीवब्रह्मवादं निर्णेतुं पञ्चममष्टसूत्रं दहराधिकरणम्। ततो दहरविरुद्धं 'न तत्सूर्यो भाति न चन्द्रतारकम्' इति

वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥ ५ ॥

ननु ज्ञेयत्वावचनमसिद्धम् । पूर्वं निर्देशमात्रमुक्त्वाऽग्रे ज्ञेयत्ववचनात् ।
'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यते' ॥

इत्युत्तरवाक्ये वदतीति चेन्न । प्रकरणस्य नियामकत्वेनैकवाक्यत्वे द्वयोः सर्वैकवाक्यत्वेन प्राज्ञः परमात्मैव निचाय्यः । न तु द्वयोरेवैकवाक्यत्वं वक्तुं शक्यम् । तस्मात् प्रकरणस्य नियामकत्वे अशब्दवाक्यमपि भगवत्परमेव ॥ ५ ॥

भाष्यप्रकाशः ।

वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥ ५ ॥ प्रकरणस्येत्यादि अव्यक्तश्रुतेः परत्वलिङ्गस्य तद्घटितवाक्यस्य च साधारणत्वात् प्रकरणस्य निर्णायकत्वं वक्तव्यम् । अतस्तस्य नियामकत्वेनैकवाक्यत्वे वाच्ये, 'महतः परमव्यक्तम्' इति, 'अशब्दमस्पर्शम्' इति द्वयोरेवैक-

रश्मिः ।

वाक्यमाशङ्क्य समाधातुं प्रसङ्गसंगत्या षष्ठं द्विसूत्रमनुकृत्यधिकरणम् । ततः प्रसङ्गसंगत्या जीवस्य मुक्तिदशायां ब्रह्माविर्भावेन विरुद्धधर्माश्रयत्वं फलितुं सप्तमं द्विसूत्रं 'शब्दादेव प्रमितः' इत्यधिकरणम् । ततः प्रसङ्गसंगत्या देवादीनां ब्रह्मविद्याधिकारं विचारयितुमष्टममष्टसूत्रं तदुपर्यपीत्यधिकरणम् । ततोनु प्रसङ्गसंगत्या शूद्राणां ब्रह्मविद्याधिकारं निराकर्तुं नवमं पञ्चसूत्रं शुगस्येत्यधिकरणम् । ततः प्रसङ्गसंगत्या-वतारदशायामपि भगवतो दण्डपाणित्वं बोधयितुं दशममेकसूत्रं कम्पनाधिकरणम् । ततः प्रसङ्गसं-गत्या उपसंपत्तव्यत्वोपसंपन्नस्वरूपाभिनिष्पादकत्वपूर्ववाक्यगतहृदयत्वोत्तरवाक्यगतसत्यपदोक्तमर्त्या-मृतनियामकत्वरूपाणां चतुरो धर्मान् निष्कष्टुमेकादशमेकसूत्रं ज्योतिर्दर्शनाधिकरणम् । ततः प्रसङ्ग-संगत्यान्यवाचकपदवाच्यस्य यत्रैवान्तर्धर्मातिरिक्तधर्मकथनं तत्रान्यवाचकपदस्य ब्रह्मपरत्वमिति न्यायं बोधयितुं द्वादशमेकसूत्रमर्थान्तरव्यपदेशाधिकरणम् । ततः प्रसङ्गोपोद्घातान्यतरसंगत्या मुक्तिदशायामपि जीवस्यानुकारित्वमेव तदात्मकत्वात् न त्वत्यन्ताभेदः सर्वथा तौल्यं वेति ब्राह्मणद्वये विचारयितुं त्रयोदशं द्विसूत्रं सुषुप्त्युत्क्रान्त्योरित्यधिकरणम् । एवं निरूपणेन परापरभावासंगतिनिरूपणे प्रतिबन्धकीभूतायाः कथमदृश्यत्वादिगुणकस्याक्षरस्य परमात्मत्वादिकमित्यस्यानिवृत्ताववश्यवक्तव्यत्वं चकारार्थहेतावित्यवसर इत्युक्तं भाष्ये । स्मारितो व्यासपादैश्चकारप्रयोगेण । तस्मादिति ज्ञेयत्वावचनाच्चकारसूचितहेतोश्च ॥ ४ ॥

वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥ ५ ॥ भाष्ये । पूर्वमिति महतः परमव्यक्त-मित्यत्र । वदतीति महतः परमित्यव्यक्तमुक्त्वा तन्निचाय्य ज्ञात्वेति वदति । प्रकरणापेक्षया श्रुत्यादीनामुपन्यासः सूत्र उचित इत्याशङ्क्य तेषां साधारण्येनाप्रयोजकत्वमाहुः अव्यक्तेति । महतः परमव्यक्तमित्यव्यक्तश्रुतिः निरपेक्षरवरूपा महतः परं ध्रुवमिति परपदश्रुतिरिति अक्षरप्रकृत्योः साधारण्यं श्रुतेः परत्वरूपपरशब्दसामर्थ्यस्य । तद्घटितेति लिङ्गघटितवाक्यस्य पदानां वाक्यानां वा एकवाक्यतारूपस्य वाक्यस्य साधारण्यं तत्र लिङ्गघटितत्वं वाक्यद्वये पूर्वमीमांसोक्तवाक्यलक्षण-घटनायोग्यत्वाय । तदित्थं वाक्यद्वयं महतः परमव्यक्तमिति महतः परं ध्रुवं निचाय्य तमिति च । अत्र परत्वलिङ्गघटितत्वं तेनोभयोः पदानां वाक्यानां चैकवाक्यताघटनायोग्यत्वम् । वाक्यं नाम

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ ६ ॥

ननु न वयं सर्वमेकं प्रकरणमिति वदामः। किंतु, 'इन्द्रियेभ्यः पराः' इत्यारभ्य, नाचिकेतमुपाख्यानमित्यन्तं भिन्नं प्रकरणम्। तत्र प्रथमं पदार्थनिर्देशः।

भाष्यप्रकाशः।

वाक्यत्वं नान्येषामित्यत्र नियामकाभावात् सर्वेषामेवैकवाक्यत्वं वक्तव्यम्। प्रकरणं च, 'ऋतं पिबन्तौ' इत्यारभ्य 'नाचिकेतमुपाख्यनम्' इत्यन्तमेकम्। तत्र चात्मानावेव परामृश्य जीवात्मनो रथित्वं, तदुपकरणं तत्फलं चोक्त्वाग्रे, एष सर्वेषु भूतेष्वित्यारभ्य वल्लीसमाप्तिपर्यंतं परमात्मैव ज्ञेयत्वेन परामृष्टः। मृत्युमुखप्रमोकरूपफलदर्शनात्। प्रधानज्ञानेन सांख्यैस्तदनभ्युपगमात् चेतनात्मज्ञानादेव तदभ्युपगमाच्च। अतः प्रकरणस्य नियामकत्वे अशब्दवाक्यस्यापि भगवत्परत्वाज्ज्ञेयत्वावचनं नासिद्धमित्यर्थः ॥ ५ ॥

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ ६ ॥ किं त्विन्द्रियेभ्य इत्यादि। तथाचात्रेवं पदार्थनिर्देशानन्तरं पुरुषविषयस्य प्रकृतिविषयस्य च ज्ञानस्य पार्थक्येन निर्देशात्

रश्मिः।

पदानां वाक्यानां वा एकवाक्यता तत्र पदानां महदादीनामेकवाक्यता। अत्र यावतां पदानामेकोर्थः प्रयोजनं विष्णुपदगमनं मृत्युमुखात्प्रमोकरूपं च विभागे साकाङ्क्षता। पूर्वस्य ज्ञेयत्वावचनसाधकाकाङ्क्षा परस्य ज्ञेयत्वावचनसाध्याकाङ्क्षा तच्च लिङ्गश्रुतिकल्पनेनाङ्गत्वबोधकं परस्याव्यक्तचोधनसामर्थ्यमालोच्य महतः परमव्यक्तमित्यत्र ज्ञेयत्वावचनं सिद्धं कुर्यादिति लिङ्गश्रुतिकल्पनम्। वाक्यैकवाक्यता नाम स्वार्थबोधे समाप्तानां वाक्यानां पुनराकाङ्क्षावशेनैकवाक्यता, तयथा स्वार्थबोधे समाप्तयोः वाक्ययोरङ्गाङ्गित्वाद्यपेक्षया पूर्ववाक्यीयज्ञेयत्वावचनस्य साध्यस्य साधकापरवाक्यापेक्षा तया एकवाक्यतया पुनरुभयोर्ज्ञेयत्वावचनसाध्यसाधकभावाख्यपरवाक्यस्य परमात्मज्ञेयत्वप्रतिपादनसामर्थ्यमस्तीति सामर्थ्यमालोच्य महतः परमव्यक्तमित्यत्र ज्ञेयत्वावचनं सिद्धं कुर्यादिति लिङ्गश्रुतिकल्पनम्। प्राञ्च इति भाष्यं विवृण्वन्ति स्म प्रकरणमिति। ज्ञेयत्वेनेति। निचाय्य इति भाष्यार्थः। तेन भाष्ये हिकारस्य सौत्रस्यावधारणमर्थस्तमाहुः परमात्मैवेति। प्रकृते। फलेति अग्रे नाचिकेतमुपाख्यानमित्यादिश्लोकद्वयं तूपाख्यानवचनश्रवणश्रावणफलबोधकं ज्ञेयम्। शंकरभाष्योक्तं किंचिदाहुः प्रधानेति। प्रकरणस्येति 'उभयाकाङ्क्षा प्रकरणम्' प्रकृते नास्तीति देशकालौ प्रकरणम्। ज्ञेयत्वेति। ननु नञ्नकारौ कुतः ज्ञेयत्ववचनं सिद्धं सांख्यानामित्येव कुतो नोक्तमिति चेन्न अप्रयोजकत्वात्। न हि सांख्यानां ज्ञेयत्ववचनं साधयितुं व्यासचरणानां प्रवृत्तिरिति किं तु सांख्ये ज्ञेयत्ववचनं वेदान्ते ज्ञेयत्वावचनमिति वक्तुम्। ततश्च ज्ञेयत्वावचनमसिद्धमिति भाष्यम्। ततो नशब्दं पूरयित्वा ज्ञेयत्वावचनं नासिद्धमिति प्रकाश इति न नञ्नकारौ प्रयुक्तौ। माध्वास्तु प्रकरणादिति सूत्रविभागेनाहुः। अर्थस्त्वयमेव तत्र जन्माद्यधिकरणरीत्या हेतुपञ्चितं सूत्रं युक्तम् ॥ ५ ॥

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ ६ ॥ भाष्ये। प्रकरणमिति सूत्रोक्तं प्रकरणम्। प्रकृते। एवमिति सांख्यभ्रमजनकं यथा भवति तथात्मानं रथिनमित्यादिप्रकारेण। पुरुषेति। दृश्यते त्वग्र्यया बुद्ध्या' इति। महतः परं ध्रुवं तं निचाय्येति। प्रकृतिविषयकस्य तयोः प्रकृति-

तदनु, एष सर्वेषु भूतेष्विति पुरुषज्ञानम् । अशब्दमिति तु प्रकृतिज्ञानम् । तस्मादेतावत्प्रकरणे साङ्ख्यमतनिरूपणादशब्दत्वमसिद्धमित्याशङ्क्य परिहरति ॥ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ अस्मादुक्तव्याख्याने त्रिप्रकरणत्वमन्यथा

भाष्यप्रकाशः ।

तयोरन्तरमेव ज्ञातं भवतीति नेदमीश्वरबोधकत्वेन वक्तुं शक्यमिति प्रधानस्याशब्दत्वकथनमयुक्तमित्यर्थः । अस्मदुक्तेत्यादि । अयमर्थः । उभयाऽऽकाङ्क्षा हि प्रकरणम् । साऽत्र त्रयाणामग्निजीवब्रह्मणामेव प्रश्नोत्तराभ्यां प्रतीयते । यदि तृतीयस्यां वल्ल्याम्, 'इन्द्रियेभ्यः' इत्यारभ्य प्रकरणान्तरं स्यात् तदा पूर्ववदत्रापि प्रश्नोत्तरे स्याताम् । यदि च स्वत एव वरान्तरं दद्यात्, तदा, 'तमब्रवीत् प्रीयमाणः' इतिवत् तमप्युपक्षिपेत् । किंचैतस्य प्रकरणान्तरस्य किं प्रयोजनमित्यपि विचारणीयम् । यदि मुक्तिस्तदा तु, 'अन्यच्छ्रेयो अन्यदुतैव प्रेयः' इत्यारभ्य, 'सोऽध्वनः पारमाप्नोति, तद्विष्णोः परमं पदम्' इत्यन्तैरेव वाक्यैः सपरिकरायास्तस्या उक्तत्वात् किमनेन । यदि च स्वरूपावस्थानरूपा काचिदन्या परमपदप्राप्तितोऽप्युत्कृष्टाभिमन्यते, तदा तु, 'स तु तत्पदमाप्नोति यस्माद् भूयो न जायते । सोऽध्वनः पारमाप्नोति' इत्येतस्य पूर्वग्रन्थस्य विरोधः । त्रिविधदुःखात्यन्तनिवृत्तेः पदप्राप्त्यैवोक्तत्वात् । विज्ञानरूपस्य स्वरूपावस्थानसाधनस्यापि ततः प्रागेवोक्तत्वाच्च । किंचाशब्दमत्रे प्रकृतिज्ञाना-

रश्मिः ।

पुरुषयोरन्तरं भेदः । नेदमिति 'अशब्दमस्पर्शमरूपमव्ययम्' इति वाक्यम् । अनेन भाष्यार्थः स्पष्टः । उभयेति यथा प्रयाजादिषु समिधो यजतीत्यत्रेष्टविशेषाश्रवणात् समिधा यागेन भावयेत् किमित्यस्त्युपकार्याकाङ्क्षा । दर्शपूर्णमासवाक्येपि दर्शपूर्णमासाभ्यां स्वर्गं भावयेत्, कथमित्यस्त्युपकारकाकाङ्क्षा तया दर्शपूर्णमासाङ्गत्वं प्रयाजादीनां सिद्ध्यतीति । अत्र विश्वजिन्न्यायसत्रिसत्रन्याययोर्नावकाश इत्युपपादितं पूर्वतन्त्रे । श्रूयमाणफलस्यैव साधनसाकाङ्क्षत्वादत्र चातथात्वात् केवलं किं भावयेदिति भाव्यमात्राकाङ्क्षा प्रयाजादीनामित्येवं बोध्यम् । सेति उभयोः प्रश्नोत्तरयोः प्रतिपाद्यप्रतिपादकयोः परस्पराकाङ्क्षा । अन्यथेति भाष्यं विवृण्वन्ति स्म यदीति । ननु तमब्रवीत् प्रीयमाण इति वरोस्तु सांख्यविद्येत्याकाङ्क्षायामाहुः यदि चेति । दद्यादग्निः । तं नचिकेतसं, तं वरं तवैव नाम्ना भवितायमग्निरिति श्रुत्वा नचिकेतसो वाजःश्रवःपुत्रस्य नाम्नाग्निरपि नचिकेता इति वरः । मुक्तिरिति 'मुक्तिरन्तरायध्वस्तेर्न परः' इति सांख्यसूत्रम् । अभीति पञ्चशिखर्षिः अभिमन्यते सनन्दनाचार्यो वा । उक्तत्वादिति 'यस्माद्भूयो न जायते' इति श्रुत्योक्तत्वात् । नन्वन्यच्छ्रेय इत्यादिना मुक्तेरुक्तावपि विज्ञानं तत्साधनं नोक्तमिति चेत्तत्राहुः विज्ञानेति । तत इति मुक्तिबोधकादन्यच्छ्रेय इत्यादिसंदर्भात्प्राक्

'यस्मिन्निदं विचिकित्सन्ति मृत्यो
यत्सांपराये महति ब्रूहि नस्तत् ।
योयं वरो गूढमनुप्रविष्टो
नान्यं तस्मान्नचिकेता वृणीते' ॥

इति श्रुत्योक्तत्वात् । अस्या भाष्यम् । यस्मिन् प्रेते इदं विचिकित्सनं सांपराये परलोकविषये । महति महत्प्रयोजननिमित्ते, गूढं गहनं दुर्विवेचनं प्राप्तस्तस्माद्वरादन्यं वरं नचिकेता न

चतुष्प्रकरणत्वं स्यात्। तृतीया चैषा वल्ली। 'स त्वमग्निं स्वर्गमध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्यम्' इति प्रश्नः प्रथमः। 'प्रतिब्रवीमि तदु मे निबोध स्वर्गमग्निं

भाष्यप्रकाशः।

ङ्गीकारस्तु 'मृत्युमुखात् प्रमुच्यते' इति फलोक्त्यैव विरुध्यते। तस्माच्चतुष्प्रकरणत्वमसंगतमिति। किंच, तृतीयैषा वल्ली। अतस्तृतीयप्रश्नोत्तरत्वमेवात्र युक्तम्। न त्वाकस्मिकं सांख्यमतनिरूपकत्वेन प्रकरणान्तरत्वम्। यतः, स त्वमग्निमित्यादिना, प्रतिब्रवीमीत्यादिना च त्रीण्येव

रश्मिः।

वृणीते मनसापीति श्रुतेर्वचनमिति। अत्रेदं विचिकित्सनं करोति बहुवचनं छान्दसं बहुलमिति योगविभागसूत्रेण यथा चषालं ये अश्वयूपाय तक्षतीति ये तक्षतीति प्राप्तं तत्र

'सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च।
व्यत्ययमिच्छति शास्त्रकृदेषां सोपि च सिद्ध्यति बाहुलकेन'॥

इति व्यत्ययो बहुल मिति सूत्रकारिकया तिङ्व्यत्ययः। सूत्रे योगविभागो महाभाष्येस्ति। अत्रार्थे विज्ञानं न स्पष्टं यतो यस्मिन् पूजके प्रेते यत्पूजादि कर्तृ इदं परमैश्वर्यवद्ब्रह्म तदन्यं गतं प्राप्तं तोयादि विचिकित्सन्ति कित निवासे भ्वा. प. से. केतितुमिच्छति सांपराये परलोके प्रापयितव्ये सति। अथवा परः पुरुषोत्तमः तस्यायो ज्ञानं तथा च सम्यग्भूतं पुरुषोत्तमज्ञानं येन स संपरायो भक्तिमार्ग इति यावत्। अथवा परे पुरुषोत्तमे अयो गमनं प्रवेश इति यावत्। तथा च सम्यक् परायो येन स तथा भक्तिमार्ग इत्यर्थः। तस्मिन् प्रापयितव्ये महति फलानां मध्ये तेनाल्पे ज्ञानमार्गीयाक्षरे प्रापयितव्ये तदप्युक्तं तृतीयाध्यायतृतीयचरणे 'संपराये तर्तव्याभावात् तथा ह्यन्ये' इति सूत्रभाष्ये ज्ञानमार्गेक्षरप्राप्त्येत्यादिना किं चान्येष्वल्पेषु पित्र्यगान्धर्वप्राजापत्यदैवमानुषान्यभूतसंबन्धिषु ब्राह्मं त्वत्र श्रुतं नाल्पं किं तु महत् तद्विस्तारकं नोस्मान् ब्रूहि हे मृत्यो गूढं ज्ञानसंवरणं यथा भवति तथा श्रद्धामनु पश्चात् नचिकेतसि प्रविष्ट इत्यादिश्रुतेर्वचनम्। अत्र विज्ञानं तेनाल्पे इत्यनेन प्राप्यते स्वरूपावस्थानमपि परमपदप्राप्त्यङ्गं प्राप्नोति। मुक्तोपसृप्यव्यपदेशादिति सूत्रात्। तृतीयेत्यादि भाष्यं व्याचख्युः किं चेति। तृतीयेति तृतीयं च तत् प्रश्नश्चोत्तरं च तयोः समाहारः प्रश्नोत्तरं तृतीयं प्रश्नोत्तरं तस्य भावः। तद्भाष्ये स्पष्टम्। स त्वमग्निमित्यादिभाष्यार्थमाहुः यत इति। श्रुत्यर्थस्तु हे मृत्यो स एवं गुणविशेषणविशिष्टः स्वर्गलोकस्य प्राप्तिसाधनमग्निं स्वर्गे साधुं 'तत्र साधुः' इति यत्। त्वमध्येषि स्मरसि तं मह्यं नचिकेतसे ब्रूहि श्रत् सत्यं दधानाय कर्तरि शानच्। अयं प्रश्नः, ब्रूहीति संप्रश्ने लोट्। इत्यादिनेत्यादिपदेन भाष्योक्तोत्तरादि। उत्तरार्थः। प्रति ते भागं ब्रवीमि त्वां प्रतीत्यध्याहारात्। क्वचित् प्र ते ब्रवीमीति पाठः ते तुभ्यं प्रब्रवीमीत्यर्थः। तत उभे मत्तो विबोध प्रजानन्नहं मृत्युः तदुभे इत्यपपाठः। भाष्ये। आदिपदेन स्वर्गलोक। अमृतत्वं भजन्ते एतद्द्वितीयेन वृणे वरेणेति येनाग्निनोचितेन स्वर्गो लोको येषां ते स्वर्गलोका यजमाना अमृतत्वमानन्दं भजन्ते तद्युपर्यप्यधिकारात् सेवन्ते तदेतदग्निविज्ञानं द्वितीयेन वरेण वृण इत्यर्थः। प्रकृते। येयं विचिकित्सा गन्तुर्भगवतो निवासेच्छा। अयमिति अज्विकारद्वयम्। विचिकित्सत्यर्थः। प्रश्नोयम्। अस्तीत्यत्र लेडाश्रयणात्। अस् भुवि 'लिङर्थे लेट्' इति सूत्रेण लेट्, अस्ति 'सिब्बहुलं लेटि' इति बहुलग्रहणान्न सिप् 'इतश्च लोपः परस्मैपदेषु' इति तिप इकारालोपः। वृत्तौ वाकारग्रहणाद्विकल्पात् 'लेटो डाटौ' इति सूत्रेण नाडाटावत्र, छन्दसि सर्वविधीनां विकल्पात्। अज्झीनं परमनुपावतीत्यस्ति इति प्रयोगसिद्धिः। अत्र संप्रश्ने लेडिति। देवैरत्रापि विचिकित्सितं पुरा नहि

भाष्यप्रकाशः ।

प्रश्नोत्तराणि प्रतीयन्ते । नच पितृसौमनस्येनाग्निजीवप्रश्नाभ्यां च वरत्रयपूर्तेस्तृतीयप्रश्नस्य

रश्मिः ।

सुविज्ञेयमणुरेष धर्म इत्युत्तरम् । शब्दविज्ञानविषयत्वमात्रमिति तु । अन्यत्रेति धर्मादिभ्योऽन्यत्र ।

'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् ।
अन्यत्र भूताच्च भव्याच्च यत्तत् पश्यसि तद्वद' ॥

इति स्पष्टा । प्रश्नोयम् । वदेति प्रश्ने लोट् ।

'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्' ॥
'एतद्ध्येवाक्षरं ब्रह्म ह्येतद्ध्येवाक्षरं परम् ।
एतद्ध्येवाक्षरं ब्रह्म यो यदिच्छति तस्य तत्' ॥ इत्युत्तरम् ।

आमनन्ति अभ्यस्यन्ति, तपांसि पुराणानि विचारकत्वात् तप आलोचनेऽसुन् । गुरुभजनवान्[1] ईश्वरभजनकर्तृत्वादत्र । भाष्ये । ननु पाठक्रमात्पूर्वमुपन्यासात्प्रश्नप्रक्षेपोऽयुक्त इत्याशङ्क्याहुः उपेति । उपन्यासः कथनम् । पश्चादिति तथा च यथा वह्निमान् धूमादित्यत्र हेतोः पश्चाद्वचनम् । तथात्रोपन्यासः प्रश्नात् । यथा दशमस्कन्धे प्रश्नादुपन्यासः साध्यतावच्छेदकसंबन्धो वाच्यतया प्रबन्धः । हेतुतावच्छेदकसंबन्धो वाच्यता । अत एवेति अनुमानध्वननादेव । तस्येति प्रश्नस्य । प्रकृते । इन्द्रियेभ्यः परा इत्यारभ्य नाचिकेतमुपाख्यानमित्यन्ते भिन्ने प्रकरणेऽभावात् पूर्ववल्लोट्लेटोरभावेन तस्य । ननु घटो घटश्चेत्युक्तिवदुपन्यासः प्रश्नश्चेत्युक्तिरस्त्वनुमानबोधकं किं पदमित्यत आहुः उत्तरेति । स्यादेवं घटः पट इत्यनुक्त्वा पोट घट इतिवदुपन्यासः प्रश्नश्चेति विपरीतं न त्वेवं किं तु भिक्षामट गां चानयेतिवदन्वाचये[2] चकारोस्तीति तेन गवानयनवत् भिक्षाटनकर्तृत्वादेवदत्तवदिति[3] चोपन्यासवती प्रश्नवतीत्वादिति चकारान्वाचययोरर्थादुत्तरः[4] उपन्यासादुत्तरः प्रश्नस्तस्य भावः सत्ता तदर्थं चकार इति भाष्यार्थः । प्रकृते । त्रीण्येवेति । भाष्ये एवकारं समर्थयितुं जीवब्रह्मवादं च निराकर्तुं शंकरभाष्यस्थं किंचिदाहुः न च पित्रिति । अयमर्थः । पूर्वं उशन् इच्छन् अर्थात् पुत्रं वाजश्रवसो वाजमन्नं तस्माच्छ्रवः श्रवणं यस्य स वाजश्रवास्तस्यापत्यं वाजश्रवसो नाम स पुत्रेष्ट्येजे तत्फलं कामयमानः स तस्यामिष्टौ सर्ववेदसं सर्वस्वं ददौ । तस्य ह नचिकेताः पुत्र आस स सर्वस्वान्तर्गतः स्वस्यादाने पितुरनिष्टं फलं श्रद्धावेशादाज्ञाय तात 'कस्मै मां दास्यसि' इत्युक्तवान् । शंकरभाष्ये तु वाजमन्नं तद्दानादिनिमित्तं पुत्रेष्ट्येजे इत्यत्र विश्वजिता सर्वमेधेनेजे इति पठितम् । तदा पिता स्वस्य सर्वस्वदानसत्यतायै मृत्यवे दत्तवान् स च यमभवनं गत्वा तिस्रो रात्रीरुवास ततश्च यममाह भार्या भगिनी वा, पद्मपुराणे यमुनामाहात्म्ये यमुनावचनं यमं प्रति स्मर्यते

'ब्रूहि भ्रातः स्वकार्यं हि किं त्वं श्रावय तत्पदम् ।
तदाकर्ण्य करिष्यामि विचार्य स्वहृदि प्रियम्' ॥ इति, तद्वत् ।

उदकाहरणं ब्राह्मणाय कर्तव्यमित्येवमुक्तो यम आह—

'तिस्रो रात्रीर्यदवात्सीर्गृहे मे अनश्नन् ब्रह्मन् अतिथिर्नमस्यः ।
नमस्तेऽस्तु ब्रह्मन् स्वस्ति मेस्तु तस्मात्प्रति त्रीन् वरान् वृणीष्वेति' ॥

१. ईश्वरं गुरुं च भजत्वेति । २. समुच्चये । ३. गुरुभजनवान् ईश्वरभजनकर्तृत्वादस्मदादिवत् इति । ४. चकारसमुच्चयादर्थादुत्तरः ।

रश्मिः।

तत्रैकैकां रात्रिं प्रति त्रीन् वरान् वृणीष्वेति शंकरभाष्यम् । शान्तसंकल्पः सुमना वीतमन्युरिति वरत्रयसंभवादिति त्रीन् वरान् वृणीष्वेति मृत्युनोक्तो नचिकेताः ।

'शान्तसंकल्पः सुमना यथा स्याद्वीतमन्युः गोतमो माभिमृत्यो ।
त्वत्प्रसृष्टं माभिवदेत् प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे' ॥

इति पितुर्सौमनस्येनेत्यर्थः। किंचाग्निजीवप्रश्नाभ्यां स त्वमग्निमित्यस्योत्तरार्धे 'स्वर्गलोका अमृतत्वं भजन्ते' एतद्द्वितीयेन वृणे वरेणेति द्वितीये वरे प्रथमप्रश्नपरिसमाप्तेस्तथा 'येयं प्रेते विचिकित्सा' इत्यस्योत्तरार्धे 'एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः' इति तृतीये वरे द्वितीयप्रश्नपरिसमाप्तेरन्यत्र धर्मादित्युक्तस्तृतीयः प्रश्नः काल्पनिकः कल्पनेन व्यवहरति 'तेन दीव्यति खनति' इति ठक्, इत्याशङ्कमानस्तृतीयः प्रश्न इति भाष्यमाक्षिप्तम् । तेन जीवप्रश्न एव परमात्मप्रश्न इति पुनरनुकृष्यते जीवप्राज्ञयोरभेदात् । न च जीवस्य धर्मादिगोचरत्वात् स नान्यत्र धर्मादिति प्रश्नमर्हति प्राज्ञस्तु धर्माद्यतीतत्वात् अन्यत्र धर्मादिति प्रश्नमर्हति प्रश्नच्छाया च न समाना लक्ष्यते पूर्वस्यास्तित्वनास्तित्वविषयत्वादुत्तरस्य धर्माद्यतीतविषयत्वात् । तस्मात्प्रत्यभिज्ञानाभावात् प्रश्नभेदो न पूर्वस्यैवोत्तरत्रानुकर्षणमिति शङ्क्यम् । भवत्प्रष्टृव्यभेदात् प्रश्नभेदो यद्यन्यो जीवः प्राज्ञतः स्यात् न त्वन्यत्वमस्ति तत्त्वमसीत्यादिश्रुत्यन्तरेभ्यः इति शंकराचार्याः जीवब्रह्मवादमवतारयन्ति सोत्रावतारितस्तद्दूषयामासुः यत्तदिति । अयमभिप्रायः पश्यसीति पदात् ।

'अथ वा शून्यवद्ब्राढं व्योमेव ब्रह्म तादृशम् ।
प्रकाशते लोकदृष्ट्या नान्यथादृक् स्पृशेत् परम्' ॥ इति ।

निबन्धोक्तरूपस्मारणात्तस्य चात्यन्तजीवभिन्नत्वेन प्रश्नभेद इति । जीवस्य त्वप्रत्यक्षत्वं 'कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्' इति श्रुतेः । न चावृत्तचक्षुस्त्वं पश्यसि तद्वदेत्यर्थ इति शङ्क्यम् । 'त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि' इति वायुप्रतिपादकश्रुतेः 'ब्रह्म तर्हि अग्निः' इति श्रुतेश्च अग्निस्तु पृष्ट एव । जीवस्याणुत्वं जीवाणुत्ववाद उपपादि, अतो न जीवो वायुवत्प्रत्यक्ष इति । अन्यच्च वायुरपि त्वाचप्रत्यक्षविषयोतो क्षरं प्रत्यक्षं पृष्टं परं च अन्यच्च शंकरभाष्येऽस्य प्रश्नस्याङ्गीकारः केषां चिदस्य पृथक् सत्त्वं स्फोरयति सूत्रकृताङ्गीकृतं सत्त्वमिति चेत् कुतो निराक्रियते श्रुत्यर्थसंगतिघलादिति चेन्न पद्मपुराणे उत्तरखण्डे उमामहेश्वरसंवादे गुणत्रयविवरणकथने 'मायावादमसच्छास्त्रमित्यस्यानिराकरणाच्छिवेन । ननु तर्हि श्रुत्यर्थसंगतिरन्या केति चेन्न ब्रह्मवादेन संगतिः सुस्थिरा भवति । तथाहि सौमनसपर्यन्तं समानकं सर्वमुक्तम् । अर्थस्तु हे मृत्यो मामभि मां प्रति मत्पिता शान्तसंकल्प इत्यादिरूपः सन् त्वत्प्रसृष्टं त्वदर्जितं माभिवदेत्प्रतीतो लब्धस्मृतिः स एवायं पुत्रो ममेत्यभिजानन् एतत्प्रयोजनं वरमाद्यं वृणे । तदा मृत्युरुवाच 'यथा पुरस्तात् भविता प्रतीतः' इति तव पिता भवितेत्यर्थः । नचिकेता उवाच ।

'स्वर्गे लोके न भयं किंचनास्ति न तत्र च त्वं न जरया बिभेति' किं च
'उभे तीर्त्वा अशनायापिपासे शोकातिगो मोदते स्वर्गलोके' इति

यामिति वर्णागमः । एतदग्रे स त्वमग्निमिति । इतः संगतिर्भिन्ना त्रयाणामेवाग्निजीवपरमात्मनामेव वरप्रदानसामर्थ्यात् वक्तव्यतयोपन्यासो दृश्यते कठवल्लीषु तद्विषय एव च प्रश्नो नातोन्यस्य प्रश्न उपन्यासो वा दृश्यते इति सूत्रार्थः परेषाम् । अवधारण एवं पदं व्याकृतमत्र

नाचिकेतः प्रजानन्' इत्याद्युत्तरम्। 'येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके' इति द्वितीयः प्रश्नः। देवैरत्रापीत्यग्रे उत्तरम्। 'अन्यत्र धर्मादन्यत्राधर्मात्' इति तृतीयः प्रश्नः। 'सर्वे वेदा यत् पदमामनन्ति' इत्यादिना

भाष्यप्रकाशः।

काल्पनिकत्वं शङ्क्यम्। 'यत् तत् पश्यसि तद् वद' इति श्रुत्यैव सिद्धत्वात्। नच निर्हेतुकत्वम्। 'तमब्रवीत् प्रीयमाणो महात्मा' इत्युक्तवरवदस्यापि वक्तृप्रीतिहेतुकत्वात्। नच तत्प्रीतेः काल्पनिकत्वम्। 'नैषा तर्केण' इति वाक्यस्थस्य प्रेष्ठपदस्यैव गमकत्वात्। नच 'यत् सांपराये महति ब्रूहि नस्तत्' इतिवदस्यापि पूर्वप्रश्नानुवादत्वं शङ्क्यम्। विषयनिर्देशविरोधात्। नच, 'येयं प्रेते'

रश्मिः।

तु त्रयाणामेव प्रकरणानामेक एवशब्देन चतुर्थप्रकरणव्यवच्छेदः। अस्मदुक्तेति भाष्यात्। उत्तरत्वेन त्रयाणामेव न चतुर्थस्यैवमुपन्यासः। चकारोऽग्न्यादिसमुच्चये, अग्न्यादिकथनं च प्रश्नसमुच्चये, प्रश्नश्च द्वितीयचकार उत्तरप्रश्नभावार्थं स चोत्तरः प्रयोक्तव्यः उत्तरवतीवेदान्तप्रश्नात् यन्नैवं तन्नैवं वेदश्रुतिवदित्युत्तरोत्तरप्रश्नप्रयोगफलं वह्निमान् धूमादित्यत्र पर्वतो वह्निमानितिवदुत्तरप्रयोगफलमिति सूत्रार्थः। सिद्धत्वादिति वदेति लोटः संप्रश्नार्थकत्वेन तथा तस्मात्। नन्वन्येप्यर्थाः सन्ति संप्रश्नार्थग्रहणे किं कारणमिति चेन्न। तृतीयवरानन्तरमन्यं वरं नचिकेतो वृणीष्वेति मृत्यूक्तेः वरकारणसत्त्वात्। श्रुत्यैवेत्यत्रैवकारेण वरव्यवच्छेदः। वराभावं तत्र कारणाभावं च शङ्कते स्म न स्वनिरिति। आपद्येत इति शङ्क्यमिति शेषः। वरवदिति तवैव नाम्ना भवितायमग्निरिति वरवत् षष्ठ्यन्ताद्वतिः। अस्येति तुरीयवरस्य इति। वाक्येति

'नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ।
यां त्वमापः सत्यधृतिर्बतासि त्वादृङ् नो भूयान्नचिकेतः प्रष्टा' ॥

इति वाक्यस्थस्य। किंच वरप्रदानसामर्थ्यात् प्रश्नोत्तरे इत्यसंबद्धं वरोभीष्टमिति पक्षे वरः श्रेष्ठ इति पक्षे च प्रश्ने तयोः सामर्थ्यस्याहेतुत्वात्। अभीष्टश्रेष्ठसामर्थ्याभावेप्यनुरोधात् प्रश्नदर्शनात्। तदत्र नास्ति यौक्तिकत्वात्। तर्हि अनुवादत्वमस्य तृतीयप्रश्नस्यास्त्वित्याहुः न च यदिति। अयं च 'येयं प्रेते' इति प्रश्नानुवादः। 'यस्मिन्निदं विचिकित्सन्ति मृत्यो' इति पूर्वपादात्। अर्थस्तूक्तः। तदुभयोरर्थयोः प्रथमेर्थेनुवादत्वम्। अस्येति तृतीयप्रश्नस्य। पूर्वप्रश्नो जीवप्रश्नस्तस्यानुवादत्वं सिद्धस्य कथनमनुवादस्तस्य भावः। विषयेति। पूर्वस्य जीवः तृतीयप्रश्नस्याक्षरः। न च जीवोऽक्षर इति पूर्वानुवादत्वं 'एतद्ध्येवाक्षरं परम्' इतिश्रुतौ परपदेनादृश्यत्वाद्यधिकरणोक्तपरब्रह्मोक्तेः। न च 'एतद्ध्येवाक्षरं ब्रह्म ह्येतद्ध्येवाक्षरं परम्' इत्याद्यनन्तरं 'न जायते म्रियते वा विपश्चित्' इति जन्ममरणप्रतिषेधेन प्रतिपाद्यमानशारीरपरमेश्वरयोर्भेदं दर्शयति। सति हि प्रसङ्गे प्रतिषेधो भागी भवति प्रसङ्गश्च जन्ममरणयोः शारीरसंस्पर्शात् शारीरस्य भवति न परमेश्वरस्य। तथा।

'स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति' ॥

इति स्वप्नजागरितदृशो जीवस्यैव महत्वविभुत्वविशेषणस्य मननेन शोकविच्छेदं दर्शयन्न प्राज्ञादन्यो जीव इति दर्शयति प्राज्ञविज्ञानाद्धि शोकविच्छेद इति वेदान्तसिद्धान्तः। तथाग्रे 'यदेवेह तदमुत्र यदमुत्र तदन्विह मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इति जीवप्राज्ञभेददृष्टिमपवदति

भाष्यप्रकाशः ।

इत्येतदुत्तरस्य ब्रह्मप्रश्नात् प्रागभावात् तत्पूर्वग्रन्थस्य तदनुत्तरत्वं शङ्क्यम् । 'न सांपरायः' इति वाक्ये परलोकासत्त्वमानिनः पुनः पुनः स्ववशगत्वोक्त्या तादृशस्याप्यस्तिबोधनस्यै वोत्तरत्वात् ।

रश्मिः ।

चातो जीवब्रह्मवादोस्त्विति वाच्यम् । अदृश्यत्वाद्यधिकरणोक्तं रूपमेतद्ध्येवाक्षरं ब्रह्मेत्युक्त्वा न जायत इति श्रुत्युक्तेरेतासां कृष्णावतारपरत्वात् । विपश्चित्पदात् 'सूर्यो विपश्चिन्मनसा पुनातु' इति विपश्चितः सूर्यत्वं कृष्णस्य सूर्यत्वं च 'कृष्णद्युमणिनिम्लोचे' इति वाक्यात् । अतः कृष्णविपश्चितोरेकार्थवाचकत्वम् । जन्ममरणयोराविर्भावतिरोभावात्मकत्वान्न दोषः । 'आविर्भावतिरोभावौ शक्ती वै मुरवैरिणः' इति वाक्यात् । न च मुरस्य जलदोपात्मकस्यारित्वसमकालिकावाविर्भावतिरोभावाविति शङ्क्यम् । नारायणत्वेनात्मत आविर्भावतिरोभावाविति श्रुतेश्च मुरवैरित्वसमकालिकत्वस्याविर्भावतिरोभावयोः पौराणत्वात् । स्वप्नान्तं जागरितान्तं चेत्यादि कृष्णावतारे 'लोकवत्तु लीलाकैवल्यम्'इति सूत्रात् । इहेति इह लोके कृष्णावतारे । अमुत्र परब्रह्मणि । नानादर्शने स्वगतद्वैतापत्तिरतः साधनै राजसतामसज्ञाने निहत्य सात्त्विकं ज्ञानं संपाद्य नानादृष्टिर्निवर्तनीया तदुक्तम्

'सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं सात्त्विकं स्मृतम्' ॥

इत्येकादशस्कन्धे । अतो न जीवब्रह्मवादः । एवं विषयनिर्देशविरोधादित्यर्थः । किं च अनूद्यजीवप्रश्न एकः अनुवादकं तु दृष्टान्तदार्ष्टान्तिकयोर्भिन्नं तत्र यदि दृष्टान्तेऽनुवादकं वाक्यं स्यात् तदा दार्ष्टान्तिकेपि वदेत् तदेव तु न दृष्टान्तीयानुवादकवाक्यस्य त्वर्थान्तरादिदं वाक्यं जीवप्रश्ने मृत्युना 'अन्यं वरं नचिकेतो वृणीष्व' इत्युक्तौ नचिकेताः

'यस्मिन्निदं विचिकित्सन्ति मृत्यो यत्सांपराये महति ब्रूहि नस्तत् ।
योयं वरो गूढमनुप्रविष्टो नान्यं वरं तस्मान्नचिकेता वृणीते' ॥

इत्याह । अत्र तस्मादित्यस्य यस्मिन्नित्यादिनानूदितद्वितीयप्रश्नार्थादित्यर्थे अनुवादः स्यान्न त्वेवं न्यूनताख्यनिग्रहस्थानापत्तेः । न हि ब्रह्म जीवस्यात्ममात्रं 'अधिकं तु भेदनिर्देशात्' इति सूत्रात् किं तु तस्मादित्यस्य श्रौतपदस्योक्तोभयार्थद्वितीयपक्षः ब्रह्मण इत्यर्थः । अतोनानुवादत्वं शङ्क्यमित्यर्थः । न चात्र चतुर्थो वरस्तस्य समाप्तत्वात् नचिकेता नामा अग्नि प्रसिद्धौ अतोन्यं वरं नचिकेतो वृणीष्व इत्यन्तं चरमवरकारणकस्तृतीयो ब्रह्मप्रश्न इति । एवं तृतीये प्रश्ने समर्थिते देवैरत्रापीत्यस्य प्रथमवल्लीसमाप्तिपर्यन्तस्योत्तरत्वम् । द्वितीयवल्लीस्थस्य ॐमन्यच्छ्रेय इत्यादेरनुत्तरत्वमाशङ्क्य समादधुः न च येयमिति । येयं प्रेत इत्यस्य प्रश्नस्य यदुत्तरं तस्य देवैरत्रापीत्यारभ्य 'नचिकेता वृणीते' इति प्रथमवल्लीसमाप्त्यन्तस्य ग्रन्थस्यात्र प्रागभावादित्यत्र प्राग्भावादिति पाठः । तत्पूर्वेति ब्रह्मप्रश्नात्पूर्वग्रन्थस्य प्रथमवल्लीसमाप्त्यनन्तरस्य ॐमन्यच्छ्रेय इत्यादिग्रन्थस्य द्वितीयवल्लीस्थस्य 'न सांपरायः' इति वाक्यात्पूर्वस्य । तदनुत्तरत्वं द्वितीयप्रश्नानुत्तरत्वं विचिकित्सनाभावाच्छङ्क्यम् । न इति ।

'न सांपरायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम् ।
अयं वा लोको नास्ति पर इति मानी पुनःपुनर्वशमापद्यते मे' ॥

इति वाक्ये । स्ववशेति मृत्युवशगत्वोक्त्या । तादृशेति परलोकासत्त्वमानिनोपि । अस्ति 'अस्तीत्येके नायमस्तीति चैके' इत्यनयोरस्तिबोधनपक्षस्यात्रापि सत्त्वात् । यद्धर्मप्रकारकयद्विषयकप्रश्नस्तद्धर्मावच्छिन्नतदुद्देश्यकमुत्तरमिति नियमस्य को घटः कम्बुग्रीवादिमान् घट इत्यादिषु दर्शनादस्ति-

भाष्यप्रकाशः।

नच तदग्रिमग्रन्थवैयर्थ्यं शङ्क्यम्। उत्तमाधिकारदर्शनेनाधिकप्रश्नोदयार्थमेव तदुक्त्या अवैयर्थ्यात्। तत एव श्रेयःप्रेयसोर्विद्याविद्ययोश्च कथनमपि युज्यते। अतः 'तं दुर्दर्शम्' इति वाक्यद्वयान्त-

रश्मिः।

घटितजीवप्रश्नस्यास्तिबोधकस्यासंपराय इति वाक्यस्योत्तरत्वादिति। तदग्रिमेति न संपराये-तिवाक्याग्रिमस्य 'श्रवणायापि बहुभिर्यो न लभ्यः' इत्यादिजीवनिरूपकग्रन्थस्य वैयर्थ्यम्। उत्तमेति यस्मिन्निदमिति वाक्येन कामाप्रलोभादुत्तमाधिकारदर्शनेन त्वादृङ् नो भूयान्नचिकेतः प्रष्टा' इति प्रश्नप्रशंसया चोत्तमाधिकारदर्शनेन। अधिकेति ब्रह्मप्रश्नोदयार्थम्। तदुक्त्येति तदग्रिमग्रन्थोक्त्या हेतोः। तत इति अधिकप्रश्नोदयार्थत्वादेव

'अन्यच्छ्रेयो अन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुषं सिनीतः।
तयोः श्रेयआददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते॥
श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ संपरीत्य विविनक्ति धीरः।
श्रेयो हि धीरो अभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते॥
सत्वं प्रियान् प्रियरूपांश्च कामान् अभिध्यायन्नचिकेतोऽत्यस्राक्षीः।
नैतां सृतिं वित्तमयीमवाप्तो यस्यां मज्जन्ति बहवो मनुष्याः'॥

इति श्रेयःप्रेयसोः। सिनीत इति छान्दसत्वादेकवचनं बध्नीत इत्यर्थः। आ इत इति छेदः। एत इत्यत्र प्राप्नुतः। तौ संपरीत्य मनसालोच्य विविनक्ति पृथक्करोति गुरुलाघवम्। अभिप्रेयसे इति अभिप्रेयो विहाय। प्रेयः पशुपुत्रादिलक्षणम्। योगक्षेमात् योगक्षेमनिमित्तम्। सृतिमिति गतिम्। यतस्त्वं नचिकेतः श्रेय आददान इति भावः। विद्येति उक्तश्रुत्यग्र एव

'दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता।
विद्याभीप्सितं नाचिकेतसं मन्ये न त्वा कामा बहवो लोलुपन्तः[1]॥
'अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः।
दन्द्रम्यमाणाः परियन्ति मूढाः अन्धेनैव नीयमाना यथान्धाः'॥

इत्यनेन विद्याविद्ययोः दूरं महतान्तरेण एते श्रेयःप्रेयसी। विषूची इति। ष्वच गतौ भ्वा. आ. से. ष्वचते इन् संप्रसारणं नानागतिभिन्नफले संसारमोक्षहेतुत्वेन एका विषूचिरविद्या या। सोर्यांच्। अपरा विषूचिर्विद्या इति ज्ञाता भवेत्। विद्या अभीप्सिता यस्य। दन्द्रेति द्रम गतौ भ्वादिः आ. से. यङ् दन्द्रम्यन्ते दन्द्रम्यमाना, शानच्, आने मुक्। पुनःपुनः कामकामा गम्यन्ते आगम्यन्ते चेत्यर्थः। परियन्तीति परितो गच्छन्ति श्रेयःप्रेयसोर्विद्याविद्ययोश्च कथनमेवं कृतमस्याधिकप्रश्नोदया-र्थत्वं तु अर्थस्य प्रयोजनरूपत्वादधिकप्रश्नोदयः प्रयोजनमस्य कथनस्य। अत्र कथनस्य कारणत्वम-त्रापि कथनरसाभिनिवेशः कारणमिति ज्ञेयम्। तच्च प्रथमस्कन्धसुबोधिन्यां 'त एकदा तु मुनयः' इत्यत्रोक्तम्। अत्र प्रश्नकथनरसाभिनिवेशयोः शौनकनिष्ठत्वम्। तत्र तु प्रश्नस्य नचिकेतोनिष्ठत्वं कथन-रसाभिनिवेशस्य मृत्युनिष्ठत्वमिति। व्यधिकरणं फलं केनचित्संबन्धेन समानाधिकरणम्। अत इति एतावतो ग्रन्थस्योक्तसंगतिकत्वादग्रे जीवप्रश्नासंगतत्वाच्च। वाक्येति। वाक्यद्वयमग्रे वक्तव्यम्।

[1] विद्याभीप्सितं नचिकेतसं मन्ये न त्वा कामा बहवो लोलुपन्ते।

BHARATIYA VI... S. N....... LIBRARY

भाष्यप्रकाशः।

संदर्भ एव तृतीयवरप्राप्तस्य द्वितीयप्रश्नस्य पूर्वैः 'अन्यत्र धर्मात्' इत्यनेनोक्तस्य प्रश्नस्य तृतीयत्वं प्रसादहेतुकत्वं च मन्तव्यम्। नच प्रसङ्गाभावः शङ्क्यः। जीवप्रश्नप्रत्युत्तरोपसंहारस्थे दुर्दर्श-वाक्योत्तरम्।

'एतच्छ्रुत्वा संपरिगृह्य मर्त्यः प्रगृह्य धर्म्यमणुमेतमाप्य।
स मोदते मोदनीयं हि लब्ध्वा विवृतं सद्म नचिकेतसं मन्ये' ॥

इत्यस्मिन् वाक्ये, एतत्पूर्ववाक्योक्तं, देवं व्यवहर्तारं जीवमाचार्यमुखाच्छ्रुत्वा संपरिगृह्य सम्यगात्मत्वेनोपादाय मर्त्यः शरीरद्वयव्यतिरिक्तत्वज्ञानेन हर्षशोकशून्योऽपि, येऽन्येऽरविन्दाक्षेतिवाक्योक्तन्यायान्मरणधर्मैव सन् प्रगृह्य धर्म्यं, 'न हि सुविज्ञेयमणुरेप धर्मः' इत्युपक्रमवाक्ये धर्मत्वेनोक्तो यो जीवस्तस्मादनपेतं सखित्वान्निकटस्थं प्रकर्षेणालम्ब्य, अणुमेतमाप्य,

रश्मिः।

वाक्यद्वयाग्रे तृतीयः प्रश्नः। तृतीयत्वमिति प्रश्नत्रये श्रुत्यभिप्राय उक्तः। तेन त्रयाणामेवेत्येवकारः सौत्रः समर्थितः। प्रसादेति प्रसादो वरद्वारा हेतुर्यस्य। न च मृत्युनाऽन्यं वरं नचिकेतो वृणीष्वेति प्रोक्ते वाक्ये प्रसादो न वर इति शङ्क्यम्। श्रुत्यग्रे यस्मिन्निदमिति वाक्ये गूढवरस्य नचिकेतस उक्तत्वात्। एवं चात्रापि प्रसादो वरः प्रश्न उत्तरं च। प्रसङ्गेति। तृतीयप्रश्ने संगत्यभावः। दुर्दर्शेति

'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति' ॥

इति वाक्यम्। गह्वरमनेकार्थसंकटम्। तत्र तिष्ठतीति गह्वरेष्ठम्। अधीति आत्मनीत्यध्यात्मं अव्ययीभावः, तत्संबन्धियोगः। जीवमिति जीवप्रश्नोत्तराभ्याम्। शरीरेत्यध्यात्मयोगाधिगमेनेत्यस्याभिप्रायः। येन्य इति।

'येऽन्येरविन्दाक्षविमुक्तिमानिन-
स्त्वय्यस्तभावादविशुद्धबुद्धयः।
आरुह्य कृच्छ्रेण परं पदं ततः
पतन्त्यधोऽनादृतयुष्मदङ्घ्रयः' ॥

अयं न्यायः प्राप्तसांख्यसामर्थ्यत्वेन मर्त्यपदोपपादनाय तस्मान्मरणधर्मेत्यत्र हेतुः। यद्यप्यात्मद्वयप्राप्तविवेकस्तथापि मृत्योः सूक्ष्मदेहीयोऽत्यन्तविस्मरणरूपो जीवस्यास्त्येव पतन्त्यध इति वचनात्। इत्युपेति जीवप्रश्नान्तरमुत्तरोपक्रमवाक्ये 'देवैरत्रापि विचिकित्सितं पुरा नहि सुविज्ञेयमणुरेष धर्मः' इतिवाक्यम्। धर्मत्वेनेति तथाच धर्म्यमित्यत्र धर्मं धर्मत्वमर्हतीति धर्म्यः। वैदिकप्रक्रियास्थेन 'छन्दसि च' इति सूत्रेण यत्। तथाच वृत्तिः 'प्रातिपदिकमात्रात्तदर्हतीति यत्' इति। धर्म्यमित्यत्र धर्मस्य भावप्रधाननिर्देशापत्त्या 'धर्मपथ्यर्थन्यायादनपेते' इति सूत्रेण यतमाहुः तस्मादिति। धर्माज्जीवादनपेतं सुपर्णं 'द्वा सुपर्णा सयुजा सखाया समाने वृक्षे परिषस्वजाते' इति श्रुतिः धर्म्यं प्रगृह्येत्यस्यार्थः। इदमेव धर्मत्वमर्हतीति धर्म्यम्। इदमेव धर्मेण प्राप्यं धर्म्यं 'नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु' इति सूत्रेण यत्। इदमेव धर्मे साधु धर्म्यं तत्र साधुरिति यत्। धर्मं प्रवृह्येति क्वचित् पाठः, पृथक्कृत्य शरीरादेरिति तद्भाष्यम्। भाष्यप्रकाशानुसारेण तु धर्मं जीवं प्रवृह्य वर्द्धयित्वा मुक्तं कृत्वा। अणुत्वं तर्ह्यवास्तवमित्याशङ्क्याणुमित्यस्यार्थमाहुः अणुमिति। एतं जीवमणुमाप्य प्राप्य ज्ञात्वेति यावत् मुक्तत्वानन्तर-

उत्तरम्। एवमग्निजीवब्रह्मणां प्रश्नोत्तराणि। तत्र यदि साङ्ख्यमतं निरूपणीयम्, 'इन्द्रियेभ्यः' इत्यादि स्यात् तदा चतुर्थस्याप्युपन्यासः स्यात्। उपन्यासे हेतुः प्रश्नः। अत एव पश्चाद्वचनम्। तस्य प्रकृतेऽभावादसदुक्तरीत्या त्रीण्येव प्रकरणानीति सिद्धम्। उत्तरप्रश्नभावार्थं चकारः॥ ६॥

भाष्यप्रकाशः।

सः, जीवं ज्ञात्वा विद्वान्, मोदनीयं सर्वथालम्बनेन प्रसादनीयं ब्रह्म लब्ध्वा प्राप्य मोदते। एष ह्येवानन्दयातीति श्रुतेः। मोदते हि यतो हेतोरतो नचिकेतसं त्वामधिकारिणं प्रति सद्म सदनभूतं ब्रह्म विवृतमपावृतद्वारं मन्य इति कथनेन ब्रह्मणः स्मारणात्। नच पञ्चमवल्लीस्थस्य, यथा च मरणं प्राप्येति सार्द्धवाक्यस्योत्तरत्वं शङ्क्यम्। व्यवहितत्वात्। हन्त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनमिति प्रतिज्ञानन्तरपठितत्वेन तल्लीलाबोधनार्थत्वावगमाच्च। नचात्र लीलाङ्गीकारे मानाभावः शङ्क्यः। य एष सुप्तेषु जागर्तीत्यारभ्य वल्लीसमाप्तिलीलाकथनदर्शनेनापि तथावसायादिति।

रश्मिः।

मपि। स इति मर्त्यः देहद्वयविशिष्टः, जीवमणुमक्षरांशमिति न कर्मकर्तृविरोधः। सदनेति अक्षरम्। अपेति नापृष्टो ब्रूयादिति सुबोधिन्या ब्रह्मपृच्छकः सन्नुत्तरं धारयिष्यति चेति। स्मरणेति तथा च स्मृतस्य ब्रह्मप्रश्नस्योपेक्षानर्हत्वात् जीवप्रश्नोत्तरेण ब्रह्मप्रश्नस्य प्रसङ्गसंगतिरिति न प्रसङ्गाभावः शङ्क्यः। ननु देवैरत्रापीत्यस्य उत्तरत्वं भाष्य उक्तं तन्न संभवति देवैरपि संदिग्धमत्र यत उपसंहारेपि 'यस्मिन्निदं विचिकित्सन्ति' इति संदेहः श्रुत्योक्तः। अत एवान्यं वरं नचिकेतो वृणीष्वेति मृत्युनोक्तम्। संदिग्धस्यानुत्तरत्वात्। अत्र प्रथमवल्ली समाप्ता। ततो हि ॐ मन्यच्छ्रेय इत्यादीनामधिकप्रश्नोदयार्थत्वं श्रवणायापीत्यादिना पुनर्जीवनिरूपणं तत्राप्याश्चर्यो वक्ता कुशलोस्य लब्धेति अस्य जीवस्य वक्ताश्चर्यः न नरेणावरप्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमान इति च एष जीवः। अतः संदिग्धस्यानुत्तरत्वम्। उत्तरसमाप्तिकायां तं दुर्दर्शमित्यादिवाक्यद्वयं तल्लाकृतं तत्राप्यध्यात्मयोगाधिगमेन देवं जीवं मत्वेत्यध्यात्मयोगाधिगमसाध्यावबोधकत्वेनाज्ञानकं ततो ब्रह्मप्रश्नः। अतः शंकरभाष्योक्तम्

'हन्त त इदं वक्ष्यामि गुह्यं ब्रह्म सनातनम्।
यथा च मरणं प्राप्यात्मा भवति गौतम'॥
'योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।
स्थाणुमन्येऽनु संयन्ति यथाकर्म यथाश्रुतम्'॥

इति व्यवहितमुत्तरमित्याशङ्क्य समादधुर्न चेति। व्यवेति येयं प्रेते इति जीवप्रश्नस्य प्रथमवल्लीस्थत्वात्तथा। यथा प्रहरे प्रहरेऽसहोच्चारितानि पदानि न प्रमाणानि संनिध्यभावात्। तथात्र प्रश्नोत्तरप्रमाजनकमुत्तरमिति भावः। ननु

'स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते'॥ इति।

पूर्वेतत्रात्मप्रश्नोत्तरभावो भविष्यतीति चेत्तत्राहुः हन्तेति। गुह्यमिति 'गूढं ब्रह्मणि वाङ्मये' इति श्रीभागवतात् कृष्णावताररूपम्। तथा च जीवविषयत्वाभावात् नाङ्गाङ्गित्वाद्यपेक्षेति भावः। लीलाकथनेति 'श्रोतव्यविषयत्वेन लीला दशविधा यतः' इति द्वितीयस्कन्धसुबोधिनीकारिकातो दशविधलीलासु प्रथमम्।

रश्मिः ।

'यथा हि मरणं प्राप्यात्मा भवति गोतम ।
योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ।
स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्' ।

मरणं प्राणत्यागं जीवीयं प्राप्य त्यक्ताः प्राणा भगवत्समीपं गच्छन्ति स आत्मा आध्यात्मिकादित्रितयविदाश्रयो भवति आत्मावतारादिरपि । लोकवत्तु लीलाकैवल्यमिति सूत्रानुसरणात् । धीरविषय उक्तः । अधीरविषयमाह योनिमिति 'योनेः शरीरम्' इति सूत्रात् । स्थाणुमन्ये । श्रुतं गुर्वादिमुखद्वारा । प्रसङ्गागतान्यगतिसहितेश्वरनिर्याणस्य मुक्तिलीलात्वेपि शोकदत्वात्तद्विहाय विसर्गलीलामारभ्याहुः य एष्विति ।

य एषु सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः ।
तदेवावक्रं तद्ब्रह्म तदेवामृतमुच्यते ॥

अवक्रं ऋजुः 'विसर्गः पौरुषः स्मृतः' इति वाक्यम् । अत्र स्वप्नसृष्टिनिर्मातृत्वं तच्च कर्तृत्वमात्रं नाभिन्ननिमित्तोपादानत्वरूपमिति न संध्याधिकरणभाष्यविरोधः 'यस्मिन् लोकाः श्रिताः सर्वे तदुनात्येति कश्चन एतद्वैतत्' इति श्रुतिरत्र अत्येति अत्यन्तमेति तद्ब्रह्म 'ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति अत्र लोकधारकत्वादाश्रयलीला कृष्णाश्रयनामाश्रयः ।

'अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च' ॥

वायुर्यथैक इति वाक्यं पूर्ववत् । अत्र धर्मिणोऽसाधारणधर्मेण व्यापकत्वेन रूपनामनिर्वाहकत्वलीला तत्त्वादिरूपनामनिर्वाहकत्वेन सर्गलीला । महत्तत्त्वाहंकारादीनि नामानि 'प्रोचुः प्राञ्जलयः' इति वाक्यात् रूपाणि ।

'सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः ।
एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः' ॥

इत्यत्र लोकदुःखासंसृष्टत्वोक्त्या जगद्व्यापारवर्जं 'सर्वरसः' इति श्रुतेः सर्वरसलीला विसर्गलीला । भक्तानुरोधिनीं लीलां विसर्गरूपामाह ।

'एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति ।
तमात्मस्थं येऽनु पश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्' ॥ इति ।

अत्रैकरूपस्य बहुधाकरणं भक्तानुरोधात् यद्यद्धियेति वाक्यात् । आत्मस्थं श्रुतिस्थं 'तस्मान्मिथा एतास्ता आभिर्भिन्नो न वै विभुः' इति कृष्णोपनिषच्छ्रुतेः मनःस्थं वा 'स मानसीन आत्मा जनानां सर्वात्मा' इति श्रुतेः । फलदातृत्वरूपां स्थानादिलीलामाह 'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् तमात्मस्थम्' इति पूर्ववत् । सुखस्थाने शान्तिः फलमत उपपत्तेरिति सूत्रात्

'तदेतदिति मन्यन्ते निर्देश्यं परमं सुखम् ।
कथं नु तद्विजानीयात् किमुतो भाति वा न वा' ॥

तद्ब्रह्म एतत्प्रत्यक्षं समीपतरं मन्यन्ते जानन्ति अवबोधयन्ति वा निवृत्तेषणा ब्राह्मणादयः तत्सुखं कथं केन प्रकारेण जानीयामहं नचिकेताः । विजानीयात् यः कोपि । किमुतेति नातिशये

रश्मिः ।

आङुक्तेः, न विकल्पे, वाकारोक्तेः । अतः प्रश्ने आसमन्ताद्भाति न वेति प्रश्नः । भासाद्वारा दीप्यते इत्युत्तरमाह 'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोयमग्निः ।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' ॥ इति ।

'अनुकृतेस्तस्य च' इत्यत्र व्याकृता पञ्चमवल्लीस्था लीला । एवमा वल्लीसमाप्ति लीलाकथनदर्शनेनेत्यर्थः । अग्रेतनवल्ल्यर्थः कथ्यते प्रसङ्गात् । 'अत एव च नित्यत्वम्' इति सूत्रभाष्ये वेदस्यार्थतौल्यं शब्दब्रह्मवेदपुरुषशब्दवाच्यत्वमुक्तं तदाहुः ऊर्ध्वमूल इति इयं विसर्गरूपेण लीला 'तस्माद्विराडजायत विराजो अधिपूरुषः' इत्युक्त्वा किंचिदन्यदुक्त्वोच्यते 'तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे छन्दाꣳसि जज्ञिरे तस्माद् यजुस्तस्मादजायत' इति श्रुतेः । 'ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः । तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते' 'तस्मिंल्लोकाः श्रिताः सर्वे तदुनात्येति कश्चन एतद्वैतत्' इति श्रुतिः । अत्र पक्षिवृषभवृक्षेषु वृक्षत्वेन वेदोऽवर्णि । ननु वृक्षे लोकानां श्रितत्वं बाधितमिति चेन्न ऊर्ध्वमूलं तद्विष्णोः परमं पदमस्य स्वर्गनरकतिर्यगादिशाखाभिरवाक्शाखः अश्वत्थः अश्वत्थं जलमस्यास्ति 'अर्शआद्यच्' 'आपः प्रजाहितं शान्तं अश्वत्थं पवनं शिवम्' इति केशरमालाकोश इति व्याख्यासुधायां भानुदीक्षितः । यद्वा अश्वस्तिष्ठत्यस्मिन्नित्यश्वत्थः लोकास्त्वश्वे तिष्ठन्ति अस्मिंस्त्वश्वस्तिष्ठतीति अश्वो रूपं कृत्वा यदश्वत्थे तिष्ठते इति अश्वशब्दो योगरूढः 'विचारो योगरूढितः' इति पूर्वमीमांसाकारिकायाः । तथा च व्यापकोश्वनामा पदार्थः कल्की अवतारः । अवतारत्वाद्व्यापकः । रूपं प्रत्यक्षाश्वत्थरूपम् । तिष्ठत इति उपग्रहव्यत्ययः । परस्मैपदी आत्मनेपदी उपग्रहः । सनातनो नित्यः । तथा च वेदतरोः शब्दात्मकत्वमर्थतरोरवतारात्मकत्वमतोत्र शुक्रत्वादि विदधौ श्रुतिः तदेव शुक्रमिति । शुक गमने भ्वा. प. से. गतमित्यर्थः क्रियेति यावत् वेदार्थयोरभेदात् । तद्ब्रह्मेति अवतारावतारिणोरभेदात् । एतदमृतमिति तस्मिंल्लोकाः श्रिताः सर्वे । अत्यन्तं नेति प्राप्नोतीत्यर्थात् । अग्रे भगवतो मारणलीलार्थमारकं रूपं भगवत आह यदिदं किं चेति । कम्पनादित्यधिकरणे चिन्तिता । इयं लीला स्थानलीला । पुनः स्थानलीलामाह ।

'भयादस्याग्निस्तपति भयात्तपति सूर्यः ।
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः' ॥

इति । स्पष्टम् । यथा वज्रोद्यतकरं स्वामिनं दृष्ट्वाऽभिमुखीकृत्य भृत्या नियमेन तच्छासने प्रवर्तन्ते तथेमाः प्रजा इति स्थानलीला । पूर्ववाक्ये फलमुक्तं य एतद्विदुरमृतास्ते भवन्तीति द्वितीयश्रुत्युक्तस्थानलीला ज्ञानफलमाह ।

'इह चेदशकद्बोद्धुं प्राक् शरीरस्य विस्रसः ।
ततः स्वर्गेषु लोकेषु शरीरत्वाय कल्पते' ॥

इति । स्थानलीलां बोद्धुमशकत् शक्नोति कालव्यत्ययः । शरीरस्य विस्रसः पतनात् प्राक् । कचिद्विस्रसः इत्यत्र विश्रम इति पाठः । श्रम धातुः खेदतपसोः दि. प. से. । बोद्धुमित्युक्ते स्थानलीलाबोधे वैजात्यात्फलवैजात्यमाह यथादर्शे तथात्मनि यथा स्वप्ने तथा पितृलोके यथाप्सु परीव ददृशे तथा गन्धर्वलोके छायातपौ ब्रह्मलोके इति । आदर्शे प्रतिबिम्बभूतकार्येश्वरं पश्यति तथात्मनि बुद्धौ मनसि वा 'स मानसीन आत्मा जनानाम्' इति श्रुतेः । पश्यति यथा च दर्शे चन्द्रसूर्ययोः संगमे यथा

१. वैयात्यात् । २. वैयात्यात् ।

रश्मिः।

चावलोकनात्मके दर्शे विषयत्वेन पश्यति तथा आत्मनि मनसीति पूर्ववत् 'दर्शस्तु संगमे चन्द्रसूर्ययोरवलोकने' इति विश्वः। चन्द्रसूर्ययोरवलोकने इत्यन्वये सूर्यत्वेन चन्द्रत्वेन पश्यतीत्यर्थः। यथा स्वप्ने जीवस्य मायिकभोगस्तथा पितृलोककामस्य पितृलोके उपस्थिते मायिकभोगः यथाप्सु परिददृशे परिदृश्यते एकोपि बहुत्वेन इव तद्वत्। तथा तेन प्रकारेणैको बहुत्वेन परिदृश्यते छायातपयोरिवात्यन्तविलक्षणौ ब्रह्मलोके। शोकाभावफलार्थमाह।

'इन्द्रियाणां पृथग्भावमुदयास्तमयौ च यत्।
पृथगुत्पद्यमानानां मत्वा धीरो न शोचति'॥

इति। युक्तो हि इन्द्रियाणां पृथगुत्पन्नानां पृथग्भावं मत्वा ज्ञात्वा न शोचति। अयमपि भेदो निरध्यस्तदेहेन्द्रियकेषु। भक्तिज्ञानमार्गयोः निरध्यस्तदेहेन्द्रियकेषु भेदावाह निरध्यस्तेन्द्रियो भक्तश्चेदिन्द्रियाणामुदयः निरध्यस्तेन्द्रियैरेव कर्मकरणसंभवात्। ज्ञानी चेदिन्द्रियाणामस्तभावः। इन्द्रियत्वेनाज्ञानमात्मत्वेन ज्ञानम्। 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' इति फलाध्यायसूत्रात् मुक्तस्यामृतत्वं फलमाह इन्द्रियेभ्य इति।

'इन्द्रियेभ्यः परं मनो मनसः सत्वमुत्तमम्।
सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम्।
अव्यक्तात्परः पुरुषो व्यापकोऽलिङ्ग एव च।
यज्ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति'॥ इति।

परत्वमिन्द्रियनायकत्वात् 'मनसैवानुद्रष्टव्यः' इति करणत्वाच्च। उत्तमत्वं ज्ञानजनकत्वाद्विष्णुत्वोपपादकत्वाच्च। अधि न दधातीत्यधि धोः किः आधेयो जीवः आत्मा अस्य सत्त्वाद्विष्णुत्वापादकादुत्तमत्वं कथमित्यत आह महानिति। अपरिच्छिन्नपरिमाणवान् मुक्त इति यावत्। तथा च निर्गुणत्वादुत्तमत्वमधिकत्वं वा कवर्णलोपात्। अव्यक्तमक्षरम्। अलिङ्ग इति लिङ्ग्यते गम्यते येन तत्तथोक्तं चिह्नं तदविद्यमानमस्येत्यलिङ्गः। चिह्नादीनां विद्यमानत्वाल्लिङ्गः लिगि गतौ भ्वा. प. से.।

'नवाम्बुदानीकमनोहराय प्रफुल्लराजीवविलोचनाय।
वेणुस्वनामोदितगोकुलाय नमोस्तु गोपीजनवल्लभाय'॥ इति।

गोपीजनवल्लभाष्टकोक्तानि चिह्नानि गम्यन्ते येन स आत्मा लिङ्गः तज्ज्ञात्वेत्युक्तं तत्र करणाकाङ्क्षायामाह।

'न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्।
हृदा मनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति'॥ इति।

संदृशे सम्यग्ज्ञानाय रूपं तिष्ठति। द्रव्यचाक्षुषं प्रत्युद्भूतरूपस्य कारणत्वेन कथं तत्पश्यति। उच्यते। हृदा मनसा। मनीट् मनसः संकल्पादिरूपस्येष्टे नियन्तृत्वेनेति मनीट् बुद्धिस्तया मनसा अभितः क्लृप्तम्। सुपां सुः मनसाभिक्लृप्तः। एतद्विशेषणं रामतापिनीये 'उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना' इति। स मानसीन आत्मा जनानामिति मनसा। ननु मनोग्राह्यत्वापत्तिः आत्मा 'भक्त्याहमेकया ग्राह्यः' इति वाक्याद्भक्तिमात्रग्राह्य इति चेन्न। मनसाभिक्लृप्तपदेन मनसाभिकल्पनविषय उच्यतेऽत्र मनसा कल्पनं 'भक्तिरहस्यभजनं तदिहामुत्र फलभोगनैराश्येनामुष्मिन् मनःकल्पनम्'

१. वेमतास्त्र। २. वेमालम्।

रश्मिः ।

मेतदेव च नैःकर्म्यम्' इति गोपालतापिनीयश्रुत्युक्तमनसः कल्पनरूपं गृह्यते इति मनसा कल्पनं मनःकल्पनमिति विगृह्य समासस्यापि संभवात् तथा च मनःकल्पनेन भक्तिरूपेण ग्राह्यः, हृदा मनीषा च सहकारिकारणानुगृहीतेनेति करणमुक्तम् । 'भक्त्या प्रसन्ने तु हरौ तं योगेनैव योजयेत्' इति सुबोधिन्या योगमाह ।

'यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च न विचेष्टति तामाहुः परमां गतिम्' ॥
'तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम् ।
अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ' ॥

अवेति आत्मन्यवतिष्ठन्ते निरोधलक्षणोक्तरीत्या । बुद्धिश्च स्वव्यापारे न व्याप्रियते तां परमां गतिं फलरूपां सेवामाहुः । निरोधलीला इत्युक्तम् । अप्रमत्तस्तदा भवतीत्युक्त्या मन्यन्त इत्यत्र केचिदिति कर्तृबोधनात् विरलाः कर्तारः । अतः सकलसाधारणयोगमाह योग इति प्रभवत्यस्मादिति प्रभवः इति 'भुवः प्रभवः' इत्यत्र व्याकृतं मनोरमायां भट्टोजिदीक्षितेनात्रापि बोध्यम् । अपि अयः ब्रह्मणि गमनं संयोगो भवत्येव हि निश्चयेन यतः सर्वोपि वदति गच्छतीत्यत्र गमनं उत्तरदेशसंयोगं करोतीति न च फलानुकूलव्यापारो धात्वर्थ इति वाच्यम् मण्डनमिश्रवरफलमात्रस्य धात्वर्थाङ्गीकारादस्यामप्ययोगदशायां निर्गुणेप्ययः न च साकारेनन्तमूर्तौ ब्रह्मणि कुतो नाप्ययः । भक्त्यैकलभ्यत्वात् ता नाविदन्निति वाक्यात् तथा चोभयोर्भक्तसाधारणयोर्ब्रह्मजीवयोश्च ग्रहणकारणाभावादनुपलभ्यमाने न स्त एव जीवब्रह्मणी इति प्राप्त आह ।

'नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा ।
अस्तीति ब्रुवतोन्यत्र कथं तदुपलभ्यते ॥
अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः ।
अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति' ॥

इति नैव वागादिभिः प्राप्तुं शक्ये यद्यपि तथापि योगकाले आत्मद्वयमस्तीत्येवोपलब्धव्य आत्मा कस्मादस्तीति ब्रुवतो अस्तिवादिन आगमार्थानुसारिणः श्रद्दधानादन्यत्र नास्तिकवादिनि विपरीतदर्शिनि कथं तद् द्वयमुपलभ्यते न कथंचनेत्यर्थः । तस्मादपोह्यासद्वादिपक्षमासुरमस्तीत्येवोपलब्धव्यः आत्मा तत्त्वभावेन तस्य आत्मनो भावस्तत्त्वं तस्य भावः सत्ता तयोपलब्धव्या जीवात्मा तत्राप्युभयोर्जीवब्रह्मणोः । निर्धारणे षष्ठी । पूर्वमस्तीत्येवोपलब्धव्यः । आत्मा प्रसीदति तत्त्वभावो जीवसत्ता प्रसीदति योग ऐक्यान्न चकारप्रयोगः । अधुना जीवन्मुक्तिप्रकार उच्यते ।

'यदा सर्वे प्रमुच्यन्ते कामा येस्य हृदि स्थिताः ।
अथ मर्त्योऽमृतो भवति अत्र ब्रह्म समश्नुते' ॥

इति स्पष्टम् । जीवन्मुक्तिप्रकार एष सलिङ्गदेहस्य ।

'यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः ।
अथ मर्त्योऽमृतो भवत्येतावदनुशासनम्' ॥

इति । हृदयस्य ग्रन्थयो लिङ्गदेहास्तेषां भेदनेऽमृतो भवति । इहेति पदादयमपि जीवन्मुक्तप्रकारो द्वितीयः । मुक्तिप्रकारमाह शतमिति स्पष्टम् ।

रश्मिः ।

'शतं चैका हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति विश्वङ्ङन्या उत्क्रमणे भवन्ति' ॥

इति श्रुतिः । सर्ववल्ल्यार्थोपसंहारार्थमाह ।

'अङ्गुष्ठमात्रः पुरुषोन्तरात्मा सदा जनानां हृदये संनिविष्टः ।
तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण ।
तं विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतम्' ॥ इति ।

मुञ्जादिति श्रीभागवते स्पष्टम् । शुक्रमिति शुच शोके भ्वा. प. से. शोचति ऋज्रेन्द्रेति रन् तमङ्गुष्ठमात्रं जीवसहितं शोचन्तं जीवं संचितकर्मसद्भावात् । अमृतमानन्दरूपमात्मानं विद्याज्जानीयात् पुनर्वचनं कर्ममार्गीयजीवाङ्गुष्ठमात्रयोः ग्रहणाय । भक्तिमार्गे तु 'ततः संसारदुःखस्य निवृत्तिर्ब्रह्मबोधनम्' इति न शोकान्वयः मनुष्यानधिकृत्येदं मृत्यूपाख्यानं प्रवृत्तम् । अतो मनुष्याणां हृदयस्थाङ्गुष्ठमात्रत्वाद्रक्षार्थमङ्गुष्ठमात्र उपसंहार उक्त इति 'शब्दादेव प्रमितः' इत्याधिकरणे उक्तम् । 'हृद्यपेक्षया तु मनुष्याधिकारत्वात्' इतिसूत्रे मुक्तिप्रकारकथनानन्तरमङ्गुष्ठमात्ररूपोक्तिर्जीवस्य मुक्तिदशायां ब्रह्माविर्भावेन विरुद्धधर्माश्रयत्वे फलिष्यतीति वेदान्ताधिकरणमालायामभिप्राय उक्तः । सोपि साकारस्यानन्तमूर्तेरनेकाख्यस्याग्रहणे बाधकाभाव इत्यभिप्रायेण । नचिकेत उपाख्यानावगतसाधनस्य फलमाह ।

मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम् ।
ब्रह्मप्राप्तो विरजोभूद्विमृत्युरन्योप्येवं यो विदध्यात्ममेव ॥

श्रुतेर्वचनान्मम श्रुतेरिव । अन्योर्थः । अन्योप्येवं यः सोध्यात्मविदेवेति । मनुष्याधिकारं ज्ञानकाण्डे निरूपयन्ती श्रुतिर्बिभयांचकार निःश्वसितत्वेन वायुत्वात् । वायुः शब्दतामापद्यत इति । ततश्च भयादिन्द्रश्च वायुश्चेति श्रुतेर्भयमस्याः सा श्रुतिराह स ह नाववतु इति स आत्मा ह प्रसिद्धः नौ वक्तृश्रोतारौ अवतु आमन्त्रणे लोट् अधीष्टे वा, न प्रार्थने 'प्रार्थिते वा ततः किंस्यात् स्वाम्यभिप्रायसंशयात्' इति वाक्यात् । ननु ज्ञानकाण्डीयस्याधिकारात्प्रच्यावनेन भगवान् मारयेदिति चेत्तत्राह सह नौ भुनक्तु इति पालयतु अभ्यवहरतु वा । 'यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः' । सह वीर्यं करवावहे वीर्यं विद्याकृतं सामर्थ्यं तेन सह आवां करवावहे यथा न द्विष्यात् । तथा च तृतीयप्रश्नोत्तरे प्रधानीकृत्य वीर्यं करवावहे आवामिति भावः । तेजस्वि नावधीतमस्तु यथा तेजस्वि नौ आवयोः वक्तृश्रोत्रोरधीतमस्तु मा विद्विषावहै मा निषेधे आत्मानं सर्वप्रशास्तारं आवां मा विद्विषावहै इत्यर्थः । शान्तिः शान्तिः शान्तिरिति । ननु वीर्ये कृतेप्युपक्रमोपसंहारयोर्मनुष्याधिकाराद्विद्याया ज्ञानकाण्डे क्वोपयोग इत्यत आह शान्तिरिति । शम उपशमे दि. प. से. शम आलोचने चु. आ. से. लोचृदर्शने चु. प. से. उपालोचनं विद्याया ज्ञानकाण्डीयमब्रह्मज्ञाने कर्तव्यम् । मार्गत्रये शान्तित्रयम् । अन्यव्याख्याने शान्तिपदे योगरूढ्यापत्तिः । अत्र वेदान्ते योगमात्रादरणादेवं व्याकृतमिति । प्रकृतमनुसर्यते तथावसायादिति लीलात्वेन य एषु सुप्तेष्वित्यादिषु पदार्थेष्वङ्गीकारावसायात् । अतो देवैरत्रापि इत्यत्र उत्तरम् । प्रश्नोत्तरयोः समानविषयत्वस्य को घटः कम्बुग्रीवादिमान् घट इत्यादिषु दर्शनादिति भाष्यार्थः । तथाच व्युत्पत्तिः । संगतिः अन्य उक्ता । यद्धर्मप्रकारकयद्विषयिणी जिज्ञासा तद्धर्मावच्छिन्नतदुद्देश्यकं लक्षणादिनिरूपणमिति नियमस्यास्योदाहरणं को घटः कम्बुग्रीवादिमान् घटः इति । किंच भाष्यं प्रति मदीमि

भाष्यप्रकाशः ।

यत्तु वरदानानुरोधेन ब्रह्मप्रश्नस्य जीवप्रश्नान्तर्गतत्वं शंकराचार्यैरङ्गीकृतं तदसंगतम् । वक्तृप्रसादस्यैवात्र प्रश्नकारणतादर्शनात् । नच त्रीन् वरान् वृणीष्वेति वाक्यबाधापत्तिः । स्वस्ति मेऽस्त्विति वाक्योक्तस्य स्वाविनाशार्थकवरत्रयस्य सौमनस्याग्निजीवप्रश्नाभ्यां च पूर्त्या तदभावात् । नच तृतीयप्रश्नस्य काल्पनिकत्वम् । यदेति श्रुत्यैव तन्निरासात् । नचाधिक्यं दोषः । दोषत्वाभावस्योपपादितत्वात् । अतोऽस्य भिन्नप्रश्नत्वेऽपि कल्पनाया अभावेन, यथा वरव्यतिरेकेण प्रश्नकल्पनायामदोष एवं प्रश्नव्यतिरेकेण प्रधानोपन्यासकल्पनायामप्यदोष इति । साङ्ख्योक्तप्रतिबन्देरपि परिहाराद् व्यर्थ एव प्रष्टव्यभेदमनादृत्य,

रश्मिः ।

इत्यग्निप्रश्नोत्तरमुक्तं तदपि शंकराचार्यैः 'लोकादिमग्निं तमुवाच तस्मै' इति तदग्रिमवाक्यस्योत्तरत्वमुक्तं तन्निरसितुम् । न च 'प्रति ब्रवीमि तदु मे निबोध स्वर्ग्यमग्निं नचिकेतः प्रजानन्' इत्यस्य प्रतिज्ञावचनत्वात् तदेवोत्तरमिति शङ्क्यम् । 'अनन्तलोकाप्तिमथो प्रतिष्ठां विद्धि त्वमेतं निहितं गुहायाम्' इत्युत्तरार्धेनास्यैवोत्तरत्वात् । यदपि 'न जायते म्रियते वा विपश्चित्' इति तृतीयप्रश्नोत्तरमुक्तं तस्यात्राभिप्रायाभावाददर्शनाच्च 'सर्वे वेदा' इत्येवोत्तरम् । वरदानेति न वयमिह वरदानव्यतिरेकेण प्रश्नं कंचित्कल्पयामो वाक्योपक्रमसामर्थ्यात् । वरदानोपक्रमा हि मृत्युनचिकेतःसंवादरूपा वाक्यप्रवृत्तिरासमाप्तेः कठवल्लीनां लक्ष्यते । मृत्युः किल नचिकेतसे पित्रा[1] प्रहिताय त्रीन् वरान् ददौ । नचिकेताः किल तेषां प्रथमेन वरेण पितुः सौमनस्यं वव्रे, द्वितीयेनाग्निविद्यां, तृतीयेनात्मविद्यां 'येयं प्रेते' इति 'वराणामेष वरस्तृतीयः' इति लिङ्गात् । तत्र यदि 'अन्यत्र धर्मात्' इत्यपूर्वोयमन्यः प्रश्न उत्थाप्यते ततो वरव्यतिरेकेणापि प्रश्नकल्पनाद्वाक्यं बाध्येतेति भाष्येण यत्त्वित्यादिः । प्रश्नेति वरप्रदानद्वारा प्रश्नकारणता । स्वस्तीति । मे नचिकेतसे । स्वेति नचिकेतोऽविनाशार्थकवरत्रयस्य । तदभावादिति तथा च वरप्रदानव्यतिरेकेण प्रश्नाङ्गीकारः श्रुतिं विरुणद्धीति श्रुत्यन्तरोक्तवरोङ्गीकृत इति भावः । भाष्योपपादने समाहितमपि काल्पनिकत्वं मतान्तरे प्रश्नद्वयस्यैक्यसाधनप्रयासस्य व्यर्थत्वसाधने पुनराहुः न चेति । एतच्च पूर्वमुपपादितम् । पूर्वं वरत्रयान्तर्गततृतीयवरस्य काल्पनिकत्वमुक्तमत्र तु वरत्रयपृथगित्येतस्य । ननु त्रीन् वरानित्युक्ते चतुर्थोयमाधिक्यं निग्रहस्थानदोषः । यथाह दिनकर्याम् । अधिकस्याधिकहेत्वाद्यभिधानरूपस्य गुणेन्तर्भाव इति वाच्यम् । उपेति न च निर्हेतुकत्वमित्यादिनोपपादितत्वात् । अत इति उक्तोपपादनात् । यथाश्रुतग्रन्थव्याकरणपक्षेऽत्र तृतीयप्रश्ने वरप्रवेशाभावादाहुः वरव्यतिरेकेणेति । अत्रोच्यते नैव वयमिह वरदानव्यतिरेकेण प्रश्नं कंचित् कल्पयाम इति शंकरभाष्यं पूर्वोक्तयुक्त्याक्षिप्तं तेन च तेषामस्य पूर्वपक्षग्रन्थः । यथैव वरप्रदानव्यतिरेकेण प्रश्नकल्पनायामदोष एवं प्रश्नव्यतिरेकेण प्रधानोपन्यासकल्पनायामदोषः स्यादिति तत्रापि वरप्रदानव्यतिरेकेण प्रश्नकल्पना युक्तियुक्ता, प्रश्नव्यतिरेकेण प्रधानोपन्यासकल्पना युक्तियुक्ता न भवतीति दृष्टान्तदार्ष्टान्तिकयोः वैषम्यं सूचितम् । पूर्वपक्षग्रन्थे न प्रतिबन्दिः । अपरीति । अत्रोच्यते । नैव वयमित्यादेः सिद्धान्तग्रन्थस्योक्तरीत्या शैथिल्येन पूर्वपक्षस्योक्तस्यापरिहारात् । प्रष्टव्येति द्वितीयतृतीयप्रश्नयोः जीवब्रह्मणोर्भेदं स च ननु च प्रष्टव्यभेदाद् पूर्वोयं प्रश्नो भवितुमर्हति । पूर्वो हि प्रश्नो जीवविषयः येयं प्रेते मनुष्येऽस्ति नास्तीति विचिकित्साभिधानात्, जीवस्य धर्मादिगोचरत्वात्, स

१. पित्र्याय हिताय ।
१०९ ब्र० सू० ८०

भाष्यप्रकाशः ।

'स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति' ॥

इत्यादिश्रुत्युक्तं जीवब्रह्मणोर्धर्मभेदं चानादृत्य प्रश्नद्वयस्यैक्यसाधनप्रयास इति दिक् ।

रामानुजाचार्यास्तु, उपायोपेयोपेतॄणां त्रयाणां प्रश्नोपन्यासावत्राङ्गीकुर्वन्ति । तथाहि । नचिकेता हि मुमुक्षुर्मृत्युना दत्ते वरत्रये प्रथमवरेणात्मनः पुरुषार्थयोग्यतापादनायात्मनि पितुः सौमनस्यं प्रतिलभ्य द्वितीयेन वरेणाग्निविद्यां वव्रे । सा च मोक्षोपायभूता प्रश्नवाक्ये,

रश्मिः ।

नान्यत्र धर्मादिति प्रश्नमर्हति । प्राज्ञस्तु धर्माद्यतीतत्वात् 'अन्यत्र धर्मात्' इति प्रश्नमर्हति, प्रश्नछाया च न समाना लक्ष्यते । पूर्वस्यास्तित्वनास्तित्वविषयत्वात् । उत्तरस्य धर्माद्यतीतवस्तुविषयत्वात् । तस्मात्प्रत्यभिज्ञाभावात् प्रश्नभेदो न पूर्वस्यैवोत्तरत्रानुकर्षणमिति ग्रन्थोक्तः । अग्रे: इति चेन्न जीवप्राज्ञयोरेकत्वाभ्युपगमात् । भवति प्रष्टव्यभेदात् प्रश्नभेदो यद्यन्यो जीवः प्राज्ञतः स्यादित्यादिना तमनादृत्य

'स्वप्नान्तं जागरितान्तं च उभौ येनानुपश्यति ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति' ॥ इति ।

स्वप्नजागरितदृशोः जीवस्यैव महत्त्वविभुत्वविशेषणस्य मननेन शोकविच्छेदं दर्शयन्न प्राज्ञादन्यो जीव इति दर्शयति प्राज्ञविज्ञानाद्धि शोकविच्छेद इति वेदान्तसिद्धान्तः इति भाष्ये धर्मभेदानादररूपं दोषमुद्घाटयामासुः स्वप्नान्तमिति । स्वप्नान्तं बहुव्रीहिणा जागरितं, षष्ठीतत्पुरुषेण वा । जागरितान्तं स्वप्नः ताभ्यामेव । येन जीवभावेन पश्यति यत्तदोर्नित्यसंबन्धात् । तं महान्तं विभुमात्मानं मत्वेत्यादर्थः । अत्र कर्मकर्तृधर्मभेदानादरः । स च कर्मकर्तृव्यपदेशादिति सूत्रं विरुणद्धि । अतः प्रथमत्यागे मानाभावात्स धीरः महान्तमित्याद्यर्थः । ननु तमिति द्वितीयान्तमादाय धीरस्य पश्चादन्वयो भवति वाक्यभेदप्रसङ्गात् जीवब्रह्मवादापत्तेश्च । प्रश्नद्वयेति जीवब्रह्मप्रश्नद्वयस्य । यद्यत्रान्यत्र धर्मादित्यत्र न त्वयमपूर्वोयमन्यः प्रश्न उत्थाप्यते ततो वरप्रदानव्यतिरेकेणापि प्रश्नकल्पना त्रीन् वरानिति वाक्यं बाध्येतेति भाष्येणानुकर्षणं पूर्वप्रश्नस्यान्यत्र धर्मादित्यत्र न त्वयमपूर्वप्रश्न इत्यैक्यसाधनप्रयासः तदुक्तं तस्माद्येयं प्रेते इत्यस्यैव प्रश्नस्यैतदनुकर्षणमन्यत्र धर्मादिति । दिगिति । तेन 'यदेवेह तदमुत्र यदमुत्र तदेवेह' 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इति श्रुतिर्जीवप्राज्ञयोरभेदं वक्तीति यदुक्तं तदपि विस्फुलिङ्गो नाग्निरिति प्रत्ययाभावादंशांशिभावेनैव । किं च यदुक्तं अविद्याकल्पितजीवप्राज्ञभेदापेक्षया सूत्रं योजयितव्यमिति । तत्राविद्यासंबन्धे आत्मनो जीवत्वापत्तिस्तदसंबन्धे जीवत्वहानिरित्येवं बहूनि दूषणानि विद्वन्मण्डने उक्तान्यवधेयानि । पुरुषेति 'पितृदेवो भव' इति श्रुत्या पुरुषेत्यादिः । अग्निविद्येति अग्निज्ञानम् । प्रश्नेति,

'स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्यम् ।
स्वर्गलोका अमृतत्वं भजन्त एतद् द्वितीयेन वृणे वरेण' ॥

इति वाक्ये स्वर्गशब्देनात्र परमपुरुषार्थलक्षणो मोक्षोभिधीयत इति । एते ज्ञानकर्मसमुच्चयवादिनः । वर्णाश्रमविहितं कर्माविद्या, ज्ञानं ध्रुवानुस्मृतिरूपम्, तयोः समुच्चयः । सत्यार्जवादिगुणयुक्तस्याश्रमाचारधर्मैरेव विद्यानिष्पत्तिरिति विद्या ज्ञानं ध्रुवा स्मृतिरिति यावत् । तदर्थं ज्ञानमुक्त्वा

भाष्यप्रकाशः।

अमृतत्वं भजन्त इत्युत्तरवाक्ये, 'त्रिकर्मकृत् तरति जन्ममृत्यू' इति कथनात्। तृतीयेन वरेण मोक्षप्रश्नद्वारेण उपेयस्वरूपमुपेतृत्वस्वरूपमुपायभूतानुष्ठितकर्मानुगृहीतोपासनस्वरूपं च पृष्टं, 'येयं प्रेते' इत्यनेन। इत्येवं मोक्षे पृष्टे, तस्योपदेशयोग्यतां परीक्ष्य, 'तं दुर्दर्शं गूढम्' इत्यनेनोपदिदेश। तदा नचिकेताः प्रीतः सन्, देवं मत्वेत्युपास्यतया निर्दिष्टस्य प्राप्यस्य देवस्य, अध्यात्मयोगाधिगमेनेति वेदितव्यतया निर्दिष्टस्य प्राप्तुः प्रत्यगात्मनः, मत्वेत्यनेनोक्तस्य ब्रह्मोपासनस्य च स्वरूपावधानाय पुनः पप्रच्छ, अन्यत्र धर्मादन्यत्राधर्मादिति। एवं पृष्टे प्रथमं, सर्वे वेदा इत्यादिना प्रणवं प्रशस्य तद्वाच्यं प्राप्यस्वरूपं, तदन्तर्गतं प्रत्यक्स्वरूपं, वाचकस्वरूपं चोपायं पुनरपि सामान्येन ख्यापयन्

रश्मिः।

आहुरुत्तरेति। 'त्रिणाचिकेतस्त्रिभिरेत्य सिद्धिं त्रिकर्मकृत्तरति जन्ममृत्यू' इति वाक्यम्। त्रिःकृत्वो नाचिकेतोग्निः चितो येन स त्रिणाचिकेतास्तत्संबोधनं, तद्विज्ञानस्तदध्ययनस्तदनुष्ठानवांश्च त्रिभिः पितृमात्राचार्यैस्त्रिकर्मकृत् इज्याध्ययनदानानि। इत्येतद्भाष्ये शंकराचार्याः। तृतीयेनेति,

'येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चैके।
एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः'॥

इत्यत्र वरस्य प्रश्नहेतुत्वात्तृतीया। वरेणेति विशेषेण केतितुं वसितुमिच्छा सन्नर्थाविवक्षायां निवासः शाश्वतविष्णुलोके निवासो मोक्षस्तस्य स्वरूपं तस्य प्रश्नः स द्वारं यस्य वरस्य तेन मोक्षपदं मोक्षस्य रूपे लाक्षणिकं मोक्षस्वरूपप्रश्नद्वारेणेति भाष्यात्। अत्रोपेयं मोक्षस्वरूपं विचिकित्सापदेन, उपेतृस्वरूपं प्रेतमनुष्यपदाभ्यां, उपायभूतानुष्ठितकर्मानुगृहीतोपासनस्वरूपमेतद्विद्यामिति। पृष्टमिति वरस्य प्रश्नहेतुत्वात् तेन वरेण त्रयाणां प्रश्नः कृत इत्यर्थः। तं दुरिति

'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति'॥

इत्यनेन। नचिकेता इति पुनः पप्रच्छेत्येतेनान्वयः। उपास्येति ननूपास्यबोधकं पदं नास्तीति चेन्न आर्थिकार्थत्वात्। तथा च मत्वेत्युक्तं ज्ञानं स्मृत्यात्मकमुपासनम्। केन मत्वेत्युच्यते अधीति। अध्यात्ममात्मविषयकयोगेनाधिगमो ज्ञानं तेन मत्वा। निर्दिष्टस्येत्यत्र भाष्ये निर्दिश्येति पेठुः। निर्दिष्टस्येति देवस्येत्यस्य विशेषणम्। प्रणवमिति ओमित्येतदिति श्रुत्योक्तं प्रणवं प्रशस्य। न च भाष्ये करणानुक्तेरस्य करणस्याग्रेन्वयोक्तेः प्रश्नवाक्येन प्रणवं प्रशस्येति कुतो नोक्तमिति शङ्क्यम्। अन्यत्र धर्मादिति प्रश्नवाक्ये प्रणवानुक्तेस्तस्य कर्मतानुपपत्तेः। वाचकस्वरूपख्यापनमाहुः पूर्वमिति। 'तस्य वाचकः प्रणवः' इति योगसूत्रात्। उपेति 'सर्वे वेदाः' इत्यादिना। ननु कथमेकस्य प्रशंसोपदेशयोः करणत्वमिति चेन्न एकं वाक्यं प्रशंसा या प्रकृष्टवचनरूपा तद्रूपं प्रकृष्टवाञ्छाविशिष्टं वा सदेव मन्त्ररूपोपदेशकर्मरूपमिति 'शंसा वचनवाञ्छयोः' इति विश्वः।

'चन्द्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये।
मन्त्रमात्रप्रकथनमुपदेशः स कथ्यते'॥

इति रामार्चनचन्द्रिकायां रुद्रयामलवचनम्। उत्तरवाक्यं प्रशंसाविशिष्टं आद्यम्। तेन प्रश्नवाक्यस्य प्रशंसावैशिष्ट्येपि न क्षतिः। प्रशंसावैशिष्ट्यं यदि प्रश्नवाक्यस्य विभाव्यते तदोम्।

भाष्यप्रकाशः ।

पूर्वं प्रणवमुपदिदेश प्रशशंस च । ततो, न जायत इत्यादिना प्राप्तुः स्वरूपमुक्त्वा अणोरणीया- नित्यारभ्य, 'क इत्था वेद यत्र सः' इत्यन्तेन प्राप्यस्य विष्णोः स्वरूपं वदन् मध्ये, नायमात्मे- त्यनेन उपायभूतस्योपासनस्य भक्तिरूपतामप्याहेत्यादि चाहुः ।

तेन तन्मते प्रश्नद्वयस्य सामान्यविशेषभावेनैक्यादन्यत्र धर्मादिति प्रश्नोऽपि तृतीयं वरमनुरुन्धे । शैवमतेऽप्येवम् । अत्रोदासीना वयम् ।

भास्कराचार्यास्तु जीवपरयोर्गोपुरुपत्रदत्यन्तभेदो नास्ति । पररूपादर्शनमेव चाविद्या । सा च विद्यया निवर्त्यते । ततश्च स्वरूपं प्रतिपद्यत इति पूर्वसूत्र उक्त्वाऽस्मिन् सूत्रे सौमनस्या- पेक्षया जीवप्रश्नस्य तृतीयत्वमुक्त्वा ब्रह्मप्रश्नस्य ततोऽतिरिक्तत्वं सूचयामासुः । तेन तन्मते जीवप्रश्नस्याऽनतिप्रयोजनत्वम् ।

भाष्यास्तु, आनुमानिकसूत्रे, 'अव्यक्तात् पुरुषः परः' इत्यत्राऽव्यक्तशब्देन, 'योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः' इत्यत्र देहिशब्देन च सांख्यानुमानकल्पितं प्रधानं जीवश्चोच्यते, उत विष्णुरिति संदेहे विष्णुरेवोच्यते । कुतः । शरीररूपकविन्यस्तगृहीतेः । शरीरस्य रूपमिव शरीररूपकम् । कप्रत्ययः कुत्सने । तथाच यथा शरीरं पुरुषतन्त्रं, तथा परमात्म- तन्त्रत्वेन शरीरसमे प्रधानादौ स्थितस्य गृहीतेः । नन्वत्र शरीरं रथमेव त्वित्यत्रोक्तं शरीरम्, आत्मानं रथिनं विद्धीत्यत्रोक्तो जीव एव च गृह्यताम् । परमात्मग्रहणे किं मानमिति शङ्क्यम् । सूत्रकृतः कुत्सार्थकप्रत्ययप्रयोगस्य रूपपदप्रयोगस्य च मानत्वात् । अन्यथा तद्वैयर्थ्यात् । नच सूत्रकृता कथनेऽपि श्रुतेस्तथैवाशय इत्यत्र किं गमकमिति शङ्क्यम् । तुच्छेनाभ्यपिहितं यदासीदिति श्रुतावल्पेन विभोरपिधानं दर्शयति । अव्यक्तमचलं शान्तमिति पिप्पलाद-

रश्मिः ।

प्रशशंसेति एतद्ध्येवाक्षरं ब्रह्मेत्यादिवाक्यद्वयेन प्रशशंस । तदन्तर्गतचिदचिद्विशिष्टेश्वरान्तर्गतं प्रत्यक्स्वरूपमाहुः तत इति । भक्तिरूपतामिति । 'यमेवैष वृणुते तेन लभ्यः' इत्यत्र वरणं ध्रुवानु- स्मृतिरिति भाति । इत्यादीति ऋतं पिबन्ताविति चोपास्यस्योपासकेन सहावस्थानात्सूपास्यतामुक्त्वा 'आत्मानं रथिनं विद्धि' इत्यादिना 'दुर्गापदं तत्कवयो वदन्ति' इत्यन्तेनोपासनस्वरूपप्रकारमुपासीनस्य च वैष्णवपरमपदप्राप्तिमभिधाय अशब्दमस्पर्शमित्यादिनोपसंहृतम् । इत्यादिपदार्थः । तमाहुरित्यर्थः । तृतीयप्रश्नस्य सिद्धान्ते वरानुरोधिसापेक्षतया वरानुरोधप्रतिपादकग्रन्थस्यादुष्टत्वात् । उदासीनाः प्रकाशाय आसीनाः । उत् प्रकाशे । आस्त आसीनः शानच् 'ईदासः' इति सूत्रेणासः परस्यानस्येत् 'आदेः परस्य' आसीनः । वयम् । तत्त्वमस्यादिश्रुतेः जीवप्रश्नस्यात्मप्रश्नत्वेन सामान्यविशेषभावस्य यथाकथंचित्सत्त्वात् । गोपुरुषेति गोपुरुषवद्योत्यन्तभेदः स नास्तीत्यर्थः । पूर्वेति 'वदतीति चेन्न प्राज्ञो हि प्रकरणात्' इति सूत्रे । तेनेति जीवपरयोर्भेदाभेदवादविषयत्वेन । अनतीति अभेदमाने प्रयोजनाभावादनतीति पाक्षिकप्रयोजनत्वम् । जीवश्चोच्यत इति जीवश्च यदुक्तं तदुच्यते इत्यर्थः । शरीरेति शरीररूपं प्रधानादि तत्कुत्सितमव्यक्तमित्याहुः केति । प्रधानादाविति । 'तुच्छे- नाभ्यपिहितं यदासीत्' इति दर्शयति च । अर्थोऽस्ति । स्थितस्येति । सौत्रविन्यस्तपदार्थः विष्णोरित्यर्थः । गृह्यतामिति शरीरविनस्तपदाभ्यां गृह्यताम् । तद्वा इति तयोर्वैयर्थ्यात् । अव्यक्तमिति ।

भाष्यप्रकाशः ।

शाखायामव्यक्तपदवाच्यतां च दर्शयति । अक्षरं ब्रह्म परममित्युक्ते अक्षरे, 'अव्यक्तोऽक्षर इत्युक्तः' इति गीतास्मृतेरित्याहुः । तथाऽग्रेऽपि ।

तत्रापि व्याख्यानस्य क्लिष्टत्वाच्छ्रुत्यर्थस्यान्यथापि संभवाद् गीतायां भगवद्वाक्यव्यक्तपदप्रयोगाच्च वयं तत्रोदासीनाः ।

विज्ञानभिक्षुस्तु, आनुमानिकसूत्रे, अजामेकामिति श्वेताश्वतरश्रुतिमुदाहृत्य श्रुत्यन्तरे ब्रह्मकारणताया अत्र च प्रकृतिकारणताया उक्तत्वात् कपालद्वयं घटस्येव जगतोऽपि द्वयं कारणं भवत्विति शङ्कायां ब्रह्मणो न कारणत्वं, विकारित्वापत्तेः । किंतु प्रकृतेरेवेति पूर्वपक्षदलार्थः । तमिमं पूर्वपक्षं शक्तिशक्तिमद्भावेनोभयोः कारणत्वेन समाधत्ते न शरीरेत्यादि । 'यस्तन्तुनाभ

रश्मिः ।

'अव्यक्तमचलं शान्तं निष्कलं निष्क्रियं परम् ।
यो वेद हरिमात्मानं स भयादनुमुच्यते' ॥

इति वाक्यम् । तथाग्र इति सूत्रद्वये । प्रथमे सूक्ष्ममव्यक्तं मुख्यगृहीतं तद्व्यक्ततामर्हतीति तदर्हत्वम् । द्वितीये सूत्रे । तदधीनत्वाचाव्यक्तत्वादीनां तस्यैवाव्यक्तत्वपरावरत्वादिकमर्थवत् । 'यदधीनो गुणो यस्य तद्गुणी सोभिधीयते' यथा जीवः परमात्मेति । यथा राजा जयीत्यपि स्कान्दे । तृतीये सूत्रे अन्यस्य वाच्यत्वं न युज्यते इति भाष्यं वदतीति सूत्रे विशेषार्थकाभावः । प्रकरणादिति सूत्रस्य सोध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति तस्य ह्येतत्प्रकरणमिति भाष्यम् । क्लिष्टत्वेति रूपपदस्य तत्सद्वये लक्षणा । तदधीनसूत्रे प्रधानादाव्यक्तपदगौणी । अप्रसिद्धाश्च श्रुतयः इति क्लिष्टत्वात् । ननु तथापि श्रुतय एता सर्वबाधिका इति चेत्तत्राहुः श्रुत्यर्थस्येति । तथा हि । 'एष ह्येव तुच्छः' इति महोपनिषच्छ्रुतेः । तुच्छेन ब्रह्मणाभ्यपिहितमभितो पिहितं बहिरपि गतं व्याप्तमिति यावत् । हि गतिवृद्ध्योः स्वा. प. अ. हितं वर्द्धितं वा । न च कथं तुच्छत्वमिति शङ्क्यम् । 'तोदनात्तुच्छमुच्यते' इति महाकौर्म्यात् तुदतीति तुच्छः प्रत्ययस्तु भावे घञ्, पाक इतिवत् । तोदनात्तुच्छमिति वाक्ये भावोक्तेः । वृद्ध्यभावश्छन्दसि सर्वविधिविकल्पात् दकारस्य चकारो विकारः हल्विकारः । तुदः वर्णविकार इति 'सर्वेषां तदधीनत्वात् तत्तच्छब्दाभिधेयता' इति तत्रत्यवाक्यात् । मुख्यतयाव्यक्तपदप्रयोगाचेत्येवमन्यथासंभवादव्यक्तात्पुरुषः पर इतीतरमुख्यवचनात्तद्धाम परमं ममेति वचनाच्चाव्यक्तादित्यस्याक्षरादित्यर्थात् देहिनि इत्यस्यान्यविशेषणत्वाच्च । न देह्यव्यक्तशब्दौ परमात्मवचनावित्युदासीनाः प्रकाशायासीनाः इत्यर्थः । गीतायामिति ।

'अव्यक्तोक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम' ॥

इति गीतायाः महापुरुषयोगाध्याये । तथैवेति उदासीनपदेनान्वयः । सौमनस्येति सुमना यथा स्यादिति लिङ्लकारबोधितायाः । तथा च भाष्यम् । त्रयाणामेव पितृसौमनस्यस्वर्ग्याग्निपरमात्मनां प्रश्न उपन्यासश्च 'अविज्ञातप्रार्थनं च प्रश्न इत्यभिधीयते' इति वचनान्न विरोध इति । 'येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके' इत्यत्रास्तीत्यत्र लेडनाश्रयणात् । जीवप्रश्नस्याविरोधः । श्रुत्यन्तर इति 'यतो वा इमानि' इति श्रुत्यन्तरे । प्रकृतीति यह्वीं प्रजां जनयन्तीमिति श्रुत्या ।

भाष्यप्रकाशः।

इव तन्तुभिः प्रधानजैः स्वभावतो देव एकः समावृणोति स नो दधातु ब्रह्माऽव्ययम्' इत्यादिषु वाक्यशेषेषु शरीरेण रूपकेण दृष्टान्तेन विन्यस्तमुपन्यस्तं यन्मायाख्यं प्रधानं तस्यैवाजावाक्ये ग्रहणं, न तु स्वातन्त्र्येण परेच्छाननुविधायित्वरूपेण। अतो न तस्याः स्वातन्त्र्येण कारणत्वमिति व्याख्याय, त्रयाणामेवेति सूत्रे त्रयाणामपीति पाठमङ्गीकृत्य प्राज्ञस्य प्रकरणित्वसमर्थनार्थं तदित्याशयेन तत्सूत्रमेवं व्याचख्यौ। भोक्ता भोग्यं प्रेरितारं च मत्वेति श्रुत्युक्तानां त्रयाणां पुरुषप्रकृतिदेवतावर्गाणामपि वाक्योपक्रमे उपन्यासः, प्रतिवचनं, तत्प्रश्नश्च प्रसज्येयाताम्। न ह्येवं दृश्यते। किं कारणं ब्रह्म कुतः स्म जाता इत्यादिना केवलब्रह्मण एव प्रश्नदर्शनात्। 'यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः' इत्यादिना केवलब्रह्मण एवोपन्यासदर्शनाच्चेति।

तदसंगतम्। अपिशब्दघटितपाठस्य क्वाप्यदर्शनात्। सांख्येऽपि देवतावर्गस्याधिदैवतत्वेन भोग्यकोटिपतिततया पृथग् ज्ञेयत्वाऽनङ्गीकारेण त्रयाणां प्रश्नाद्यापत्तेरपि दातुमशक्यत्वात्। किं कारणमिति श्रुतावपि विचारस्यैव दर्शनेन तत्र प्रश्नत्वायोगात्, 'ते ध्यानयोगानुगता अपश्यन्' इत्यग्रेऽपि दर्शनकथनेन प्रतिवचनादर्शनाच्च। एवं पूर्वोत्तरग्रन्थेऽप्यवगन्तव्यमिति दिक्॥ ६॥

रश्मिः।

प्रधानजैरिति सत्त्वरजस्तमोभिः। देवः कालः। एवं कालकर्मस्वभावा उक्ताः। कर्म प्रधानमज्ञानं मायेति यावत्। समावृणोतीति सम्यक् भजति विभागं करोति, वृङ् संभक्तौ क्र्या. आ. से. विकरणोपग्रहयोर्व्यत्ययः। वृञ् वरणे स्वा. उ.. से. वा अर्थः। स एव वृञ् वरणे इत्यत्र वृङ् संभक्तावित्यस्य ल्युडन्तस्य रूपमिति। नोऽस्मान् धारयत्विति दधात्वित्यस्यार्थः। वाक्येति संदिग्धेषु वाक्यशेषात्। आदिपदार्थः स्पष्टः। शरीरेणेति तन्तुनाभशरीरेण। तदिति सूत्रम्। इत्यादीत्यादिना। तमेकनेमिमित्यादिः तन्मतसमाप्ताविति पदम्। भोग्येति प्रकृतिकोटिपतिततया। पृथक्ज्ञेयत्वेति। यथाहुः अपवादमात्रमबुद्धानामिति कापिलसांख्यप्रवचनसूत्रवृत्तौ। देवतावर्गः प्रधानकार्याध्याये निरूपितः इति प्रधानात्पृथक् ज्ञेयत्वानङ्गीकारः। विचारस्येति मननस्य। प्रश्नस्येति। ननु किं कुतः इति प्रश्नस्य वाचके पदे स्तः इति चेत्तत्राहुः ते ध्यानेति। 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्' इति श्रुतिः। अत्रात्मशक्तिस्तत्त्वशक्तिः स्वस्वकार्यनिर्माणसामर्थ्यम्। तद्दर्शनकथनेन ब्रह्मत्वावधित्वकरणत्वाधिकरणत्वानामदर्शनेन यद्धर्मप्रकारकयद्विषयकप्रश्नः तद्धर्मावच्छिन्नतदुद्देश्यकं लक्षणादिनिरूपणमिति व्युत्पत्तेः। को घटः कम्बुग्रीवादिमान् घटः इत्यादिषु दृष्टायाः प्रकृतेः अभावादप्रश्नत्वादतः किमिति प्रश्नः। कुत इत्यवधिकरणाद्यन्तर्गत एकापेक्षया बहूनामनुग्रहो न्याय्य इति प्रश्नं न्यक्कृत्य 'कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम्' इति श्रुत्युक्तमननं विचाररूपमङ्गीकृतमिति बोध्यम्। किं च वेदान्तत्वेन किं कारणं ब्रह्मेत्यत्र किंपदस्य योग आवश्यकः। स च कै शब्दे भ्वा. प. अ. कायतेर्डिमिः शब्दरूपं शब्दकर्तृ वा ब्रह्म कारणमित्यर्थात्, कुतः पञ्चम्यर्थोऽज्ञाताः, केन शब्दकर्त्रा, क शब्दकर्तरि, इत्यर्थाच्च न प्रश्नार्थत्वम्। अतः पुरुष इति चिन्त्यमित्युक्तचिन्तनं मननात्मकमुच्यते न प्रश्नः तदुक्तं विचारस्यैवेत्यनेन। पूर्वोत्तरेति 'ज्ञेयत्वावचनाच्च' इति सूत्रस्य पूर्वोत्तरग्रन्थे यद्वा पूर्वस्यानुमानिकसूत्रस्योत्तरग्रन्थे 'सूक्ष्मं तु तदर्हत्वात्' इत्यादिग्रन्थे॥ ६॥

१. प्रश्नस्येति रश्मिपाठः।

महद्वच्च ॥ ७ ॥

ननु तथापि मतान्तरेऽन्यत्र संकेतिताः कथं ब्रह्मवादे ब्रह्मपरतया योज्यन्त इत्याशङ्क्य परिहरति महद्वत् । यथा महच्छब्दः । 'महान्तं विभुमात्मानम्' 'वेदाहमेतं पुरुषं महान्तम्' इत्यादौ महच्छब्दो ब्रह्मपरो योगेन । एवमव्यक्तशब्दोऽप्यक्षरवाचक इति । न हि सांख्यमत इव वेदान्तेऽपि महच्छब्दः प्रथमकार्ये वक्तुं शक्यते । तस्मादिन्द्रियादिवाक्ये सांख्यपरिकल्पितानां पदार्थानां नामापि नास्तीति सिद्धम् । चकारोऽधिकरणसंपूर्णत्वद्योतकः ॥ ७ ॥

इति श्रीप्रथमाध्याये चतुर्थपादे प्रथमं सप्तसूत्रात्मकमानुमानिकाधिकरणम् ॥१॥

भाष्यप्रकाशः ।

महद्वच्च ॥७॥ अत्र भाष्यं निगदव्याख्यातमित्युपरम्यते । मायादिवादानां निराकृतिरपि शरीररूपकविन्यस्तगृहीतेरेव बोध्या ॥ ७ ॥ इति प्रथममानुमानिकाधिकरणम् ॥ १ ॥

रश्मिः ।

महद्वच्च ॥ ७ ॥ निगदेति यथा महच्छब्दो महत्तत्वे प्रसिद्धोपि परममहत्वात्परमात्मन एव मुख्य एवमितरेपि इत्याहुः । भाष्ये । यथा महदिति । अधीति अत्राधिकरणसंपूर्णत्ववाचकं किमिति चेन्नाधिकरणस्य संपूर्णत्वे कर्तुः स्वमतनिराकरणपूर्वकस्वमतस्थापनरूपार्थपूर्तिः कारणम् । संपूर्णत्वं समाप्तिः । सा च चरमवर्णध्वंसरूपा । तद्ध्वंसश्च चरमवर्णस्य कारणमात्मा 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इति श्रुतेः । तथा च चरमवर्णस्य महद्वदित्यत्र तकारस्य ध्वंसस्तत्कारणभूतात्मरूपः । न तु अभावरूपः ध्वंसप्रागभावौ कारणावस्थातो नातिरिच्येते इति प्रस्थानरत्नाकर उपपादितत्वात् । ततश्च चरमवर्णध्वंस आत्मा तद्वाचकमात्मपदमध्याहार्यं पदजन्यपदार्थोपस्थितेः शाब्दबोधे कारणत्वात् । अर्थाध्याहारेप्येवम् । तथा चात्मपदं वाचकं, अभावपदं वाचकमित्यन्ये ध्वंसस्याभावत्वात् चकारध्वंसो वा चरमवर्णध्वंसः उभयथात्मपदमधिकरणसंपूर्णत्ववाचकं चकारस्तु अधिकरणसंपूर्णत्वद्योतकः । न च वाचकोस्त्विति शङ्क्यम् । वृक्षाश्चेत्यत्र केवलवृक्षशब्दात् समुच्चयाबोधाच्चकारश्रवणे तद्बोधाच्चकार एव तद्वाचको न द्योतकस्तद्वत् प्रकृते अभावात् । एवं निगदव्याख्यातम् । नन्वव्यक्तशब्दस्य योगो मायादौ पूर्वसूत्रे उक्तस्तस्य का गतिरिति चेत्तत्राहुः मायादीति । मायाप्रकृत्यविद्याविष्णुशिवादिपदार्थः तथा च विश्वः ।

'अव्यक्तः शंकरे विष्णावव्यक्तो महदादिके ।
आत्मन्यपि स्यादव्यक्तमस्फुटेप्यभिधेयवत्' ॥

इति । एते वादाः शंकराचार्यादीनां पूर्वमुक्तास्तेषां निराकृतिः शरीररूपकविन्यस्ता रथादयस्तेषां गृहीतेः । महदादिकेऽव्यक्तपदे प्रयोक्तव्ये कृपायामव्यक्तपदमात्मनि प्रयोक्तव्येऽक्षरे । 'अव्यक्तोक्षर इत्युक्तः' इति प्रमाणात् ।

'महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।
पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः' ॥

इति विषयः । अत्र महदव्यक्तपुरुषशब्दानां सांख्यशास्त्रप्रसिद्धानां श्रवणात् सांख्यमपि श्रौतं भवति न वेति संशये, भवतीति पूर्वपक्षः सांख्यमतं श्रौतं न भवतीति सिद्धान्तः । संगतिः पूर्वमुक्ता ॥ ७ ॥

इति प्रथमाधिकरणम् ॥ १ ॥

चमसवदविशेषात् ॥ ८ ॥ (१।४।२)

पुनः श्रुत्यन्तरेण प्रत्यवस्थितं निराकर्तुमधिकरणान्तरमारभते। ननु प्रकरणवशात् पूर्वमस्मदुक्तोऽर्थोऽन्यथा वर्णितः। यत्र प्रकरणापेक्षैव नास्ति मन्त्रे तदस्माकं मूलम्।

'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः' ॥

इति। यद्यपीदं श्वेताश्वतरोपनिषदि चतुर्थाध्याये विद्यमानत्वात् पूर्वापर-

---

भाष्यप्रकाशः।

चमसवदविशेषात् ॥ ८ ॥ अधिकरणप्रयोजनमाहुः श्रुत्यन्तरेणेत्यादि। अत्रापि साध्यमानुमानिके श्रौतत्वाभावरूपमेव। अजामन्त्रस्थोऽजाशब्दस्तु पूर्वपक्षोत्थाने द्वारमतः संशयं तद्वीजं चानुल्लिख्य पूर्वपक्षं विषयवाक्यं चाहुः नन्वित्यादि। नन्वस्य मन्त्रस्य श्वेताश्वतरोपनिषच्चतुर्थाध्याये, 'य एको वर्णो बहुधा शक्तियोगाद् वर्णाननेकान्निहितार्थो दधाति' इत्यादिमन्त्रैर्ब्रह्म प्रकृत्यैव पठितत्वाद् उपनिषदारम्भेऽपि, किं कारणं ब्रह्मेति ब्रह्मण एव प्रकृतत्वात् कथमस्य कारणानपेक्षत्वमित्याकाङ्क्षायां तदनपेक्षतामुपपादयति यद्यपीत्यादि। तथाच यथा प्रणवादिमन्त्राणामर्थान्तरवाचकानां प्रकृतोपयोगः 'इमं मे वरुण' इत्यादीनां च

रश्मिः।

चमसवदविशेषात् ॥ ८ ॥ अत्रापीति अपिः समुच्चये। आनुमानिकं श्रौतत्वाभाववच्छ्रुतौ शरीररूपकविन्यस्तगृहीतेस्तदग्रहणात् घटवत्। यत्र यत्रान्यगृहीतेस्तदग्रहणं तत्र तत्र तदप्रतिपाद्यत्वमिति व्याप्तिः। प्रतियोगिता हेतुतावच्छेदकसंबन्धः, विशेषणविशेष्यता च साध्यतावच्छेदकसंबन्धः इति समुच्चयः। अत्रेति सूत्रे। आनुमानिकं श्रौतत्वाभाववत् चमसवदविशेषात् इति। अत इति। उपस्थितत्वात्। पूर्वपक्षस्यान्याभिमतत्वेन सिद्धान्तस्पर्शित्वात् संशयोन्नायकत्वं तत एव तद्बीजोन्नायकत्वम्। अतो विषयवाक्यं पूर्वमनुक्त्वा पूर्वपक्षो विषयवाक्यात्पूर्वमुपात्तः। भाष्ये। प्रत्यवस्थितमिति सांख्यवादिनम्। प्रकरणेति 'वदतीति चेन्न प्राज्ञो हि प्रकरणात्' इति सूत्रे। अजामिति न जायते इत्यजा तां मूलप्रकृतिरविकृतिरित्यभ्युपगमात्। ननु रूढिरत्र छागस्य स्त्रियां प्रजापदस्य रूढियोगमपहरतीति चेन्न विद्याप्रकरणात्। लोहितं रजो रञ्जनात्मकत्वात्, शुक्लं सत्त्वं प्रकाशात्मकत्वात्, कृष्णं तमः आवरणात्मकत्वात्, तेषां साम्यावस्थाऽवयवधर्मैर्व्यपदिश्यते। लोहितशुक्लकृष्णेति सरूपास्त्रिगुण्याः, अजोऽसङ्गः पुरुषः, जुषमाणः सेवमानः। अनुशेते तामेव। प्रकृतिमध्यासेनात्मत्वेनोपगम्य सुखी दुःखी मूढोहमित्यविवेकतया संसरति। अन्यः पुनरजः पुरुष उत्पन्नविवेकज्ञानो विरक्तो जहात्येनां प्रकृतिं भुक्तभोगां कृतभोगापवर्गां परित्यजति मुच्यत इत्यर्थः। प्रकृत्ये। एको वर्ण इति प्रणवः। वर्णान् अकारेकारमाकारादीन् घटः पटः कुड्यं कुसुलं महाविष्णुः गोरोचनकमित्येवमनेकान् वर्णान्। बहुधा शक्तिलक्षणा लक्षितलक्षणा योगो रूढियोगरूढिरिति नामभिः बहुधा शक्तियोगान्निहिता अर्था शब्देषु येन। ब्रह्मेति एको वर्णः प्रणव इति ब्रह्म प्रकृत्य। तदनपेति प्रकरणानपेक्षताम्। यद्यपीत्यादीति। भाष्ये। पूर्वापरसंबद्धमिति ब्रह्मज्ञानम्। ब्रह्मविद्येति यावत्। प्रणवेति पूर्वकाण्डे हरिः ॐ इत्यस्य पूर्वापरसंबद्धस्यार्थस्याग्रे हरिः ओमित्युच्चवोक्ते ग्रन्थे न नियमः तदीयोपक्रमाद्यधीनत्वात्। तथा च

रश्मिः ।

प्रणवः तदादिश्च प्रणवादी प्रणवाद्योर्मन्त्राणां नायं नियम इत्यर्थः । यद्वा हरिः ॐ इति प्रणवमन्त्रो विशेषणविशिष्टः आदिशब्देन 'चत्वारि शृङ्गा त्रयो अस्य पादा' इति मन्त्रः । अत्र महाभाष्ये व्याकरण-परता पूर्वापरसंबद्धोर्थः न च नायमर्थः । *'यावानर्थः' इति गीतायाः । सांख्यमतमसङ्गपुरुषः । अन्य-*न्मतम् । सिद्धान्ते ब्रह्मविद्या तद्वाचकस्य अन्यन्मतं मतान्तरमिति प्रकृते सांख्य उपयोगः । प्रकृते तदेवाहुः तथा चेति । अर्थान्तरं ब्रह्मविद्या । प्रणवादिमन्त्राणामिति बहुवचनघटितत्वाद्भाष्यस्य मन्त्रानाहुः 'इमं म' इति संहिताद्वितीयाष्टके प्रथमेध्यायेऽन्तिमो मन्त्रः इत्यादीनामित्यादिपदेन विश्वचर्षणे 'मित्रस्य चर्षणी धृतः श्रवः' इति मन्त्रः संहितातृतीयाष्टकचतुर्थेध्यायेन्तेस्ति । तथा 'आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च, हिरण्ययेन सविता रथेनादेवो याति भुवनानि पश्यन्' इति मन्त्रसंहितायां तत्रैव तृतीयाष्टकचतुर्थेध्यायेस्ति सूर्यादीत्यादिना वरुणः । तथा हि संध्यायां इमं मे वरुण इत्यादीनामित्यत्र संहितापाठक्रमः । सूर्यादीनामित्यत्रार्थक्रमः । सूर्योपस्थानमन्तरा सायंकालाभावेन वरुणानुपस्थितेः । अतः सूर्याद्युपस्थान इत्युक्तम् । अतः प्रथमं सूर्योपस्थानमन्त्रौ व्याख्यायेते । विश्वेषां सर्वेषां चर्षणे प्रजनने ऐष्ये च मित्रस्य पयश्चर्षण्यो हि परिभ्रमणशक्तयः तासां धृतः धारकस्य मित्रस्य इनस्य मेद्यति ध्यायति ञिमिदा स्नेहने दि. प. से. अमिचिमिदिशसिभ्यः इति क्त्रन् । श्रूयते इति श्रवो यशः तेन देवः दीव्यति हलश्चेति घः देवः यशसा देवस्य सानसिं भजनीयं सम्यक् । षण् संभक्तौ भ्वा. प. से. सानसिवर्ण-सीत्यादिना निपातितोऽसिजन्तः । सत्यमिति यथार्थम् । चित्रमाश्चर्यकरं श्रवः श्रवणं यस्य अतिशयेन तथाभूतं चित्रश्रवस्तमम् । मित्रो जनान्यातयतीति अन्तस्तद्धर्माधिकरणोक्तरूपस्य पूर्वोक्तस्य मित्रस्तं मेद्यति स्निह्यतीति मित्रः, क्त्रन्, सूर्यः । जनान् लोकान् यातयति जना यतन्ते 'भवाय नाशाय च कर्म कर्तुम्' इति पञ्चमस्कन्धात्प्रेरयतीति यातयति यती प्रयत्ने भ्वा. प. से. हेतुमण्ण्यन्ताल्लट्, कीदृशो मित्र इत्याह प्रजानन् तत्तज्जीवकृतधर्माधर्मज्ञानं प्रमिमाणः पुनः पुनर्मित्रपदं स्नेहमुख्यतया भक्तिप्रतिपादनाय । मित्रो भगवान् 'ध्येयः सदा सवितृमण्डलमध्यवर्ती' अत्रापि मित्रपदस्य योगरूढिः सर्वपदवाच्यत्वात् मित्रः सूर्यो वा पृथिवीमुत 'उतः प्रश्ने वितर्के स्यात्' इति विश्वात् । दाधारेति प्रश्नो वितर्को वा 'सूर्य आत्मा जगतस्तस्थुषश्च' इति श्रुतेः जङ्गमस्य स्थावरस्य च मित्रः वृष्टिद्वारा अन्नं गाश्च जनयन् दाधार धारयति । प्रश्नपक्ष उत्तरमाह मित्रः कृष्टीरनिमिषामिचष्टे अभितोवतीर्यापि चष्टे वक्ति श्रीभागवत-द्वारापि सत्याय हव्यं घृतवद्विधेम इति । सत्याय यथार्थाय हव्यं दानादनयोः अदनयोग्यं घृतयुक्तं विधेम । विध विधाने तु. प. से. तस्य विधानं कुर्याम इति दानमपीन्द्रियाणां संभवति । इन्द्रियाणि जुहोतीति श्रुतेः । यथाग्नये घृतदानं तद्वदिन्द्रियदानं निरोधलक्षणग्रन्थोक्तदिशा विधेम प्रयच्छेम । इत्यन्यः 'प्रसमित्र मर्तो अस्तु प्रयस्वान् यस्त आदित्य शिक्षति व्रतेन' इति हे मित्र कृष्णस्य मुख्या-धिकारिन् स्नेहकर्त आदित्य स मित्रो भगवान् 'ध्येयः सदा सवितृमण्डलमध्यवर्ती' मर्तो यलोपः । मर्तो मनुष्यः वसुदेवद्वारा प्रास्तु स्वयं भगवान् भवतु स क इत्याह । बहुषु साकाररूपेष्वित्याह यो व्रतेन स्वानंशान् प्रशिक्षति यस्ते तुभ्यं शिक्षति व्रतेनेति 'न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्ततो न दूरात्' । यत् त्वोतः त्वयाधिकारिणा सूर्येणोतः शिक्षितः उङ् शब्दे भ्वा. आ. अ. 'कृष्णद्युमणिनिम्लोचे गीर्णेष्वजगरेण ह' इति वाक्यात् । न हन्यते न जीयते नाभिभूयते केनापि न एनं त्वया शब्दितं अंहोतीतं समीपात् अश्नोति व्याप्नोति । अशूङ् व्याप्तौ उपग्रहव्यत्ययः स्वा. आ. वे. न दूरादपि यत् अहः निषिद्धदेवपूजादिकर्तृ इति योगः । निषिद्धदेवपूजाकर्ता पुरुषोपि

रश्मिः।

भवत्यतः समुदायशक्तिरंहसीति रूढिः योगरूढं पदं यचिह्निते विशो यथेतीमं मे वरुण इति मन्त्राग्रे व्याख्येयम्। अत्राप्यासाम वरुणप्रियासः इत्युपसंहाराद्रुपक्रमस्स तु विचारात्तस्य यज्ञ ऋध्यते यस्य हविरतिरिच्यते इत्यस्य यज्ञवृद्ध्यर्थत्वात्॥ प्रकरणं यज्ञवृद्धेर्वरुणप्रीतेश्च तदुभयनिरपेक्षेण सूर्योपस्थाने मित्रस्येति मन्त्रः। न च वरुणोपस्थानायास्त्विति शङ्क्यम्। ततः सूर्योपस्थानं तत्र मन्त्राः मित्रस्ये-त्यादयः इति संध्याव्याख्यानात्। तत इत्यस्य गायत्रीजपानन्तरमित्यर्थः। आसत्येनेति मन्त्रो व्याख्यायते। सत्येन सह वर्तमानः सत्येन व्यावहारिकेणेत्यन्ये रजसान्तरिक्षलोकेन लोका रजांस्युच्यन्ते इति यास्कोक्तेः। सविता सूर्योक्षरो वा अमृतमानन्दं देवं वा मर्त्यं मनुष्यं कृष्णं वा आसमन्तात् नितरां वेशयन् मित्रत्वादधिकारित्वादक्षरस्य लोकत्वात् स्वस्थाने मनुष्यान् स्वक्रीडायां कृष्णं महाराजत्वाद्वेशयन् इति भक्तिमार्गमर्यादाऽन्यत्र तु कर्ता कारयिता हरिरिति हिरण्ययेन निरोधस्कन्धोक्तेन रथेन देवः क्रीडयिता कृष्णः हिरण्ययेनेत्यत्र ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि च्छन्दसीति सूत्रेण मयटो मकारलोपः। यस्येति लोपे प्रत्ययस्वरः वर्णलोपः मयटो मकारस्य हलो लोपः। याति प्रापयति निरोधं दशरसः। आसमन्तात् भुवना जसोर्डा भुवनानि विशेषेण पश्यन्। अत्रापि प्रकरणं पूर्वोक्तम्। उद्वयमित्यादिमन्त्रव्याख्या उत् वयं यद्वा उ आश्चर्ये द्वयं कृष्णरामरूपं वेदार्थो रामकृष्णयोरिति कृष्णोपनिषदः। एकं द्वयमित्याश्चर्यम्। तमसः परि परितो वर्तमानं अजुष्टं द्वयं तमः सेवमानं तमसः पार इत्यन्ये। ज्योतिरुत्तरं पश्यन्तः वयं श्रुतयः। उत्तरं वितर्कतरं यथा भवति तथा वेदाः पश्यन्तो वा। उद्वयं तमसस्परि पश्यतो ज्योतिरुत्तरमिति व्याकृतम्। देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्। देवत्रा देवेषु 'देवमनुष्यपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्' इति सप्तम्यर्थे त्राप्रत्ययः। देवेषु देवं इह वृन्दावनादौ क्रीडन्तं सूर्ये अन्तर्वर्तमानं सूर्यं द्युमणिं कृष्णं सूर्यं वा उत्तमं ज्योतिस्तदेवागन्म 'छन्दसि लुङ्लङ्लिटः' इति प्रार्थनायां लिट्, बहुलं छन्दसीति शपो लुक् म्वोश्चेति मकारस्य धातोर्नकारः पादादित्वान्निघातोर्नेति सन्ध्याटीका। संहिताचतुर्थाष्टक-प्रथमाध्यायस्थेयं श्रुतिः। अत्र छन्दसि लुङ्लङ्लिट इति सर्वकाले लङ् इति पाठः। तथाहि धात्वर्थानां संबन्धे सर्वकालेषु एते वा स्युरिति वृत्त्यन्तरं देवो देवेभिरागमदिति लुङः लोडर्थे। इदं तेभ्यो करं नमः अग्निमद्य होतारमवृणीतायं यजमान इति इमे उदाहरणे लङः। अद्याममार इति लडर्थे लिटः। अद्य म्रियत इत्यर्थः। तथा चागन्मेत्यत्र लङुपलब्ध्या लिटोनुपलब्धेः तथा चागन्मेति श्रुत्याज्ञाविधौ लङुत्तमपुरुषबहुवचनं सर्वकालेषु न तु भूतानद्यतनकाल एव। प्रकरणमत्र सुखानं प्रथमं मन इत्युपक्रमेण शं नो भवतु वाजे वाजे इत्युपसंहारेणोन्नेयम्। 'उदुत्यं जातवेदसं देवं वहन्ति केतवः' दृशे विश्वाय सूर्यम्। 'चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्रा द्यावापृथिवी अन्तरिक्षꣳसूर्य आत्मा जगतस्तस्थुषश्च' इति मन्त्रः। प्रथमाष्टकचतुर्थाध्यायस्थः। उदित्यमिति टीकायां पाठः। उत् उ, इ वा, त्यं प्रसिद्धं जातं वेदो धनं यस्मात् जातवेदाः अग्निस्तं देवं केतवोऽश्वा वहन्ति वहन्ति वहन्ति प्रापयन्ति वा। जातवेदा इत्यत्र 'गतिकारकयोः पूर्वपदप्रकृति-स्वरत्वं च' इति उणादिसूत्रेणाऽसिः पूर्वपदप्रकृतिस्वरश्च। केतव इति 'केतुर्केतौ पताकायां ग्रहोत्पा-तारिलक्ष्मसु' इति विश्वः। अश्वाः केतव इति निरुक्तम्। योगरूढं पदं विश्वाय भुवनाय सामर्थ्यो-दये तस्य दृशे द्रष्टुं सूर्यम्, सूर्यजातवेदसोरभेदः। 'षष्ठ्यर्थे चतुर्थीति वाच्यम्' इति वार्तिकेन षष्ठ्यर्थे चतुर्थी या खर्वेण पिबति तस्मै खर्व इत्यत्र यथा। विश्वायेत्यत्र न ङे स्मै। विश्वस्येश्वरसामर्थ्य-

रश्मिः ।

नामत्वात् ॐमित्येकाक्षरं ब्रह्म सर्वं तस्योपव्याख्यानमिति उपपदवाच्यसामर्थ्यस्य व्याख्यानम् । उप 'सामर्थ्ये' इति विश्वात् । यद्वा सर्वमिति पदादिसर्वमित्यर्थात् । न उप इत्यस्य सामर्थ्यमात्रवाचकत्वद्योतकत्वेऽपि तु सामर्थ्यादेर्वाचकत्वद्योतकत्वे तथा च विश्वः ।

'उप सामर्थ्यदाक्षिण्यदोषाख्यानात्ययेषु च ।
आश्चर्यकरणे दाने व्याप्तावारम्भपूजयोः' ॥ इति ।
'नाभिः प्राण्यङ्गके क्षेत्रे चक्रान्ते चक्रवर्तिनि ।
नाभिः प्रधाने कस्तूरीमदेपि क्वचिदीरितः' ॥

इति च । दृशे इति 'दृशे विख्ये' इति तुमुनर्थे निपातितः । चित्रमिति देवानामिन्द्रादीनां कृष्णोपनिषदुक्तानां तं होचुः सुराः सर्वे इत्येषां देवानां वाऽनीकं सकलदेवसमूहात्मकं वा चित्रमाश्चर्यकरं उदगात् चक्षुर्मित्रस्य वरुणस्याग्नेः द्यावापृथिवी अन्तरिक्षं आप्राः तेजसा क्रीडया चापूरयत् । प्रा पूरणे लङ् पुरुषव्यत्ययः त्वमाप्रा इति श्रुतिवचनं वा । अदादिरयमनिट् परस्मैपदी च । जगतो जङ्गमस्य तस्थुषः स्थावरस्यात्मा व्यापकः । अत्राप्याददे ग्रावास्त्वध्वरकृदित्युपक्रमः त्वमग्ने विचर्षणे इत्युपसंहारः । प्रकरणमुन्नेयम् । 'तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतम् । जीवेम शरदः शतम् । नन्दाम शरदः शतम् । मोदाम शरदः शतम् । भवाम शरदः शतम् । शृणवाम शरदः शतम् । प्रब्रवाम शरदः शतमजीता स्याम शरदः शतम् । ज्योक् च सूर्यं दृशे' 'य उदगान्महतोर्णवात् विभ्राजमानः सरिरस्य मध्यात् स मा वृषभो लोहिताक्षः सूर्यो विपश्चिन्मनसा पुनातु' इति आरणश्रुतिनिरूपणम् । चक्षुः प्रकाशकम् । देवेभ्यो हितं निर्मलं पुरस्ताच्छुक्रं शोककर्तारम् ।

'उत्प्रकाशे वियोगे च प्राबल्यस्वास्थ्यशक्तिषु ।
प्राधान्ये बन्धने भावे मोक्षे लाभोर्ध्वकर्मणि' ॥

इति विश्वः । प्रकाशाय चरत् गच्छत् अडभावश्छान्दसः अभक्षयद्वा । अतश्चक्षुरादिभक्षकभक्षकत्वात् पश्येम इत्यादि स्पष्टम् । ज्योक् चेति ज्योक् बहुकालं तत् ब्रह्म वर्णलोपः सूर्यं सूर्यान्तस्थं दृशे द्रष्टुम् । मा माम् । 'शन्नो वातः पवतं मातरिश्वा शन्नस्तपतु सूर्यः' इत्युपक्रमकः ब्रह्म प्रावादिष्म तन्नो मा हासीदित्युपसंहाराद्ब्रह्मप्रकरणम् । सायं वरुणोपस्थानं 'इमं मे वरुण श्रुधी हवमद्या च मृडय त्वामवस्युराचके 'तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः अहेडमानो वरुणेह बोध्युरुशꣳसमान आयुः प्रमोषीः' इति । इमं मे मम हे वरुण हवं आह्वानं श्रुधि शृणु, अद्य मां मृडय सुखय त्वामवः रक्षणं आत्मन इच्छतीत्यवस्युः आचके आह्वये, कै शब्दे छन्दसि लिडिति लिङ्व्यत्ययेनात्मनेपदम् । तत्त्वेति । तत् सूर्यान्तस्थः त्वा त्वां वरुणं यामि याति कीदृश इत्याह ब्रह्मणा वेदेन वन्दमानः स्तूयमानः यकारलोपः, तत् त्वमाशास्ते आशास्से यजमानो देवपूजादिकर्ताशास्से हविर्भिस्तत् । हे वरुण अहेडमानः अनादरमकुर्वन् इह मत्कर्तृकां स्तुतिं बोधि बुद्ध्यस्व अबोधि वा । स्तुतिर्मत्कर्तृका त्वया । कीदृग्वरुण इत्याह उरुर्महान् शंस स्तुतिर्यस्य तादृक् नोऽस्माकं उत्तमश्लोकवार्तायातमानामायुर्मा प्रमोषीः न्यूनं मा कार्षीः । उपसंहारमन्त्रोयम् । उपक्रममन्त्रस्तु वायव्यं श्वेतमालभेत भूतिकाम इति ब्रह्मप्रकरणम् । वायुमुपक्रम्य त्वमेव प्रत्यक्षं ब्रह्मासीति श्रुतेः । अग्ने यच्चिद्धिते विशो यथेति मन्त्रः तृतीयाष्टकचतुर्थाध्यायान्तेस्ति । विश्वचर्षणे मित्रस्य चर्षणी धृतश्रवो देवस्येत्यस्याग्रेतनो मन्त्रः । यच्चिद्धिते विशो यथा प्र देव वरुण व्रतं मिनीमसि यद्द्यवियवि

संवन्धमेव वक्तव्यम् । तत्र, ब्रह्मवादिनो वदन्तीत्युपक्रम्य ब्रह्मविद्यैव निरूपिता । तथापि पूर्वकाण्डे प्रणवादिमन्त्राणां नायं नियम इति प्रकृतेऽपि मतान्तरवाचकस्यैव प्रकृतोपयोग इति शङ्का । 'ते ध्यानयोगानुगता अपश्यन् देवा-

भाष्यप्रकाशः ।

सूर्याद्युपस्थाने, तथास्यापि मन्त्रस्य कपिलमतसिद्धार्थवाचकस्यैव ब्रह्मविद्योपयोग इत्येष मन्त्रः स्वार्थनिरपेक्ष एवेति शङ्केत्यर्थः । किंचात्र यद्येक एव मन्त्र एतादृशोऽन्ये त्वन्यादृशा इति स्यात् तदा बहूनामनुग्रहो न्याय्य इत्यस्यैवार्थोऽन्यथा कल्प्येतापि । यथा कठवल्लीमन्त्रस्य । इह तु मन्त्राणां बहूनां तादृशत्वात् तदपि न वक्तुं शक्यमित्याह ते ध्यानेत्यादि ।

रश्मिः ।

यत् किं चेदं वरुण दैव्ये जनेभिद्रोहं मनुष्याश्चरामसि अचित्ती यत्तव धर्मायुयोपिम मा नः तस्मादेनसो देव रीरिषः कितवासो यद्रिरिपुर्न दीवि यद्वा घासत्यमुतन्न विद्म । सर्वा ता विष्य शिथिरेव देवाथाते स्याम वरुणप्रियास इति । हे देव वरुण ते व्रतं त्वदीयपरिचर्यारूपं द्यविद्यवि दिवसे दिवसे प्रमिनिमसि मिनीमः । मीञ् हिंसायां क्र्या. उ. अ. मीनातेर्निगमेति ह्रस्वः । यच्चिद्धि, चिद्धीति वा । यद्येवं तथापि विशो यथा, प्रजा इव, वयं तथा च सापराधाः अपि प्रजाः स्वासिना यथानुगृह्यन्ते तथा वयमप्यनुग्राह्या इति भावः । यत्किंचेति । किं च हे वरुण दैव्ये देवसमूहरूपे जने यत् । किं च अभिद्रोहमपकारजातं वयं चरामसि चरामो मनुष्याः किं चाचित्ती अचित्या अज्ञानेन तव त्वदीयं यद्धर्मधारकं कर्म आयुयोपिम युप विमोहे दि. प. से. विमोहितवन्त हे देव तस्मादेनसः पापान्नोस्मान् मा रीरिषः मा हिंसीः रिष् हिंसायां भ्वा. प. से. । कितवास इति कितवास्तीत्याचक्षाणाः कितवा द्यूतकृतः कितवेत्यनुकरणादाख्यातण्यन्तं पचाद्यच् पृषोदरादित्वात् किमो मलोपः दिवीति ते वरुणस्य दीविनीति ताच्छील्ये णिनौ प्राप्ते देवनमिव देवनं द्यौः तस्यां दिवि दिवेर्डिविः अन्येषामपीति दीर्घः । कितवासस्ते मित्रीभूतस्य दिवि नरि रिपुः रप व्यक्तवाचि भ्वा. प. से. यन् नाम देवपूजादिकर्तृ व्यक्तमूचुरिति यत् वाक् हा सत्यमिति छेदः यस्य देवपूजादिकर्तुः वाक् सत्यं हा जहाति उत वितर्के यत् यस्य न, न जहाति तन्न विद्म । यद्वा घा सत्यमिति छेदः ऋचि तु नुघ मक्षु तङ् कुत्रो रूष्माणामिति संहितायां दीर्घः सर्वा सर्वाणि ता तानि विष्य विशेपेण ष्य नाशय षोऽन्तकर्मणि दि. प. अ. विपूर्वाल्लोटि मध्यमैकवचनम् । शिथिरेव शिथिलानीव । शिथिरेत्यत्र शेश्छन्दसि बहुलमिति शिलोपे 'न लोपः प्रातिपदिकान्तस्य' इति न लोपः । हे वरुण अथ अनन्तरं तव प्रियासः प्रियाः । आज्जसेरसुगिति जसोऽसुगागमः । स्याम भवेम । अयमुपसंहारमन्त्रः । वि वा एतस्य यज्ञ ऋध्यते यस्य हविरतिरिच्यते इत्युपक्रमः । प्रकरणमुन्नेयम् । न चात्र सूर्योपस्थानं न वरुणोपस्थानमिति शङ्क्यम् । इमं मे वरुणेत्युपक्रमात् । वरुणप्रियास इत्युपसंहाराच्च । न च सूर्योपस्थानपरग्रन्थविरोध इति वाच्यम् । व्याख्याने सूर्यप्राधान्येन तत्परत्वात् । हेतुद्वयेनार्थद्वयव्यवस्था । प्रकृतमधुनानुसर्यते । एतादृश इति सांख्यप्रतिपादकः 'त्यदादिषु दृशोनालोचने कञ्च' इति कन् । अस्यैवेति अजामेकामित्यस्यैव । कठवल्लीमन्त्रस्येति 'इन्द्रियेभ्यः परा ह्यर्थाः', इत्या दिकं सकलमतसाधारणम् । अतो महतः परमव्यक्तमिति मन्त्रस्य । मन्त्राणामिति वक्ष्यमाणानां मन्त्राणाम् । तादृशेति कर्मकर्तरि प्रत्ययः रूढ्यनुगुणत्वादिति मनोरमायां प्रत्ययस्तु,

१. आज्जसोरसुगिति वा पाठः ।

त्मशक्तिं स्वगुणैर्निगूढाम्' इति च । तथा 'ज्ञाज्ञौ द्वावजावीशानीशौ' अजा ह्येका भोक्तृभोग्यार्थयुक्ता । अग्रे च यो योनिं योनिमधितिष्ठत्येको विश्वानि रूपाणि योनीश्च सर्वाः । 'ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत्' इत्यादि च । वाक्यानि कपिलतन्मतवाचकानि वर्तन्त इति सांख्यमतमपि वैदिकमेवेत्येवं प्राप्ते, उच्यते—चमसवदविशेषात् ।

'अर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन् यशो निहितं विश्वरूपम् ।
तस्यासत ऋषयः सप्त तीरे वागष्टमी ब्रह्मणा संविदाना' ॥

भाष्यप्रकाशः ।

तथाचात्र स्वगुणैर्निगूढत्वम् । अग्रिमे मुक्तामुक्तात्मसंघैर्भोक्तृभिर्भोग्यार्थैर्मात्रादिकार्यैर्युक्ता अनादिः प्रकृतिः । तदग्रिमे चाधिष्ठातृत्वम् । तदग्रिमे च कपिलस्य नाम तद्धर्माश्च प्रत्यभिज्ञायन्ते । एतावान् परं विशेषो यत् कापिलैः प्रकृतिः स्वतन्त्रोच्यते । अत्र तु परमेश्वरशक्तित्वेनेति । न तावता तस्या अजात्वहानिः । शक्तेर्नित्यत्वात् । अतः शक्तित्वमात्रेण विशेषेण कपिलमतप्रत्यभिज्ञापकनानापदानादरणमनुचितमिति सांख्यमतस्यानुमानिकत्वोक्तिः प्रधानस्याशब्दत्वोक्तिश्चानुपपन्नेति प्राप्ते इत्यर्थः । सूत्रं पठित्वा सिद्धान्तं व्याकुर्वन्ति उच्यते इत्यादि । एकपदमिदं सूत्रम् । चमसेन तुल्योऽविशेषश्चमसवदविशेषस्तस्मात् । स्यात् सांख्यमतमत्र, यदि तस्याः सृष्टिकरणे स्वातन्त्र्योपपादको रजःसत्त्वतमःसाम्यावस्थात्मकः स्वरूपस्य विशेषो

रश्मिः ।

स्वदादिषु दृशोनालोचने कश्च' इति सूत्रेण । बहवो मन्त्राः सांख्यप्रतिपादकास्ते । दृश्यन्ते स्वयमेवेति तादृशाः सांख्यप्रतिपादकत्वेन दृश्यन्त इति फलितम् । तथा च तादृशत्वात् सांख्यप्रतिपादकत्वात् । तदपीत्येकमन्त्रान्यथार्थकल्पनम् । तन्मताभिज्ञापकपदानि स्फोटयन्ति तथा चेति । शक्तिपदं प्रकृतिव्यतिरिक्तेपि शक्तमित्यज्ञापकम् । स्वगुणैर्निगूढत्वं तु ज्ञापकमिति तदुक्तं मुक्तामुक्तेति । ज्ञाऽज्ञात्वित्यनेनाविवक्षितैकत्वकेन । अजेति स्पष्टम् । मात्राः शब्दादयः आदिना महदादियुक्ताः । आत्मपदार्थमाहुरनादिरिति । अधीति । योनिः समवायिकारणं प्रकृतिस्तदधिष्ठातृत्वम् । असङ्गस्य पुरुषस्याभिमानेन । मायावादेऽविद्यावादे च युक्तयस्तत्त्वानुसंधाने सन्ति । तद्धर्मा इति ज्ञानैर्धारणकर्मत्वं जायमानत्वं दर्शनविषयत्वं च । त एते सांख्यपदार्था इति प्रत्यभिज्ञाविषयीक्रियन्ते सांख्यमतमपि वैदिकमेवेति भाष्ये एवकारव्यावर्त्यं सांख्यमतस्यानुमानिकत्वप्रधानस्याशब्दत्वं चेत्याहुः एतावानिति विशेष इति सांख्यमताद्विशेषः । स्वतन्त्रेति 'प्रकृतिपुरुषयोरन्यत्सर्वमनित्यम्' इति सूत्रवृत्तौ वदद्भिरुच्यते 'असङ्गोयं पुरुषः इति' 'प्रधानाज्जगज्जायते इति' च इतिशब्दान्तं सूत्रद्वयम् । (स्वातन्त्र्यं कर्तृत्वं 'प्रकृतिः कर्त्री पुरुषस्तु पुष्करपलाशवन्निर्लेपः' इति) परमेति हे देव । आत्मशक्तिमिति श्रुत्यर्थात्परमेश्वरस्य शक्तित्वेन । आनुमानिकेति । पूर्वाधिकरणपूर्वसूत्रे दृष्यत्वेनानुपपन्ना तथा चानुमानेन प्रकृत्या संबद्ध्यत इति आनुमानिकमित्युक्ता न व्युत्पत्तिः किं तु अनुमानेन व्याप्त्या परामर्शेन वा जयति परामवतीति आनुमानिकं 'तेन दीव्यति खनति जयति जितम्' इत्यनेन ठक् । वैशेषिकादि इति भावः । अशब्देति । प्रधानस्याव्यक्तशब्दाप्रतिपाद्यत्वोक्तिः । अस्यपदविग्रहोऽविग्रहो वा नित्यसमासस्तदर्थमाहुः तुल्य इति । 'तेन तुल्यं क्रिया चेद्वतिः' इति वतिः ।

इति मन्त्रे यथा न विशेषो विधातुं शक्यते । न हि कर्मविशेषं कल्पयित्वा तत्रार्वाग्बिलचमसं कल्पयित्वा तत्र यशोरूपं सोमं होतारो मन्त्रेण भक्षयेयुरिति कल्पयितुं शक्यते । तथा प्रकृते रोहितशुक्लकृष्णशब्देन रजःसत्त्वतमांसि कल्पयित्वा न तद्वशेन सर्वमेव मतं शक्यते कल्पयितुम् । कपिलऋषिवाक्यमप्यनित्यसंयोगभयान्नित्यऋषेरेवानुवादकम् । तस्मान्न मन्त्रमात्रेण प्रकरणश्रुत्यन्तरनिरपेक्षेण विशेषः कल्पयितुं शक्यः ॥ ८ ॥

भाष्यप्रकाशः ।

विधातुं शक्येत । स च न शक्यते । शक्तित्वेन शक्तिमदधीनोदयतया तत्सापेक्षतयैव सिद्धत्वात् नच स्वगुणैर्निगूढत्वं तद्गमकम् । तत्र स्वपदेन ब्रह्मण एव ग्रहीतुं शक्यतया तद्गुणानामेव ग्राह्यत्वात् । उत्तरार्धे, 'यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः' इत्यनेनापि तस्यैव परामृष्टत्वाच्च । नापि भोक्तृभोग्यार्थयोगस्तथा । जन्यायां शक्तावपि तथात्वस्य पुराणसिद्धत्वान्नापि, योनिं योनिमिति तद्गमकम् । वीप्साया बहुत्वस्य च बाधकत्वात् । नाप्यंशभेदात् समाधिः । तस्यापि शक्तिसाधारणत्वात् । अतश्चमसवाक्यवदत्राप्युक्तरीत्या कल्प्यमानस्य विशेषस्याभावान्न सांख्यमतसिद्धिः । कपिलवाक्यादसिद्धिस्तु भाष्य एवोपपादितेति पूर्वाधिकरणोक्तमक्षुण्णमित्यर्थः ॥ ८ ॥

रश्मिः ।

तेन चमसेन तुल्यश्चमसवद्वर्ततेऽविशेष इति क्रिया । तत्सापेक्षेति शक्तिमदात्मसापेक्षतया । घटवद्भूतलमित्यादेः प्रयोगस्य भूतलादिज्ञानवत् संबन्धित्वात् । यद्यपि घटज्ञानवत् संबन्धित्वमपि प्रयोगस्य तथापि प्रकृते नोपयोगः । तद्गमकमिति अनादिप्रकृतिगमकम् । प्रकरणादाहुः । तत्रेति प्रकरणं श्वेताश्वतरे ॐ ब्रह्मवादिनो वदन्ति किं कारणं ब्रह्म कुतः स्म जाता जीवामेत्युपक्रमात्स्वशब्दस्यात्मात्मीयज्ञातिधनवाचकत्वाच्च ब्रह्मणः । स्वशब्देन प्रकृतिसंग्रहाभावे प्रमाणान्तरमाहुः उत्तरेति । निखिलानीति प्रकृतिरपि संगृहीता । अधितिष्ठति स्वगुणैः । तस्येति ब्रह्मणः । तथेति तद्गमकत्वेन । पुराणेति तृतीयस्कन्धपञ्चमाध्याये ।

'त्वं नः सुराणामसि सान्वयानां कूटस्थ आद्यः पुरुषः पुराणः ।
त्वं देवशक्त्यां गुणकर्मयोनौ रेतस्त्वजायां कविमादधेऽजः' ॥

इति पुराणसिद्धत्वात् । किं च 'ततो वयं सत्प्रमुखा यदर्थे बभूविम' इति पुराणम् । वयं सात्विकाहंकारप्रमुखाः । यदर्थे भगवतः कार्यार्थे । बहुत्वस्येति । योनीरित्यत्र । अंशेति प्रकृत्यंशभेदाद् वीप्साबहुत्वयोः समाधिः । शक्तीति जन्यशक्तिसाधारणत्वात् । अत इति कपिलवाक्यातिरिक्तवाक्यानां प्रकृत्यगमकत्वात् । विशेषस्येति । रोहितशुक्लकृष्णशब्दानां रजःसत्त्वतमोवाचकत्वरूपस्य । कपिलेति । 'ऋषिं प्रसूतं कपिलम्' इति कपिलस्य वाक्यम् । प्रतिपाद्यप्रतिपादकभावसंबन्धे षष्ठी । अत्राप्यानुमानिको न वैदिकश्चमसवदविशेषात् । यन्नैवं तन्नैवं 'यतो वा इमानि' इत्युक्तजगज्जन्मादिकर्तृत्वादिवदित्यनुमानमपि । भाष्ये । न विशेष इति । ननु कं प्रत्याक्षेप इति चेच्छृणु—चम्यते भक्ष्यते सोमोऽस्मिन् पात्रविशेषे इति चमसः सोमपानपात्रं स्यात् अधिकरणे घञ्, वृद्धिर्न, छन्दसि विकल्पात् सोयं पूर्वतन्त्रे तृतीयस्य पञ्चमपादे ज्योतिष्टोमे मैत्रहोतृश्चमसः प्रमब्रणः प्रोद्गातॄणां प्रयजमानस्य प्रयन्तु सदस्यानामित्युक्तः । एवं च जिज्ञासाधिकरणोक्तं

ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके ॥ ९ ॥

ननु चमसमन्त्रे अर्वाग्बिल इति मन्त्रव्याख्यानमस्ति । शिरश्चमसः प्राणा वै यशः प्राणा वा ऋषय इति । नात्र तथा व्याख्यानमस्तीतीमां शङ्कां

भाष्यप्रकाशः।

ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके ॥ ९ ॥ सूत्रमवतारयन्तो व्याकुर्वन्ति नन्वित्यादि । **इतीमामिति** इति हेतोश्चमसदृष्टान्तस्य वक्तुमशक्यत्वादजाशब्दे यौगिकार्थमात्याध्यात्मप्रकरणासंबद्धत्वाद्रूढार्थं च विहायात्र सांख्यसिद्धा प्रकृतिरेवाङ्गीकार्येतीमामित्यर्थः ।

रश्मिः ।

तस्माद्यत्रापि विध्यश्रवणं तत्रापि अर्वाग्विलश्चमसः ऊर्ध्वबुध्नोभवदिति विधिं परिकल्प्य तत्रत्यानां तच्छेपत्वं परिकल्प्य कर्मविशेषं प्रब्रह्मण एत्वित्युक्तब्रह्मत्वार्थं कल्पयित्वा ब्रह्मिष्ठो ब्रह्मा तं दर्शपूर्णमासयोर्वृणीत इति वाक्यात् । तथा च स्यादेतत् अथातो ब्रह्मजिज्ञासेत्यादि जिज्ञासाधिकरणभाष्योक्तमानवं प्रत्याक्षेपः सिद्धः । एवं च विशेषो ब्रह्मत्वार्थं धर्मविशेषरूपः । एतदेवाहुर्नहीति । **तत्रार्वागिति** विशेषणार्थः स्पष्टः । सोमे यशोरूपव्यापकत्वं तु श्रुतिप्रामाण्यात्, विश्वरूपत्वं तु सर्वस्य सर्वात्मकत्वात् । वागष्टमीत्यस्यार्थमाहुः **मन्त्रेणेति** । वागष्टमी ऋषिवत्तीरे निकटे कर्मविशेषस्येत्यष्टमीत्वं ब्रह्मणा वेदेन संविदाना संबध्नातीति मन्त्रार्थः । अत्र कर्मविशेषे चमसो ब्रह्मणः ग्रैवित्यत्रोक्तचमसपदव्युत्पत्त्या सोमभक्षणं प्राप्तं तदाहुः **भक्षयेयुरिति** नान्यं क्रियापदमत्र । नित्यऋषेरिति आह्वुणस्तु न । छन्दोवदग्निभाष्यमिति विकल्पात् । **अन्विति** । सिद्धस कथनमनुवाद-इति कपिलपदार्थः सिद्धः । **विशेष** इति ब्रह्मत्वार्थं धर्मविशेषः ॥ ८ ॥

ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके ॥ ९ ॥ नन्वित्यादीति अयं मन्त्रो बृहदारण्यके शिशुब्राह्मणेस्ति । **व्याख्यानमिति** श्रुतिस्तु अर्वाग्बिलश्चमसः ऊर्ध्वबुध्न इतीदं तच्छिर एष अर्वाग्बिलश्चमसः ऊर्ध्वबुध्नस्तस्मिन् यशो निहितं विश्वरूपमिति । प्राणा वै यशो विश्वरूपप्राणा नो तदाह तस्यासत ऋषयः सप्ततीर इति प्राणा वा ऋषयः प्राणा तदाह वागष्टमी ब्रह्मणा संविदानेति अत्र हि शिशूपासनं प्रक्रम्येयं श्रुता सप्रतीकव्याख्यात्री तत्रेदं तच्छिर इति अयं वा व शिशुर्योयं मध्यमः प्राण इति श्रुतेः प्राणात्मकस्य शिशोः प्रत्याधानभूतशिर एव तत्र श्रोत्रादिच्छिद्रेषु प्रत्येकं प्राण आधीयते शृण्वञ्छ्रोत्रं भवतीति । अर्वाग्बिलः अवाङ्मुखः अधः स्थितस्यैव मुखस्य बिलत्वात् । शिरसो बुध्नाकारस्योपरिदर्शनात् ऊर्ध्वबुध्नः चमसो यज्ञपात्रविशेषस्तद्वदिति । प्राणादीति प्राणादिरूपं यशःशब्दादिप्रकाशनं तत्कारणं नार्थोल्लासकत्वाद् विश्वरूपं तस्मिन् । शिरसि निहितं एतदिति यश इत्यर्थः प्राणा वा इति प्राणरूपा सप्तऋषयः शिरोलक्षणचमसस्य तीरे निकटे आसते भवन्तीति । एतदिति ऋषीनित्यर्थः । ब्रह्मणेति वेदेन संबध्नाति के ते प्राणा ऋषयः इत्याहाग्रे इमावेव विश्वामित्रजमदग्नी अयमेव विश्वामित्रोऽयं जमदग्निरिमावेव वसिष्ठकश्यपावयमेव वसिष्ठोयं कश्यपो वागेवात्रिः वाचा ह्यन्नमद्यते अत्तिर्ह वै नामैतद्यदत्रिरिति इमाविति कर्णौ अयं दक्षिणः कर्णः अयमुत्तरः कर्णः इमौ चक्षुषी इमाविति नासापुटौ इति व्याख्यानम् । भाष्यसिद्धार्थेन समं भाष्यार्थमाहुः **चमसेति** । अविशेषे दृष्टान्तः अध्यात्मेति आत्मनि । आत्मविषयप्रकरणासंबद्धत्वात् । **रूढेति** छागीरूपम् । इमामिति प्रत्यक्षगे इदमः

१. छागा।

परिहरति तुशब्दः । अजाशब्देन ज्योतिरेवोच्यते । यथा छाजा अल्पदोग्ध्री तथेयं नश्वरसुखदात्री अग्निसूर्यसोमविद्युद्रूपा ब्रह्मणो हंसोक्तचरणरूपा । भगवत्कार्यांशरूपत्वात् 'तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' इति श्रुतेश्च प्रथमोत्पन्ना

भाष्यप्रकाशः ।

नन्वजाशब्दार्थानिर्द्धारे कथं तत्परिहार इत्यत आहुः अजेत्यादि । तर्ह्यजाशब्दप्रयोगः कुत इत्यत आहुः यथेत्यादि । तथाच 'पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति शिताः शराः' इतिवन्निगीर्याध्यावसानेन तथात्वबोधनाय प्रयोग इत्यर्थः । ननु किं तज्ज्योतिर्यदेवमुच्यत इत्यत आहुः अग्नीत्यादि । अग्निसूर्यसोमविद्युद्रूपत्वाज्ज्योतिः । रूपादिति पाठे भावप्रधानो निर्देशः । रूपेति पाठः श्रीहस्ताक्षरेषु संदिग्धत्वाद् बोध्यः । छान्दोग्ये षष्ठे प्रपाठके सत्यकामाय हंसेन, अग्निः कला सूर्यः कला चन्द्रः कला विद्युत् कलैष वै सौम्य चतुष्कलः पादो ब्रह्मणो ज्योतिष्मान्नामेत्युक्तो यश्चरणस्तद्रूपा । तस्य चरणरूपत्वं तु, तत् तेजोऽसृजतेति श्रुत्युक्तभगवत्कार्यांशत्वात् तस्य त्रिरूपत्वं, कार्यत्वस्त्रीत्वे च । तासां त्रिवृतमिति श्रुतेः । चोऽवधारणे । अतः प्रथमोत्पन्ना या देवता तेजोरूपा सैवात्राजापदेनोच्यत इत्यर्थः । ननु तथा अत्र

रश्मिः ।

प्रयोगाद्भाष्यीयशब्दश्रानगां प्रकाशोक्तसिद्धार्थप्रत्यक्षमाचार्याणां तद्वां चेत्यर्थः । अजेति ज्योतिःशब्दं विहाय । अध्याहृतगौणीबोधनायेति भाष्यार्थमाहुः तथा चेति । इदं वाक्यं चन्द्रालोकस्थम् । पूर्वार्धं तु 'रूपकातिशयोक्तिः स्यात् निगीर्याध्यवसानतः' इति । तथा च यथात्र नीलोत्पलशरपदाभ्यां लोचनकटाक्षाणां निगरणं विषयवाचकपदोल्लेखमन्तराप्युपस्थापनं तत्पूर्वकं तद्रूपताध्यवसानं तथा जातकार्यपदाभ्यां ज्योतिस्तत्कार्ययोस्तद्वाचकपदोल्लेखमन्तराप्युपस्थापनं तत्पूर्वकतद्रूपताध्यवसानं तेन तथात्वम् । अध्याहृतगौणीत्वं तु 'अम्' तस्य बोधनाय । तथा च गौर्वाहीक इत्यत्र इव लक्ष्यमाणगुणा गवाद्यपेक्षयाल्पदोग्ध्रीत्वादयः अजात्वविशिष्ट अजारूपशक्यस्याधेयतासंबन्धाख्यलक्षणाया अल्पदोग्ध्रीत्वादिषु सत्त्वाद्गुणेषु लक्ष्यमाणत्वं 'लक्ष्यमाणगुणैर्योगात् वृत्तेरिष्टा तु गौणता' इति काव्यप्रकाशे । ननूपचारमिश्रेयं गौणीति चेदोम् । उपचारो गुणयोगः सोऽस्त्येवेति । एवमल्पदोग्ध्रीत्वनश्वरफलदात्रीत्वयोः दुःखदातृत्वादिगुणयोगः अन्यत्पूर्ववत् । अल्पदोग्ध्रीत्वमजापदप्रवृत्तिनिमित्तं दुःखदातृत्वादि अल्पदोग्ध्रीत्वपदप्रवृत्तिनिमित्तम् । ज्योतिरिति तथेयमिति भाष्योक्ता ज्योतीरूपाजा । भाचेति । यद्वा । अग्निसोमसूर्यविद्युतां रूपं प्राप्यात्मेयं ज्योतिरूपाजा नश्वरसुखदात्रीति भाष्यार्थः । ल्यब्लोपे पञ्चमी । ब्रह्मण इति भाष्यं विवृण्वन्ति स्म छान्दोग्य इति । भगवत्कार्येति भाष्यं विवृण्वन्ति स्म तस्येति ज्योतिषः । तासामिति भाष्यं विवृण्वन्ति स्म तस्येति । ननु तत्तेजोऽसृजतेति छान्दोग्यश्रुत्या कार्यत्वं तत्पदवाच्यसद्ब्रह्मणस्तेजसस्तर्हि तस्य त्रिरूपत्वं वक्तव्यम् । आनन्त्येपि हि कायार्णामित्युक्त्वा 'सर्वेषां त्रिगुणत्वाद्धि तयोर्भेदाः पृथङ् मताः' इति निबन्धात् । किं च भगवत्कार्येति भाष्योक्तकार्यत्वं अग्न्यादावसंभवि ब्रह्म तर्हि अग्निरिति श्रुतेः । सूर्यचन्द्रयोः प्रश्नोपनिषदि षड्धासृष्टिकर्तृत्वोक्तेर्ब्रह्मलक्षणाक्रान्तत्वात् । विद्युतो विद्युद्ब्रह्मेत्याहुरिति बृहदारण्यकात् । अतः कार्यत्वे कारणं वक्तव्यम् । तथा ज्योतिषि नपुंसकेऽजेति स्त्रीत्वे हेतुर्वक्तव्यः इति चेत्तत्राहुः त्रिरूपत्वमित्यादि । अत इति दोषाभावात् । कार्येऽजापदप्रयोगः कथमित्याशङ्काग्रे सूत्रे निराकार्या ।

देवता अजाशब्देनोच्यते । तत्र हेतुः । उपक्रमात् । अत्रैवोपक्रमे, 'तदेवाग्निस्तद्वायुस्तदादित्यस्तदु चन्द्रमाः' इति । द्वा सुपर्णेति चाग्रे । मध्ये चायं मन्त्रः पूर्वोक्तरसंबद्धमेव वदति । सा मुख्या सृष्टिः । अजद्वयं जीवब्रह्मरूपमिति । अत्र

भाष्यप्रकाशः ।

कथं प्रत्यभिज्ञानमित्यत आहुः तत्र हेतुरित्यादि । तथापि चेतनाधिष्ठितत्वस्य कथं प्रत्यभिज्ञानमित्यत आहुः द्वा इत्यादि । सैव कुत उच्यत इत्यत आहुः सा मुख्या सृष्टिरिति । सा त्रिवृत्कृतदेवतारूपा मुख्या सृष्टिः । सृष्ट्यन्तरकरणसमर्थमाद्यं कार्यमत उच्यत इत्यर्थः । एवमत्राजामन्त्रस्य पूर्वार्धं व्याख्यातम् । उत्तरार्धं व्याकरोतीत्याहुः अजद्वयमित्यादि ।

रश्मिः ।

अयमर्थः । ब्रह्मत्वेपि चतुर्व्यूहेऽन्तर्भावस्य साध्यत्वेन स्वरूपलक्षणानाक्रान्तत्वेन चैकत्वाभावात् 'एकमेवाद्वितीयं ब्रह्म' इति श्रुत्यस्पर्शादनेकेश्वरापत्तेः ।

'भयादस्याग्निस्तपति भयात्तपति सूर्यः ।
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः' ॥ इति ।
'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोयमग्निः ।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' ॥ इति च ।

काठके श्रावणात् विद्युति वाच्यं ब्रह्मत्वं तदपि विद्युद्ब्रह्मेत्याहुरित्यत्र केचिदित्यध्याहारे केचिदित्यस्वरसं ग्रस्तं तदपि केचिदिति विरला इति सुबोधिन्याः । स्वरूपलक्षणाक्रान्तेति ह्यलमयोग्यकर्तृकविचारेणेति । किं च ब्रह्म तर्हि अग्निरिति श्रुतिरपि सुबोधिन्यामत उभयं सुबोधिनीप्रमाणकं तदुभयं विहाय कार्यत्वमत्रोक्तं ज्ञेयमिति चतुरस्रम् । त्रिरूपत्वं लोहितशुक्लकृष्णरूपत्वं तत्तेजोऽसृजत इत्युक्त्वोच्यते तदपोसृजत तदग्रे ता अन्नमसृजन्त इत्युक्त्वोच्यते तासां त्रिवृतं त्रिवृतमेकैकां करवाणि इत्युक्त्वा यदग्ने रोहितँरूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाण्येव सत्यमिति त्रिवृत्करणे छान्दोग्यश्रुतेः त्रिवृतमिति श्रुत्यंशेन बोध्यते कार्यत्वस्त्रीत्वे तासामिति श्रुत्यंशेन बोध्यते । तासामित्यस्य तेजोबन्नरूपदेवतानां कार्यरूपाणामित्यर्थात् । इमास्तिस्रो देवता इति श्रुतेः । कथमिति केन हेतुनेति प्रश्नः । प्रत्यभीति सेयमजेति प्रत्यभिज्ञा । न च नित्यानित्यसंयोग इति शङ्क्यम् । दृष्टान्तार्थमात्रत्वात् । दृष्टान्तव्यतिरिक्तस्थले ऐक्यविषयत्वात् ऐक्यप्रतीतेर्भ्रमत्वात् तत्र हेतुरित्यादीति उपक्रमोपसंहाराभ्यामर्थनिर्णयादुपक्रमस्यासंजातविरोधित्वेन प्रबलत्वात् सृष्टिकर्तृत्वोक्त्याजा ज्योतिः प्रश्नोपनिषदुक्तौ सूर्यचन्द्रमसौ । वायुः बृहदारण्यकोक्तो यश्चक्षुषः स्वस्वरूपं प्रापितवान् सः । अग्निर्व्यापकः ब्रह्मरूपः एवमजा ज्योतिश्चतुष्टयरूपा । अत्र बृहदारण्योक्ता विद्युत् न छान्दोग्ये वायुर्न विद्युदस्ति । तस्या ब्रह्मरूपायाः संनिवेशार्थमुत्तरभाष्यं व्याचक्रुः तथापीति चेतनोग्निः । द्वा इत्यादीति । द्वौ जीवब्रह्मरूपौ ब्रह्माग्निः । विद्युत्पक्षे विद्युद् ब्रह्मेति । तदेवाग्निरित्यस्याः अग्निः कलेत्यस्याश्चैकवाक्यत्वे वायुः प्राणो विद्युदिति यावत् । सैवेति अव्याकृता देवता सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति श्रुत्युक्ताग्निविद्युदन्यतरात्र श्रुतौ कुतः कस्माद्धेतोरुच्यते तेजोनिरूपणे इत्यत इत्यर्थः । उच्यत इति । समवायित्वार्थम् । स्वतः प्रतीतत्वाद्वा भावप्रत्ययेन प्रकृतिजन्यबोधे प्रकारतामापन्नेनोच्यते इत्यर्थः । अत एव मुख्यपदम् । अजद्वयमित्यादीति प्रथममजपदं जीवपरम् । द्वितीयं ब्रह्मपरम् । तत्रेति

प्रकरणे न स्पष्ट इति निरूपयति । तथाहि श्रुत्यन्तरे स्पष्टमेव अधीयत एके 'यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत् कृष्णं तदन्नस्य' इति । एवमग्रेऽपि कलात्रये । अनेन जीवेनात्मनेति जीवब्रह्मणोश्चानुप्रवेशः । बीजेऽपि त्रैविध्यमिति सरूपत्वम् । भगवतोऽभोगे हेतुः जीवेन भुक्तभोगामिति । तस्मात् प्रकृतेऽपि चमसवच्छ्रुतावेवार्थकथनान्न सांख्यमतप्रतिपादकत्वम् ॥ ९ ॥

भाष्यप्रकाशः ।

नन्वज्ञाया ज्योतिष्ट्वेन निरूपणमयुक्तम् । छान्दोग्ये तेजस उत्पत्तिकथने त्रिरूपताया अनुक्तत्वात् । भाष्ये च हंसोक्तचरणरूपत्वेन व्याख्यानमयुक्तम् । तस्यापि तत्रानुक्तत्वादित्याशयेन सूत्रशेषमवतारयन्ति अत्रेत्यादि । अत्र प्रथमकार्यप्रकरणे त्रिरूपत्वं, हंसोक्तश्चरणो न स्पष्ट इति हेतोस्तत्रत्यं श्रुत्यन्तरं दर्शयतीत्यर्थः । श्रुतिमाहुः यदग्नेरित्यादि । ननु यदि तेजोरूपा देवताभिप्रेता तदा सूत्रकृता तेजःपदमेव कुतो नोक्तमित्यत आहुः एवमित्यादि । कलात्रय इति सूर्यसोमविद्युद्रूपे । तथाचैतदग्रे, यदादित्यस्य रोहितं रूपं यच्चन्द्रमसो यद् विद्युत इत्यादिनिरूपणात् तत्र हंसोक्तपादरूपतादिधर्मनिरूपणार्थं ज्योतिःपदं प्रयुक्तं, न तेजःपदमित्यर्थः । अस्यां श्रुतौ जीवब्रह्मणी कुत्रोक्ते इत्याकाङ्क्षायामाहुः अनेनेत्यादि । जीवेनेति सहार्थतृतीययाऽऽत्मनेति करणतृतीयया च बोधिते इत्यर्थः । सरूपत्वकथनप्रयोजनमाहुः बीजेऽपीत्यादि । 'बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम्' इति वाक्याद् बीजं भगवान् । तत्रापि सच्चिदानन्दरूपत्वात् त्रैविध्यमस्तीत्यतः प्रजासरूपत्वम् । तथाच कार्यकारणयोः सालक्षण्यस्यौत्सर्गिकत्वेनार्थात् प्राप्तावपि यत् सरूपत्वकथनं तत् प्रजानां तेजोऽबन्नात्मकत्वेऽपि बीजधर्मस्य सच्चिदानन्दरूपत्वस्य ज्ञापनार्थमित्यर्थः । तस्मादिति यस्मादेवं वाक्यतात्पर्यं तस्मात् ॥ ९ ॥

रश्मिः ।

छान्दोग्ये । अनुक्तेति उक्तत्वेऽप्यग्रिमग्रन्थावतरणायाहार्यज्ञानविषयत्वं कृत्वानुक्तत्वादित्युक्तम् । एवं पूर्वत्रापि ज्ञेयम् । तत्रत्यमिति छान्दोग्ये भवं जाताद्यर्थेऽव्ययात्त्यप् । श्वेताश्वतरश्रुतेरन्या श्रुतिः श्रुत्यन्तरम् । तत्र छान्दोग्ये जातादिः तत्रत्यं तद्दर्शयति तत्रेति छान्दोग्ये । हंसोक्तेति आदिना त्रिरूपता । अस्यामिति श्वेताश्वतरव्याख्यानरूपायाम् । छान्दोग्यश्रुतौ जीवब्रह्मणी उत्तरार्धेऽजद्वयवाच्ये कुत्रेति स्थलप्रश्नः । सरूपेति व्याख्येयश्रुतौ 'सरूपा' इतिपदेन तेषां खल्वेषां भूतानां त्रीण्येव बीजानीति छान्दोग्योपबृंहितां गीतामाहुः बीजं मामिति । सच्चिदिति सद्रोहितं परिशेषात्, चित् शुक्ला प्रकाशकत्वात्, आनन्दः कृष्णस्तमोजनकत्वात्, तमसश्च कृष्णत्वात् । बीजधर्मेति तेन समवायित्वं स्फोरितम् । निमित्तत्वं सतः । ज्योतिषि कार्ये सतोऽभिन्ननिमित्तोपादानत्वम् । एवमिति उक्तप्रकारेण छान्दोग्यश्रुतिषु व्याख्यानतात्पर्यं श्वेताश्वतरीयाजामेकामिति श्रुतिवाक्यतात्पर्यम् । भाष्ये । श्रुतावेवेत्यत्रैकवचनमविवक्षितम् । ताश्च श्रुतयः पूर्वमर्थानुरोधेन त्यक्तक्रमा अत्र प्रोच्यन्ते 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्, तद्धैक आहुरसदेवेदमग्र आसीत् एकमेवाद्वितीयम् । तदैक्षत बहु स्यां प्रजायेयेति, तत्तेजोऽसृजत तदैक्षत बहु स्यां प्रजायेयेति, तदपोऽसृजत तस्माद्यत्र क्व च शोचति स्वेदति वा पुरुषः तेजस एव तदध्यापो जायन्ते, ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहि इति, ताः अन्नमसृजन्त तस्माद्यत्र क्व च वर्षति तदेव भूयिष्ठमन्नं भवत्यद्भ्यः एव तदध्यन्नाद्यं जायते । तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्यण्डजं

रश्मिः ।

जीवजमुद्भिज्जमिति सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवताः अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति सेयं देवतेमास्तिस्रो देवता अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत् । तासां त्रिवृतं त्रिवृतमेकैकामकरोद्यथा नु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवतीति तन्मे विजानीहीति । यदग्नेः रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाण्येव सत्यम् । यदादित्यस्य रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादादित्यादादित्यत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाण्येव सत्यम् । यच्चन्द्रमसो रोहितं रूपं तेजसस्तद्रूपं तच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाच्चन्द्रमसश्चन्द्रमस्त्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाण्येव सत्यम् । यद्विद्युतो रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाद्विद्युतो विद्युत्त्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाण्येव सत्यम् । एतद्ध स्म वै तद्विद्वांस आहुः पूर्वे महाशाला महाश्रोत्रिया न नोऽद्य कश्चनाश्रुतममतमविज्ञातमुदाहरिष्यति इति ह्येभ्यो विदांचक्रुरिति श्वेताश्वतरश्रुतिव्याख्यानरूपश्छान्दोग्यश्वेतकेतूपाख्यानस्थाः एकमेवाद्वितीयमित्युक्तं 'वीर्यं मे दुश्चरं तपः' इति द्वितीयस्कन्धालोचनाद्वीर्यात्तेजः अग्नेोत्पत्तिः । वर्षेति वर्षणमपां विमोकः तथा चापां वर्षणकर्तुः सामर्थ्यादन्नत्वं अस्थ्यादिवत् । पृथिवी वा अन्नं आद्यं अद भक्षणे 'ऋहलोर्ण्यत्' अत्तुं योग्यं तयोः समाहारोन्नाद्यः अधिजायते अध्युपसर्गकृतविशेष उन्नेयः । अधुना तेजःपदवाच्याऽजायाः प्रथमकार्यत्वं वक्तुं कार्याणां सत्पदार्थभूतानि सदेव सोम्येदमग्र आसीदित्यत्र सत्पदेन उक्तानि बीजान्याह तेषामिति । तेषां प्रसिद्धानामेषां भूतानां मनुष्यपक्ष्यादिकानां कानीत्याह आण्डजमिति । स्वराड् 'एतन्नानावताराणां निधानं बीजमव्ययम्' इति वाक्यात् । जीवजं रेतः । जरायुजं वा जरायुजं मनुष्यादि । तत्र बीजपदप्रयोगश्चिन्त्यः । उद्भिनत्ति इत्युद्भित् कर्तरि क्विप् । स्थावरं ततो जातमुद्भिज्जं स्थावरपदमनुक्त्वोद्भिज्जपदमुक्तं तेनोद्भिनत्ति यो जगदाश्रयः स सर्वेषां बीजम् । अभिन्ननिमित्तोपादानम् । तत्तु समन्वयादिति व्याससूत्रात् । 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इति गीता । अत्र श्वेताश्वतरोक्तो ब्रह्मवादिनो वदन्ति किं कारणं ब्रह्म कुतः स्म जाता जीवाम इत्युक्तब्रह्मप्रश्नोत्तरं सदेव सोम्येत्यादि तदेव बीजत्रयं चतुष्टयं वा तेषु । एतस्माज्जगदाश्रयरूपात्सतः भूतान्तर्गततेजःपदं तदर्थश्चाजा अग्निवाय्वादित्यचन्द्ररूपा प्रथमकार्यम् । सापि नश्वरसुखदा न रूपकार्यसहितेति । तस्याश्च प्रत्येकं चत्वारि रूपाण्याह । सेयमिति प्रकृताव्यवहितोक्ता व्याकृताख्या देवता पूर्ववदैक्षत आत्मनाऽनश्वता सता । अन्विति । एवां सृष्टिमनु 'पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः पुरः स पक्षीभूत्वा पुरः पुरुष आविशत्' इति मधुब्राह्मणस्थश्रुत्युक्तन्यायेन । विजानीहहि इति हेति अज्विकारः । हि हीति, विजानीहीति पाठः स्पष्टः । तेजःपदवाच्याऽजायाः अग्न्यादित्यचन्द्रमोविद्युद्रूपेष्वग्नित्रिवृत्करणमाह यदग्नेरिति अग्नौ सतस्तेजोनिविष्टस्य सत्त्वादाह रोहितमिति, अब्निविष्टस्य सत्त्वादाह यच्छुक्लमिति, पृथिवीनिविष्टस्य सत्त्वादाह यत्कृष्णमिति, तथा च यान्यग्नेस्त्रिवृत्कृतस्य रोहितादिरूपाणि तान्यत्रिवृत्कृतानां तेजोवन्नानां रूपाणि इत्युक्तम् । नन्वग्नित्वं गन्तृत्वं नाग्नौ दृश्यते । न च येनेन्द्रियेण यद्गृह्यते तेनैवेन्द्रियेण तद्गता जातिस्तदभावश्च गृह्येते इति नैयायिकोक्तेः दृश्येते इति वाच्यम् । अपागमनानन्तरमिन्द्रियेण तद्गृह्यते । अपागमनमेव कुतः इत्यतो विचारादित्याह अपेति । आप्लृ व्याप्तौ इत्यस्य रूपमेति । अतो व्यापकेन सता रूपत्रयरूपाग्नित्वमागादिणो गा । अतोग्नौ

रूढः। न जायत इति योगः। अनुभयरूपत्वात् कथं सृष्टिवाचकत्वमित्याशङ्क्य परिहरति कल्पनोपदेशाच्च। कल्पनात्रोपदिश्यते।

आद्या सृष्टिः कल्पनया अजाशब्देनोच्यते। यथा ह्यजा बर्करसहिता

भाष्यप्रकाशः।

परिहारं व्याकुर्वन्ति कल्पनाऽत्रेत्यादि। एतस्यैव विवरणम् आद्येत्यादि। कल्पनाया विवरणं यथेत्यादि। तथाच तस्या भगवत्साहित्येन कार्यसाहित्येन चोपासनार्थं गौण्याऽजत्वोपदेश

रश्मिः।

इति वदतां समुदायशक्ती रूढिः अवयवशक्तिर्योगः एतदुभयातिरिक्तयोर्यत्रावयवशक्तिमध्ये समुदायशक्तिरप्यस्ति तद्योगरूढं पङ्कजादिपदम्। यत्र तु यौगिकार्थरूढ्यर्थयोः स्वातन्त्र्येण बोधस्तद्यौगिकरूढं यथा उद्भिदादिपदम्। अत्र ह्यूर्ध्वभेदकर्ता तरुगुल्मादिरपि बुध्यते योगविशेषोपि इति रूढियोगातिरिक्तशक्तिद्वयदर्शनान्न नैयायिकशङ्केयमिति चेन्न। पङ्कजादिपदं योगरूढं तत्र पङ्कजनिकर्तृरूपत्वमवयवशक्त्या पङ्कजपदं बोधयति, समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बोधयति। न च केवलावयवशक्त्या कुमुदादौ प्रयोगः स्यादिति वाच्यम्। रूढिज्ञानस्य केवलयौगिकार्थबोधप्रतिबन्धकत्वादिति प्राञ्चः। वस्तुतस्तु समुदायशक्त्योपस्थितपद्मे अवयवार्थपङ्कजनिकर्तुरन्वयो भवति, सांनिध्याद्यत्र तु रूढ्यर्थस्य बाधः प्रतिसंधीयते कुमुदत्वेन रूपेण च बोधे तात्पर्यं तत्र लक्षणया कुमुदादेरेवेति। यत्र तु कुमुदत्वेन बोधेन तात्पर्यज्ञानं पद्मत्वस्य च बाधः तत्रावयवशक्तिमात्रेण निर्वाह इत्याहुः। यत्र तु स्थलपद्मादौ अवयवार्थबाधः तत्र समुदायशक्त्या पद्मत्वेन रूपेण बोधः। यदि स्थलपङ्कजं विजातीयमेव तदा लक्षणयैवेति सिद्धान्तमुक्तावल्याः वस्तुतस्त्वित्युक्तपक्षेपि रूढिर्योगमपहरतीत्यस्य प्रसक्तेः। न च पद्मत्वावच्छिन्नविशेष्यत्वानिरूपितपङ्कजपदप्रयोगजन्यपङ्कजनिकर्तृत्वावच्छिन्नविषयताशालिबोधं प्रति रूढिज्ञानस्य प्रतिबन्धकत्वेन पद्मधर्मिकपङ्कजादिपदयोगार्थबुद्धेः प्रतिबध्यतावच्छेदकानाक्रान्तत्वादिति वाच्यम्। विरोध्यविषयकज्ञानस्य प्रतिबन्धकत्वं ·······ज्ञानविघटकत्वेनैवेति नियमभङ्गात्। अत उक्तं ननु द्विधा शब्दप्रवृत्तिरिति योगो रूढिर्वेति। छागायामिति। अत इति। सिद्धेऽजादिग्रहणं ज्ञापयति। जातिलक्षणं ङीपं बाधित्वाऽजवाचकाददन्ताट्टाबेवेति। तदुक्तं सिद्धान्तकौमुद्याम्। अजाद्युक्तिर्ङीपो ङीपश्च बाधनायैवेति। जातेरस्त्रीविषयादयोपधादिति सूत्रस्याजशब्दाट्टाब्विधान एव प्रवृत्तिर्न छागशब्दात् व्यक्तेरभेदस्य जातिबाधकसंग्रहस्य सत्त्वात्। यथा घटत्वं जातिर्न कलशत्वं व्यक्तेरभेदादिति। 'आकृतिग्रहणा जातिः' इति लक्षणपक्षे छागत्वं जातिः अनुगतसंस्थानव्यङ्ग्यत्वात्। तथापि नैयायिकपक्षैकवाक्यतयाऽजात्वं जातिरस्त्येवेति गौरवात् न छागत्वं जातिरिति बोध्यम्। अनुभयेति अजाशब्दस्योभौ रूढियौगिकावयवौ अस्य। संख्याया अवयवे तयप्। तयपोऽयच् 'उभादुदात्तो नित्यम्' इत्युभयरूपत्वाभावात् प्रथमसृष्टितेजोवाचकत्वं कथमिति प्रश्नः। प्रकृते। गौण्येति तेन योगरूढिव्यतिरेकेणापीति भाष्ये गौण्येति शेषः। भाष्ये तु शब्दब्रह्मण ब्रह्मतुल्यत्वस्य 'अत एव च नित्यत्वम्' इति सूत्रउक्तत्वात् तद्व्यतिरेकेणापि शब्दसामर्थ्यं द्योत्यते। गौणी तु पूर्वसूत्र उपपादिता। भाष्ये। बर्करेति। कोशे कस्मिंश्चिदयं शब्दः। शंकरभाष्ये च बहुबर्करा सरूपबर्करा चेत्यजाविशेषणे। उपदेशेति कल्पनोक्तिरित्युक्त्वा।

भाष्यप्रकाशः।

द्योक्तस्य मधुत्वस्य तस्मिन् वक्तुमशक्यत्वेन सांख्यवादिनापि तत्र गौण्येव वृत्तिः कल्पनोपदेशमादायैवादरणीया। अन्यथा श्रुतिविरोधापत्तेः। निर्गुणादिश्रुतिविरोधश्चेति सूत्रयतः कपिलाऽऽचार्यस्यापि तद्विरोधस्यासह्यत्वात्। अतो यथा मध्वादिविद्यायां कल्पनोपदेशस्त्वयाङ्गीक्रियते तथा श्रुतिविरोधपरिहारायाजाप्यङ्गीकार्यमिति प्रतिवादिबोधनार्थं तदनुसारेणोक्तम्। वस्तुतस्तु पुरुषविधब्राह्मणे रमणार्थं सृष्टिं प्रकृत्य अजेतराभवद् बस्त इतर इति श्रावणादत्रापि तादृगाकारमादाय चतुर्मुखाऽऽजन्यायबाधादजात्वमाद्यसूत्रैरुच्यते बन्धकत्वाय। नचात्र मानाभावः।

रश्मिः।

इति वाक्याच्च। अपीति। ननु ह्यनेन पदेन प्रतिवादिमते गौणी ध्वन्यते सा न संभवति एकविज्ञानेन सर्वविज्ञानस्य प्रतिज्ञातत्वात्। आदित्यादीनां ज्ञानकर्तृभगवदभेदबोधनाय मधुब्राह्मणस्य प्रवृत्तेरभेदसंभवादिति चेन्न 'आनन्दादयः प्रधानस्य' इति सूत्रे आदिपदेन मधुत्वस्यापि संग्रहात्। सूर्यधर्मत्वाभावेनाभेदान्वयासंभवात्। अतो गौण्यर्थं, योगरूढिव्यतिरेकेणापि शब्दप्रवृत्त्यर्थं वा मधुब्राह्मणम्। श्रुतीति श्रुतीनां व्याख्यातश्रुतीनां छान्दोग्यस्थानां विरोधः। तत्तेजोऽसृजत इत्यस्या वा। त्वयेति सांख्यप्रतिपादकेन प्रतिवादिना वा। तदन्विति तदनुसारः तदुक्ताभिन्नप्रकारेणानुसरणं तेनोक्तमविरुद्धम्। तेन मात्सर्याभावो ध्वन्यते। तेन भाष्यस्य परमार्थत्वं ज्ञातव्यम्। धर्मस्थानं उच्चैः स्थितोऽत एव बृहस्पतिर्मङ्गलयुतश्च तत्फलं जातकाभरणेस्ति,

'विलग्नतः शीतमयूखतः कर्मणि मयोनः सचिवो यदा स्यात्।
नानाधनाप्त्यागमनानि पुंसां विचित्रवृत्तं नृपगौरवं च'॥

मङ्गलसाहित्यफलं—

'मन्त्रास्त्रशस्त्रादिकलाकलापैः विवेकशीलो मनुजः किल स्यात्।
चमूपतिर्वा नृपतिः पुरेशो ग्रामेश्वरो वा सकुजे सुरेज्ये'॥ इति

ज्ञानप्रदीपनामग्रन्थे—

'भवति भाग्यपतिर्नृपवल्लभः सुरगुरौ नवमे सुखवान् गुणी।
त्रिदशयज्ञपरः परमार्थवित् प्रचुरकीर्तिकरः कुलवर्धनः'॥ इति।

यथाश्रुतार्थे मधुविद्यायाम्। अक्षरमात्रमपि वेदो नान्यथावक्तीति पक्षेप्यविरुद्धः प्रतीतार्थउक्तः। भेदान्वयस्फूर्तेर्गौणी न मधुब्राह्मणे संभवतीत्यरुच्या अजामेकामिति मन्त्रे परोक्षवादमाहुः वस्तुत इति। पुरुषेति बृहदारण्यके। अजेति अजा इतरा शतरूपा, इतरो मनुः। इतीति 'अजेतराभवत् बस्त इतरोऽविरितरा मेष इतरस्ताꣳसमेवाभवत्ततोऽजावयोऽजायन्तैवमेव च यदिदं किं च मिथुनमापिपीलिकाभ्यस्तत्सर्वमसृजत' इति श्रावणात्। समेत्यस्य मिथुनाय गतवान् इत्यर्थः। समाय सुपां डा प्रत्यय। *'इ'आश्चर्ये युत्रीत्वात् स्वसेत्याश्चर्यम्। वा। वा गत्यादौ गतवान्। अभवत् सत्तां कृतवान्।* अत्रेति अजामेकामिति मन्त्रे। सा दृश्यते स्वयमेवेति तादृक्। कर्मकर्तरि प्रत्ययः। आकार आकृतिः तमादाय जातित्वात्। नित्यमेकमनेकानुगतं सामान्यमिति। विशिष्टे अजात्वविशिष्टे अजारूपेर्थे बाधितो योगो विशेषणमुपसंक्रामतीत्यजात्वं न जायते इति योगभाक्। अतः श्रौतेन पौराणस्य चतुर्मुखाजन्यायस्य बाधात्। पुराणानां वेदत्वपक्षे विकल्पः। तथा सति कया वृत्त्योच्यते इत्यत आहुः बन्धेति। बन्धकत्वमिन्द्रियविक्षेपकत्वं तस्मा अजात्वमुच्यते तेनाजापदप्रयोगः ज्योतिःस्थलेऽजापदप्रयोगेऽजात्वेन ज्योतिर्बोधो न ज्योतिष्ट्वेन, यथा कलशस्थले घटपदप्रयोगे घटत्वेन बोधो न कलशत्वेनेति

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ ११ ॥ (१।४।११)

मन्त्रान्तरेण पुनराशङ्क्य परिहरति। बृहदारण्यकषष्ठे श्रूयते।
'यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः।
तमेव मन्य आत्मानं विद्वान् ब्रह्माऽमृतोऽमृतम्' ॥

भाष्यप्रकाशः।

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ ११ ॥ सूत्रमवतारयन्ति मन्त्रान्तरेणेत्यादि। आशङ्क्येति सांख्यमतस्य श्रौतत्वमाशङ्क्य। तेन विषयरूपहेतुभेदादधिकरणान्तरत्वं वा, पूर्वशेषत्वान्न वेत्यपि बोधितम्। विषयमाहुः बृहदित्यादि अत्र षष्ठ इति काण्वपाठाभिप्रायेणोक्तम्। माध्यंदिनानां चतुर्थे दर्शनादिति। मन्त्रार्थस्तु, यस्मिन्नेते पञ्चादय आकाशान्ताः प्रतिष्ठितास्तमात्मानमेवं ब्रह्माऽमृतं विद्वानन्यो जीवः, अमृतो मुक्तो भवतीति शेषः। अन्यैस्तु तमेवात्मानं ब्रह्माऽमृतं विद्वानहममृत इति मन्य इति व्याक्रियते।

रश्मिः।

स्फुटत्वान्न कोपीत्यर्थः। सूत्रार्थः। कल्पनोपदेशाचकारात् पञ्चम्या लुक्। चकारात् परोक्षवादात्। मध्वादिष्विव मध्वादिवदित्यत्र सप्तम्यन्ताद्वतेर्व्याकृतत्वात् अजाशब्दस्याद्यसृष्टिरूपज्योतिर्वाचकत्वस्याविरोधः। विरोधः सहानवस्थानलक्षणः। अजात्वविशिष्टाजावाचकत्वेन सह ज्योतिर्वाचकत्वस्यानवस्थानं न। प्रत्यक्षवादे पूर्वस्य परोक्षवाद उत्तरस्य सत्त्वादिति। भाष्ये। वेद इति वेदस्य चेश्वरात्मत्वादिति भावः। **प्रकाशे** गौण्युक्तेव। अत्राजामेकां लोहितशुक्लकृष्णामिति विषयः। अत्राजाशब्देन सांख्यमतसिद्धा प्रकृतिरुच्यते वा अग्निसोमसूर्यविद्युदादिरूपं ज्योतिरुच्यते इति संशये प्रकृतिरिति पूर्वपक्षेऽजाशब्देन ज्योतिरेवोच्यत इति सिद्धान्तः। संगतिस्ततोक्ता निर्वाहकत्वरूपा ज्ञेया। पूर्वाधिकरणनिरूपणानन्तरं किं सांख्यनिराकरणनिर्वाहप्रयोजकमिति जिज्ञासया 'कल्पनोपदेशाच्च मध्वादिवदविरोधः' इत्यधिकरणनिरूपणमिति ॥ १० ॥

इति द्वितीयमधिकरणम् ॥ २ ॥

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ ११ ॥ भाष्ये। बृहदारण्यकेति माध्यंदिनानां षष्ठेध्याये 'अथ जनको ह वैदेहः कूर्चात्' इत्यारम्भके तत्रापि शारीरब्राह्मणे श्रूयते। **प्रकृते।** सूत्रमिति त्रिसूत्रमिदमधिकरणम्। तत्रात्र सूत्रे मन्त्रान्तरेण पुनराशङ्क्य परिहार इतरयोर्मन्त्रार्थः संख्यापूरणं च। एवमन्यत्रापि। **यस्मिन्नि**ति। पूर्वार्धं भाष्ये व्याकरिष्यते। उत्तरार्धं व्याकुर्वन्ति यद्यपि तमेव मन्येहमात्मानं विद्वान् वेदोवबोधयामि ब्रह्मामृतं कृष्णं सदानन्दं अमृतोहं मन्ये ब्रह्म सदमृतमानन्द इत्यर्थो भवति। तथापि पूर्वमन्त्रे 'यदैतमनुपश्यत्यात्मानं देवमञ्जसा। ईशानं भूतभव्यस्य न तदा विचिकित्सति' इति मन्त्रे आत्मदर्शी विशेषेण निवासं कर्तुं नेच्छतीत्युक्तम्। तत्रात्मदर्शनस्य पूर्वं सिद्धत्वाद्बोधनं नोपयुज्यत इत्यर्थान्तरमाहुः **तमात्मानमिति। ब्रह्मामृतं कृष्णम्।**

'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते' ॥ इति वाक्यात्।

अन्यैरिति बृहदारण्यकटीकाकृदादिभिः। शाब्दापरोक्षवादोत्र। तत्तच्छब्दार्थ एव जीवात्मानः तत्त्वमसीति वाक्येन ब्रह्मामृतं विद्वान् शाब्दज्ञानवान्। मन्ये अपरोक्षज्ञानवान्। अक्षरसस्तु शाब्दापरोक्षस्य दूषणादाकरे दूषितत्वं ज्ञेयम्। विषयवाक्यार्थ उक्तः। विषयस्त्वत्र पञ्चगुणिताः

सवत्सा ख्यामिहिता तथेयमिति उपदेशपदात् तथोपासनमभिप्रेतम्। चकारात् परोक्षवादोऽपि देवस्य हिताय। यथा आदित्यो वै देवमधु, वाचं धेनुमुपासीत। द्युलोकादीनां चाग्नित्वं पञ्चाग्निविद्यायां तथा प्रकृतेऽप्यविरोधः। योगरूढिव्यतिरेकेणाप्येषा वेदे शब्दप्रवृत्तिः। तस्मादजामात्रेण न सांख्यमतसिद्धिः॥ १०॥

इति प्रथमाध्याये चतुर्थपादे द्वितीयं त्रिसूत्रं चमसाधिकरणम्॥ २॥

भाष्यप्रकाशः।

'समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः' इत्यग्रिमग्रन्थेन तथावसायात्। एवं मधुविद्यायामपि, दृष्ट्वैव तृप्यन्तीति तृप्तिलिङ्गादादित्यस्य मधुत्वम्। नच विरोधः। सैषा त्रय्येव विद्या तपतीति श्रुत्या शब्दात्मकत्ववद् रसात्मकत्वेऽप्यदोषात्। एवमेव वाचो धेनुत्वमपि धरणीवज्ज्ञातव्यम्। एवं द्युलोकादीनामग्नित्वमपि। 'सर्वं सर्वमयम्' इति तापनीयश्रुतेः सर्वत्र सर्वसत्त्वात् तत्तदुद्भवानुद्भवयोर्भगवदिच्छया नियामकत्वेन प्रत्यक्षविरोधस्याकिंचित्करत्वादिति। तदेतदुक्तं चकारात् परोक्षवादोऽपीति। अनेनैवाशयेन सुबोधिन्यां निगमकल्पतरोरित्यत्र, असौ वा आदित्यो देवमध्विति स्वर्गस्थानां सूर्यो मधु। यथास्माकं सारघमित्युक्तम्। एतावान् परं विशेषो यच्छ्रुतौ परोक्षवादोऽत्र नेति न कोऽपि शङ्कालेशः॥ १०॥

इति द्वितीयं चमसाधिकरणम्॥ २॥

रश्मिः।

तद्वत्। तथा चाजामन्त्रे रूढमजापदम्। अजेतरेत्यत्रैव। मैवं योगेऽप्यजात्वमविरुद्धमिति। पाठकस्थले भाषकपदप्रयोगे पाठकस्य भाषकत्वेन बोधो न पाठकत्वेनेति तद्वत्। नन्वजेतरेत्यत्र योगो बाधित इति चेन्न। नित्यानित्यसंयोगभियाधिदैविकाजाऽजापदवाच्या नित्येति योगाविरोधात्। अत्रेति बन्धकत्वे। वृक्षो देहः अनीशा माया इन्द्रियरूपा अनीशतयेति वार्थः। तकारलोपः। अग्रिमेत्यजामन्त्राग्रिमग्रन्थेन। तथेति बन्धकत्वावसायात्। दृष्टान्ते परोक्षवादमाहुः एवं मध्विति। दृष्ट्वैवेति इदं दर्शनं भक्त्यनन्तरं दर्शनानन्तरं भक्तिर्वा 'दृष्ट एव स्नेहः' इति भाष्यात्। आदित्यपदस्यात्मन्यधिकरणे वा पारोक्ष्यं आदित्यत्वे वा पारोक्ष्यम्। आदित्यत्वस्य, ध्येयः सदा सवितृमण्डलमध्यवर्तीत्यन्तस्तद्धर्माधिकरणोक्तरूपत्वात् 'येनेन्द्रियेण यद्गृह्यते तेनैवेन्द्रियेण तद्गता जातिस्तदभावश्च गृह्यते' इति स्वीकारस्य मतान्तरीयत्वात्। एतादृशादित्यस्य अभेदान्वयी मधु तस्य ज्ञानकर्तृत्वात्। तदाहुरादित्यस्य मधुत्वमिति। विरोधः प्रत्यक्षविरोधः परोक्षवादे मानाभावादित्यर्थः। मानमाहुः सैषेति। श्रुत्येति महानारायणीयोपनिषच्छ्रुत्या। रसेति सर्वं सर्वमयमिति श्रुतेः। तथा च त्रयीविद्याया भक्तिरसात्मकोप्ययम् 'रसो वै सः' इति श्रुतेश्च। धरणीवदिति। भूमिर्धेनुर्धरणी लोकधारिणीति तैत्तिरीये यथा भूमेर्धेनुत्वमाधिदैविकं रूपं श्रीभागवते तथा वाचोप्याध्यात्मिकमाधिदैविकं ज्ञातव्यम्। परोक्षवादे, प्रत्यक्षवादे गौणी स्पष्टा। युक्तिमाहुः तापीति नृसिंहतापिनीयश्रुतेः। नन्विदमपि प्रत्यक्षबाधितं तत्राहुः तत्तदिति। अकिमिति। श्रुत्यपेक्षया। अत्रापि परोक्षवादे। प्रत्यक्षवादे तु गौण्येवमत्र परोक्षवादो वेदान्तत्वेन योगादङ्गतीत्यग्निरिति द्युलोकादिरग्निर्गतेत्येव सर्वस्य सर्वमयत्वे। तदेतदिति वस्तुत इत्यादिनोक्तं भाष्यीयम्। चकारात् परोक्षवादोपीति दार्ष्टान्तिके दृष्टान्ते चास्माभिरुक्तं परोक्षवादार्थम्। अनेनेति परोक्षवादोक्तेन। सारघमिति सरघा मधुमक्षिका तासु जातं सारघं 'तत्र जातः' इति सूत्रेणाण्। अत्रेति सारघे। न कोपीति। अविरोधपदार्थस्य भाष्ये

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ ११ ॥ (१।४।३)

मन्त्रान्तरेण पुनराशङ्क्य परिहरति। बृहदारण्यकपष्ठे श्रूयते।
'यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः।
तमेव मन्य आत्मानं विद्वान् ब्रह्माऽमृतोऽमृतम्' ॥

भाष्यप्रकाशः।

न संख्योपसंग्रहादपि नानाभावादतिरेकाच ॥ ११ ॥ सूत्रमवतारयन्ति **मन्त्रान्तरेणे**त्यादि। **आशङ्क्ये**ति सांख्यमतस्य श्रौतत्वमाशङ्क्य। तेन विषयरूपहेतुभेदादधिकरणान्तरत्वं वा, पूर्वशेषत्वान्न वेत्यपि बोधितम्। विषयमाहुः **बृहदि**त्यादि अत्र पष्ठ इति काण्वपाठाभिप्रायेणोक्तम्। माध्यंदिनानां चतुर्थे दर्शनादिति। मन्त्रार्थस्तु, यस्मिन्नेते पञ्चादय आकाशान्ताः प्रतिष्ठितास्तमात्मानमेवं ब्रह्माऽमृतं विद्वानन्यो जीवः, अमृतो मुक्तो भवतीति शेषः। अन्यैस्तु तमेवात्मानं ब्रह्माऽमृतं विद्वानहममृत इति मन्य इति व्याक्रियते।

रश्मिः।

स्फुटत्वान्न कोपीत्यर्थः। सूत्रार्थः। कल्पनोपदेशाचकारात् पञ्चम्या लुक्। चकारात् परोक्षवादात्। मध्वादिष्विव मध्वादिवदित्यत्र सप्तम्यन्ताद्वतेर्व्याकृतत्वात् अजाशब्दस्याद्यसृष्टिरूपज्योतिर्वाचकत्वस्याविरोधः। विरोधः सहानवस्थानलक्षणः। अजात्वविशिष्टाजावाचकत्वेन सह ज्योतिर्वाचकत्वस्यानवस्थानं न। प्रत्यक्षवादे पूर्वस्य परोक्षवाद उत्तरस्य सत्त्वादिति। **भाष्ये**। **वेद** इति वेदस्य चेश्वरात्मत्वादिति भावः। **प्रकाशे गौण्युक्तेव**। अत्राजामेकां लोहितशुक्लकृष्णामिति विषयः। अत्राजाशब्देन सांख्यमतसिद्धा प्रकृतिरुच्यते वा अग्निसोमसूर्यविद्युदादिरूपं ज्योतिरुच्यते इति संशये प्रकृतिरिति पूर्वपक्षेऽजाशब्देन ज्योतिरेवोच्यत इति सिद्धान्तः। संगतिस्तत्रोक्ता निर्वाहकत्वरूपा ज्ञेया। पूर्वाधिकरणनिरूपणानन्तरं किं सांख्यनिराकरणनिर्वाहप्रयोजकमिति जिज्ञासया 'कल्पनोपदेशाच्च मध्वादिवदविरोधः' इत्यधिकरणनिरूपणमिति ॥ १० ॥

इति द्वितीयमधिकरणम् ॥ २ ॥

न संख्योपसंग्रहादपि नानाभावादतिरेकाच ॥ ११ ॥ **भाष्ये**। **बृहदारण्यके**ति माध्यंदिनानां पष्ठेध्याये 'अथ जनको ह वैदेहः कूर्चात्' इत्यारम्भके तत्रापि शारीरब्राह्मणे श्रूयते। **प्रकृते**। **सूत्रमि**ति त्रिसूत्रमिदमधिकरणम्। तत्रात्र सूत्रे मन्त्रान्तरेण पुनराशङ्क्य परिहार इतरयोर्मन्त्रार्थः संख्यापूरणं च। एवमन्यत्रापि। **यस्मिन्नि**ति। पूर्वार्धं भाष्ये व्याकरिष्यते। उत्तरार्धं व्याकुर्वन्ति यद्यपि तमेव मन्येहमात्मानं विद्वान् वेदोवबोधयामि ब्रह्मामृतं कृष्णं सदानन्दं अमृतोहं मन्ये ब्रह्म सदमृतमानन्द इत्यर्थो भवति। तथापि पूर्वमन्त्रे 'यदैतमनुपश्यत्यात्मानं देवमञ्जसा। ईशानं भूतभव्यस्य न तदा विचिकित्सति' इति मन्त्रे आत्मदर्शी विशेषेण निवासं कर्तुं नेच्छतीत्युक्तम्। तत्रात्मदर्शनस्य पूर्वं सिद्धत्वाद्बोधनं नोपयुज्यत इत्यर्थान्तरमाहुः **तमात्मानमि**ति। **ब्रह्मामृतं कृष्णम्**।

'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते' ॥ इति वाक्यात्।

अन्यैरिति बृहदारण्यकटीकाकृदादिभिः। शाब्दापरोक्षवादोत्र। तत्तच्छब्दार्थ एव जीवात्मानः तत्त्वमसीति वाक्येन ब्रह्मामृतं विद्वान् शाब्दज्ञानवान्। मन्ये अपरोक्षज्ञानवान्। अस्वरसस्तु शाब्दापरोक्षस्य दूषणादाकरे दूषितत्वं ज्ञेयम्। विषयवाक्यार्थ उक्तः। विषयस्त्वत्र पञ्चगुणिताः

इति। यद्यप्यत्र पञ्चजनाः पञ्चोच्यन्ते, न पञ्चानां पञ्चगुणत्वम्। समासानुपपत्तेः। तथा हि। आद्यः पञ्चशब्दः संख्यावाची, संख्येयवाची वा? । आद्ये पञ्चसंख्याया एकत्वान्न षष्ठीसमासः। संख्यायां संख्याभावाच्च। संख्येयपरत्वे

भाष्यप्रकाशः ।

अनेन मन्त्रेण कथमाशङ्कोत्थानमित्याकाङ्क्षायामस्मिन् मन्त्रे पञ्चशब्दद्वयदर्शनात् पञ्चसंख्याविषयकपञ्चसंख्यान्तरश्रवणाभिमानरूपेण मूढग्राहेणेति वक्तुं तं व्युत्पादयन्ति यद्यपीत्यादि । तथाच तद्विवक्षितसंख्यानुपसंग्रहान्मूढग्राह इत्यर्थः । कथं समासानुपपत्तिरित्याकाङ्क्षायां तां व्युत्पादयन्ति तथा हीत्यादि। अयमर्थः। संख्योपसंग्रहार्थं पञ्चानां पञ्चेति समासे वाच्ये पञ्चसंख्याया एकत्वाद् ब्राह्मणसमाज इत्यत्र ब्राह्मणानामित्यस्येव पञ्चानामित्यस्य संख्यावाचिनो बहुवचनान्तस्य प्रवेशो न वक्तुं शक्य इति न षष्ठीसमासः। यदि च पञ्चशब्दस्य नित्यं बहुवचनान्तत्वेन दारा इत्यादिवद् बहुत्वस्याविवक्षितत्वेन प्रवेशो विभाव्यते, तदापि पञ्चपञ्चेत्यस्य पञ्चसंख्यासंबन्धिनी पञ्चसंख्येत्यर्थो वक्तव्यः। संबन्धश्च विषयतया वक्तव्यः। तथा सति तस्यां संख्यायां

रश्मिः ।

पञ्चेति व्याख्याय सांख्योक्तानि पञ्चविंशतितत्त्वानि ग्राह्याणि वाक्प्राणश्चक्षुःश्रोत्रमन्नं मन इति पञ्चकं पञ्चजनशब्देन ग्राह्याणीति अत्र पूर्वपक्षमनुवदन्ति स्माचार्याः इति सूत्रयामासुरनेनेति। पञ्चेति पञ्चसु पञ्चेत्यत्र तं मूढग्राहं मूढो मोहयुक्तस्तस्य ग्राहो ग्रहणम्। तद्धीति गुणो विंशतिस्तत्त्वं 'गुणोऽप्रधाने रूपादौ' इति विश्वात् रूपादिनैयायिकोक्तोतः संख्यालाभः। भाष्ये। पञ्चानां पञ्चगुणत्वे पञ्चविंशतिसंख्यालब्ध्या न पञ्चानामिति तेषां सांख्यपदार्थश्रौततत्त्वकल्पकानां विवक्षिता संख्या पञ्चविंशतिसंख्या। आद्य इत्यादि भाष्यार्थमाहुः अयमिति। संख्येति पञ्चविंशतिसंख्योपसंग्रहार्थं पञ्चानां संख्यानां पञ्चेति षष्ठीतत्पुरुषः। षष्ठ्या वैशिष्ट्यमर्थः। गुणगुणिनोः समवायात् 'विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः। संख्यार्थे द्विबहुत्वे स्तः' इत्यमरात् पञ्चसंख्या न पञ्चत्वम्। पञ्चेति पञ्चपञ्चकेषु एकं पञ्चकं पञ्चतत्त्वरूपं पञ्चसंख्याविशिष्टमिति प्रतीतेः सामानाधिकरण्यसंबन्धेन पञ्चसंख्यायामेकत्वं एकं रूपं रसात्पृथगित्यत्र रूपे गुणे एकत्वसंख्यावत्। न षष्ठीति भाष्यं विवृण्वन्ति स्म ब्राह्मणेति। ब्राह्मणानां समाजः। अनेन प्रकारेण प्रकृतिविचारे प्रत्ययार्थबहुत्वसंख्यास्मरणात्तद्विचार्यते इत्यस्येति। अत्र प्रकृत्यर्थे प्रत्ययार्थबहुत्वस्याश्रयतयान्वयः बहुत्वावच्छिन्नब्राह्मणसंबन्धी, अस्य समाजपदार्थेऽभेदान्वयः संबन्धस्य पदार्थमर्यादयाऽभावात्। तादृशसंबन्ध्यभिन्न एकत्वविशिष्टः समाज इति बोधः। एकत्वस्य समाजेन्वयात् बहुत्वसंख्याया इव इत्यस्य। प्रवेश इति न च पञ्चपदं पञ्चसंख्यावाचकं भागत्यागलक्षणिकया सामानाधिकरण्येनैकं तत्रान्वयीत्युक्तम्। तत्र बहुत्वं पञ्चपदवाच्यसंख्येयान्वयि वाच्यं बहुत्वावच्छिन्नपञ्चसंख्येयनिष्ठपञ्चनिष्ठमेकं नैयायिकमते पञ्चसंख्यायामेक इत्यत्र प्रथमान्तविशेष्यकबोधाङ्गीकारादिति वाच्यम्। भागत्यागलक्षणिकया बहुत्वान्वयिपञ्चसंख्येयाप्रतीतेर्बहुत्वान्वयप्रवेशस्य वक्तुमशक्यत्वात्। नेति बहुत्वस्यैकार्थीभावेऽन्वयाऽप्रतीतेः सामर्थ्याभावान्न षष्ठीसमासः। ननु बहुत्वस्य विवक्षा नास्ति इत्यप्रतीतत्वेपि समासः सामर्थ्यादिति चेत्तत्राहुः यदि चेति। तस्यामिति पञ्चानां पञ्चेत्यत्र विषयतासंबन्धोङ्गीकृतः विषयतासंबन्धेन सत्त्वे सप्तम्या भाव्यमिति सप्तम्युक्ता।

भाष्यप्रकाशः ।

तत्संख्याऽभावात् समासानुपपत्तिः । अनेन सप्तमीसमासोऽपि नेत्युक्तप्रायम् । एवमन्येऽपि चोद्याः । यदि चाद्यस्य पञ्चशब्दस्य संख्येयपरत्वेन द्वितीयस्य संख्यापरत्वेन सप्तमीसमासो भाव्यते, तदा पञ्चसंख्यासंख्येयेषु पञ्चसंख्येत्यर्थलाभादभीष्टायाः संख्याया असिद्ध्या समासवैयर्थ्यम् । यदि च पूर्ववदाद्यस्य संख्यार्थत्वं, द्वितीयस्य संख्येयार्थत्वं, तदापि षष्ठीसमासे संख्येयबोधकपदादेव विशेषणीभूतसंख्यालाभेन पूर्वपदस्यानन्वयः । सप्तमीसमासे तु संख्यायां संख्येयाभावादुत्तरपदस्यानन्वयः । न चात्रासूर्यंपश्या राजदारा इतिवदसमर्थसमास एवास्त्विति वाच्यम् । अत्र 'असूर्यललाटयोर्दृशितपोः' इतिवत् तादृशसमासज्ञापकाभावादिति । एतेनान्येऽप्य-

रश्मिः ।

संख्यायामिति भाष्यं विवृण्वन्ति स्म **अनेनेति** । पञ्चानां पञ्चगुणत्वमित्यत्र पञ्चानां पञ्चेति विग्रहे षष्ठ्या विषयत्वसंबन्धाङ्गीकारेण संख्यायां संख्यानङ्गीकारेण च पञ्चसंख्यासु पञ्चसंख्येया इति विग्रहः । द्वितीयपञ्चपदं संख्यावाचि चेत् पञ्चानां पञ्चगुणत्वं, अत्र पञ्चानां पञ्च इत्यत्र घटानां घटा इतिवदतिमूढग्राह्यत्वं पञ्चानां सकलानां पञ्चविंशतिपञ्चेति । यदि च शते पञ्चाशदितिवदुच्यते तथापि द्रव्यादिगतायाः एव प्रत्ययाङ्गीकाराददोषः । **एवमन्य** इति द्वन्द्वाव्ययीभावयोरसंभवात्तत्पुरुषबहुव्रीहिद्विगुकर्मधारया इत्यर्थः । अत्र षष्ठीसप्तम्योस्तत्पुरुषस्योक्तत्वात् मूढग्राह्यत्वात् तृतीयादिसमासस्तु न सूत्राभावात् । **संख्येयपरत्व** इत्यादि भाष्यं विवृण्वन्ति स्म **यदि** चेति, तं समासमाहुः तदेति, पञ्चेति संख्यावाचकः । **अभीति** एतत्समासे पञ्चत्वमेवेति अभीष्टायाः पञ्चविंशतिसंख्यायाः । **पूर्वचचेदनन्वय** इति व्याचक्रुः **यदि** चेति चेद्यदि पूर्ववदिति संख्यार्थत्वमित्यनेनान्वयि । संख्यायां संख्याभावादित्युक्तभाष्यात् । अत्र भाष्य एव संख्यावाचकत्वं पञ्चपदस्य द्वितीयस्य तदा तु संख्येयार्थत्वमित्यन्तमन्वयः । **संख्येयेति** पञ्चानां पञ्चेत्यत्र संख्येयवाची पञ्चशब्दः । स च पञ्चविशिष्टवाचकः । तत्र पञ्चत्वे पञ्चानामित्युक्तपञ्चसंख्यानामभेदान्वयः स च नास्ति उद्देश्यतानवच्छेदकविधेययोरैक्यात् । घटो घट इत्यत्र यथा । **विशेषणीति** पञ्चसंख्यालाभात् । **पूर्वपदस्येति** पञ्चानामिति पदस्य । हेतुभाष्यमवतारयन्ति स्म **न चात्रेति** । अत्र पञ्चानां पञ्चेत्यत्र षष्ठीति सूत्रेण वा कृतसमासके । **असमर्थेति** दृशिना नञः संबन्धादसूर्यमित्यसमर्थसमासः सूर्यं न पश्यन्तीत्यसूर्यंपश्याः इत्यर्थात् । अत्रासूर्योपपदे दृशेः खश् प्रत्ययः कृतः । मनोरमात्र गुप्तिपरं चेदं वचनं यत्परिहार्यदर्शनं सूर्यमपि न पश्यन्ति सत्यपि सूर्यदर्शने प्रयोगो भवत्येव यदा तु सूर्यदर्शनाभावमात्रं सूर्येतरस्य चन्द्रादेः दर्शनं वा विवक्षितं तदा खश् न भवत्यनभिधानात् इति । तथा च दार्ष्टान्तिकेऽसमर्थसमासः । पञ्चानां पञ्चत्वानां व्यपेक्षा जना इत्यनेन जना इत्यस्य पञ्चेत्यनेन पञ्चानामाश्रयतया संबन्धिनो जनास्ते च पञ्च पञ्चगुणिताः पञ्चेति पञ्चविंशतिसंख्या लब्धा । अयं समास एवास्त्विति वाच्यमित्यर्थः । पञ्चानां जनाः पञ्चेत्यर्थात् । असमर्थसमासत्वं तु समर्थपदमहिम्ना समासपदसंनिवेशे 'समर्थः पदविधिः' इत्यत्र व्याख्यातं सामर्थ्यं तद्विशिष्टत्वम् । सामर्थ्यं च व्यपेक्षालक्षणं एकार्थीभावलक्षणं च, अजहत्स्वार्था वृत्तिः जहत्स्वार्था वृत्तिश्च उभयोः पर्यायरूपे । जहदजहत्स्वार्थवृत्तिरूपसामर्थ्यविशिष्टत्वं समर्थत्वं तद्विशिष्टः समर्थः । न समर्थोऽसमर्थः । तादृशसमसनत्वम् । तथा च राजपुरुष इत्यत्र वृत्तिद्वयमस्ति तद्वत्प्रकृते

१. संख्यानाम् ।

द्वितीयस्य संख्यात्वे पञ्चत्वमेव पूर्वचचेदनन्वयः । विधायकाभावाच । अतो वीप्सा । पञ्चजनसंज्ञाविशिष्टानां वा पञ्चत्वमिति यथासंभवमर्थः । तथापि मूढग्राहेण संख्योपसंग्रहेपि लक्षणार्थं केनचिद्धर्मेण पञ्चसंग्राहकेण भाव्यम् । स च तेषां मते न संभवति । तथा सति पञ्चैव तत्त्वानि स्युः । अतस्ते

भाष्यप्रकाशः ।

समर्थसमासा निवारिताः । एवं समासानुपपत्त्या तन्मतं दूषयित्वा सूत्रोक्तं पूर्वपक्षहेतुं साधयितुं पुनस्तन्मतोत्थापनायाहुः अत इत्यादि । यतः पूर्वोक्तरीत्या न पञ्चविंशतिसंख्योपसंग्रहोऽतस्त्वया असमस्तयोरेव पञ्चपञ्चेति पदयोर्वीप्सा द्विरुक्तिर्वा, अथ समासान्तरेण पञ्चजनसंज्ञाविशिष्टानां वा पञ्चत्वं यथासंभवं त्वदभीष्टं यथा स्यात् तथा, अर्थो वक्तव्यः । स चेत्थम् । वीप्सापक्षे पञ्चसंख्यायाः पञ्चगुणत्वबोधकस्याभावाद्दशानामेव बोधो न पञ्चविंशतीनाम् । अतो यस्मिन्ननाः पञ्चशः पञ्चेत्येवं संख्योपसंग्राह्या । द्वितीयपक्षादरे तु पञ्चजनपदस्य, 'दैत्यः पञ्चजनो महान्' इत्युक्ते दैत्ये वा, 'स्युः पुमांसः पञ्चजनाः' इतिकोशोक्तेषु मनुष्येषु वा रूढिमाश्रित्य पञ्च पञ्चपूल्य इतिवत् पञ्चानां पञ्चजनानां समाहारः पञ्चजना इति समासो लिङ्गव्यत्ययादेश्छान्दसत्वं च वक्तव्यम् । अथवा 'दिक्संख्ये संज्ञायाम्' इत्यनेन सप्तर्षय इतिवत्

रश्मिः ।

नेति वैयाकरणभूषणसारे विस्तरः । असमर्थेति यथा देवदत्तो राज्ञः पुरुषो विष्णुमित्रस्य इत्यत्र राजपुरुष इति समासस्तद्वत् । पञ्चत्वानां संबन्धिनां जनाः पञ्च पञ्चगुणिताः पञ्च पञ्चजनाः । पञ्चसु जनाः पञ्चपञ्चगुणिता इत्यर्थे पञ्चविषया जनाः पञ्चगुणिता पञ्चपञ्चेति द्वितीयः समासः । पञ्चसु स्थलेषु जनाः पञ्चपञ्चगुणिताः पञ्चपञ्च । षष्ठीति सूत्रेण सप्तमीति योगविभागात् । सुपेति सूत्रेण वा समासास्तेषामनुपपत्तेर्निवारिताः ॥ भाष्ये । विधायकेति । 'न निर्धारणे' इति सूत्रेण 'पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन' इति सूत्रेण गुणे परे समासनिषेधे विधायकाभावात् । 'असूर्यललाटयोर्दृशितपोः' इतिवत् । पूर्वेति संख्योपसंग्रहादिति हेतुम् । स चेति वीप्सयार्थः । समासान्तरेणार्थश्च । एवं सांख्यमतमुत्थाप्य पूर्वपक्षहेतुं साधयामासुः अत इति । पञ्चश इति 'संख्यैकवचनाच वीप्सायाम्' इति शस् । पञ्च पञ्च ददति द्वितीयपञ्चशब्दस्य पञ्चकवाचकत्वाद्वीप्सया पञ्चकलाभः । जनाः पञ्च पञ्चकान् ददतीत्यर्थः । अतो वीप्सेति भाष्यं व्याख्याय पञ्चजनसंज्ञेति भाष्यं व्याचख्युः द्वितीयपक्षेति । रूढिमिति । नृवर्गे पञ्चभिर्भूतैर्जन्यते इति पञ्चजनाः घञ् । जनिवध्योश्चेति न वृद्धिः । यद्वा पञ्चजना उत्पादका यस्येति विग्रहौ प्रकृतिप्रत्ययज्ञानार्थं, नावयवशक्त्यर्थम् । समुदायशक्त्यपहारात् । पञ्चानां पञ्चपूलीनां समाहार इत्यत्र 'संख्यापूर्वो द्विगुः' इति समासो विहितः । ततो 'द्विगोः' इति सूत्रेण ङीप् विधानात् समाहारप्रतीतौ समाहाराः कति इत्याकाङ्क्षायां सत्यां पञ्चेति पदान्तरान्वयो युक्त इतिवत् । अत्र शंकरभाष्यादौ पूलशब्दः 'पुलं तु विपुलेन्यवत् । पुलः स्यात्पुलके चापि' इति विश्वात् । ह्रस्वादिः पुलशब्दः । मूलशब्दो वा 'मूलं मोघे शिफायां च भे निकुञ्जेन्तिकेपि च' इति विश्वः । शिफा जटा । लिङ्गेति स्त्रीलिङ्गव्यत्ययैकवचनव्यत्ययौ । सप्तेति गगने शकटाकारं तारासप्तकं सप्तर्षिसंज्ञकं मण्डलम् । एवं भाष्यं व्याख्याय तस्य विवक्षितसंख्यासाधनत्वाय पूर्वस्मिन् पक्षे पञ्चविंशतिसंख्या स्पष्टेति । वीप्सापक्षमपहाय समास-

भाष्यप्रकाशः।

पञ्च च ते पञ्चजनाश्चेति संज्ञासमासो वा वक्तव्यः। तत्र पूर्वस्मिन् विकल्पे दैत्यस्यैकत्वेन समाहारासंभवान्न समासः। द्वितीयविकल्पे तु मनुष्याणां बहुत्वेन समूहघटकतया समाससंभवेऽपि विशेषणीभूतपञ्चत्वोपपत्त्यर्थं, 'वैवस्वतो न तृप्यति पञ्चभिर्मानवैर्यमः' इति मन्त्रोक्ता वा, जना यदग्निमयजन्त पञ्चेति यागसंबन्धलिङ्गेन निषादपञ्चमाश्चत्वारो वर्णा वा ग्राह्याः। तदापि न पञ्चविंशतिसंख्योपसंग्रहः। संख्याया एकस्मिन्नेव पञ्चशब्दे प्रविष्टत्वेन गुणकसंख्यान्तरस्याभावात्। तथा संज्ञासमासपक्षेऽपि। वस्तुतस्तु वशिष्ठादिषु सप्तर्षय इतिवत् पञ्च पञ्चजना इति संज्ञायाः कुत्राप्यभावात् समासस्यैवानुपपत्तिः। अत एतत्सर्वं विहाय जनयन्तीति जना इति योगं चाश्रित्य तत्त्वानि ग्राह्याणि। ततः पञ्चानां जनानां समाहारः पञ्चजनाः, पञ्चानां पञ्चजनानां सः पञ्चपञ्चजना इति समाहारसमासद्वयस्य वा पञ्चगुणिताः पञ्च पञ्चपञ्च, ते च ते जनाश्चेत्युत्तरपदलोपिगर्भस्य कर्मधारयस्य वा आश्रयणेन पञ्चविंशतिसंख्याद्युपसंगृह्य वेदान्ते

रश्मिः।

पक्षे पञ्चविंशतिसंख्यासाधकत्वं स्पष्टमाहुस्तत्र पूर्वेति। निषादेति ब्राह्मणाच्छूद्रायां जातो निषादः। यागसंबन्धस्तु 'निषादस्थपतिं याजयेत्' इति श्रुतेः। एकस्मिन्निति विशेषणे द्वितीयस्य रूढपदान्तर्गतत्वात्। गुणकेति गुणः विंशतिसंख्या तत्र पञ्चसंख्या पञ्चशब्देनोक्ता विंशतिः संख्या गुणपदार्थः। गुण एव गुणकः। 'गुणोऽप्रधाने रूपादौ' इति विश्वः। रूपादिः रूपरसगन्धस्पर्श इत्यादिनैयायिकोक्तः। तत्र संख्या गुणः। तथेति यथा समाहारद्विगुपक्षे तथा। एवमुपपादितेपि भाष्ये समासपक्ष एव पञ्चजनपदे व्याकरणसंचारात् प्रतिपिपादयिषितवाक्यशेषाच्छक्तिग्रहे पञ्चजनपदे उपपदमतिङिति सूत्रेणापि समासस्य वैयर्थ्यमापादयतीति पञ्चजनपदे उक्तव्याकरणवैफल्याय पक्षान्तरमाहुः वस्तुत इति। न चात्रापि व्याकरणं वक्ष्यमाणं भवतीति 'दिक्संख्ये संज्ञायाम्' इति व्याकरणं कुतो नेति शङ्क्यम्। पञ्चजनपदे अन्यस्य वक्ष्यमाणस्यापि व्याकरणस्य क्लिष्टत्वेन युक्त्यन्तरतौल्यात् स्पष्टस्य दिक्संख्येति सूत्रस्याप्राप्तिमाहुः वशिष्ठेति। ननु पूर्वपक्षभाष्यस्य पञ्चजनसंज्ञाविशिष्टानां वेत्यस्य विरोध इति चेन्न। पञ्चजनपदे संज्ञासमासं परित्यज्य वाक्यशेषेण प्राणादिवाचकत्वस्योत्तरसूत्रभाष्य एवादरात्। किं च प्राणादिवाचकत्वेपि समासस्तु दिक्संख्येत्यनेनैव। न च सप्तर्षय इतिवत्पञ्चजना इति संज्ञायाः क्वाप्यदर्शनान्न 'दिक्' समासः किंतूपपदमतिङिति सूत्रेण समास इति वाच्यम्। कर्मणि चेति निषेधात्। न च कुम्भकार इत्यत्रेवोभयप्राप्त्यभावादस्तु समासो बुद्धेः पञ्चवृत्तिं जनयन्तीति प्राणादयः पञ्चजनाः इति भाष्यादिति वाच्यम्। कुम्भकार इत्यत्रास्तु उपपदमतिङिति सूत्रेण समास इह तु पञ्चसंख्याश्रावणात् दिक्संख्येतिसूत्रेण समासः। समानाधिकरण एवेति नियमाश्रयणे तु उपपदमतिङिति सूत्रेण समासः। वसिष्ठादयस्तु 'सप्तर्षीणां तु यौ पूर्वौ' इति श्लोकव्याख्याने द्वादशस्कन्धे सन्ति वसिष्ठो, मरीचिरङ्गिरसः, अत्रिः, पुलस्त्यः, पुलहः, क्रतुरिति अयं प्रकाशो दिक्संख्ये संज्ञायामिति सूत्रप्रवृत्तिर्या पञ्चजनपदे तस्या नैर्बल्यं प्रतिपादयति। दिक्संख्यासमासप्रसङ्गात्। उत्तरसूत्रे वक्तव्यमत्र पूर्वपक्षग्रन्थ उक्तम्। संख्योपसंग्रहादपि नेति सूत्रांशं व्याकरिष्यन्तो यथा संभवमिति भाष्येण वीप्सादिक्संख्येतिसमासयोरनाश्वासूचनादाहुः अत इति। यथासंभवमिति भाष्यतात्पर्यात्। जना इति पचाद्यच्। उपपदाभावान्नान्येष्वपि दृश्यत इति डः। योगमिति। तथा च योगरूढं पदमिति भावः। अवयवशक्तेः कुलालादौ सत्त्वात्। उत्तरेति पञ्चगुणिता इत्यत्र पञ्चोत्तरपद इत्यर्थः। शाकपार्थि-

नानाभावा एव स्वीकर्तव्याः । यद्यपि भूततन्मात्राकृतिचित्त्यन्तःस्थितत्वधर्मा वक्तुं शक्यन्ते । तथापि न ते तथोक्तवन्तः ।

भाष्यप्रकाशः ।

मोक्षाधिकारान्मुमुक्षुभिः कपिलस्मृतिसिद्धानि पञ्चविंशतितत्त्वानि ग्राह्याणीति तन्मतस्यापि श्रौतत्वकल्पनं मूढग्राह इतीदं सर्वं संख्योपसंग्रहादपीत्यनेनोत्थाप्य, नेत्यनेन निषेधन्ति । तत्र हेतुर्नानाभावादिति । तद् व्याकुर्वन्ति **तथापीत्यादि** । एवं बाधेऽप्युक्तरीत्या मूढग्राहेण संख्योपसंग्रहेऽपि जनशब्दवाच्यानां तत्त्वानां प्रत्यभिज्ञानार्थं तत्पञ्चकनिष्ठपञ्चत्वसंग्राहकेण केनचिद्धर्मेण सांख्यमते भाव्यम् । तादृशश्च धर्मस्तन्मते अप्रसिद्ध इति न संभवति । तदसंभवे सति पञ्चैव तत्त्वानि स्युर्न तु पञ्चपञ्च । अतस्तेषां संख्यासंग्रहस्यावश्यकत्वात् पञ्चकनिष्ठपञ्चत्वसंग्राहका धर्मा **नानाभावाः**, प्रकृतित्वादिधर्मेभ्योऽतिरिक्तो भावो धर्मो येषां तादृशाः स्वीकर्तव्याः ।

रश्मिः ।

वादिराकृतिगण इति भावः । **पञ्चविंशतीति** पञ्चगुणिताः पञ्च पञ्चविंशतिः संख्या पञ्चानां जनानां समाहार इत्यत्र समाहारः पञ्चानां जनानामेवैकैकस्य पञ्चकरणं ततः पञ्चकृतस्य जनस्य पञ्चत्वाय पञ्चानां पञ्चजनानां समाहारः पञ्चकरणं पञ्च पञ्चजना इति पञ्चविंशतिसंख्या तामुपसंगृह्णेत्यर्थः । सौत्रापिपदार्थं भाष्ये तमाहुः **मूढेति** । अपि गर्हायाम् । मूढग्राह इति गर्हा सप्तम्यन्तपदं मूढेन मोहयुक्तेन ग्राहो ग्रहणं यस्य समासमात्रस्य स मूढग्राहकस्तस्मिन् । **निषेधन्तीति** सूत्रकारो निषेधति । तत्रेति निषेधे हेतुः सूत्रे नानाभावादिति । **एवमिति** पूर्वोक्तप्रकारेणातः एतत्सर्वमित्युक्तसमासयोरर्थबाधे । बाधस्तु पञ्चपदस्य पञ्चगुणितरूपत्वं कल्पितं अन्यस्यार्थस्य संभवात् । गौरवात् । समाहारे एकैकस्य पञ्चकरणमित्यपि न समाहृतिस्तु इति शब्दादिवर्गीयामरकोशात् ।

'विस्तरेणोपदिष्टानामर्थानां सूत्रभाष्ययोः ।
निबन्धो यः समासेन संग्रहं तं विदुर्बुधाः' ॥ इति ।

'संग्रहो बृहदुद्रङ्गे मुष्टिसंक्षययोरपि' इति हैमः । अपि गर्हायाम् । मूढग्राहो गर्हा । लक्षणेति भाष्यार्थमाहुः **जनशब्देति** । **तत्त्वानामिति** पञ्चविंशतितत्त्वानाम् । पञ्च पञ्चजना इत्यत्र प्रत्यभिज्ञानार्थम् । जनपञ्चकनिष्ठपञ्चत्वसंग्राहकेण । पञ्चेति भाष्यस्य संख्यापरत्वस्फोरणार्थं भावप्रत्ययो न तु भाष्ये पञ्चपदं भावप्रधानमिति बोधनार्थम् । 'विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः' इत्यमरात् । **केनचिदिति** द्वितीयपञ्चपदं पञ्चगुणेषु लाक्षणिकम् । शक्यसंबन्धो लक्षणा संबन्धश्च स्वरूपः गुणपदवाच्यविंशतिसंख्यायाम् । तथा च स्वरूपसंबन्धः कश्चिद्धर्मस्तेन । स चेति भाष्यं विवृण्वन्ति **तादृशश्चेति** । स धर्मो दृश्यते स्वयमेव । त्यदादिष्विति कन् । अत्रेति । यथा नैयायिकमते शब्दप्रत्यक्षानुमितयः तथा सांख्यमतेपि स्वरूपसंबन्धो नैयायिकमते नैतेषां मते इति भावः । **तथासतीति** भाष्यं विवृण्वन्ति **तदसमिति** अयमपि क्वचित्प्रकारोतस्तथापदार्थः । पञ्चानां पञ्चगुणत्वमित्यत्र पञ्चगुणेषु लक्षणाभावाद्गुणाबोधे पञ्चानां पञ्चानां पञ्चेति स्थितौ पञ्चैव तत्त्वानि स्युरित्यर्थः । **पञ्चपञ्चेति** पञ्च पञ्चगुणिताः । **अतस्त** इति भाष्यं विवृण्वन्ति **स अत** इति पञ्चतत्त्वापत्तेः । तेषां संख्यानां तत्त्वानां वा । प्रेति आदिपदेन महत्तत्त्वादित्वे । **अतिरिक्त** इति । नानापदार्थः । नाना भिन्नवाची नैयायिकभेदवादे य इह नानेव पश्यतीति श्रुतिविचारे । विनार्थेपि । 'नाना विनार्थेपि भवेत्' इति विश्वात् । अपिना 'नानानेकोभयार्थयोः' इति विश्वोक्तम् ।

भाष्यप्रकाशः।

न च तादृशामभावः। भूतादिषु भूतत्वतन्मात्रात्वाकूतित्वचित्तित्वानां प्रकृतिपुरुषमहदहंकारमनस्सन्तःस्थत्वस्येत्येवं तादृशां वक्तुं शक्यत्वात्। यद्यप्येवं शक्यन्ते वक्तुं तथापि न ते तथोक्तवन्तः। मूलप्रकृतिरित्यादिना एकैकनिष्ठसप्तनिष्ठषोडशनिष्ठानां चतुर्णामेव धर्माणां स्वाभिमतसंख्यासंग्राहकत्वेनोपगमात्। तथा चायं सूत्रार्थः। पञ्चपञ्चजना इत्यत्र केनचित् समासेन संख्योपसंग्रहादपि न सांख्यमतस्य शब्दवत्त्वम्। कुतः? नानाभावात्। संख्यासंग्राहकधर्माणां तन्मते पञ्चपञ्चकनिष्ठधर्मभिन्नत्वेन विद्यमानत्वात्। यदि हि तत्त्वेषु श्रौतत्वं तदभिप्रेतं स्यात् संग्राहकधर्माणां श्रौतशब्दविरुद्धसंख्याकत्वं न ब्रूयुरतस्तथेति। भाष्ये, आकूतित्वं कर्मेन्द्रियाणां धर्मः। चित्तित्वं ज्ञानेन्द्रियाणाम्। अन्तःस्थितत्वं प्रकृतिपुरुषमहदहंकारमनसाम्। सांख्यकारिकायां

रश्मिः।

(शोधपत्रमत्र) नानापदस्यानेकार्थकत्वे तु कारिकोक्तचतुष्कं नाभिप्रेतम्। अत्रोच्यते। मूलप्रकृतिरविकृतिरित्यत्र मूलप्रकृतेः प्रकृतित्वेनोपस्थितौ अनेकार्थकत्वं अविकृतित्वेनोपस्थितौ अविकृतित्वप्रकृतिविकृतित्व-विकृतित्वप्रकृतिविकृतिविलक्षणत्वरूपचतुष्कमतो विकृतित्वेन रूपेणोपस्थितिं वदामः यथा क्षितिर्गन्धसमवायिकारणमित्यत्र गन्धसमवायिकारणत्वेन क्षितिबोधो न पृथिवीत्वेन तस्या गन्धसमवायिकारणतासिद्ध्यधीनत्वात्। तथाहि। क्षितौ गन्धसमवायिकारणता किंचिद्धर्मावच्छिन्ना कारणतात्वात् घटस्य समवायिकारणतावत्। तद्वदविकृतित्वं तत्त्वान्तरोपादानत्वं किंचिद्धर्मावच्छिन्नं कारणत्वाद् घटदृष्टान्तः पूर्ववत्। एवं 'महदाद्याः प्रकृतिविकृतयः' इत्यत्र न महदाद्यत्वेन बोधः किं तु प्रकृतिविकृतित्वेन तत्र किंचित्तत्त्वोपादानत्वे सति किंचित्तत्त्वोपादेयत्वमत्रत्यं तत्त्वोपादानत्वमादाय किंचिद्धर्मावच्छिन्नकारणतात्वात्। दृष्टान्तः स एव। अग्रे 'षोडशकश्च विकारः' इत्यत्र विकारत्वं साक्षात्तत्त्वोपादेयत्वमत्र कारणताभावाभावात्तादृशज्ञानकारणतां विषयनिष्ठामादाय किंचिद्धर्मावच्छिन्नमित्यादि पूर्ववत्। एवं पुरुषलक्षणे उक्तत्रितयविलक्षणत्वेन ज्ञानं तत्कारणतां पुरुषनिष्ठामादाय किंचिद्धर्मावच्छिन्नमित्यादि पूर्ववत्। तदुक्तं द्वितीयपरिच्छेदे दिनकर्यां 'स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः' इत्यस्या मुक्तावल्या व्याख्याने॥ अत्र शंकरभाष्ये तु नाना अनेकार्थकः नानाभावात्। नाना ह्येतानि पञ्चविंशतत्त्वानि तेषां पञ्चशः पञ्चशः साधारणो धर्मोस्ति येन पञ्चविंशत्यन्तरालेऽपरा पञ्चपञ्चसंख्या निविशेरन्। न ह्येकं निबन्धनमन्तरेण नानाभूतेषु द्वित्वादिसंख्याः निविशन्ते इति भाष्यात्। अत्र नानाभावादिति सांख्यमतानुवादो भगवता व्यासेन कृतः। इति सांख्यकारिकोपन्यासेन गम्यते। यद्यपीति भाष्यं विवृण्वन्ति स्म न चेति। भूतादीति आदिपदेन तन्मात्राः पञ्च। आकूतयः कर्मेन्द्रियाणि पञ्च, चित्तयः पञ्च ज्ञानेन्द्रियाणि। अन्तःस्थिततत्त्वानि तानि धर्माः। इति द्वन्द्वगर्भितकर्मधारयः। द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकं अभिसंबद्ध्यते। मूलेति भाष्यं विवृण्वन्ति स्म मूलेति। चतुर्णामिति अविकृतित्व-प्रकृतिविकृतित्व-विकारत्व-प्रकृतिविकृतिविलक्षणत्वानाम्। केनेति पूर्वं लक्षणोक्ता केनचित्स्वरूपसंबन्धघटितेन समासेन षष्ठीतत्पुरुषेण 'उपपदमतिङ्' इति सूत्रकृतसमासेन वा। अपीति मूढग्राहेणेत्यर्थः। नानाभिन्नत्ववाचकं लुप्ततृतीयान्तम्। भिन्नत्वं धर्मप्रतियोगिनावपेक्षेते। भावो विद्यमानत्वमित्याशयेन विवृण्वन्ति स्म संख्यासमिति। अतस्तथेति संख्योपसंग्रहादपि न सांख्यस्य श्रौतत्वम्। कारिकेति। आर्याछन्दः।

'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः'॥

इत्यन्यथोपगमात्। पुरुषे वैलक्षण्याभावप्रसङ्गश्च। किंच नायं श्रुत्यर्थ इति श्रुतावेव प्रतीयते। अतिरेकादाकाशश्चेति। चकारादात्मा यस्मिन्नित्यधिकरणत्वेनोक्तः। तस्मान्नानेनापि मन्त्रेण तन्मतसिद्धिः॥ ११॥

भाष्यप्रकाशः।

तु प्रकृतित्वं तत्त्वान्तरोपादानत्वम्। प्रकृतिविकृतित्वं किंचित्तत्त्वोपादानत्वे सति किंचित्तत्त्वोपादेयत्वम्। विकारत्वं साक्षात् तत्त्वोपादेयत्वम्। पुरुषत्वं चोक्तत्रितयविलक्षणत्वं बोध्यम्। जनशब्दोऽपि तन्मते विरुद्ध्यत इति दूषणान्तरमधिकमाहुः पुरुष इत्यादि। जनशब्दस्य जनकत्वोपाधिना तत्त्ववाचकत्वेन गृहीतत्वात् पुरुषेऽपि तदापत्त्या तथेत्यर्थः। न च छत्रिणो यान्तीतिवद् गौण्या तत्संग्रहान्न दोष इति शङ्क्यम्। तत्र प्रत्यक्षस्येवात्र गौणीनियामकस्याभावेन तस्या वक्तुमशक्यत्वाज्जनशब्दे युगपद् वृत्तिद्वयापातादगतिकगतित्वाच्चेति। हेत्वन्तरं व्याकुर्वन्ति

रश्मिः।

'यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेपि।
अष्टादश द्वितीये पञ्चदश चतुर्थके सार्या'॥

तत्त्वेति अविकृतिपदार्थः। विकृतिर्विकारः कार्यं तत्त्वान्तररूपं तद्भिन्ना उपादानकारणरूपा। विकृतीराह महदाद्या इति द्वितीयपादे महदहंकारपञ्चतन्मात्राणि इति सप्तप्रकृतिविकृतयः। तत्त्वं च किंचित्तत्त्वस्याहंकारस्योपादानत्वं महति तत्त्वे सति किंचित्त्वं प्रकृतिस्तस्या उपादेयत्वं किंचित्तत्त्वस्येति पष्ठ्याऽभेदोर्थकः। पष्ठ्योर्निरूपितमर्थः। एवमन्यत्रापि। पोडशके विकारत्वं पञ्चस्थूलभूतान्येकादशेन्द्रियाणि च पोडशके विकारत्वं न प्रकृतित्वं तत्त्वान्तरभ्यो भिन्नत्वाभावात्। साक्षात्तत्त्वानि महदादीनि। न च मनसो महत्तत्त्वमतः पोडशकत्वं विकारस्येति कथमिति वाच्यम्। अहंकारवच्चित्तबुद्ध्योः पृथक्कृत्वात् दोषाभावात्। उक्तेति प्रकृति-प्रकृतिविकृति-विकृतिभ्यो विलक्षणत्वम्। तदुक्तं 'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोहंकारात् पञ्चतन्मात्राण्युभयमिन्द्रियं स्थूलभूतानि पुरुष इति पञ्चविंशतिर्गुणाः' इति प्रवचनसूत्रवृत्तौ। भाष्ये। अन्यथेति पञ्चपञ्चकत्वप्रकारादन्यः प्रकारः। चतुष्कत्वं तत्त्वान्तरोपादानत्वं किंचित्तत्त्वोपादानत्वे सति किंचित्तत्त्वोपादेयत्वं साक्षात्तत्त्वोपादेयत्वम्। उक्तत्रितयविलक्षणत्वमेतेषामुपगमात् पञ्चविंशतितत्त्वेषु। प्रकृते। दूषणेति पुरुषस्य जनत्वापत्तिरूपं दूषणान्तरम्। तद्दिति 'असङ्गोऽयं पुरुषः इति' इति सांख्यप्रवचनसूत्रात्। वैलक्षण्यवति पुरुषे जनकत्वापत्त्या तथावैलक्षण्याभावप्रसङ्गः। ननु 'प्रकारवचने थाल्' इति तथापदस्योक्तप्रसङ्गोर्थः कथं स्यादिति चेन्नास्य पुरुषधर्मत्वेन प्रकारत्वात्। असङ्गस्य पुरुषस्य वैलक्षण्यमजहत्स्वार्थलक्षणया जनपदवाच्यत्वं चाशङ्क्य निषेधन्ति स्म न चेति। एतत्स्मिति असङ्गपुरुषसंग्रहात्। तथाहि। यथा छत्रिण इत्यत्र एकसार्थवाहित्वे छत्रिपदलक्षणा इयमेवाजहत्स्वार्था लक्षणोच्यते। एकसार्थवाहित्वेन छत्रितदन्ययोर्बोधात्। तथा जनपदस्यैकप्रक्रमपठितत्वे लक्षणा। एकप्रक्रमपठितत्वेन जनतदन्ययोर्बोधात्। तत्रेति दृष्टान्ते। वृत्तिद्वयेति गौणीयोगरूढ्योरापातात्। ननु छत्रिपदस्य वृत्तिद्वयमस्त्येवेत्यत आहुः अगतीति। हेत्वन्तरमिति सौत्रमति-

प्राणादयो वाक्यशेषात् ॥ १२ ॥

नन्ववश्यं मन्त्रस्यार्थो वक्तव्यः । तदनुरोधेन लक्षणयापि ज्योतिःशास्त्रवत् पञ्चपञ्चशब्दः पञ्चविंशतिवाचकतया परिकल्प्यः । स्पष्टमाहात्म्यार्थमात्माकाशयोराधाराधेयभावः प्रदर्शितस्तत्रत्ययोरेव । अतो मन्त्रे तन्मतसिद्धिरित्याशङ्क्य

भाष्यप्रकाशः ।

किंचेत्यादि । आकाश आत्मा चेत्येतयोरतिरेकाज्जनशब्दोक्तेभ्य आधिक्यात् संख्याविरोधे सति न तन्मतसिद्धिरित्यर्थः ॥ ११ ॥

प्राणादयो वाक्यशेषात् ॥ १२ ॥ सूत्रमवतारयन्ति नन्वित्यादि । अयमर्थः । पञ्चविंशतिसंख्योपसंग्रहे मन्त्रवर्णविरोधो दोषत्वेनोक्तः । सोऽस्माभिः परिह्रियते । यतो मन्त्रस्यार्थो भवतामस्माकं चावश्यं वक्तव्यः । तत्र भवन्मते आत्मनि प्रतिष्ठिता द्विपञ्चसंख्याकाः पञ्चविंशतिसंख्याका वा एते जनाः, पञ्चसंख्याका वा एते पञ्चजना इति निश्चेतुमशक्यत्वादस्मन्मते तु पञ्चविंशतिसंख्याकानां तत्त्वानां निश्चितत्वादस्मन्मतमेव ज्यायः । एवं सति तदनुरोधेन यथा, 'पञ्च सप्त च वर्षाणि न ववर्ष शतक्रतुः' इत्यत्र द्वादशसंख्याघटकतया पञ्च सप्तेति पदद्वयेऽवयवद्वारेण समुदाये लक्षणा । तथात्र पञ्चविंशतिसंख्याघटके पञ्चेतिपदद्वये समुदाय-

रश्मिः ।

रेकादिति हेतुम् । संख्येति । सप्तविंशतिसंख्यापत्त्या पञ्चविंशतिसंख्याविरोध इति । न चाकाशः स्थूलभूतमात्मापुरुष इति कुतोतिरेक इति चेन्न यस्मिन् पञ्चपञ्चजना इति श्रुतौ यच्छब्दार्थ आत्माकाशश्च तयोरतिरेक आधिक्यं पुनरुक्त्यापत्तेः । भाष्ये श्रुतावयमिति यस्मिन् पञ्चपञ्चजना इति श्रुतौ अयं पञ्चविंशतिसंख्याप्रतिरूपोर्थः । प्रतीयत इति आत्माकाशयोः पञ्चविंशतिसंख्यातोतिरेकस्यातिरिक्तत्वस्य सत्त्वात् । तदाहुः सौत्रं हेतुम् । अतिरेकादिति आकाश इति अनेन भाष्येण सौत्रचकारार्थाकथनेन च ज्ञायते नायं श्रुत्यर्थ इति भाष्यमतिरेकाचेति सौत्रचकारार्थप्रतिपादकमिति । तथा चानुक्तसमुच्चयार्थकश्चकार इति भावः । आकाशश्चेति सौत्रचकारादात्मा । नन्वात्मग्रहणे किं बीजमत आहुः यस्मिन्निति । ननु कथमेकस्याधाराधेयभाव इति चेन्न 'अदृश्यत्वादिगुणको धर्मोक्तेः' इत्यधिकरणे एतादृश एव ब्रह्मवाद इति भाष्यात् ॥ ११ ॥

प्राणादयो वाक्यशेषात् ॥ १२ ॥ ननु सत्यमुक्तं मन्त्रवर्णे सप्तविंशतिसंख्या वर्तत इति । तथाप्यस्माकं शास्त्रत्वाच्छ्रुतार्थो वक्तव्य एवेति तमर्थान्तरेण प्रत्यवतिष्ठन्तं सांख्यं प्रत्याहुः भाष्ये इत्याशयेनाहुः अयमिति । मन्त्रवर्णो यस्मिन् पञ्चपञ्चजना इति । द्वीति । द्वौ च ते पञ्चेति विग्रहे 'तत्पुरुषः समानाधिकरणः कर्मधारयः' संख्यापूर्वो द्विगुरित्यत्र चरितार्थः । दशसंख्याका इत्यर्थः । पञ्चजनाः पुमांसः । ज्योतिःशास्त्रवदिति भाष्यं विवृण्वन्ति स्म यथेति । द्वादशवर्षाणि इन्द्रो न ववर्षेत्यर्थः । द्वादशसंख्या घटयतीति द्वादशसंख्याघटकपदद्वयम् । अत्रेति । अत्र पञ्चपदेन पञ्चानां संख्येयानां वर्षाणामुपस्थितिः सप्तपदेन सप्तानां संख्येयानां वर्षाणामुपस्थितिः समवायेन कीदृशेनावयवौ पञ्चसप्तरूपौ, द्वारे अभ्युपायौ निर्गमौ यस्य 'द्वारं निर्गमे अभ्युपाये' इति हैमः । समुदाये द्वादशसंख्येयरूपे लक्षणा । अवयवद्वयसमवायरूपा । समुदाय इति । पञ्चविंशतिसंख्येयरूपे लक्षणा पञ्चावयवसमवायसंबन्धरूपा तया । परिकल्प्य इति भाष्येणान्वयः । भाष्ये लक्षणयापीत्यपिपदं समुच्चये तदर्थ-

परिहरति । प्राणादयः पञ्चजनाः वाक्यशेषस्य मन्त्रार्थनियामकत्वात् । 'प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो मनः' इति ।

भाष्यप्रकाशः ।

लक्षणया, अथवा, त्रिणवेनौजस्कामं याजयेत्, 'शुद्धं त्रिणवरात्रं तद्भूत्तुमुलमुल्बणम्'इत्यत्र यथा त्रयो नव यत्रेति बहुव्रीहिस्तथात्र पञ्च पञ्च यत्रेति बहुव्रीहिणा सुब्लुका च गणलक्षणयापि ज्योतिःशास्त्रे इव पञ्चपञ्चशब्दः पञ्चविंशतिवाचकतया परिकल्प्यः । एवं वाचकत्वे कल्पितेऽत्र पञ्चविंशतितत्त्वसिद्धावेवं मन्त्रार्थः । यस्मिन् पञ्चविंशतिसंख्याकानि तत्त्वानि आकाशश्च प्रतिष्ठित उत्कर्षं प्राप्तस्तमात्मानमेव ब्रह्माऽमृतं विद्वान् अमृतो मुक्तो भवतीति मन्य इति । न च तत्त्वेष्वात्माकाशयोः प्रविष्टत्वात् पुनस्तत्कथनमतिरेकापादकतया बाधकमिति शङ्क्यम् । यतोऽत्र तत्रत्ययोर्गणस्थयोरेवात्माकाशयोराधाराधेयभावः । आत्मनः स्पष्टमाहात्म्यार्थं प्रदर्शितो योऽन्यत्र सर्वाधारत्वादिधर्मवत्तया प्रसिद्धः सोऽपि यस्मिन्निति । अत्रात्मन आधारता, मोक्षे इच्छाऽस्तीतिवद् विषयतया । तथा च यस्मिन्नात्मनि विषये तत्त्वान्याकाशश्च संघातरूपतया परार्थत्वेन ज्ञेयत्वरूपां प्रतिष्ठां प्राप्तवन्तस्तमात्मानं विद्वाँस्तथेति निर्गलितोऽर्थः । अतो मन्त्रे तन्मतसिद्धिरित्याशङ्क्य **परिहरतीति** । परिहारं व्याकुर्वन्ति **प्राणादय** इत्यादि । भवेदयं मन्त्रविरोधपरिहारो यद्यस्मन्मते पञ्चजनानामनिश्चयः स्यात् । स तु नास्ति । यतः प्राणादयो निश्चिताः पञ्चजनाः । कुतः? वाक्यशेषात् । बहूनां प्राप्तौ वक्ष्यमाणस्य वाक्यशेषस्य मन्त्रार्थनियामकत्वात् ।

रश्मिः ।

माहुः अथवेति । **सुब्लुकेति** 'अव्ययादाप्सुपः' इति सूत्रेण लुक्कृता बहुत्वसंख्या प्रथमपञ्चपदाल्लुक्कृता पञ्चदशसंख्या द्वितीयपञ्चपदाद्बहुत्वं पञ्चैवेति पञ्चविंशतिः । **गुणेति** गुणे विशेषणे लक्षणा पञ्चगुणितेषु अवयवेषु समवायः तयापि । **ज्योतिरिति** गुणपदं गुणितेषु तद्वत् । **उत्कर्षमिति** विकारत्वं माहात्म्यसूचकत्वं वा । यद्यपि मायाऽविद्याप्रकृतिवादाः किंचित्परस्परं विलक्षणा अपि मुक्त्यंशे भिन्ना इति मायावाद्यनुसार्यर्थः पूर्वोक्तो वक्तव्यस्तथापि जगन्नित्यत्वपरिणामभक्त्याङ्गीकारपूर्वकं 'मुक्तिरन्तरायध्वस्ते न परः' इति सूत्रणात् । तन्मतरीत्यार्थमाहुरुभयार्थमिश्रणेन । **तमात्मानमिति । मन्य** इति अहममृतो ध्वस्तान्तराय इति मन्य इत्यर्थः । **स्पष्टमिति** भाष्यं व्याकर्तुमाहुः **न चेति । अतीति** । भिन्नत्वापादकतया सप्तविंशतितत्त्वानुसंधानजनकतया सांख्यमतबाधकम् । **गणेति** पञ्चविंशतिगणस्थयोः । माहात्म्यमाहु**र्योन्यत्रेति** । अन्यत्र गीतादौ 'आकाशवत् सर्वगतश्च नित्यः' इति । **अत्रेति** श्रुतौ विषयेति वैषयिकाधारे सप्तमी । **विषय** इति विषये आधारे तत्त्वानि तत्त्वान्तर्गत इन्द्रियाणामिवान्येषामपि सविषयत्वेन । आकाशस्तु तत्त्वान्तर्गतोप्युक्तमाहात्म्यार्थं पृथगुपात्तः । ननु माहात्म्यस्य सांख्ये कोपयोगः इति चेन्न स्नेहकारणत्वादस्य भक्तौ तात्पर्यं भविष्यति ।

'एकं सांख्यं च योगं च वेदारण्यकमेव च ।

परस्पराङ्गान्येतानि पञ्चरात्रं च कथ्यते' ॥ इति भारतात् ।

पञ्चरात्रे 'स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा' इत्युक्तेः । **संघातेति** । 'संघातपरार्थत्वात्पुरुषस्य इति' इति सूत्रे यदेते संहता भावा तदेतदर्थं पुरुषः 'शरीरादिव्यतिरिक्तः पुमान्' 'संहतपरार्थत्वात्' इति सूत्राभ्यां परार्थः पुरुष इति प्रयोगे परार्थत्वेन पुरुषभाने पुरुषस्यासंगत्वादाधेयत्वेन ज्ञेयत्वरूपाम् । **तमात्मानमिति** तमात्मानमेवेति पूर्वमुक्ते सेश्वरसांख्यापत्तिरदूष्यत्वं चातस्तत्पुरुषमात्मानं जीवं विद्वानिति लापवोक्तिः । अर्धश्लोकत्वात् । **तथेति** इति पूर्वोक्तप्रकारेण ।

ननु कथमस्य वाक्यशेषत्वम्। उच्यते । प्राणादयः संज्ञाशब्दाः करणवाचकाः। ते ज्ञानरूपं वा, क्रियारूपं वा कार्यं जनयन्ति स्वव्यापारेण। तत्र तेषां करणान्तरापेक्षाभावात् प्राणादीनां पुनः प्राणादिमत्त्वं बाधितं स्यात्। भगवतो

भाष्यप्रकाशः ।

एतस्य वाक्यशेषत्वे प्रत्यवतिष्ठते नन्वित्यादि। एकवाक्यलक्षणे परस्परसाकाङ्क्षत्वस्यैकवाक्यताबीजस्य सूचितत्वात् तस्याश्चात्राप्रतीयमानत्वे एकवाक्यत्वाभावेन शेषताया निश्चेतुमशक्यत्वात् कथमस्य वाक्यशेषत्वमित्यर्थः । एवं प्रत्यवस्थाने तां व्युत्पादयन्ति उच्यते प्राणादय इत्यादि। सत्यमापाततो नाकाङ्क्षा प्रतीयते। तथापि सूक्ष्मविचारे, प्राणादय इत्यादिनोक्तप्रकारेण पुनः प्राणादिमत्त्वं बाधितं स्यादित्यतः प्रतीयते। किंच। ते निचिक्युरित्युत्तरार्धाद् भगवतो माहात्म्यनिरूपणार्थमिदं वाक्यं प्रवृत्तम्। सांख्यमते चेश्वरानङ्गीकाराद् भगवतो माहात्म्य-

रश्मिः ।

निर्गलितो निष्कृष्टः। बहूनामिति पक्षाणाम्। भाष्ये वक्ष्यमाणस्य । एतस्येति भाष्योक्तस्य प्राणस्य प्राणमित्यस्य। न तु वाक्यस्य यस्मिन् पञ्चपञ्चेत्यस्य शेषः तदर्थः। पारार्थ्यं शेषलक्षणमिति पञ्चपञ्चजना इति गूढार्थ इति तदग्रेतनवाक्ये प्राणादिपञ्चोक्तेः तच्छेष इति । नन्विति भाष्यस्य किं प्रयोजनमित्याकाङ्क्षायां वाक्यशेषत्वे कारणं वक्तुम्। मुक्तावल्यामपि वाक्यशेषे एकवाक्यतायाः कारणभूताया अनुक्तेस्तामाहुः एकेति। पूर्वतन्त्रे द्वितीयाध्याये 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्' इति सूत्रे। सूचीति यदि विभागे साकाङ्क्षं स्यात् तदेकवाक्यं स्यात्, अर्थैकत्वादित्यत्र हेतुहेतुमद्भावे लिङ्गाबोधितत्वं यद्यपि तथापि अर्थैकत्वादेकं वाक्यं भवति चेद्विभागे साकाङ्क्षं स्यात् इत्यर्थे लिङ् भावाद् हेतुहेतुमद्भावस्य सूचितत्वम्। शेषताया इति एतस्य प्रयोजनं वै यस्य तो न तृप्यति निषादपञ्चमा वर्णा इत्येतयोरसंग्रहोऽग्रे। एवं सतीत्यनेनात्रैव स्फुटीभविष्यति। तामिति आकाङ्क्षाम्। प्राणादय इति एतेषां संज्ञाशब्दत्वकथनं पाचको याचक इतिवदुभयो संज्ञाशब्दत्वार्थम्। यद्वा प्राणा आदिर्येषां ते प्राणादय इत्यत्र 'न संज्ञायाम्' इति सूत्रेण 'शेषाद्विभाषा' इति सूत्रविकल्पितकबभावो नित्यः। तेन प्राणादय इति सौत्रप्रयोगः। न कदापि प्राणादिका इति सूचितम्। ज्ञानकरणानि ज्ञानरूपं कार्यं कर्मेन्द्रियाणि क्रियारूपं कार्यम् । करणत्वं व्यापारनियतमत आहुः स्वेति । करणेति । द्वितीयान्तप्राणादिपदवाचकानामपेक्षाभावात् । उत्तरत्र हेतुः । बाधितमिति बाधितत्वमाधाराधेयभावः। अनेन उक्तप्रकारेण। प्रतीयत इति अर्थान्तराकाङ्क्षा प्रतीयते प्राणादीनां भगवतः प्राणादिरूपस्याकाङ्क्षा वर्तते। ननूक्तं न कारणानां कारणान्तरापेक्षेति। अत्रोच्यते। 'यद्वाचानभ्युदितं येन वागभ्युद्यते। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' इति केनोपनिषच्छ्रुतेः भगवत आकाङ्क्षास्ति । भगवत इति भाष्यं विवृण्वन्ति स किं चेति। ननु द्वितीयप्राणादीनां भगवति शक्तौ किं मानमत आहुः ते निचिक्युरिति ते निचिक्युर्ब्रह्म पुराणमग्र्यम्' 'मनसैवानुद्रष्टव्यम्' 'नेह नानास्ति किंचन' इति 'ये प्राणस्य प्राणमिति विदुः ते ब्रह्मपुराणमग्र्यं निचिक्युः ज्ञातवन्तः। अत्र ब्रह्मज्ञानोक्तेः प्राणस्य प्राणमित्यादि भगवतो माहात्म्यं देवत्वं तन्निरूपणार्थं। अतो द्वितीयप्राणादिशब्दार्थो भगवान्। किं च शारीरब्राह्मणेपि भगवत्प्रकरणमस्ति। सांख्येपि किंचिदाहुः सांख्येति चकारस्त्वर्थे। सांख्यमते त्वीश्वरानङ्गीकारान्नेदं प्रवृत्तम्।

माहात्म्यविरोधश्च । अतः स्वार्थनिर्वाहार्थमन्यार्थौ वर्तेते पञ्चजनवाक्यस्य च । अतो बुद्धेः पञ्चवृत्तीर्जनयन्तीति प्राणादयः पञ्चजनाः ।

भाष्यप्रकाशः ।

विरोधश्च स्यादतोऽपि सा प्रतीयते । अतस्त्वद्रीत्या वाक्यस्याबोधकत्वात् तस्य स्वार्थनिर्वाहार्थमन्योऽर्थो वर्तते । अन्यार्थे वर्तत इति सप्तम्यन्तपाठे तु, तद्वाक्यमन्यार्थे वर्तते इत्येवं व्याख्येयम् । पञ्चजनवाक्यस्य च सांख्यरीत्या पञ्चपञ्चकनिष्ठधर्मपञ्चकानुपलम्भात् पञ्चपञ्चजननिश्चायकोऽन्योऽर्थो वर्तते । स क इत्यपेक्षायां संशयादिरूपपञ्चबुद्धिवृत्तिजनकाः पञ्चजनास्ते पञ्चेति पञ्चानां ब्रह्मणि प्रतिष्ठितत्वमर्थः प्रतीयते । तदेतदुक्तमतो बुद्धेरित्यादि । एवं सति प्राणवाक्यं तेषां करणत्वं बोधयत् पञ्चजनवाक्यसूचितं कार्यमाकाङ्क्षते, पञ्चजनवाक्यं च तेषां तदित्यादिनोक्तरीत्या प्राणवाक्योक्तं भगवन्तमाकाङ्क्षत इति द्वयोर्विभागे साकाङ्क्षत्वे ब्रह्मबोधकतया च द्वयोरेकार्थत्वे ब्रह्मज्ञानार्थतया द्वयोरेकप्रयोजनकत्वे च सति यदत्रानुपपद्यमानत्वेनोक्तं तत् सर्वं संगतं स्यादतोऽस्य वाक्यशेषत्वम् । यदि चोभयोः परस्परसाकाङ्क्षत्वाद् गौणमुख्यभावाच्च एकस्य शेषित्वमपरस्य शेषत्वमिति नोपेयते, तदा तु साकाङ्क्षत्वेन खण्डत्वादेव शेषत्वमतो

रश्मिः ।

अत इति शेषः । अतो द्वितीयप्राणादिपदार्थोऽन्यश्चेद्भगवतो माहात्म्यविरोधः । सेति अर्थान्तराकाङ्क्षा । अत इति भाष्यं विवृण्वन्ति अत इति सांख्यरीत्या । भाष्यं प्रतीकं धृत्वा स्वयं विवृण्वन्ति पञ्चेति । पञ्चका इति पञ्चविंशतितत्त्वावयवाः पञ्चकाः पञ्च तन्निष्ठो यो धर्मपञ्चकस्तस्यानुपलम्भात् । किं तु प्रकृतिविकृतिरिति कारिकोक्तमविकृतित्वादिरूपं चतुष्कम् । अतो बुद्धेरिति भाष्यं विवृण्वन्ति स स क इति । पञ्चजना इति अत्र पञ्चबुद्धिवृत्तीर्जनयन्ति ते पञ्चजनाः कर्मणि घञ् । पञ्चानां जनाः पञ्चजनाः 'दिक्संख्ये संज्ञायाम्' इति समासः । सामानाधिकरण्यनियमस्य छन्दसि विकल्पात् । 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति परिभाषया । सामानाधिकरण्यपक्षे तु 'उपपदमतिङ्' इति सूत्रेण समासः । भाष्ये वाक्यं तु तृतीयस्कन्धस्य षड्विंशेऽध्याये । तेषां तदिति वाक्यं विवृण्वन्ति स एवमिति । पञ्चजनेति एकार्थीभावात्पञ्चजनेषु शक्तिः समासशक्तेः । बुद्धिवृत्तिरूपं कार्यं तु तात्पर्यवृत्त्या । विग्रहेण तत्प्रतीतीच्छयोच्चरितत्वं तात्पर्यं तदवगतेः । तेषां तदिति तेषां प्राणानां तत्तद्गन्धत्वादिप्रकारो यत्र गन्धादिज्ञानेषु तादृशि स्वकार्याणि प्राणकार्याणि तेषां जननं न स्वतो न प्राणेभ्यो किं तु भगवतोऽजडत्वात् । केनोपनिषच्छ्रुतेः । इति द्वयोरिति भाष्यार्थमाहुः इति द्वयोरिति । सर्वमिति भाष्यार्थमाहुः यदत्रेति । यदत्र प्राणवाक्ये पञ्चजनवाक्ये च । अनुपपद्येति प्राणादीनां प्राणादिमत्त्वं पञ्चजनानां पञ्चत्वम् । ननु सर्वादीनि सर्वनामानीति अन्वर्थसंज्ञाबलात् किं किमन्यत्संगतमिति चेन्न प्राणस्य प्राणवत्त्वं चक्षुषः चक्षुष्मत्त्वं इत्येवं प्रातिस्विकरूपैः सर्वं बोध्यमिति । अतोस्येति विभागे साकाङ्क्षयोरर्थः प्रयोजनं ब्रह्मज्ञानं तस्यैकत्वात् । एकं वाक्यमस्मात् वैवस्वतो न तृप्यतीत्यस्य निषादपञ्चमानां वर्णानां च पञ्चजनप्रतिपादकत्वं पञ्चजनत्वं चेत्युक्तम् । मन्त्रस्य यममाहात्म्यपरत्वात् । निषादेत्युक्तानां लौकिकत्वात् । जना यदग्निमित्यत्र तु पञ्चजना ये ते एव 'वनस्पतयः सत्रमासते' इति श्रुतेः । खण्डत्वादिति भाष्यं विवृण्वन्ति यदि चेति । उभयोरिति यस्मिन् पञ्च पञ्चजना इत्यस्य प्राणस्य प्राणमित्यस्य च । साकाङ्क्षत्वेनेति

'संशयोऽथ विपर्यासो निश्चयः स्मृतिरेव च ।
स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक्' ॥

इति । तेषां तत्तत्प्रकारकं स्वकार्यजननं न स्वतः किंतु भगवत इति द्वयोरेकार्थत्वे सर्वं संगतं स्यात् । खण्डत्वाच्च शेषत्वम् । सर्वप्रवर्तकत्वाद् भगवतो न माहात्म्यविरोधः । तत्र प्राणशब्देन त्वग्घ्राणप्राणा गृहीताः । रसना चान्ने

भाष्यप्रकाशः ।

न वाक्यशेषत्वानुपपत्तिरित्यर्थः । ननु प्राणादिप्रवर्तकत्वं जीवस्याप्यस्तीति भगवन्माहात्म्यमत्र वाक्यद्वयेऽपि न स्फुटतीति तद्विरोधात् कथमस्य ब्रह्मवाक्यत्वमित्यत आहुः सर्वेत्यादि । नन्वत्र पञ्चैव प्राणादयः प्रतीयन्ते, नान्ये इति कथमत्र सर्वप्रवर्तकत्वसिद्धिरित्यतः पञ्चसु सर्वनिवेशं व्युत्पादयन्ति तत्रेत्यादि । प्राणशब्दो मुख्यप्राणवाचकः । स च वायुरूप इति प्राणशब्देन वायुविकारभूता त्वक्, तत्सहभूतं घ्राणं मुख्यप्राणस्य रूपान्तरभूता अन्ये अपानादयः प्राणा गृहीताः । रसना चान्ने प्रतिष्ठिता 'तन्निरन्नस्य वर्धते' इति वाक्यादत्यन्तान्ना-

रश्मिः ।

यस्मिन् पञ्चपञ्चेति वाक्यस्य ह्याकाङ्क्षत्वेन प्राणस्य प्राणमिति वाक्यं पञ्चसंख्यापूरकं यावत् तावतो खण्डत्वं पूर्ववाक्यशकलत्वं तस्माच्च शेषत्वमतो नैव वाक्यशेषत्वानुपपत्तिः । एवकारो नशब्देनान्वयी । भाष्ये चकारस्यान्यार्थत्वाभावात् । नैवशब्दार्थकत्वम् । जीवस्येति 'तमुत्क्रामन्तं प्राणोनूत्क्रामति प्राणमनूत्क्रामन्त५सर्वे प्राणा अनूत्क्रामन्ति' इति श्रुतेः । तं जीवम् । स्फुटतीति तु. प. स्फुट विकसन इत्यस्य रूपम् । स्फोटतीति तु स्फुट विशरणे भ्वा. प. से. रूपम् । धातूनामनेकार्थत्वात् प्रयुक्तमन्यत्रास्माभिः स्फुट विकसन इत्यस्यैव रूपं नामधातुत्वाद्वा तत्प्रयुक्तम् । सर्वेत्यादीति सर्वान्तर्गतो जीवोपि । तेन जीवस्याणुत्वान्न व्यापकत्वं तत एव न प्राणादिप्रवर्तकत्वमित्यग्रे वक्ष्यते । प्राणादीनां सर्ववाचकत्वं व्युत्पादयन्ति प्राणशब्द इति । प्राणपदे वर्णविकारात् घ्राणवाचकं घ्राणपदमनुक्त्वा प्राणपदोक्त्या प्राणान् पञ्चेन्द्रियाणि चानुक्तानि सूचयति तत्र सूचितार्थ उक्तः प्राणशब्द इति वाचको व्यञ्जनया । त्वक् स्वरूपमाहुः वाय्वित्यादि तथा च सूत्रे प्राणश्च प्राणश्च प्राणश्च प्राणश्च प्राणश्च प्राणाः सरूपैकशेषः । व्यञ्जनापक्षे श्रुतौ प्राणस्येत्येकवचनं प्राणापेक्षं जात्यभिप्रायेण व्यञ्जनापक्षे । तत्र द्वितीयप्राणशब्दस्त्वचो वाचकः प्राणपदे हल्विकारः घ्राणादय इति भाष्यात् । तस्याभिधावृत्तिर्घ्राणे तदाहुः तत्सहेति । ततोभिधावृत्त्या घ्राणं घ्राणपदवाच्यं प्रसिद्धं हेति । स भगवान् श्रुतिप्रसिद्धः प्राणमिति द्वितीयान्तमुक्तं तदर्थ उक्तः । पुनः सूचितार्थमाहुः मुख्येति । रसनेति भाष्यार्थमाहुः रसनेति रस आस्वादने रसाः षट् मधुराम्ललवणकटुकषायतिक्तभेदात् । रसयन्ते ये इति रसाः चु. प. से. कर्मणि घञ् । तदुक्तं प्रश्नोपनिषदि रसं च रसनीयं चेत्युक्त्वा एष पुरुषः परेक्षरेत्युक्तम् । तत्र रसो रसना रसनीयमन्नं पुरुषरूपं यद्यप्यक्षर उक्तं तथाप्यक्षरस्य साधारणाश्रयत्वात् संनिहितान्नत्यागे मानाभावाद्विशेषाश्रयत्वमन्नस्य न जिह्वायाः श्रुतावग्रहणात् । न चान्नं पृथिवी सा चान्नं जिह्वेति शङ्क्यम् । पुराणमतत्वात् । तृतीयस्य षष्ठेध्याये ।

'निर्भिन्नं तालु वरुणो लोकपालोविशद्धरेः ।
जिह्वयांशेन च रसं ययासौ प्रतिपद्यते' ॥ इति ।

प्रतिष्ठितेत्यन्नं गृहीतम्। वाग् वा तेजसि। अत्ता चान्नं चैकत्र भवतः। सह-भावित्वात् क्वचिदेकग्रहणं, क्वचिदुभयग्रहणमिति तेनैते सर्वे पञ्चैव भवन्त्यति-रिच्यते परमाकाशः।

भाष्यप्रकाशः।

काङ्क्षिणीति तद्ग्रहणायात्रान्नं गृहीतम्। पाठान्तरेऽन्नस्थाने ज्योतिः पठितम्। तच्च तेजः। रश्मिः।

जिह्वापीन्द्रियमिति सुबोधिनी। रसति अनयाऽस्यां वा रसना। णिचो वैकल्पिकत्वं अन्ने प्रतिष्ठितत्वमेवं 'रसना' इन्द्रियम्। रामानुजभाष्ये तु अन्नस्येति घ्राणरसनयोः तन्त्रेणोपादानमन्न-शब्दोदितपृथ्वीसंबन्धित्वादित्युक्तम्। 'पृथ्वी वा अन्नमिति' अत्र प्रमाणमाहुः तन्निरन्नेति निष्क्रान्तोन्नान्निरन्नः पुरुषः 'अन्नात् पुरुषः' इति श्रुतेः, यतो पुरुषस्य वर्धते अतोन्ने प्रतिष्ठिता पुरुषस्या-न्नान्निर्गतस्यान्नत्वात् यथा घटो मृदिति प्रतीतिः समवायित्वात्तथा पुरुषोन्नमिति प्रतीतिः। ननु निरोपधेर्वर्धते इति कुतो नोक्तं साक्षादन्ने प्रतिष्ठितत्वसंभवादिति चेन्न पुराणस्याज्ञासिद्धत्वात् न चैवं सति पुंसो वर्धत इत्युक्त्या अन्नात्पुरुष इत्युक्त्या पुरुषप्रतिष्ठिता सती जायते, अस्ति, विपरिणमते, इति शङ्क्यम्। 'अत्ता चान्नं चैकत्र भवतः' इति भाष्यात्। अत्तृत्वं तु जिह्वायां यतो जिह्वा गलाधः-संयोगानुकूलव्यापारवती तत्रान्नमत्र विवक्षितं अन्ने रसना इन्द्रियरूपा करणाधिकरणयोश्चेति निष्पन्ना न भावल्युडन्ता। शारीरब्राह्मणस्थत्वेन विचार्यवाक्यानां शरीरस्य तत्र त्याज्यत्वेन षड्रसानां स्थूलस्थत्वादत्र भावल्युडन्तताभावात्। ननु जिह्वायां प्रतिष्ठिता रसनं जिह्वाग्रवर्तीति नैयायिकग्रन्था-दिति चेन्न रसना हि रसग्राहिकेति रसग्रहकारणं कारणताग्राहकस्तर्को न जिह्वाग्रवर्तित्वेऽपि तु अन्ने प्रतिष्ठिततत्त्वे अन्नसत्त्वे रसग्राहकत्वं तदभावे तदभाव इति रसाभिव्यक्तिस्थानत्वं भवतु जिह्वाग्रस्येति अन्नं पृथिवीति पक्षे जिह्वा अन्नं तस्मिन् प्रतिष्ठिता न चान्नमत्र पृथिव्याधिदैविकी रूपत्रयोक्तेः। तदन्नं त्रिवृत्कृतम्। त्रिवृत्करणस्य पुरुषं प्राप्य भिन्नत्वात्। तदन्नमत्ता बृहदारण्यकोक्तः 'सर्वमत्तुमध्रियत' इति श्रुतेः। न च गलाधःसंयोगानुकूलव्यापाराभावः शङ्क्यः 'सर्वतोक्षिशिरोमुखम्' इति श्रुतेः। तथा चात्ता चान्नं चैकत्र भवतः इति भाष्यस्यायमर्थो रसनायास्तत्राकाङ्क्षया संभवान्न पूर्वोक्त इति वाच्यम्। सहभावित्वादिति भाष्यविरोधात् 'तस्माद्वा एतस्मादात्मन आकाशः संभूत आकाशाद्वायुः वायोरग्नि-रग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधिभ्योऽन्नमन्नात्पुरुषः' इति श्रुतौ आत्मन आकाशो-त्पादकत्वेन सर्वपूर्वत्वं अन्नस्य तु ओषधिभ्योऽर्वाक्त्वमिति सहभावित्वाभावात्। वृद्धिस्तु परिणामस्य।

'पूर्वरूपपरित्यागो द्वितीयस्यादिमस्तथा।
उभौ चैकीकृतौ लोके वृद्ध्यादिभिरुदितौ'॥

इति द्वितीयस्य दशमाध्याये 'आभासश्च विरोधश्च, इति श्लोकेस्ति। यद्वा अन्ने प्रतिष्ठितेति भाष्ये नान्नपदेनान्नजः पुरुषः किं तु अन्नमेवेति पक्षे। अत्र प्रमाणमाहुरिति न संभवत्यतस्त-न्निरन्नेत्युत्तरत्र हेतुः यतः पुंसो वर्धतेऽतोत्यन्तान्नाकाङ्क्षिणी आकाङ्क्षा पुरुषगता रसनायामारोप्यते पुरुषोत्पन्नाकाङ्क्षा क्षुधितोत्यन्नाकाङ्क्षी यद्यपि तथापि 'रसवर्जं रसोप्यस्य परं दृष्ट्वा निवर्तते' इत्यतिक्षुधितो रसनावानपि। उपलक्षणार्थं रसनान्नयोराकाङ्क्ष्याकाङ्क्षकभावसंबन्धोप्युक्तः। तथा चान्नपदं रसनोपलक्षणार्थं गृहीतमिति भाष्यार्थः। तद्ग्रहणायेति उपलक्षणविधया रसनाग्रहणायान्नं गृहीतमित्यर्थः। तथा च प्रश्नोपनिषच्छ्रुतिः रसश्च रसनीयं चेति अत्र रसो सना प्रायपाठात् रसनीयमन्नं रस इत्यत्र वर्णलोपः। वाग्वेति भाष्यार्थमाहुः पाठेति

भाष्यप्रकाशः ।

वाक् च तेजोमयीति सा तेजसीति तेन वाक्संग्रहः । अत्ता चान्नं चैकत्र भवतः । अन्नार्थमेवान्न-प्राकट्यात् । अतोऽन्नग्रहणेनैवात्तापि गृहीतः । तथा च तस्य तस्य तत्तत्सहभावित्वात् क्वचिदेकग्रहणं, क्वचिदुभयोर्ग्रहणम् । तेजस्येकस्या वाचो ग्रहणम् । प्राणान्नयोस्तूभयोस्त्वग्घ्राणयो रसनान्नयोश्च ग्रहणमिति सिद्ध्यति । तेन प्राणादिपदैरन्येषां संगृहीतत्वेन, चक्षुःश्रोत्रमनसां च कण्ठत उक्तत्वेनैते सर्वे प्राणवाक्ये पञ्चसु निविष्टत्वात् पञ्चैव भवन्ति । अतः पञ्चजनवाक्येऽपि पञ्चजनपदेनैत एव संगृह्यन्ते । अतिरिच्यते परमाकाशः । स च भूतत्वादिविधया पृथिव्या-दीनां भूतानां तद्गुणानां च संग्राहक इति तेषां सर्वेषां ब्रह्मणि प्रतिष्ठितत्वकथनात् प्राणवाक्ये च तत्प्रवर्तकत्वकथनाज्जीवे तादृशत्वाभावेन वाक्यद्वयेऽपि भगवन्माहात्म्यमेव स्फुटतीति ब्रह्मवाक्यत्वमेतयोरविवादमित्यर्थः । एतेन बुद्धिवृत्तिजनकत्वं चक्षुःश्रोत्रमनसामेव, न तु

रश्मिः ।

माध्यंदिनपाठादन्यः पाठः काण्वपाठः पाठान्तरं तस्मिन् । **तेजोमयी**ति त्रिवृत्करणप्रसङ्गे तेजोऽशितं त्रेधा विधीयत इत्युक्त्वा 'योणिष्ठः सा वाग्' इत्युक्तेस्तेजोविकारः, विकारे मयट्, 'अग्निर्वाग् भूत्वा मुखं प्राविशत्' इति तेजोभिन्ना वाङ् नोक्ता । अभेदस्योपलक्षणविरुद्धत्वादत आहुः **सा तेजसी**ति । **तेने**ति । ज्योतिषोपलक्षणविधया वाक्संग्रहः विकारविकार्यभावसंबन्धात् । **अत्ते**ति भाष्यं विवृण्वन्ति **अत्ते**ति । **एकत्रे**ति । परेऽक्षरे । तथा च श्रुतिः प्रश्नोपनिषदि गार्ग्येण पृष्टः कस्मिन्नु सर्वे संप्रतिष्ठिता भवन्ति इति पृष्टः पिप्पलादः पृथिवी च पृथिवीमात्रा चेत्याद्युक्त्वा प्राणश्च घ्रातव्यं च रसश्च रसनीयं चेत्याद्युक्त्वा 'एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः स परेऽक्षरे आत्मनि संप्रतिष्ठित' इति । **सहे**ति भाष्यं विवृण्वन्ति **अन्नार्थ**मिति । अत्तुरर्थम् । **गृहीत** इति उपलक्षणेन गृहीतः । तथा च रसयितेत्युक्तश्रौतपदे रस आस्वादने चुरादिः पठितः । न तु रस शब्दे भ्वा. आ. से. ह्रस्वपाठात् । पुरुषविशेषणं रसनया-स्वादकर्ता प्रतीयते सोयमत्ता तस्य रसनीयं चेति श्रुतौ रसनीयपदेन अन्नग्रहणात् । रसरसनीय एव इत्यनेनोक्त्वा रसयितेति एष इत्यनेनाभेदकथनात् । तथा चात्र रसनान्ने रसयितृपदेनोच्येते । आस्वादनानुकूलव्यापारो रसनानिष्ठः काष्ठानि पचन्तीतिवत् । अन्ननिष्ठो वा व्यापारः । व्यापाराणा-मनेकविधत्वात् । **क्वचि**दिति भाष्यं विवृण्वन्ति **तथा चे**ति । उदाजह्रुः । **तेजसी**ति तेजसा वाचा ग्रहणमिति प्राप्ते विवक्षातः कारकाणि भवन्तीति औपश्लेषिकाधारे सप्तमी । यथा 'इको यणचि' इत्यत्र । उप समीपे श्लेषः संबन्धस्तत्कृतमौपश्लेषिकम् । **प्राणान्नयो**रिति सप्तम्यन्तं पदद्वयम् । प्राणे कयो-र्ग्रहणमित्याहुः त्वग्घ्राणेति षष्ठ्यन्तम् । रसना चात्ता च तयोः । **तेनैत** इति भाष्यार्थमाहुः **तेन प्राणे**ति आदिपदेनान्नज्योतिषी । **अती**ति पञ्चजनवाक्य एव संगृहीतेभ्योतिरेको भेदः, तस्य कर्म, भिन्न इति यावत् । भूतत्वादित्यादिपदेन पञ्चतन्मात्रत्वम् । **तद्गुणाना**मिति शब्दरूपरसगन्ध-स्पर्शानाम् । **तत्प्रवर्त्ते**ति । ननु प्राणस्य प्राणमित्युक्ते कथं प्रवर्तकत्वमिति चेन्न 'यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' इति श्रुत्युक्तवागभ्युदयकर्तृयच्छब्दार्थत्व-प्रवर्तकत्ववत् प्राणस्य प्राणमित्यत्र द्वितीयान्तस्य प्राणस्य प्रवर्तकत्वात् । प्राणपदवाच्यत्वं ब्रह्मणो 'अत एव प्राणः' इत्यधिकरणे छान्दोग्ये कतमा सा देवता प्राण इति होवोचेत्यत्र श्रुतौ । **एतयो**रिति पञ्चपञ्चजनप्राणवाक्ययोः । **एतेने**ति । **बुद्धी**ति बुद्धेर्वृत्तीनां संशयादीनां जनकत्वम् । ननु

तस्मात् प्राणादय एव पञ्चजना इति न तन्मतसिद्धिः ॥ १२ ॥

भाष्यप्रकाशः ।

प्राणान्नयोरतः कथं प्राणादीनां पञ्चजनत्वमित्याशङ्कापि निरस्ता । केवलानां चक्षुरादीनां न तथात्वमपि तु कर्तृगोलकादियुक्तानाम् । अतस्तद्विशिष्टानामेव पञ्चजनत्वमिति बोधनात् । किंचात्रैवं ब्रह्मणि सर्वप्रतिष्ठासिद्ध्या पञ्चसंख्यादीनामपि न निस्तात्पर्यकत्वम् । परोक्षवादत्वाच्चैवमुक्तिरिति सर्वं सुस्थम् । तदेतदभिसंधायाहुः तस्मादित्यादि । एवंचात्र पञ्चजनपदे योग आदृतः ।

रश्मिः ।

बुद्धिवृत्तिजनकत्वे संशयादीनां चाक्षुषत्वं बुद्धित्वं वेति चेदुच्यते । एतस्य पूर्ववाक्ये—

'तैजसात्तु विकुर्वाणाद् बुद्धितत्त्वमभूत् सति ।
द्रव्यस्फुरणविज्ञानमिन्द्रियाणामनुग्रहः' ॥ इत्यत्र ।

तैजसाद्राजसाहंकारात् । बुद्धिलक्षणमाह इन्द्रियाणामिति । कार्यलक्षणमिदम् । बुद्ध्यनुगृहीतान्येवेन्द्रियाणि पश्यन्ति कुर्वन्ति चेति । अत एव बुद्धितारतम्येन इन्द्रियज्ञानक्रिययोस्तारतम्यं 'द्रव्यस्फुरणविज्ञानम्' इति स्वरूपलक्षणम् । द्रव्यस्य घटादेः स्फुरणे सति शब्देन संस्कारेणालोकेन वा यद्विशिष्टं ज्ञानं यस्मात्, केवलं चक्षुषा ज्ञाने तारतम्यं न स्यात् । स्वतः स्फुरणं योगजधर्मादिभिरपि भवति अतो द्रव्यस्फुरणविज्ञानं बुद्धेर्लक्षणमित्युक्त्वाधिभौतिकं विभागनिरूपणेनैव लक्षयति **संशय** इति । एवमाध्यात्मिकबुद्ध्यनुगृहीतानीन्द्रियाणि मनसि सूक्ष्मरूपेण स्थितमाधिभौतिकं संशयादिकं बुद्धिवृत्तिशब्देनोक्तं जायते इति बुद्धिवृत्तिजनकत्वं चक्षुरादीनामिति संशयादीनां चाक्षुषत्वं बुद्धित्वं चेत्युभयम् । अत्र प्रस्थानरत्नाकरे दैवानुकूल्येनान्तर्यामिणा मनस्तत्कार्यार्थं प्रेर्यते तच्चेन्द्रियप्रेरणाय तत्तदिन्द्रियेण संसृज्यते तत्र तत्तदिन्द्रियदेवतानुकूल्ये विषयसंसृष्टैरिन्द्रियैः स्वावच्छिन्नमनसि पूर्वं निर्विकल्पकमुत्पाद्यते तदा इन्द्रियदेशे बुद्धेर्वृत्तिः । तदा बुद्ध्यापि वृत्तिद्वारा तदनुग्रहे सविकल्पकं भवतीति बुद्धितत्त्वनिवेश उक्तः । **तथात्वमिति** तथा बुद्धिवृत्तिजनकत्वम् । तु अम् । **कर्त्रिति** आदिना प्राणान्ने । **तद्धीति** तथा च साक्षात्परंपरया बुद्धिवृत्तिजनकत्वं विवक्षितमिति भावः । ननु पञ्च बुद्धिवृत्तीर्जनयन्ति इति पञ्चजना इत्यत्र पञ्चपदं साक्षाद् बुद्धिवृत्तिवाचकमिति कुतः परंपरापि विवक्षितेत्याशङ्क्याहुः **किं चेति** । **निस्तात्पर्येति** तथा च पञ्चपदस्य प्राणान्नयोस्तात्पर्यवृत्तिरिति भावः । 'प्रायशः सर्वशब्दानां व्यञ्जकत्वमपीष्यते' इति काव्यप्रकाशे । साक्षाद्बुद्धिवृत्तिवाचकत्वमपि पञ्चपदस्याहुः **परोक्षेति** । प्राणस्य प्राणमित्यत्र प्राणपदे परोक्षवादः, घ्राणस्य घ्राणमित्यर्थः । तथान्नपदे परोक्षवादः रसनाया रसनेत्यर्थः । तथा च प्रश्नोपनिषत् । प्राणश्च घ्रातव्यं च रसश्च रसनीयं चेति प्राणः पवर्गादिः घ्रातव्यं कवर्गादिः । ननु रसपदे रसनेत्यस्य परोक्षवादो न त्वन्नपदे इति चेन्न रसते यः स रसः । कर्मणि घञ् । इत्यर्थस्यापि रसपदोक्त्या सूचनात् । अद्यते यत्तदन्नमित्युभयोरेकार्थतया रसपदे परोक्षवादेनान्नपदेपि परोक्षवादात् । ऐकार्थ्याद्घ्राण इत्यत्रान्त्याक्षरैक्यात् परोक्षवादः औचित्याच्च प्रायपाठाच्च रस इत्यत्राद्याक्षरैक्यात् परोक्षवादो घ्राणरसनयोः । **एवमिति** पञ्चजनान्तर्गतत्वेन प्रकारेण प्राणान्नयोरुक्तिः । सर्वं पूर्वोक्तं शोभनं तस्याः स्थितिकर्ता यस्य तत् । **तस्मादित्यादीति** । भाष्ये । **तन्मतेति** सांख्यमतसिद्धिः । शंकराचार्यादिमतैः पञ्चजनपदार्थे योगं निश्चेतुमाहुः **एवं चेति** । ननु रूढिर्योगमपहरतीति न्यायाद् योगः कुत आदृतः इति

भाष्यप्रकाशः ।

शंकराचार्यास्तु, 'ते वा एते पञ्च ब्रह्मपुरुषाः' इत्यत्र पञ्चसु प्राणेषु प्रयुक्तत्वात् 'प्राणो हि पिता प्राणो माता' इत्यत्रापि पित्रादिरूपेण प्राणस्यैवोक्तत्वाच्च जनसंबन्धेन प्राणादीनां जनशब्द-भाक्त्वे सिद्धे दिक्संख्येति संज्ञासमासबलात् पञ्चजनेति समुदायस्यापि प्राणादिषु रूढत्वमविरुद्ध-मित्याहुः तच्चिन्त्यम्। ते वा इति श्रुतौ जनवचनस्य पुरुषपदस्य प्राणापानादिषु प्रयुक्तत्वे-

रश्मिः ।

चेन्न पूर्वपादे 'शुगस्य तदनादरश्रवणात्' इति सूत्रे दत्तोत्तरत्वात् । ननु प्रकृते किं सूचकमिति चेन्न वाक्यशेषस्यैव योगसूचकत्वात् । ननु कथं योगसूचकत्वमिति चेद् भाष्यार्थः स्फुटं नोक्तोत्रोच्यते । शांकरमतमनुवदति स्म प्राणादय इति । ननु पञ्चजना इत्यत्र 'दिक्संख्ये संज्ञायाम्' इति सूत्रेण समासः स न संभवति पञ्चेत्यस्य संज्ञाशब्दत्वाभावात् । इत्याशङ्क्याहुः संज्ञाशब्दा इति । तथा च शंकरभाष्यं पञ्चजनशब्दः समासान्वाख्यानादवगते संज्ञाभावः संज्ञाकाङ्क्षी वाक्यशेषसमभिव्याहृतेषु प्राणादिषु वर्तिष्यते इति । जातिगुणक्रियायदृच्छाशब्देषु यदृच्छाशब्दाः गौः शुक्लः चलति डित्थः इति चतुष्टयशब्दाः न च जातिशब्दाः । संज्ञारूपो यदृच्छात्मक इति काव्यप्रकाशात् । तथा च पञ्चक इत्युक्तौ प्राणादयः पञ्चेत्युत्तरे संज्ञाशब्दत्वेनार्थस्य संज्ञाप्रत्यायकत्वात् पञ्चजना इति समास इति भावः । 'दिक्संख्ये संज्ञायाम्' इति विशेषस्मरणात् संज्ञायामेव पञ्चशब्दस्य जनशब्देन समास इति 'न संख्योपसंग्रहादपि' इति सूत्रस्य शंकरभाष्यं तेन 'संज्ञा पञ्चजनेत्येषा प्राणाद्याः संज्ञिनः श्रुताः' इति वैयासकिन्यायमालायां संज्ञा प्राणादयः इति पञ्चजनास्तु संज्ञिनः इति युक्तः पाठः । पञ्चजनानां विचार्यत्वेन संजि""दिति ज्ञेयम् । स्वेति यतो 'व्यापारवदसाधारणं कारणं करणं' 'साधकतमं करणं' क्रियासिद्धौ प्रकृष्टोपकारकं करणसञ्ज्ञं स्यात् यद्व्यापाराव्यवधानेन क्रियानिष्पत्तिस्तत्प्रकृष्टमिति शेखरे । माहात्म्यमिति तत्त्व निबन्धे टीकायाम् । रतिर्देवादिविषयेत्यत्र रतिः स्नेहः देवत्वं माहात्म्य-मित्युक्त्या देवत्वं सर्वप्रेरकत्वं तस्य विरोधः । प्राणस्य प्राणमित्यादौ द्वितीयप्राणादिपदार्थानुक्तेः । वैयासकिन्यायमालायां प्राणादीनां पञ्चानां साक्षी चिदात्मा द्वितीयप्राणादिशब्दैरभिधीयत इत्युक्तं तत्र विवर्तप्रेरकमिति विरोधः । ब्रह्मामृतवर्षिणीकारोपि द्वितीयप्राणादिपदार्थान्न जगाद । वर्णागम इति पक्षे एकवर्णागमादन्योऽप्रसिद्धः स्पष्टमन्यत् । अत्र वाक्यशेषात् पञ्चानां बुद्धिवृत्तीनां जनाः पञ्च प्राणादयः इत्येकवाक्यतया सूचनात् । ननु रूढिः कैरुच्यत इति चेत्तत्राहुः शांकरेति श्रुतिमाहुः ते वा इति । ब्रह्म वायुः पुरुषा जनाः तथा च पञ्च ब्रह्मवायवः पुरुषा जना यद्वा ब्रह्मणो वायोः जना इति श्रुतिवचनव्यक्तेः, पञ्चसु प्राणेषु जनेषु पञ्चजनपदस्य प्रयुक्तत्वात् । जना पुरुष-पदार्थाः स्पष्टा इति नोक्ताः । ब्राह्मणमाहुः प्राणो हीति । जनेति पुरुषपदोक्तजनसंबन्धेन संबन्धश्च ब्रह्मेति भिन्नं पदं यदा तदा भेदः । ब्रह्मणः पुरुषा इति षष्ठीसमासे तु अवयवावयविभावः संबन्धः । प्राणादीनां ब्रह्मपदार्थानां पुरुषपदार्थजनपदभाक्त्वे इत्यर्थः । संज्ञेति संज्ञाशब्दा रूढा इति भावः । प्राणादिष्विति प्राणश्चक्षुःश्रोत्रादिषु । अविरुद्धमिति प्रथमप्रयोगस्य श्रुत्युक्तेषु प्राणेषु सत्त्वात् प्राणादिषु वाक्यशेषोक्तेषु रूढत्वं पञ्चजनशब्दस्याविरुद्धम् । तथा च भाष्यम् । कथं पुनरसति प्रयोगे रूढिराश्रयितुं शक्येति । ननु रत्नप्रभायां प्राणेषु रूढस्य पञ्चजनपदस्य प्राणादिषु लक्षणेत्युक्तमिति रूढत्वं विरुद्धमिति चेन्न । पञ्चजनशब्दस्य रूढिरेव नावयवशक्त्यात्मको योग इत्युक्तत्वात् । प्राणापाना-दिष्विति । ते वा एते प्राणापानादयः पञ्चजनाः ब्रह्मवायव इत्यन्वयः । समासे लक्षणाप्रसङ्गात् ।

भाष्यप्रकाशः।

नान्येषु रूढ्यभावात् समुदायस्यापि तत्रैव रूढिसिद्ध्या वाक्यशेषोक्तेषु चक्षुरादिषु पञ्चजनशब्दस्य रूढेर्दूरनिरस्तत्वात्। न च प्राणापानादय एव पञ्चजनाः सन्त्विति वाच्यम्। तथा सति प्राणा इति बहुवचनेनैव चारितार्थ्ये आदय इत्यस्य वैयर्थ्यप्रसङ्गात्। स्वस्यापि वाक्यशेषगता विवक्ष्यन्त इति कथनविरोधप्रसङ्गाच्चेति। समुदायशब्दार्थेऽवयवार्थस्याभावेन जनशब्दस्य तत्रानर्थकतया तेन तदुपपादनस्याशक्यत्वादित्यन्ये।

रश्मिः।

इत्येवं प्राणापानादीति। चक्षुरादिषु प्रयुक्तत्वेन। अन्येष्विति वाक्यशेषोक्तेषु प्राणेषु समुदायस्य पञ्चजनस्यापि तत्रैव प्राणापानादिष्वेव। घटादिपदवदनेकेषु रूढिदर्शनात् प्राणचक्षुरादिष्वपि प्राणेष्वस्तु रूढिरित्याशयेन प्राणानुक्तिः। ननु तर्हि प्राणेषु रूढिस्तत्सहचरितत्वसंबन्धश्चक्षुरादिष्विति चक्षुरादिषु लक्षणास्त्विति चेन्न योगेन निर्वाहेऽस्य गौरवग्रस्तत्वात्। वाक्यशेषान्तरस्य श्रौतत्वाद्धि-कल्पमाशङ्कते स न चेति। एवकारोऽप्यर्थे। ते वा एते इति श्रुतौ उक्तवाक्यशेषे संनिधिवत् पञ्चेति पुरुषा इति च पञ्चजना इत्यस्य संबन्धिनो दर्शनात्। प्राणा इतीति सूत्रीयप्राणादयः इत्यत्रेदं बोध्यम्। ननु प्राणा इत्युक्तेपि प्राणापानादिषु रूढिः, तथा वाक्यशेषोक्तप्राणेषु रूढिश्चक्षुरादिषु संबन्धरूपा लक्षणेति चेत्तत्राहुः स्वस्येति। शंकराचार्यस्यापि वाक्यशेषगताः पञ्चजनाः। प्राचां नैयायिकानां मतमाहुत्याहुः समुदायेति। अत्र योगः स्फुटति परं तु रूढिर्योगमपहरतीति रूढिरेवोक्ता सा तु पञ्चजनपदैकार्थीभावप्रतिबन्धिका पञ्चबुद्धिवृत्तीर्जनयतीति पञ्चजनाः प्राणादय इति भाष्याद् योगसत्त्वादेतदाहुः समुदायेति। इदं प्राचां नैयायिकानां मतम्। समुदायशक्तिः रूढिः, अवयवशक्तिर्योगः। तत्र पञ्चजनशब्देऽनर्थकतया। अयमर्थः। शब्देन्दुशेखरे तु एकार्थीभावस्य स्थलं दर्शितं 'समर्थः पदविधिः' इति सूत्रस्य। अवयवार्थविरुद्धो यत्र समुदायार्थस्तत्रैवैकार्थीभाव इति। तदुक्तं वृद्धैः 'जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी' जहत्स्वार्था एकार्थीभावः जहन्ति पदानि स्वार्थं यस्यां वृत्तौ सा जहत्स्वार्था। तथा च तेन जहत्स्वार्थेन पञ्चजनसमुदायगतेन जनशब्देन तदुपपादनं तस्या रूढेरुपपादनं तस्याशक्यत्वात्। न चाजहत्स्वार्था वृत्तिरस्तु व्यपेक्षालक्षणसामर्थ्यरूपेति शङ्क्यम्। महाभाष्ये ऋद्धस्य राजपुरुष इति वारणाय तस्या अनादृतत्वात् योगप्रतीत्यापत्तेश्च। अन्य इति एकदेशिनः। एकदेशिमतस्यारूपवत्सूत्रे वक्ष्यमाणत्वात्। तेन तदुपपादनस्याशक्यत्वं त्वेवम्। समुदायान्तर्गतजनशब्दस्यानर्थकतया। कथं पुनः प्राणादिषु जनशब्दप्रयोगः तत्त्वेषु वा कथं वा जनप्रयोग इति शंकराचार्यभाष्यासंगतिः। समासशक्तेरतिरिक्तत्वात्। जनशब्दाशक्तेः। न च शब्देन्दुशेखरे कृप्तशक्तित्यागे मानाभावात् प्रत्येकशक्ति-सहकृतया समुदायशक्त्या तथोपस्थितिरयमेव चैकार्थीभावः। जहत्स्वार्था वृत्तिः। पदानामानर्थक्य-मिति तु न युक्तम्। महाबाहुः सुपन्था इत्यादावात्वायनापत्तेः भूतपूर्वाश्रयणं तु तस्यां गतावयुक्तम्। तदुक्तं वृद्धैः 'जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी'। अवयवार्थविरुद्धो यत्र समुदायार्थः तत्रैव सेति तदर्थ इति ग्रन्थेन जनशब्दशक्त्युक्तेः न शंकराचार्यभाष्यासंगतिरिति वाच्यम्।

'पदं न वाचकं वाक्ये सादृश्यात्स्मारकं परम्।
विशिष्टवाक्यमेवात्र वाक्यार्थस्य च वाचकम्'॥ इति।

सर्वनिर्णयात्। तदुक्तं वैयाकरणभूषणसारे 'जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था' पदवर्णा वा वृत्तौ पदानामानर्थक्यमिति कथं तर्हि महाबाहुः सुपन्था इति च 'आन्महतः

भाष्यप्रकाशः ।

यदपि, देवाः पितरो गन्धर्वा असुरा रक्षांसि वा निषादपञ्चमाश्चत्वारो वर्णा वा यत् पाञ्चजन्यया विशेति प्रजापरः पञ्चजनशब्द इति तत्परिग्रहेऽपि न दोषः । आचार्येण तु, न तत्त्वानामिह प्रतीतिरस्तीत्येतावन्मात्राभिप्रायेण वाक्यशेषोक्तमादृतमित्याहुः । तदपि स्वप्रज्ञाविलसितमात्रम् । पूर्वोक्तपक्षद्वयोपगमे सर्वाधारत्वरूपब्रह्ममाहात्म्यासिद्ध्या पञ्चसंख्याया निस्तात्पर्य-

रश्मिः ।

समानाधिकरणजातीययोः' इत्यस्य शब्दविषयत्वात् । पथिमथ्यृभुक्षामात्' इत्यस्य च शब्दविषयत्वात् पदानामानर्थक्येप्यदोषात् । न च समानाधिकरणस्य भिन्नप्रवृत्तिनिमित्तत्वे सति एकार्थबोधकत्वादानर्थक्येऽर्थबोधकत्वासंभवात् समानाधिकरणे आत्वानापत्तिरिति वाच्यम् । सादृश्यात् स्मारकत्वात् समानाधिकरणत्वस्य । अनर्थकपदैः सार्थकपदसमानाधिकरणस्मारणेनान्महत इति सूत्रे स्मृतसमानाधिकरणाश्रवणात् । पूर्वं महच्छब्दस्य बाहुशब्दस्य चार्थोनुभूतो महाबाहुरित्यत्र तत्सदृशशब्दाभ्यां सोर्थः स्मारितः । 'सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधकाः' इति भाषापरिच्छेदात् । तदुक्तं टीकायां तथा वाक्येपि पदं न वाचकं तर्हि संकेताग्रहेपि वाक्यार्थज्ञानं स्यात् गौरवं च स्यादित्याशङ्क्याह. सादृश्यात्स्मारकं परमिति । वाक्यावयवभूतस्य स्वतन्त्रपदतुल्यत्वात् पदार्थस्मारकत्वम् । अन्यथा स्वार्थं प्रतिपाद्य कृतार्थत्वे वाक्यार्थो न तैर्जन्येतेति शंकराचार्यैकदेशिनोमेतद्वयमाहुः **यदपीति** । **निषादेति** निषादः पञ्चमो येषाम् । शंकराचार्यैः श्रुत्या पञ्चजनशब्दार्थ उक्तस्तमाहुः **यत्पाञ्चेति** श्रुत्यर्थस्तु पाञ्चजन्यया प्रजया विशतीति विद् तया विशा पुरुषरूपस्येन्द्रियस्याह्वानार्थं घोषाः सृष्टा इति यत्तदुक्तम् । घोषातिरेकेणेन्द्राह्वानायोगात् इति श्रुत्यनुसारेण प्रजामात्रग्रहेपि न दोष इत्यर्थः । प्राणादयः पञ्चजना इति सूत्रोक्तविरोधमाशङ्क्याह शंकरभाष्ये भाष्यकारस्तदाहुराचार्येणेति भगवता व्यासेन । **वाक्येति** प्राणादीनां पञ्चजनत्वम् । **सर्वाधारेति** अत्रार्थे श्रुतिः प्रश्नोपनिषत्था कस्मिन् सर्वे संप्रतिष्ठिता भवन्तीत्यादिः पूर्वमुक्ता । ननु पृथिव्यादीनां पूर्वमुक्तत्वादेव पितृगन्धर्वासुररक्षोभिर्निषादपञ्चमचतुर्वर्णैश्च सर्वप्रतिष्ठा सिद्धिरस्तु इति चेत्तत्राहुः **पञ्चेति** । पञ्चशब्दद्वये द्वितीयपञ्चशब्दस्य पञ्चबुद्धिवृत्तिवाचकत्वेन प्रथमपञ्चपदं पञ्चसंख्येयान् वक्ति त्वग्घ्राणादिपञ्च प्राणाः प्राणापानव्यानादयः पञ्च पुनः प्राणाः नागकूर्मकृकलदेवदत्तधनंजयाः इति पञ्च, रसनादयः पञ्च । काण्वपाठे वागादयः पञ्च, एतदेकवाक्यतया रसना कर्मेन्द्रियम् । न च पुराणे ज्ञानेन्द्रियेषु पाठविरोध इति शङ्क्यं पुराणमतत्वात् 'अग्निर्वाग्भूत्वा मुखं प्राविशत्' इतिप्रकाशकत्वेन वागिन्द्रियस्य ज्ञानेन्द्रियत्वात् । न च वस्तुप्राप्यकारित्वप्रसङ्ग इति शङ्क्यम् । ज्ञानेन्द्रियाणां वस्तुप्राप्यप्रकाशकारित्वेपि निस्तात्पर्यकत्वप्रसङ्गवारणप्रसङ्गे चतुर्णां प्राप्यप्रकाशकारित्वं न वाचः । यथा दोरादिचतुष्कमन्यदेवेति व्यष्टिसमष्टिभेदेन श्रुत्युक्तमनोबुद्धिचित्ताहंकाराः । पञ्चेति तन्निष्ठपञ्चसंख्यायाः निस्तात्पर्यकत्वं निष्क्रान्ता तात्पर्यकादिति निस्तात्पर्यका तस्याः भावो निस्तात्पर्यकत्वम् । त्वे चेति सूत्रेण ह्रस्वो वा समासाश्रयविधिस्थं सूत्रं तस्य प्रसङ्गस्य । अयं भावः । यस्मिन् पञ्च पचजना इति मन्त्रे बुद्धिवृत्तिजनाः पञ्चेत्यनुक्त्वा पञ्च पञ्चजना इत्युक्तम् । पञ्चेत्यपि वाक्यशेषादृणनया लभ्यते एवं च पञ्च पञ्च पञ्च पञ्च पञ्च जना इत्युक्तम् । पञ्चजना वृद्धत्वविशिष्ट पञ्च पञ्च पञ्च । बहुत्वं च पञ्च पञ्च पञ्च पञ्च पञ्चनिष्ठमप्येतदितीच्छयोक्तम् । 'वक्तुरिच्छा तु तात्पर्यम्' तत्प्रतीतीच्छयोच्चरितत्वं वा । एवं च पञ्चपदस्य त्वग्घ्राणादिपञ्चसु तात्पर्यम् ।

भाष्यप्रकाशः।

कत्वप्रसङ्गस्य दुर्वारत्वात्। वाक्यशेषानादरे खले कपोतिकावत् सर्वपक्षपातेन वाक्यार्थनिर्णयाभावप्रसङ्गाच्च। वाक्यशेषस्यानिर्णायकत्वेन न्यायचर्चावैयर्थ्यापत्तेश्च।

अन्ये तु वाक्यशेषबलादेव पञ्चजनशब्दस्य प्राणादिषु रूढिमाहुः। तत् पूर्वोक्तपक्षापेक्षया सम्यगपि वाक्यशेषस्य वराहं गावोऽनुधावन्तीत्यादौ नियामकत्वेन शक्तिग्राहकत्वदर्शनाभियमस्य

रश्मिः।

द्वितीयपञ्चपदस्य प्राणेषु पञ्चसु, तृतीयस्य नागादिप्राणेषु, चतुर्थस्य रसनादीन्द्रियेषु वागादीन्द्रियेषु वा, पञ्चमस्य मन आदिकरणेषु। श्रुत्वा प्रजापरः पञ्चजनशब्द इति यदुक्तं तदपि पञ्चजना प्राणादयस्तेभ्यो हिताः पाञ्चजन्या इति न भवति 'पञ्चजनादुपसंख्यानं' इति वार्तिकाच्छप्रत्ययः पञ्चजनीनमिति स्यात् अतः स्वार्थे ष्यञ्। नापि छान्दसेन 'भवे छन्दसि' इति सूत्रेण यत्। अर्थासंभवात्। तया विशा प्रजयेत्यन्यत् पूर्ववदित्यर्थस्यापि वक्तुं शक्यत्वादविरुद्धम्। अतो वाक्यशेषानादरे दोषमाहुः वाक्यशेषेति। खले कपोतिकान्यायस्तु—

वृद्धा युवानः शिशवः कपोताः
खले यथामी युगपत्पतन्ति।
तथैव चामी युगपत्पदार्थाः
परस्परेणान्वयिनो भवन्ति॥ इति।

वाक्येति वाक्यं तु यस्मिन् पञ्च पञ्चजना इति। न्यायेति सिद्धान्तमुक्तावल्यां विश्वनाथः। वाक्यशेषादपि शक्तिग्रहः यथा 'यवमयश्चरुर्भवति' इत्यत्र यवपदस्य दीर्घशुकविशेषे आर्याणां प्रयोगः कङ्गौ च म्लेच्छानां यत्रान्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्ति तत्र।

'वसन्ते सर्वसस्यानां जायते पत्रशातनम्।
मोदमानाश्च तिष्ठन्ति यवा कणशशालिनः'॥

इति वाक्यशेषाद्दीर्घशूकविशेषे शक्तिर्निर्णीयते कङ्गौ च शक्तिभ्रमात्प्रयोगः। नानाशक्तिकल्पनागौरवात्। हरिपदादौ विनिगमकाभावान् नानाशक्तिकल्पनमिति चकाराद्वेदव्याससूत्रप्रामाण्यात्श्रुतेरुक्त एवार्थः। आहुरिति रामानुजाचार्या व्यञ्जनामाहुः तथा च वाक्यशेषोक्त्यनन्तरं भापयन्ति ब्रह्माश्रयाः प्राणादयः एव पञ्च पञ्चजना इति विज्ञायत इति सम्यगपीति सर्वाधारस्वरूपब्रह्ममाहात्म्यसिद्ध्या सम्यक् तात्पर्यार्थानुक्त्या न तादृश ब्रह्ममाहात्म्यासिद्ध्यापीति पदम्। अपिर्गर्हायाम्। माहात्म्यसिद्धिर्गर्हिता तात्पर्याभावात् पञ्चपञ्चपदयोः। वाक्यशेषस्येति वाक्यशेषत्वेन रूपेण वाक्यशेषस्य। पूर्वतन्त्रे प्रथमस्य तृतीयपादे पञ्चमाधिकरणे वाराही उपानहावुपमुञ्चते इति श्रूयते अत्र वराहशब्दमार्याः शूकरे प्रयुञ्जते म्लेच्छाः कृष्णशकुनौ तथा सति लोकव्यवहारेण निश्चेतव्येषु शब्दार्थेषु आर्यम्लेच्छप्रसिद्ध्योः समबलत्वादुभयविधोप्यर्थः विकल्पेन स्वीकार्य इति प्राप्ते उक्तम्। शास्त्रीयधर्मावबोधे शास्त्रप्रसिद्धिर्बलीयसी प्रत्यासन्नत्वादविच्छिन्नपारंपर्यागतत्वाच्च शास्त्रे च वराहं गावोनुधावन्ति इत्यादौ वाक्यशेष इत्यर्थः। आदिपदेन यवमयश्चरुर्भवति इत्यस्य वाक्यशेषः। यत्रान्या ओषधयो म्लायन्ते अथ ते मोदमाना इवोत्तिष्ठन्ति इति तस्य संग्रहः। गवामनुधावनं शूकरविषये संभवति न कृष्णशकुनिविषये इति वाक्यशेषत्वं वराह इत्यस्य। शक्तीति वराहे वराहपदस्य

ज्योतिषैकेषामसत्यन्ने ॥ १३ ॥

काण्वपाठे, अन्नस्यान्नमिति नास्ति, तदा कथं पञ्च? तत्राह। ज्योतिषा संख्यापूर्तिस्तेषाम्। यस्मादर्वाक् संवत्सर इति पूर्वं पठितो मन्त्रः। तत्र तद्देवा ज्योतिषां ज्योतिरिति। अन्नस्थाने ज्योतिर्ग्राह्यम्। व्याख्यानं पूर्वमेव। तस्मात् सिद्धं न तन्मतस्य श्रुतिमूलत्वम् ॥ १३ ॥

इति प्रथमाध्यायचतुर्थपादे तृतीयं त्रिसूत्रं न संख्योपसंग्रहाधिकरणम् ॥ ३ ॥

भाष्यप्रकाशः।

च प्रसिद्धप्रसृत्वरशक्तिसापेक्षत्वात् प्रकृते च प्रसिद्ध्यभावाचिन्त्यम्। तस्माद् योग एव साधीयानिति दिक् ॥ १२ ॥

ज्योतिषैकेषामसत्यन्ने ॥ १३ ॥ व्याख्यानं पूर्वमेवेति ज्योतिषा तेजोवाचौ ग्रहीतव्ये। मनसोऽन्नमयत्वेन मनसाऽन्नाचूरसना ग्राह्याः। चक्षुषैकं चक्षुरेव ग्राह्यमित्येवं पूर्वोक्तरीतिकमेवेत्यर्थः। ननु काण्वमाध्यंदिनपाठविरोधादिह वाक्यशेषगतप्राणादिग्रहणं न युक्तम्। विकल्पापादकत्वादिति चेन्न। तुल्यबलतया षोडशिग्रहणाग्रहणवत् श्रुत्यभिप्रेतत्वेन विकल्पस्यादुष्टत्वात्। न च तत्रातिरात्रयागे व्यक्तिभेदेन ग्रहणाग्रहणयोरुपपत्तिवत् प्रकृते ब्रह्मण एकत्वेन

रश्मिः।

शक्तिग्राहकत्वेत्यादिः। प्रसृत्वरेति प्रपूर्वकसर्तेः क्वरप्। सूत्रं तु 'इण्नशजिसर्तिभ्यः क्वरप्' इति। प्रसिद्धीति पञ्चजनशब्दस्य प्राणादिषु। योग एवेति तथा च भाष्यम्। महद्वेति सूत्रस्य 'महान्तं विभुमात्मानं' 'वेदाहमेतं पुरुषं महान्त'मित्यादौ महच्छब्दो ब्रह्मपरो योगेन एवमव्यक्तशब्दोप्यक्षरवाचक इतीति। दिगिति व्याकरणस्याङ्गतया वेदान्ते योगाबाधे रूढिरयुक्तेति न रूढिर्योगमपहरतीति नैयायिकमतप्रसरः। नैयायिकमतस्य पातित्यसाधकत्वस्मरणाच्छ्रुतिविरुद्धांशत्याजकत्वस्मरणाच्च ॥ १२ ॥

ज्योतिषैकेषामसत्यन्ने ॥ १३ ॥ भाष्ये। यस्मादर्वागिति।

'यस्मादर्वाक् संवत्सरोऽहोभिः परिवर्तते।
तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्' ॥ इति मन्त्रः।

प्रकृते। काठिन्याद् व्याकुर्वन्ति स्म ज्योतिषा तेजोवाचाविति व्याख्यातम्। विकल्प इति केषांचिदन्नं केषांचिज्ज्योतिरिति स च पूर्वतन्त्रे परिसंख्याविधिनिरूपणे विकल्पस्य दोषत्वकथनात्। तुल्येति अन्नज्योतिर्ग्रहणयोस्तुल्यबलत्वम्। अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीति श्रुतिर्ज्योतिष्टोमस्य संस्थाविशेषेऽस्ति। अदुष्टत्वादिति यथाह जैमिनीयन्यायमालाविस्तरे सत्स्वप्यष्टदोषेषु गत्यन्तराभावाद् व्रीहियववत् विकल्पोऽस्त्विति तत्र व्रीहियवविकल्पो द्वादशतृतीयपादे चतुर्थाधिकरणे व्रीहिभिर्यजेत यवैर्यजेत इति श्रुत्युपन्यासेनोपपादितः। व्यक्तीति दशमस्याष्टमे पादे तृतीयाधिकरणेऽस्ति अतिरात्रभेदादतिरात्रव्यक्तिभेदेन। इदमपि तत्रैव। पर्युदासार्थवादनिषेधेषु निषेधार्थभङ्गीकृत्य न चात्रापि व्याघातः शङ्कनीयः। अनुष्ठानविकल्पाङ्गीकारेण भिन्नप्रयोगविषयत्वात्। सत्स्वप्यष्टदोषेषु गत्यन्तराभावात् व्रीहियववत् विकल्पोऽभ्युपेतव्यः। तस्मात्प्रतिषेध इति राद्धान्त इति इयमुपपत्तिरपि। तद्वद् दार्ष्टान्तिके योजयन्ति प्रकृत इति। ब्रह्मणोऽतिरात्रस्थानीयत्वम्। यस्मिन् पञ्च पञ्चजना इत्यत्र यच्छब्दार्थस्य।

१. पाद्मे उमामहेश्वरसंवादेऽस्ति।

भाष्यप्रकाशः।

ग्राह्याणां प्राणादीनामन्यान्यत्वेन युगपद् ग्रहीतुमशक्तिरिति शङ्क्यम्। प्रकृतेऽपि तेषामेव सत्त्वेन ग्राहकशब्दमात्रभेदस्य तत्तत्पाठकरूपाधिकारिभेदाद् ग्रहीतुं शक्यतया सुखेनैवोपपत्तेरिति। भाष्यं तु निगदव्याख्यातमेवेति शुभम्॥ १३॥

इति तृतीयं न संख्योपसंग्रहाधिकरणम्॥ ३॥

रश्मिः।

दृष्टान्ते षोडशिग्रहणाग्रहणे उक्ते दार्ष्टान्तिकेऽन्नस्यान्नमित्यस्य ग्रहणाग्रहणे ते प्राणाद्यन्तर्गते इति। प्राणादीनां ग्राहकत्वमाहुः ग्राह्याणामिति। अन्येति अन्येषां काण्वानामन्यत्वम्। कर्मव्यतिहाराभावात् समासः। समासवत् सुपः सोरभावश्च तद्धितसमासिसमीपे सर्वनाम्नो द्वे विहिते कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलम्। बहुलग्रहणात् अन्यपरयोर्न समासवत्। इतरशब्दस्य तु नित्यम्। असमासवद्भावे पूर्वपदस्य सुपः सुर्वक्तव्यः अन्योन्यं विप्रा नमन्तीतिवत्। अन्यमित्यस्य द्वित्वे पूर्वपदस्य सुपः सौ रूपसिद्धिः। ग्रहीतुमिति षोडशिग्रहणाग्रहणवत्। प्रकृत्त इति काण्वपाठे। तेषामिति सोयं गकार इतिवत्। तेषां माध्यंदिनपठितानां प्राणादीनामेव सत्त्वेन। ग्राहकौ शब्दौ अन्नज्योतीरूपौ तावेव ग्राहकशब्दमात्रौ तयोर्भेदस्य। तत्तत्पाठकेति काण्वमाध्यंदिनपाठकेत्यर्थः। ग्रहीतुमिति षोडशिग्रहणाग्रहणयोर्ग्रहणवत्। षोडशी ज्योतिष्टोमसंस्था। स्वयमेकोपि ज्योतिष्टोमः समाप्तिभेदात् भिद्यते यतो यज्ञायज्ञीयस्तोत्रेण समाप्तावग्निष्टोम इत्युच्यते। तस्मादपि स्तोत्रादूर्ध्वमुक्थ्यस्तोत्रेण समाप्तावुक्थ्य इत्युच्यते। अतिरात्रे षोडशिनमित्यादिमन्त्रेण समाप्तौ षोडशीत्याद्युच्यते। इत्येवं सप्तसंस्थावान् ज्योतिष्टोमः। श्रीभागवते तृतीयद्वादशेध्याये—

'षोडश्युक्थ्यौ पूर्ववक्त्रात् पुरीष्यग्निष्टुतावथ।
आप्तोर्यामातिरात्रौ च वाजपेयं स गोसवम्'॥ इति वाक्यम्।

अग्निष्टुत् अग्निष्टोमः पुरीष्या अग्नयः चयनात्मकाः पुरीषं यस्यास्तीति पुरीषी च अग्निष्टुच्च पुरीष्याग्निष्टुतौ समासान्तः आप्तोर्यामः अतिरात्रस्यैव भूमा सविशेषोतिरात्र इत्यर्थः। वाजपेयोपि स्वतन्त्रो महाफलः। गोसवः गोसत्रं तयोरपि सहभावः। इति सुबोधिनी। शंकराचार्यभाष्ये तु कथं पुनरुभयेषां तुल्यवदिदं ज्योतिः पठ्यमानं समानमन्त्रगतया पञ्चसंख्यया केषांचिद्गृह्यते केषांचिन्नेति अपेक्षाभेदादित्याह माध्यंदिनानां समानमन्त्रपठितप्राणादिपञ्चतया लाभान्नास्मिन् मन्त्रान्तरपठिते ज्योतिष्यपेक्षा भवति तदलाभाच्च काण्वानां भवत्यपेक्षा अपेक्षाभेदाच्च समानेपि मन्त्रे ज्योतिषो ग्रहणाग्रहणे यथा समानेप्यतिरात्रे वचनभेदात् षोडशिनो ग्रहणाग्रहणे तद्वत् इत्युक्तम्। ननु व्याख्यानं पूर्वमेवेति भाष्यमात्रं व्याकृतमन्यत्कुतो न व्याकृतमित्याशङ्क्याहुः भाष्यं त्विति। अत्र यस्मिन् पञ्च पञ्चजना इति विषये संशयः अत्र पञ्च पञ्चजना इति प्रोक्ताः पदार्थाः किं सांख्यशास्त्रोक्ततत्त्वानि आहोस्विच्छ्रुतिप्रोक्ताः प्राणचक्षुःश्रोत्रमनोन्नसंज्ञकाः इति। पूर्वपक्षस्तु सांख्यशास्त्रप्रसिद्धायाः पञ्चविंशतिसंख्याया अत्रावभासनात् सांख्यतत्त्वानि पञ्च पञ्चजना इति। सिद्धान्तस्तु वाक्यशेषोक्ताः प्राणादयः पञ्च पञ्चजनाः इति। संगतिस्तु पूर्वाधिकरणोक्ता। किं च पञ्चपदं पचि व्यक्तीकरणे भ्वा. आ. सेट्, पचि विस्तारे चुरा प. सेट्।

'संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे।
कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु'॥

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ १४ ॥ (१।४।१४)

श्रुतेर्विप्रतिषेधात् स्मृतिरेव ग्राह्येति मतं दूरीकर्तुं श्रुतिविप्रतिषेधो नास्तीत्यधिकरणमारभते। तत्र श्रुतौ सृष्टिभेदा बहवः क्वचिदाकाशादिका। 'आत्मन आकाशः संभूतः' इति। क्वचित् तेजःप्रभृतिका। तत् तेजोऽसृजतेति। क्वचिदन्य-

भाष्यप्रकाशः ।

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ १४ ॥ ननु पूर्वाधिकरणैः सांख्यमतस्य श्रौतत्वे निराकृते पुनरस्य किं प्रयोजनमित्याकाङ्क्षायामधिकरणप्रयोजनमाहुः श्रुतेरित्यादि। स्मृतिरिति सांख्यस्मृतिः। मतमिति सांख्याभिमतम्। नास्तीति इति बोधनाय। विप्रतिषेधबोधकं विषयमाहुः तत्रेत्यादि। असृजतेत्यन्तम्। अन्यथैवेति युगपत् साक्षात्। संशयस्तु एकस्यां सृष्टौ वक्तव्यायामेवं विप्रतिषिद्धनानाप्रकारकमनेन तदनिर्णायिकां श्रुतिं विहायैकप्रकारनिर्णायिका स्मृतिरेवादर्तव्या ? उत, विप्रतिषेधं परिहृत्य सर्वस्मृत्युपजीव्या

रश्मिः ।

इति पचेः कनिन् कर्तरि, तथा च व्यक्तीकृतबुद्धिवृत्तीनां जनाः पञ्च व्यक्तिकारका प्राणादय इत्यर्थो भवति न रूढ्या प्राणादयोर्थाः। रूढेर्वेदान्तानङ्गत्वात्। योगबोधकव्याकरणस्याङ्गत्वात्। न च भाष्ये यौगिकार्थः कुतो न कृतः इति शङ्क्यम्। भगवदिच्छया प्रसिद्धो योर्थस्तत्परत्वात् भाष्यस्य, उक्तार्थाविरुद्धत्वाद्वा भाष्यस्येति ॥ १३ ॥

इति तृतीयमधिकरणम्।

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ १४ ॥ श्रुतेरित्यादीति। **भाष्ये।** विप्रतिषेधात् अनेकधा विरुद्धप्रतिनिधिप्रापणात्। श्रुतेर्हेतोर्ब्रह्मणो विप्रतिषेधात्। ग्राह्येति। अयमर्थः। ननु प्रथमस्य तृतीयपादे औदुम्बरीं स्पृष्ट्वोद्गायेदिति श्रुत्या औदुम्बरी सर्वा वेष्टयितव्येति स्मृतिरप्रमाणमित्युक्ते ग्राह्येति बुद्धिरेव नोदेतीति चेन्न। मूढग्राहेण स्मृतिसंग्रहात्। तथाहि औदम्बरी ज्योतिष्टोमे सदोनामकस्य मण्डपस्य मध्ये काचिदौदम्बरीशाखा निखन्यते तस्याश्च वेष्टनं वाससा स्मर्यते इति श्रुतिमूलरहिता स्मृतिरप्रमाणम्। सांख्यस्मृतिस्तु तच्छास्त्ररूपा अष्टकाः कर्तव्या इति वाक्यवत्प्रमाणं सांख्यानाम्।

'एकं सांख्यं च योगं च वेदारण्यकमेव च।
परस्पराङ्गान्येतानि पञ्चरात्रं च कथ्यते' ॥

इति परस्पराङ्गत्वात्। तथा चैतन्मतम्। तदुक्तं 'यावानर्थ उदपाने' इति गीतायाम्। 'सांख्योप्येकः सदादृतः' इति निबन्धे। तृतीयाधिकरणे सदाचारस्य मानत्वोक्तिश्च। दूरीकर्तुमिति तत्र श्रद्धात्याजनेन पाषण्डित्वापादकं दूरीकर्तुमधिकरणमारभत आचार्यः। ननु श्रुतिविप्रतिषेधोस्ति इति व्यर्थोधिकरणारम्भः इति चेत्तत्राहुः श्रुतीति। नास्तीति बोधनायेति योजनामाहुः प्रकाशे इतीति। तत्रेति भाष्यं व्याकर्तुमाहुः विप्रतीति। युगपदिति। अग्रेतनश्रुतिद्वये द्रष्टव्यम्।

'एतस्माद् ब्रह्मणः प्राणो मनः सर्वेन्द्रियाणि च।
खं वायुर्ज्योतिरापः पृथ्वी विश्वस्य धारिणी' इति ॥

मुण्डके युगपत्। इदं परिदृश्यमानं सर्वं ब्रह्म कर्तृ असृजत इति तैत्तिरीये साक्षात्। एवं पूर्वोक्ता- तैत्तिरीये। द्वितीया छान्दोग्ये श्वेतकेतूपाख्याने। सर्वस्मृतीति इदमुपपादितं पूर्वतन्त्रे प्रथमस्य तृतीयपादे

थैव। 'एतस्माज्जायते प्राण' इति। 'इद५ सर्वमसृजत' इति च। एवं क्रमव्युत्क्रमानेकविधसृष्टिप्रतिपादकत्वाद् वस्तुनो द्वैरूप्यासंभवाद्, 'गृहान्त्वा अनु प्रजा पशवः प्रजायन्ते' इतिवत् सृष्टिवाक्यानामर्थवादत्वेन ब्रह्मस्वरूपज्ञानार्थत्वादध्यारोपापवादन्यायेन न वेदाद्ब्रह्मणः कारणत्वं सिध्यति। अतः परिदृश्यमानजगतः कारणान्वेषणे क्रियमाणे बाह्याबाह्यमतभेदेषु सत्सु कपिलस्य भगवज्ज्ञानांऽशावतारत्वात् तन्मतप्रकारेणैव जगद्व्यवस्थोचितेत्येवं प्राप्ते, उच्यते। न सृष्टिभेदेषु

भाष्यप्रकाशः।

श्रुतिरेवादरणीयेति। अनिर्णायकत्वमुपजीव्यता च संदेहबीजम्। तत्र संशयस्य पूर्वपक्षयुक्तिभिरेवावगमात् तमनुक्त्वा पूर्वपक्षमेवाहुः एवमित्यादि। क्रमव्युत्क्रमेति नानाविधक्रमैर्नानाविधव्युत्क्रमैश्चेत्यर्थः। सृष्टिवाक्यानीतिपाठे त्वर्थवादत्वेनेत्यस्याग्रे, ग्राह्याणीति शेषो बोध्यः। शेषं स्फुटम्। एतत्समाधिं व्याकुर्वते न सृष्टीत्यादि। अयमर्थः। श्रुतयो हि ब्रह्मणस्तन्माहात्म्यस्य च बोधनार्थं प्रवृत्ताः। 'वन्दिनस्तत्पराक्रमैः' इति श्रीभागवते वेदस्तुतौ वाक्यात्। तत्रापि माहात्म्यमेव मुख्यम्। बोधनद्वारत्वात्। न चाध्यारोपापवादन्यायादरे ब्रह्मस्वरूपप्रतिपत्तिः। उन्मत्तादिप्रलाप इव तत्रापि वाक्ये अप्रामाण्यस्य, श्रुतौ च प्रतारकत्वस्य स्फूर्त्या

रश्मिः।

विमता स्मृतिर्वेदमूला वैदिकमन्वादिप्रणीतस्मृतित्वात् उपनयनाध्ययनादिस्मृतिवत् न च वैयर्थ्यम्। अस्मदादीनां प्रत्यक्षेषु परोक्षेषु नानावेदेषु प्रकीर्णस्यानुष्ठेयार्थस्यैकत्र संक्षिप्यमाणत्वात्। अनिर्णायेति नन्वेतेषां पदानां श्रुतौ कुतोऽनिर्णायकत्वमिति चेन्न पुराणोपबृंहितस्य वेदस्य निर्णायकत्वात्। तमिति संशयम्। नानेति नानापदार्थो भेदः अनेकपदे नञोर्थः। आश्रयतया एकभेदोऽन्यत्रैकस्यां संख्येयायां विधायां सा भेदविशिष्टा। नानापदार्थोपि भेदः आश्रयतया विधासु। अतो भाष्योक्तानेकविधापदस्य नानाविधापदस्यैकार्थत्वम्। 'नानानेकोभयार्थयोः' इतिविश्वाच्च। तथा च क्रमव्युत्क्रमाभ्यामनेकविधानां सृष्टीनां प्रतिपादकत्वादिति भाष्यार्थप्राञ्जल्येपि क्रमव्युत्क्रमयोरनेकविधानां सृष्टीनां प्रतिपादकत्वादित्यर्थे क्रमव्युत्क्रमसंबन्ध्यनेकविधासंबन्धिनी न सृष्टीनामित्यर्थेनेकविधानां क्रमव्युत्क्रमयोरपि भानादेवमर्थ उक्तः। शेषमिति। वस्तुनो ब्रह्मणः। द्वैरूप्यं विकृतत्वम्। अतः प्रकृतिर्मायाऽविद्या वा कर्त्री पुरुषोऽसंग इति भावः। गृहानिति श्रुतौ वै निश्चये गृहानिति द्वितीयाऽनोर्योगे ज्ञेया। श्रुतिस्तु षष्ठाष्टकपञ्चमाध्याये। अर्थवादत्वेनेति दृष्टान्तेऽर्थवादोऽनुवादात्मकः प्रत्यक्षसिद्धार्थानुवादात्। 'अग्निर्हिमस्य भेषजम्' इतिवत्। दार्ष्टान्तिकेप्यर्थवादत्वं आद्ये गुणानुवादत्वं वा 'आदित्यो यूपः' इतिवत्। गुणवादरूपार्थवादत्वम्। आकाशाद्वायुरित्यत्राथवा अद्भ्यः पृथिवीत्यत्राप्सु पृथिव्युपादानत्वरूपप्रत्यक्षविरुधार्थबोधकत्वविरोध इति। आदित्ये यूपे आदित्यत्वरूपप्रत्यक्षविरुद्धार्थबोधकत्वविरोधवत्। ननु सांख्यमते निराकर्तव्ये भाट्टमतस्य किं प्रयोजनमिति चेदुच्यते। मायाप्रकृत्यविद्यावादा अपि श्रौता इति भाष्यस्यानुमानिकसूत्रे दर्शनान्मायावादिनां व्यवहारे भाट्टमताङ्गीकारात् तत्तुल्ये सांख्यमतेपि भाट्टमतबोधनस्यैव प्रयोजनत्वात्। ब्रह्मेति 'असङ्गो ह्ययं पुरुषः' सांख्यसूत्रोक्तब्रह्मस्वरूपेत्यादिः। अध्यारोपेति जगज्जन्मादिकर्तृत्वं तटस्थलक्षणं काकवन्तो देवदत्तस्य गृहाः इतिवत्। इदं मायोपहितस्य ब्रह्मणः, अयमेवाध्यारोप इत्युच्यते। अस्यापवाद इदानीमुच्यते अपवादो नाम अधिष्ठाने भ्रान्त्या प्रतीतस्य तद्व्यतिरेकेणाभावनिश्चयः।

रश्मिः ।

यथा शुक्त्यादौ भ्रान्त्या प्रतीतस्य रजतादेः शुक्तिव्यतिरेकेण नेदं रजतं किं तु शुक्तिरित्यभावनिश्चयः, अनेन न्यायेन । तत्त्वानुसंधानेऽस्य प्रपञ्चः । न वेदादिति 'अथात आदेशो नेति नेति' 'नेह नानास्ति किंचनेति' अपवादरूपाद्वेदात् । बाह्येति बाह्या नास्तिकाः । अबाह्याः प्रच्छन्नबौधाः मायाप्रकृत्यविद्यावादिनः । ज्ञानेति तृतीयस्कन्धे कपिलोपाख्याने । एवं शेषं स्फुटमित्यर्थः । अत्र वेदार्थस्य निर्गुणसगुणरूपस्य आरोपापवादसंगत्यधीनत्वं सतो ह्यारोपापवादयोः वेदस्यार्थवादत्वं स्वार्थे प्रमाणाभावोपपादने बाधकाभावादतो निर्वाहकसंगतिं सूचयितुं श्रुतिविप्रतिषेधं निषेधन्ति अतोऽत्रारोपापवादसंगतिनिषेधतात्पर्यमिति । अनेनाशयेन भाष्यं विवृण्वन्ति **अयमर्थ** इति । स्याद्यदि ह्यारोपापवादसंगत्या वेदार्थः स्याचेर्हि अधिष्ठाने भ्रान्त्या प्रतीतस्य जगत्कर्तृत्वादेः तद्व्यतिरेकेणाभावनिश्चयः न त्वेवं श्रीभागवते क्वचिच्छ्रूयमाणोऽप्यध्यारोपपावादो न सार्वत्रिकः । जगन्मिथ्यात्व एव जगज्जन्मादिकर्तृत्वापवादापत्त्या जगन्नित्यत्वबोधकश्रीभागवतविरोधात् । किं तु पुराणमतत्वेन पुराण एव । भगवदिच्छावशात् । अतो वेदस्तुतिवाक्यं श्रीभागवतीयं वक्ष्यन्ति तदाहुः **श्रुतय** इति । माहात्म्यं देवत्वं तच्च पदजन्यपदार्थो भवति । अत्र पदज्ञानं तु करणं 'यतो वा इमानि भूतानि जायन्ते' इत्याद्युक्तपदानां ज्ञानं करणं, माहात्म्यरूपपदार्थधीस्तद्बोधनरूपा द्वारं, शाब्दबोधः फलम् । स च यतो यच्छब्दार्थभूताभिन्ननिमित्तोपादानिका प्रत्यक्षभूतकर्तृका जनिरिति । नन्वध्यारोपापवादानङ्गीकारे वस्तुनो वैरूप्यापत्तिस्तदङ्गीकारे ब्रह्मस्वरूपस्य शुद्धबुद्धमुक्तस्वभावासङ्गरूपस्य प्रतिपत्तिः प्रकृत्यादेर्वैरूप्यादित्याशङ्कते वादीत्याहुः **न चे**ति । इति शङ्क्यमिति योजनीयम् । **तत्रापी**ति वेदान्तेष्वपि यत्र विधिं परिकल्प्यार्थवादा योज्यन्ते तत्रेत्यर्थः । **प्रतारे**ति प्रकृष्टतारको दैत्यः 'प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः' इत्युक्तस्तत्त्वस्फूर्त्या । **अत** इति । तादृशन्यायानादरणसमानाधिकरणा कारणस्य सिद्धिः । कालेऽधिकरणम् । **अयमर्थः** यावत्कालमुक्तन्यायादरस्तावत्कालं न कारणसिद्धिः वेदस्यार्थवादत्वेन स्वार्थे प्रामाण्याभावात् कारणत्वबोधकस्य । यदा तु ह्युक्तन्यायानादरस्तदा तु वेदस्यानधिगतार्थगन्तृत्वलक्षणप्रामाण्यम् । निर्वाहकसंगत्या स्फोरणात् । ननु क्वोक्तेयं संगतिरिति चेन्न श्रीभागवत एव—

'ब्रह्मन् ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः ।
कथं चरन्ति श्रुतयः साक्षात्सदसतः परे' ॥

इति राज्ञा पृष्टः श्रीशुकः स्वरूपलक्षणं त्यक्त्वा 'बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः' इति तटस्थलक्षणमाहेति । न च गुणवृत्तय इति श्रुतिविशेषणात् आरोपापवादोपीति वाच्यम् । 'अथातो ब्रह्मजिज्ञासा' इति प्रतिज्ञाय 'जन्माद्यस्य यतः' इत्यवदद्यतो व्यासः अत्राप्येवमिति चेन्न पूर्वं स्वरूपलक्षणमित्यादसंदिग्धत्वेपीति सहृदयैर्विचारणीयम् । निर्गुणब्रह्म प्रतिज्ञाय सगुणनिरूपणे व्यासस्य प्रतिज्ञाहानिरूपनिग्रहस्थानापत्तिरुपक्रमविरोध इत्यलम् । विद्वन्मण्डने निर्गुणसगुणप्रतिपादकश्रुतिभागौ कल्पयित्वा बाध्यबाधकभावविचारे

'अभेदादनुपाधित्वाज्जगदप्रत्ययात्ततः ।
सर्वाधारत्वतस्तावच्छक्तित्वान्नास्य बाधनम्' ॥

इत्यस्याः कारिकायाः विवरणे । किं च ब्रह्मनिरूपकमहावाक्ये त्वन्मते सृष्टिनिरूपकाणि वाक्यान्यसंगतानि स्युः तदनिरूपकत्वात् । नन्वस्ति संगतिरध्यारोपापवादलक्षणा । तथाहि शुद्धब्रह्मणो

ब्रह्मणः कारणत्वे विप्रतिपत्तिः। सर्वप्रकारेषु तस्यैव कारणत्वोक्तेः। आकाशादिषु कारणत्वेन ब्रह्म यथा व्यपदिष्टमेवैकत्र, अन्यत्रापि तदेव कारणत्वेनोक्तम्। 'न तस्य कार्यं करणं च विद्यते' इत्यादिनिराकरणं तु लौकिककर्तृत्वनिषेधपरम्।

भाष्यप्रकाशः।

विश्वासनाशप्रसङ्गात्। अतस्तस्य न्यायस्यानादरे कारणस्य सिद्धौ न सृष्टिप्रभेदेषु ब्रह्मणः कारणत्वे विप्रतिपत्तिः। सर्वप्रकारेषु कारणत्वोक्तेः। तदेतदाह **कारणत्वेन चाकाशादिष्विति**। आकाशतेजःप्रभृतिषु क्रमिकेषु प्राणादिषु चाक्रमिकेषु कार्येषु कारणत्वेन यथाव्यपदिष्टोक्तेः। एकत्र यथैव सर्वज्ञत्वसर्वेश्वरत्वसर्वात्मत्वैकत्वाद्वितीयत्वसच्चिदानन्दरूपत्वादिधर्मवत्तया कारणत्वेन व्यपदिष्टमेवमन्यत्रापि तदेव कारणत्वेनोक्तं, तस्मादिति। नच, 'न तस्य कार्यम्' इति निषेध-

रश्मिः।

दुर्ज्ञेयत्वेन तज्ज्ञापनाय जगज्जननमुक्त्वा कर्तृत्वभोक्तृत्वे प्रतिपाद्य तद्द्वारा सोपाधिके ब्रह्मणि बुद्धौ सिद्धायां शाखारुन्धतीन्यायेन पूर्वोक्तमपोह्य कर्तृत्वाद्यपेतं ब्रह्म पश्चाद्बोध्यते इति चेन्नैवं वक्तुं युक्तं जगदप्रतीतिप्रसङ्गात्। तथाहि न हि जगत्प्रतीतिः श्रुतिसिद्धा येन पूर्वं बोधयति पश्चान्निषेधतीत्युच्येत किंतु लौकिकसिद्धा। तथा च तत्र कर्त्रपेक्षायां कर्तारमेवोपदिशतीति वक्तुं युक्तं न तु लोकसिद्धमेव जगदनूद्य तत्र कर्तृत्वं बोधयित्वा पश्चान्निषेधतीति। तथा सति कार्यस्य प्रतीतिसिद्धत्वेन कर्त्रन्तरस्याभावाच्च जगत एवासंभवेनानुवादो बाधितविषयः स्यादित्यादिना। जगत्प्रतीतिरत्र शाब्दी श्रुतिसिद्धेति चेन्न नित्यानित्यसंयोगभिया इमानि भूतानि इत्यत्र शाब्द्यास्तस्या अभावात्। आधिदैविकानीमानि भूतानीति प्रतीतिः श्रुतिसिद्धा, आधिभौतिकभूतविषयिणी त्वियम्। इदंपदप्रयोगात्। नन्विमानि भूतानीत्यत्राधिदैविकप्रतिपादकान्याधिभौतिकप्रतिपादकानीति चेन्न आधिदैविकप्रतिपादकानि सन्तीदृशस्थलेऽभियुक्तप्रसिद्ध्याधिभौतिकेष्वर्थेषु तात्पर्यवन्तीत्यभ्युपगमात्। सादृश्यात्स्मारकाणि आधिभौतिकानां वा। तथा च निर्वाहकसंगतिः स्फुटति। 'न कर्तृत्वनिषेधो ब्रह्मणि शक्यनिरूपणः' इति विद्वन्मण्डनात्। किमन्यद्ब्रह्मज्ञाननिर्वाहकमिति जिज्ञासया सृष्टिनिरूपकवाक्यानां निरूपणात्। प्रकृतमुच्यते। **कारणस्य सिद्धाविति** सामानाधिकरण्ये सति सप्तमी 'सिद्धिसमानाधिकरणं न सृष्टीत्यादिभाष्योक्तमित्यर्थः। तथाहि। निर्वाहकसंगत्यार्थवादत्वनिवृत्तौ सर्वकारणप्रतिपादकानां 'आत्मन आकाशः संभूतः' इत्यादीनां स्वार्थे प्रामाण्योपपत्तौ तदुक्तेषु सर्वप्रकारेषु तस्यैव न तु प्रकृतेः कारणत्वोक्तिस्तस्याः। न सृष्टिभेदेषु ब्रह्मणः कारणत्वे विप्रतिपत्तिरिति भाष्यार्थः प्रकाशेन सिद्धः। न च कारणस्य सिद्धावित्यन्तप्रकाशस्य न सृष्टीत्यादिभाष्येणान्वयोऽस्त्विति शङ्क्यम्। अस्य भाष्यस्य सिद्धत्वापत्त्या सर्वप्रकारेष्विति भाष्यस्य न सृष्टीत्याद्यर्थसाधकस्य वैयर्थ्यापत्तेः। आहेति सूत्रकार आह। **कारणत्वेनेति**। सूत्रव्याख्यानेनैवाकाशादिष्विति भाष्यं विवृण्वन्त आहुः **आकाशतेज** इति। स्पष्टयांबभूवुः **एकत्रेति**। 'यतो वा इमानि भूतानि जायन्ते' इत्यत्र 'जन्माद्यस्य यतः' इत्यधिकरणे मुख्यतयोक्तेः। **सर्वज्ञेति** जगदुपादानापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं जगत्कर्तृत्वं तेन 'यः सर्वज्ञः' इति श्रुत्युक्तसर्वज्ञेति। मनसाप्याकलयितुमशक्यस्य विचित्रसन्निवेशस्य सर्वेश्वरातिरिक्तकारणासंभवात् सर्वेश्वरत्वेति। समवायित्वात्सर्वात्मत्वेति अनेकेश्वरेषु सत्सु विसंमतिरत एकत्वेति। एकरसत्वव्याहत्यापत्तिरतोऽद्वितीयत्वेति। सगुणत्वं स्यादतः सच्चिदानन्दरूपत्वेति। आदिपदेन वैषम्यनैर्घृण्यापत्तिवारणाय कृतप्रयत्नापेक्षत्वम्। **व्यपदिष्टमिति** यथा प्रथावद्व्यपदिष्टम्। तस्योक्तेरिति सूत्रेऽर्थो न तु व्यपदिष्टमनतिक्रम्येति यथाव्यपदिष्टमित्यव्ययीभावो व्याख्यानात्। **अन्यत्रेति** उक्तेषु 'आत्मन आकाशः संभूतः' इत्यादिषु। **न तस्येति** भाष्यं विवृण्वन्ति स्म न च नेति। श्वेताश्वतरे षष्ठाध्याये।

तस्यैव प्रतीतेः। सर्ववैलक्षण्यार्थं वैदिकानामबाधितार्थैकवाक्यत्वस्याभिप्रेतत्वादिति चकारार्थः। कार्यप्रकारे भेदस्तु माहात्म्यज्ञापको न तु बाधकः। बहुधा कृतिसामर्थ्यं लोकेऽपि माहात्म्यसूचकमिति। तस्मान्न श्रुतिविप्रतिषेधात् स्मृतिपरिग्रह इति सिद्धम्॥ १४॥

इति प्रथमाध्याये चतुर्थपादे एकसूत्रं यथा व्यपदिष्टाधिकरणं चतुर्थम्॥ ४॥

भाष्यप्रकाशः।

श्रुतिव्याकोपः। तस्य लौकिककर्तृत्वनिषेधपरत्वात्। निषेधकवाक्योत्तरार्धे 'स्वाभाविकी ज्ञानबलक्रिया च' इति स्वाभाविकक्रियासद्भावप्रतिपादनात्। द्वितीयपादे समाऽभ्यधिकनिषेधाच्च। कार्यकारणसापेक्षलौकिककर्तृत्वनिषेधस्यैव प्रतीतेरिति। चकारसूचितं हेत्वन्तरमाहुः सर्ववैलक्षण्येत्यादि। वैदिकानामिति पदवाक्यानाम्। सिद्धमाहुः तस्मादित्यादि। उक्तरीतौ कस्या अपि श्रुतेर्व्याकोपाभावात् तथेत्यर्थः॥ १४॥

इति प्रथमाध्याये चतुर्थपादे चतुर्थमेकसूत्रं यथाव्यपदिष्टाधिकरणम्॥ ४॥

रश्मिः।

'न तस्य कार्यं करणं च विद्यते न तत्समश्चाप्यधिकश्च दृश्यते।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च'॥ इति।

लौकिकेति तत्त्वं तु कार्यस्य घटादेः कारणं समवायिनिमित्तं तज्ज्ञानरूपं तत् सापेक्षत्वं अलौकिकत्वं ब्रह्मनिष्ठमभिन्ननिमित्तोपादानत्वम्। इच्छाया धर्मत्वेन कार्यत्वादन्यानपेक्षत्वं च। एतदेवाहुः कार्यकारणेति तस्यैवेत्यादिभाष्यविवरणमिदम्। तथा च तस्यैवेत्यादिभाष्यस्यार्थस्तावत् तस्य कार्यकारणसापेक्षलौकिककर्तृत्वनिषेधस्यैव प्रतीतेः। कस्मै प्रयोजनायेत्याहुः सर्वेति। न च पदार्थकारणेभ्यो वैलक्षण्यार्थम्। न च कामधेन्वादेर्नवतत्त्वान्तर्गतत्वेन न नवपदार्थकारणेभ्यो वैलक्षण्यमिति शङ्क्यम्। कामधेन्वादेः कार्यत्वेनाकार्यत्वेनापि वैलक्षण्यस्य विवक्षणात्। अत्र नैयायिकयुक्तिसंचार इति सर्वेति भाष्यस्यार्थान्तरं चाहुः चकारेति। चकारार्थोऽग्रे वाच्यत्वेनायमर्थः सूच्यते। भाष्येस्योक्तार्थेन चकारार्थो वैदिकानामित्यादिर्ध्वनितः अनधिगतो यः सृष्टिभेदेषु ब्रह्मणः कारणत्वे विप्रतिपत्त्यभावोऽर्थः तस्य गन्तृत्वं तस्य प्रामाण्यस्य 'आत्मन आकाशः संभूतः' इत्यादिषु विषयत्वेनोदाहृतेषु सत्त्वात्। वैदिकानां लोकानधिगतो यो अबाधितार्थः पूर्वोक्तस्तत्साधिकरणात्मकेनार्थेऽस्यैकवाक्यत्वस्य तथा च सर्ववैलक्षण्यं चकारेण सूच्यत इत्यर्थः। अनधिगतार्थगन्तृत्वं प्रामाण्यमित्यत्र चकारो मानमित्युक्तम्। तथा च व्याकरणादिना श्रुत्यर्थे कृते 'यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः' इति तर्कादिसंपातेनाधिगतार्थगन्तृत्वं प्रामाण्यं दुष्टं भवेत्। एवं तु श्रुत्यनुकूलतर्कं प्रगृह्य नैषा तर्केण मतिरापनेयेति श्रुत्या यथार्थवस्तुज्ञानं भवतीति। माहात्म्येति। 'यथा त्रिविधभक्तेषु त्रिविधा भगवत्कृतिः' देवत्वबोधकम्। यथा वा दशविधलीला देवत्वबोधिका। लोके इति स्मृतौ व्यासादीनां माहात्म्यस्य वाचकं माहात्म्यपदं, सूचकं तु बहुधा कृतिसामर्थ्यं पदमर्थो वा काव्यप्रकाशे अर्थस्य व्यञ्जकत्वं यथा 'सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते' इति। तत्त्वं वाच्यस्य यथा।

'माए घरोव अरणं अज्ज्ह णत्थि त्ति साहिअं तुमए।
ता भण किं करणिज्जं एमेअ ण वासरो ठाइ'॥

१. मातर्गृहोपकरणमद्य खलु नास्तीति साधितं त्वया। तद्भण किंकरणीयमेवमेव न वासरः स्थायी॥

समाकर्षात् ॥ १५ ॥ (१।४।१५)

पुनरन्यथाशङ्क्य परिहरति। ननु क्वचित् 'असद्वा इदमग्र आसीत्' इति क्वचित्, 'सदेव सोम्येदमग्र आसीत्'। तद्धैक आहुरसदेवेदमग्र आसीत्। अव्याकृतमासीत्। 'नासदासीन्नो सदासीत्' 'तम आसीत्' इत्यादिवाक्येषु ब्रह्मणोऽपि विगानं श्रूयते। तद्धैक आहुरितिवत् पक्षान्तरं संभवति। न ह्यसत्तमःशब्दैर्ब्रह्म

भाष्यप्रकाशः।

समाकर्षात् ॥ १५ ॥ सूत्रमवतारयन्ति पुनरित्यादि। प्रकारान्तरेण श्रुतिविप्रतिषेधमाशङ्क्य परिहरतीत्यर्थः। अत्रापि संशयस्तद्बीजं च पूर्ववदेव। एकस्य ब्रह्मणः कारणत्वे वक्तव्ये नानाशब्दानां कारणे प्रयोगादनिर्णायिकां श्रुतिं विहायेत्येतावान् विशेषः। पूर्वपक्षमाहुः ननु क्वचिदित्यादि। विगानमिति विरुद्धं गानम्। कै गै शब्दे। विरुद्धः शब्दः कारणान्तरचुरद्भिः।

माए मातः अनेन सुखानुज्ञानार्थं प्रियोक्तिः सूच्यते। **घरोव अरणं** गृहोपकरणं तण्डुलादि, अनेनावश्यकरणीयत्वं सूच्यते। अज्ज: अद्य, अनेन शीघ्रत्वं सूच्यते। **खलु ण त्थित्ति** नास्तीति **साहियं** कथितम्, **तुमए** त्वया। अनेन मया व्याजो नोत्पादितः इति सूच्यते, ता तस्मात् भण, **भण** अनेन प्रेरणार्थः शीघ्रत्वं सूच्यते, **किंकरणिज्जं** किं करणीयम्। **एमेय** एवमेव, **ण** न, **वासरो** वासरः, **ठाइ** तिष्ठति। अनेन सायंकाले मम पतिव्रताया गमनं नोचितमित्यात्मनः शुद्धत्वं द्योत्यते। त्वरया प्रेरय इति वा। अत्र व्यङ्ग्यं किमित्याकाङ्क्षायां काव्यप्रकाशे व्यङ्ग्यमुक्तम्। अत्र स्वैरविहारार्थिनीति व्यज्यते। अत्रान्येषां मतानि नान्यविधानि। **माध्वास्तु** आकाशादिष्ववान्तरकारणत्वेनापि स एव स्थितः। यथाव्यपदिष्टस्यैव परस्य यच्चाकाशे तिष्ठतीत्यादिनाऽऽकाशादियूक्तेः ॥१४॥

इति चतुर्थाधिकरणम् ॥ ४ ॥

समाकर्षात् ॥१५॥ सर्वशब्दानां परमात्मवाचिनः शब्दाः अन्यत्र समाकृष्य व्यवह्रियन्ते।

'परस्य वाचकाः शब्दाः समाकृष्येतरेष्वपि।
व्यवह्रियन्ते सततं लोकवेदानुसारतः' ॥

इति पाद्मे चेत्याहुः तत्स्पष्टमिति नात्र सिद्धान्ते सूत्रं प्रवर्तितम्। समाकर्षादित्यधिकरणे भिन्नभिन्नशब्दप्रयोगप्रयोजनं न किमपि स्फुटतीति दूषणं वक्ष्यते संगतिस्तु निर्वाहकरूपैव। विषयस्तु उक्तश्रुतिरूपः। सांख्यस्मृतिरूपश्च। आकाशादिषु कारणत्वेन यथा व्यपदिष्टायाः प्रकृतेरित्येवं सूत्रार्थस्पर्शित्वात्। न च स्मृतेः सूत्रविषयत्वं नास्त्यपीति **युक्तम्**, पूर्वतन्त्रे षष्ठेऽध्याये सत्त्वात्, तथा हि षष्ठस्य द्वितीयपादे षष्ठाधिकरणे 'उपनयनादिर्नियमः' इति प्रागुपनयनात्कामचारवादभक्षा' इति स्मृतिविषय इति। ननु तर्हि कुतो दूषणमष्टकाः कर्तव्या इति स्मृतिवत् प्रमाणमस्त्विति चेन्न प्रकृतिवादत्वेन मूलश्रुत्यभावात् सर्ववेष्टनस्मृतिवत् प्रमाणत्वं न श्रुत्युक्तत्वेनेत्यलम्। सदाचारस्यापि मातुलकन्यापरिणयवदादरः। पूर्वतन्त्रे तृतीयपादे पञ्चमाधिकरणे मातुलकन्यापरिणये सदाचार उक्तः। सदाचारस्य स्मृतिमूलत्वम्।

स्मृतिस्तु—'मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च।
समानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेत्' ॥ इति।

तद्वत्प्रकृतेऽपि पाद्मे द्विचत्वारिंशाध्याये रुद्र उवाच।

'शृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमम्।
येषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि' ॥ इत्युक्त्वा।

भाष्यप्रकाशः ।

ब्द्युल्लासकः । कर्मवदिति । यथा, मलवद्वाससोऽन्नं नाद्यादिति निषिद्ध्य अथो खल्वाहुरभ्यञ्जनं वा व स्त्रिया अन्नमभ्यञ्जनमेव न प्रतिगृह्यं कामनयान्यदिति पक्षान्तरं कर्मविशेष उक्तं तद्वत् ।

रश्मिः ।

'प्रथमं हि मयोक्तं वै शैवम्' इत्युक्त्वा 'काणादेन तु संप्रोक्तं शास्त्र'मित्युक्त्वा 'सांख्यं तु कपिलेन वा' इति परंपरया पातित्यसाधकवाक्यम् । **समाकर्षात्** । सूत्रमित्यधिकरणात्मकं सूत्रम् । ननु पूर्वाधिकरणे इमाः श्रुतीरुक्त्वा ब्रह्मविगानपरिहारार्थं सूत्रमिदमिति कुतोधिकरणमिति चेन्न । पूर्वश्रुतिषु सृष्टिवैचित्र्याद्ब्रह्मणः सतो विकारित्वापत्त्या प्रकृतिः कर्त्री पुरुषोऽसङ्ग इति श्रुतिविप्रतिषेधात्स्मृतिपरिग्रहस्तर्कितः । अत्र तु ब्रह्मविगानेन श्रुतिविप्रतिषेधात् स्मृतिपरिग्रहस्तर्कितः इति भेदात् । **प्रकारे**ति प्रकारोत्र विप्रतिषेधे स च प्रकृतिः कर्त्री पुरुषोऽसङ्ग इति हेतुकः श्रुतिविप्रतिषेध इति तादृशहेतुकत्वम् तस्मादन्यः प्रकारः प्रकारान्तरं ब्रह्मविगानेन श्रुतिविप्रतिषेध इत्यत्र ब्रह्मविगानहेतुकः श्रुतिविप्रतिषेध इति ब्रह्मविगानहेतुकत्वं तेन अयं भाष्यीयान्यथाशब्दार्थः । तथा च पूर्वाधिकरणे सेश्वरसांख्यः अस्मिन्नधिकरणे निरीश्वरः सांख्य इत्यपि भेदः । पूर्ववदिति अत्रापि श्रुतिरूपो निरीश्वरसांख्यस्मृतिरूपश्च विषयः । संदेहबीजं तु अनिर्णायकत्वमुपजीवत्वं च । पूर्वस्माद्विशेषमाहुः **एकस्ये**ति । **विशेष** इति अग्रे तु एकप्रकारनिर्णायका निरीश्वरसांख्यस्मृतिरेवादर्तव्या उत विप्रतिषेधं परिहृत्य सर्वस्मृत्युपजीव्या श्रुतिरेवादरणीयेति विशेषपूरणम् । **ननु कचिदि**त्यादीति तैत्तिरीये कचिदिति छान्दोग्ये । **एवमव्याकृत**मिति पुरुषविधब्राह्मणेस्ति । **नासदासी**दिति ब्राह्मणे द्वितीयाष्टकेऽष्टमाध्याये पीवोन्नाऽरजिवृद्धः सुमेधा इत्यारम्भकेस्ति वै आदिपदेन बृहदारण्यके आरणे । नेति नेतीति मूर्तामूर्तब्राह्मणे वाक्यपदोपादानं श्रुतिपदमपहाय ज्ञापयति 'यन्नेति नेतीत्यतदुत्सिसृक्षवः' इति श्रीभागवतवाक्यम् । तद्धैक इति । एके मुख्यान्यकेवलाः इति कोशात् एके मुख्या आहुरित्यर्थे कर्मणा ब्रह्मत्वे पक्षान्तरे तत्कर्म तदसतो ब्रह्मत्वे पक्षान्तरं संभवतीत्यर्थः । कर्मवदित्यस्यार्थमाहुः यथा मलवदिति कर्मवत् सप्तम्याद्वतिः । दर्शपूर्णमासाख्य कर्मणीव तद्धैक इति श्रुतावपि पक्षान्तरं संभवतीति भाष्यार्थः । कर्मणि किं पक्षान्तरमित्याकाङ्क्षायामाहुः **यथा मले**ति अयं न्यायः तृतीयस्य चतुर्थपादेस्ति प्रागपरोधान्मलवद्वाससः इत्यधिकरणे मलवद्वाससा न संवदेत न सहासीत नास्यान्नमद्यात् ब्रह्महत्यायै ह्येषा वर्णं प्रतिमुच्यास्ते इति निषिद्ध्य नास्या अन्नमद्यादिति श्रुत्यर्थः प्रकाशे उपन्यस्तः । तत्रायं प्रतिषेधः क्रत्वर्थ आहोस्वित् पुरुषार्थ इति संदेहे क्रत्वर्थः प्रकरणादिति प्राप्ते रजस्वला निःक्रतुव्यापारा तामवरुद्ध्य यजेत इति वाक्यात् क्रतावप्राप्तत्वात् पुरुषे च स्वतन्त्रे प्राप्तत्वान्निषेधोयं पुरुषार्थ इति स्थितम् । अभ्यञ्जनं घृततैलेन वा युक्तं दीपधूमः । कामं यथेच्छम् । अन्यदिति पृथ्वी वा अन्नमिति श्रुतौ पृथ्वी ग्राह्येत्यर्थः । **कर्मविशेष** इति दर्शपूर्णमासयोः । वेत्रिति 'असन्नेव स भवति असद्ब्रह्मेति वेद चेत्' इत्यत्रासद्ब्रह्मवेत्तृनिन्दया । बाधो निषेधः । श्रुती तैत्तिरीये । अन्येति प्रथमनिर्दिष्टा अप्यसत्प्रतिपादिकाः श्रुतयः पक्षान्तरपरत्वेन पश्चात् संगृहीता अतः प्रथमाः परित्यज्याव्याकृतपदघटितश्रुत्यर्थपुरस्कारेणार्थमाहुः **अव्याकृते**ति ।

प्रतिपादयितुं शक्यते। असन्नेव स भवतीति बाधात्। आदित्यवर्णं तमसः परस्तादिति च। तस्मात् कारणत्वेनापि श्रुतिविप्रतिषेधाद् ब्रह्म कारणं नेत्येवं प्राप्ते उच्यते समाकर्षात्। आकृष्यते स्वस्थानाद्व्याख्यत इत्याकर्षः सर्वेष्वेतेषु वाक्येषु असदादिपदानां न निरात्मकत्वाद्यर्था उच्यन्ते। किंतु वैलक्षण्येन।

भाष्यप्रकाशः।

तमसः परस्तादिति असन्नेवेत्यत्र यथावेत्तृनिन्दया बाध एवमत्र तमःपरत्वकथनेन बाधादित्यर्थः। तस्मादिति अव्याकृतपदेनाव्यक्तस्य प्रधानस्य ग्रहीतुं शक्यत्वात्। श्रुतौ पक्षान्तरस्याप्यङ्गीकाराद्सदादिशब्दैर्ब्रह्मणः प्रतिपादयितुमशक्यत्वाच। शेषमतिरोहितार्थम्। अत्र समाधानं सूत्रकथनपूर्वकं व्याचक्षते आकृष्यत इत्यादि। कारणत्वेनेति पूर्वस्मादनुवर्तते। कारणत्वेन ब्रह्मैवादरणीयम्। अतो नात्र श्रुतिविप्रतिषेधः। कुतः? समाकर्षात्। आकर्षत इत्याकर्षः। समीचीनो निश्चायनार्थं आकर्षः समाकर्षस्तस्मात्। सामीचीन्यं व्युत्पादयन्ति सर्वेष्वित्यादि। किंतु वैलक्षण्येनेति एकश्रुत्युक्तरूपविलक्षणरूपान्तरमभिप्रेत्य श्रुत्यन्तरे तस्य तस्य शब्दस्य स्वार्थात्

रश्मिः।

श्रुताविति तद्धैक आहुरिति श्रुतौ। तर्हि असदादिपदैः कः प्रतिपाद्य इति चेच्छृणु असन्मृत्युरिति बृहदारण्यकादसच्छब्दप्रतिपाद्यो मृत्युः 'मेनेऽसन्तमिवात्मानम्' इति लोकोक्तासच्छब्दार्थो वा। आदिपदेन 'नासदासीन्नो सदासीत्तदानीम्' इत्युक्तः सदसद्विलक्षणः पदार्थः कश्चित्। भाष्यार्थस्तु तस्माद्ब्रह्मणोपि विगानात् कारणत्वेन रूपेण श्रुतिभिरसदादिनिरूपकैः विरुद्धस्य प्रधानस्य प्रति प्रतिनिधिरूपस्य षेधाप्रापणात्। अपिशब्देन पूर्वाधिकरणोक्ताभिरात्मन आकाश इत्यादिश्रुतिभिः वैरूप्यप्रतिपादिकाभिः श्रुतिप्रतिपाद्याद्विरुद्धस्य प्रधानस्य प्रति प्रतिनिधिरूपस्य प्रापणाच ब्रह्मकारणं नेति। न च श्रुतेर्विप्रतिषेधादिति भाष्ये षष्ठीतत्पुरुषाङ्गीकारात् तद्विरोध इति शङ्क्यम्। कर्मादीनामपि संबन्धसामान्यविवक्षायां षष्ठ्येवेति षष्ठ्यङ्गीकारात् विप्रतिषेधपदेन बाधोक्तेश्च। इह तु बाधपदमतिहाय विप्रतिषेधपदमुक्तम् तदन्यर्थमित्येवं समर्थितम्। सूत्रकथनेति। व्याख्यातुमिति भावः। पूर्वं तु उद्देशमात्रम्। ब्रह्मैवेति जिज्ञासासूत्रादनुवृत्तम्। नात्रेति साध्यं तु भाष्यम्। एतदर्थं हेतुरूपाधिकरणावतरणात्। तथाहि ब्रह्मपक्षः न कारणमिति साध्यम्। श्रुतिविप्रतिषेधादिति हेतुः। अत्र ब्रह्मणि श्रुतिविप्रतिषेधरूपत्वप्रसिद्धिः। स्वरूपासिद्धिभेद इत्याहुः। नात्रेति अत्र ब्रह्मणि न श्रुतिविप्रतिषेधः समाकर्षादिति पूर्वसूत्रादनुवृत्तश्चकारस्तदर्थः। वैदिकानामबाधितार्थैकवाक्यत्वस्याभिप्रेतत्वाच्चेति। अधुना व्याचख्युः आकृष्यत इतीति। समीचीनं विवृण्वन्ति निश्चयनार्थं इति यथा असदितिपदं स्वस्थानान्मृत्युरूपादर्थात् प्रच्याव्यन्ते स आकर्षः स समीचीनः। लक्षणाद्यन्तरेण तृतीयाध्याये वक्ष्यमाणविरुद्धधर्माश्रयत्वनिश्चायनार्थः। सद्ब्रह्मासद्ब्रह्मेति सत्त्वासत्त्वे हि नकुलवद्विरुद्धौ धर्मौ तदाश्रयत्वनिश्चायनार्थः। 'न चासन्नेव स भवति असद्ब्रह्मेति वेद चेत्' इति श्रुत्युक्तासत्त्वं वेत्तरि स्यादिति शङ्क्यम्। विरुद्धधर्माश्रयत्वेन वेत्तुरङ्गीकारात्। सामीचीन्यमिति विरुद्धधर्माश्रयत्वस्य लक्षणाद्यन्तरानिश्चायनार्थः। निश्चायनेत्यत्र नन्द्यादित्वाह्युः। सर्वेष्वित्यादीति। भाष्ये। न निरात्मकेति। निर्गतः सत्पदार्थ आत्मा यस्मात्तन्निरात्मकम्। 'असन्नेव स' इति श्रुतौ निन्दाश्रवणात्। किं त्विति नञर्थभूतवैलक्षण्येन। प्रकृते। नञर्थपदं प्राचीनानां तेषु विरोधितारूपं वैलक्षण्यमादाय भाष्यार्थमाहुः एकेति। विरोधो नञर्थः अधर्म इत्यत्र

सर्वशब्दवाच्यत्वं च सिद्धं ब्रह्मणः । यथा 'को अद्धा वेद' । 'क इह प्रावोचत्' । 'सर्वे वेदा यत् पदमामनन्ति' । 'यतो वाचो निवर्तन्ते' । 'मनसैवानुद्रष्टव्यम्' इत्यादिसर्वे विरुद्धधर्मा भगवत्युच्यन्ते । एवमनेकविरुद्धशब्दवाच्यत्वं लोकप्रसिद्धतादृशार्थात् समाकर्षादवगम्यते । तं यथा यथोपासते तथा भवतीति फलज्ञापनार्थमसत्त्वेव स भवतीति यथा कंसादीनां मारकः । तद्धैक आहुरित्यत्र

भाष्यप्रकाशः ।

प्रच्यावनं कृत्वा तत्तद्रूपविशिष्टं ब्रह्मैवोच्यते । नच लक्षणापत्तिः । यतः सर्वशब्दवाच्यत्वमपि सिद्धं ब्रह्मणः । तदप्युपपादितं तल्लिङ्गाद्यधिकरणेषु । नच सर्वत्र ब्रह्मण एव कारणत्वे वक्तव्ये विरुद्धशब्दप्रयोगस्य किं प्रयोजनमिति शङ्क्यम् । यथा को अद्धा वेदेत्यत्र सृष्टिकर्तृविषयकमज्ञानं, सर्वे वेदा इत्यत्र साधनैस्तज्ज्ञानं यतो वाच इत्यत्र वागाद्यप्राप्यत्वं, मनसेत्यत्र तत्प्राप्यत्वमित्येवं ब्रह्मणि विरुद्धा धर्मास्तत्र तत्र ते ते उच्यन्त एवमनेकविरुद्धशब्दवाच्यत्वमपि लोकप्रसिद्धो यस्तादृशधर्मविशिष्टोऽर्थस्ततः शब्दस्य समाकर्षादवगम्यते । तस्य प्रयोजनं तु तेन तेन प्रकारेण तद्भावने तादृशतादृशफलाप्तिरिति । तत्रोदाहरणं तु कंसादीनां मारकत्वभावनाद् यथा मृत्युः । एवमसत्त्वेन भावनादसत्त्वमिति । अतस्तत्तत्फलार्थे समाकर्षे ब्रह्मणः कारणत्वमक्षुण्णमित्यर्थः । एवं सूत्रं व्याख्यायासदादिशब्दानां प्रवृत्तिनिमित्तं सिद्धान्तसिद्धं स्फुटीकुर्वन्ति तद्धैक इत्यादि ।

रश्मिः ।

धर्मविरोधोर्थः । अभावो वा नञर्थः । आर्थिकार्थो विरोधः । यद्वा पर्युदासो नञर्थः । सद् ब्रह्म तद्भिन्नतत्सदृशो मृत्युः असन्मृत्युरिति बृहदारण्यकात् । तथा चैकश्रुतिः सदेव सोम्येदमिति तदुक्तं रूपं सद्रूपं तद्विलक्षणमसदेवेदमित्यत्रासद्रूपान्तरमित्यर्थः । श्रुत्यन्तर इति असदेवेति श्रुतौ । तस्येति । असच्छब्दस्यार्थो मृत्युस्तस्मात्प्रच्यावनं कृत्वा तत्तदसद्रूपविशिष्टमभेदेन विरुद्धधर्माश्रयत्वाय ब्रह्मैवोच्यते इत्यर्थः । **सर्वशब्द** इति भाष्यमवतारयामासुः **न चेति** । मृत्युवाचकस्यासच्छब्दस्य ब्रह्मणि लक्षणा । संबन्धस्तु भेतव्यभीषकभावः 'मृत्युर्धावति पञ्चमः' इति श्रुतेः शून्यवाचकस्यासच्छब्दस्य लोकोक्तस्य वा ब्रह्मणि लक्षणा । 'मेनेऽसन्तमिवात्मानम्' इति लोके ज्ञानाश्रयस्य कर्तुरसद्विषयः तस्य शुद्धा सति ब्रह्मणि भागत्यागलक्षणा ज्ञानाश्रयब्रह्मणो ज्ञानविषयत्वस्य भागस्य त्यागात् । न च शुद्धा सति प्रयोग इति शङ्क्यम् । धर्मः प्रोज्झितकैतवोत्रेत्यस्य विरोधात् । तदुक्तं पद्मपुराणे उत्तरखण्डे उमामहेश्वरसंवादे गुणत्रयकथने द्विचत्वारिंशेध्याये ।

'बौधशास्त्रमसत्प्रोक्तं नग्ननीलपटादिकम् ।
मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते' ॥ इति ।

शास्त्रं शब्दात्मकमिति तत्प्रतिपाद्यमप्यसतदिति । यथा क इति भाष्यमवतारयन्ति **न च सर्वेति** । **अद्धेति** साक्षात् । **अज्ञानमिति** क इह प्रपञ्चे प्रवोचन्न कोपीत्यर्थात् । **तज्ज्ञानमिति** सृष्टिकर्तृज्ञानम् । **आमनन्ति** अभ्यस्यन्ति । अतो वेदोक्तसाधनैः तज्ज्ञानमिति ज्ञायते इति । **तत्रेति** श्रुतिषु । ते सत्त्वमसत्त्वं च ज्ञानमज्ञानं च वागाद्यप्राप्यत्वं वागादिप्राप्यत्वं च धर्माः । ननु मनसैवेत्यत्र कथं वागादिग्रहणमिति चेन्न । मनः पूर्वरूपं वागुत्तररूपमिति श्रुतेः वाचामादि मनः तद्ग्रहणात् । यद्वा मनसैवेत्येवकारेणान्येन्द्रियव्यवच्छेदः भक्तिरूपव्यापारस्य तु मनसेति करणतृतीयया बोधनात् भक्तिश्च वागादिरूपा कीर्तनादिरूपा । एवमुच्यन्त इत्यन्तं भाष्यं व्याख्यायैवमिति भाष्यं व्याचक्रुः ।

रश्मिः ।

एवमिति अनेके विरुद्धाः सदसदादयः शब्दास्तद्वाच्यत्वमपीत्यर्थः । लोकेति भाष्यं विवृण्वन्ति लोकप्रसिद्ध इति लोकः स्मृतिः मेनेऽसन्तमिवात्मानमिति तत्प्रसिद्धो यस्तादृशः असत्स्वरूपो धर्मः तद्विशिष्टोर्थोसद्रूपः स्पष्टमन्यत् । तं यथेति भाष्यमवतारयन्ति लोकप्रसिद्धस्येति लोकसिद्धार्थोत्प्रत्यावनस्य । तेनेति असत्त्वेन प्रकारेण । तद्भावने ब्रह्मभावने । तादृशेति 'मृत्युरत्यन्तविस्मृतिः' इत्यत्यन्तविसरणरूपफलाप्तिः । न च लोकोक्तासच्छब्दे प्रतिपाद्यासत्त्वेन प्रकारेण ब्रह्मभावने तादृशफलमस्त्विति वाच्यम् । तादृशफलाभावप्रसङ्गात् । पुराणस्य स्वतन्त्रत्वेन तदुक्तरीत्या भावनेनोपनिपदुपुरूपं फलं भवेत् । असन्निति भाष्यं विवरीतुमाहुः तत्रोदाहरणमिति । मारक इति आदिपदेनाम्बष्ठचाणूरशलानां मारकः । मृत्युपदार्थः मृत्युर्भोजपतेरिति वाक्यात् । मारकोपि भावनान्मृत्युरित्यभेदान्वयः । असन्मृत्युरिति बृहदारण्यकात् । निगमयांबभूवुः एवमसत्त्वेनेति एवं पूर्वोक्तप्रकारेण एवं चासन्निति श्रुतौ स परमात्मा असन्मृत्युर्भवति योसद्ब्रह्म मृत्युर्ब्रह्मेति वेद स्मरति स भावयति स्येति यावत् । स वेत्तेति नार्थः । 'ॐ तत् सत्' इति त्रिविधब्रह्मनिर्देशात् । नित्यानित्यसंयोगापत्तेश्च । न च य इत्यत्र नित्यानित्यसंयोग इति वाच्यम् । वेदस्याधिदैविकप्रतिपादकत्वात् । तद्धैक इत्यादीति । भाष्ये । सर्वप्रपञ्चवैलक्षण्यमसच्छब्दप्रवृत्तिनिमित्तम् । सत् सर्वप्रपञ्चः नञो वैलक्षण्यमर्थः । सद्विलक्षणत्वम् । तत् सत् असत् सर्वप्रपञ्चवैलक्षण्यविशिष्टम् । इदमित्युक्तप्रपञ्चाभेदकथनात् प्रपञ्चरूपोपि स इत्यर्थः । प्रकृते । इत्युक्तः पक्ष इति सत्पदोक्तब्रह्मणो विरुद्धधर्माश्रयत्वेन एके इत्यस्य मुख्यार्थकत्वेन च प्रथम इत्यर्थः । भाष्ये । अरूपवत्सूत्रोक्तं द्वितीयपक्षमाहुः अव्याकृतमिति । इदं रूपमिदं नाम इदमित्यव्याकृतम् । प्रकृते । वैलक्षण्यबोधकमिति तथा च न तृतीयः पक्ष इति भावः । भाष्ये । नासदासीदिति न असत् सद्विलक्षणो मृत्युः नो निषेधे न सद्ब्रह्मासीत् इति द्वयोर्निषेधेन हेतुना मनोग्राह्यम् । नैवेह किंचनाग्र आसीत् । मृत्युनैवेदमावृतमासीत् इति कालस्याग्रपदेन मृत्योश्च मृत्युपदेनाभिधानात् । तदुक्तं बृहदारण्यके मनोमयब्राह्मणे मनोमयोयं पुरुषः भाः सत्यः तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा एवमयमन्तरात्मन् पुरुषः स एष सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किं च य एवं वेदेति मनोमयो मनःप्रायः भाः सत्यस्वरूपं यस्य स भाः सत्यः अन्तरात्मन् इत्यत्र सप्तम्या लुक् । वेदेत्यस्य सस्मार इत्यप्यर्थः । मनःप्रायपदेन टीकास्थेन मनु अवबोधने असुन् । एवं भूतेन सत्यं ज्ञानमनन्तं ब्रह्म ज्ञानप्रधानम् न चान्नमयप्राणमयविज्ञानमयानन्दमयाः कुतो न गृहीता इति शङ्क्यम् । बृहदारण्यक एव अन्नं ब्रह्मेत्येक आहुः तन्न तथा पूयति वा अन्नमृते प्राणात् प्राणो ब्रह्मेत्येक आहुः तन्न तथा शुष्यति प्राणमृतेन्नादेते ह त्वेव देवते एकधाभूयं भूत्वा परमतां गच्छत इति एकेन्येन्ये दूषणात् । तत्तथा न ग्रहीतव्यम् यथा प्राणाद्रक्षकादृते विनान्नं वै पूयति क्लियत इति प्रसिद्धं तथा प्राणो ब्रह्मेत्येकेऽन्य आहुः तदपि न तथा न ग्राह्यम् । अतोन्नाददनीयात् पृथ्वीरूपाद्वा ऋते प्राणः शुष्यति वै ह शोषमुपेतीति प्रसिद्धम् । ब्रह्म तु क्लेदशोषविवर्जितम् । एत एव तु देवते अन्नप्राणलक्षणे एकधाभूयं एकभावं भूत्वा गत्वा परमतां ब्रह्मतां गच्छतः प्राप्नुवत इत्यर्थः । विज्ञानमयो जीवो न सृष्टिकर्ता इत्यनुपयुक्तः । आनन्दमयस्तु नित्यलीलायां 'मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपि' इति स्मृतेः । सृष्टिकर्तापि । विरुद्धधर्माश्रयत्वात् । इदमित्थतया ज्ञानत्वाच्च । अत उक्तं तदपि ब्रह्मेति । तथा च श्रुतिः मनो ब्रह्मेति व्यजानात् मनसो ह्येव खल्विमानि

सर्वप्रपञ्चवैलक्षण्यम् । प्रपञ्चरूपोऽपि स इति प्रथमः पक्षः । अव्याकृतमसत्पक्षेण तुल्यम् । नासदासीदिति मनस्तदपि ब्रह्म, तम आसीदित्यनभिव्यक्तम् । कर्मणोऽपि भगवत्वात् । पूर्वकाण्डेऽपि तस्मादेव सृष्टिः । न हि तमस्तः स्वेन गूढत्वं लोके संभवति । अतः क्वचिद् विलक्षणात् क्वचिदविलक्षणाद् ब्रह्मणो जगत् । भगवत्त्वादेव स्वयं कर्तृकता च । संभवति चैकवाक्यत्वे

भाष्यप्रकाशः ।

प्रथमः पक्ष इति सदेव सोम्येत्युक्तः पक्षः । असत्पक्षेण तुल्यमिति वैलक्षण्यबोधकम् । तमःशब्देन कर्माप्युच्यते । पूर्वमनभिव्यक्तत्वादित्यभिप्रेत्याहुः कर्मण इत्यादि । कर्मणस्तमः-शब्दवाच्यत्वे युक्तिः न हीत्यादि । शेषं स्फुटम् । एतेनैव यत्रादिकारणे शिवरुद्रभगवती-

रश्मिः ।

भूतानि जायन्त इत्यादि । यद्वा मनसैवानुद्रष्टव्यः इति श्रुतेर्मनसो दर्शनसाधनत्वमुच्यते तन्मनश्चेन्न ब्रह्म तदा मनः संकल्पनभक्त्यादिव्यापारेण न ब्रह्मदर्शनसाधनं 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम' इत्यस्यात्र पाठस्यापि वक्तुं शक्यत्वात् । द्वितीये नवमाध्याये त्रयस्त्रिंशे श्लोके तु नासदासीन्नो सदासीत्तदानीमित्यादेस्तु स्थूलसूक्ष्मकार्यपरत्वमित्युक्तम् । तत्पक्षेत्र न ब्रह्मवार्ता । तम इति अनभिव्यक्तं ब्रह्म तमः इत्यर्थः । तत्रैव सुबोधिनी तम आसीदिति तमोपि ब्रह्मैव सर्वतः सुप्तत्वसाम्यात् न प्रकृतिः किमावरीवः कुह कस्य शर्मन्निति कार्याश्रयप्रयोजनाभावात् तस्याः कार्याश्रयप्रयोजनाभावादिति किं कार्यं कुह कुत्र कस्य शर्मन् कस्य सुखाय आवरीवः आवृणुयादिति श्रुत्यर्थः । इदमप्यवान्तरकल्पाभिप्रायेण । प्रकृते । कर्मापीति यथा तमु काङ्क्षायामित्यस्य रूपमन्धकारे, तथा तम ग्लानावित्यस्य रूपं कर्मणि वाच्ये । कर्मणो गहना गतिरिति कर्मग्लानिं करोतीति एतेन कर्मणो हि पूर्वभावे श्रुतिरुक्ता । ननु पूर्वं कर्म वा ब्रह्म वा, उभयोः पूर्वत्वे द्वैतमिति चेन्न 'अत एव च नित्यत्वम्' इति सूत्रे वेदस्य ब्रह्मपदवाच्यत्वेपि भाष्येऽङ्गाङ्गिभावोक्तेश्चोभयोः 'अथातो धर्मजिज्ञासा' 'अथातो ब्रह्मजिज्ञासा' इति धर्मधर्मिभावेन धर्मिपूर्वत्वस्य न्याय्यत्वात् । पूर्वमनभिव्यक्तत्वादिति सृष्टेः पूर्वम् । तथा च प्रस्थानरत्नाकरे सुबोधिनी द्वितीयस्कन्धस्य प्रदर्शिता ब्रह्म हि धर्मरूपेण भवन् ज्ञानानन्दकालेच्छाक्रियामायाप्रकृतिरूपेण पूर्वं भवतीति, अतः कर्मानभिव्यक्तम् । कर्मण इत्यादीति कर्मणो भगवत्त्वं 'धर्मो यस्यां मदात्मकः' इति भगवद्वाक्यात् । भावार्थपादस्थक्रियामात्रं न धर्मः किंतु अतीन्द्रियो यागादिः स्थिरो धर्मः । द्रव्यदेवतासंबन्धो यागः देवताया अतीन्द्रियत्वं तत्संबन्धोपि प्रीतिहेतुत्वेन स्वीकाररूपोतीन्द्रियः द्रव्यं चालौकिकमित्यनित्यतायां न कोपि हेतुरिति । भाष्ये । तस्मादिति तृतीयाष्टके प्रजापतिरकामयत प्रजा सृजेयमिति । प्रकृते । युक्तिरिति स्वस्य स्वेन गूढत्वाभाव इति न्यायः । न हीत्यादीति । लोक इति वेदे तु संभवति अनधिगतार्थगन्तृत्वात् । घटः पटेन गूढः इत्यत्र योगजधर्मेण पटस्य घटत्वे स्वस्य घटस्य स्वेन घटेन गूढत्वात् । स्फुटमिति विलक्षणादसतः । अविलक्षणात् सतः । ननु कर्मणः सृष्टिरित्युक्तं तत्र कर्मरूपसहकारिकारणनिष्ठ-व्यापारमपेक्ष्य कर्म करोतीति प्रयोगो न तु ब्रह्म करोतीतिवत् प्रसिद्धप्रयोग इति कर्तृकत्वं ब्रह्मापेक्ष-मित्याशङ्क्याहुः भगवत्त्वादेवेति । ननु शंकरभाष्ये असद्वा इदमग्र आसीदित्यत्र सदेव ब्रह्म सदिवासीदित्युपचर्यते प्रागुत्पत्तेः तद्व्याकरणाभावापेक्षयाऽतोऽसद्वादापवादेनास्तित्वलक्षणं ब्रह्मेत्युक्तमिति चेत्तत्राहुः संभवतीति सदसद्रूपत्वे संभवति विरुद्धधर्माश्रयब्रह्मार्थाज्ञानान्निराकरण-

११६ ब्र० सू० १०

भाष्यप्रकाशः ।

यक्षादिशब्दाः प्रयुज्यन्ते अथर्वशिरःशिखासुन्दरीतापनीयगोपथब्राह्मणादिषु तत्राप्ययमेव न्यायो बोध्य इति बोधितम् ।

रश्मिः ।

माहुः तस्मादिति विरुद्धधर्माश्रयत्वाद् ब्रह्मणः । शब्दवैलक्षण्येनासच्छब्देन श्रुतिविप्रतिषेधः श्रुतिबाधः एवं स्फुटमित्यर्थः । द्वितीयस्कन्धनवमाध्याये सुबोधिनी, एवमन्यान्यपि वाक्यानि तत्तद्भावप्रकारेण बोधयन्ति पूर्वमेकरूपे भगवति न बाधकानि भवन्तीति तथाहुः एतेनेति । शिवेति । आदिपदेन आत्मा वाय्वादयः । अथर्वेति । अथर्वशिरः अथर्वशिखा च तत्राहमेकः प्रथममासीद्वर्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्त इतीति रुद्रवचनं देवान् प्रति । अथर्वशिखायां च शिव एको ध्येयः शिवंकरः इति सुन्दरीतापिनीयं यथा दुर्गामाहात्म्यं ब्रह्माण्डपुराणे तत्र

स्थिता नित्या अर्धमात्रा यानुचार्या विशेषतः ।
त्वमेव सत्त्वं सावित्रि त्वं देवि जननी परा ।
त्वयैव धार्यते सर्वं त्वयैतत्सृज्यते जगत् ।

इत्युक्त्वाग्रेन्यदुक्त्वोक्तं महामोहा च भगवतीति तथाग्रे 'सौम्या सौम्यतराशेषसौम्येभ्य-स्त्वतिसुन्दरी' इति अत्र भगवती अतिसुन्दरी च । गोपथब्राह्मणं यथा बृहदारण्यके महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति आदिपदार्थः पुरुषविधब्राह्मणे 'आत्मैवेदमग्र आसीत्पुरुषविधः' इति वायुविषये त्वमेव प्रत्यक्षं ब्रह्मासीति श्रुतिस्तैत्तिरीये । अत्र लोकप्रसिद्धो यस्तादृशधर्मविशिष्टोर्थः । तस्माच्छब्दस्य प्रच्यावनं शिवादित्वेन रूपेण ब्रह्मणो भावुकाः शिवादिभक्ताः शिवादिशब्दैर्ब्रह्मैवाहुरिति समाकर्षन्यायावतरणम् । एवं न्यायो बोध्य इति बोधितम् । अयं न्यायः कारणशब्दविषयः तेन तल्लिङ्गाद्यधिकरणेषु सर्वशब्दवाच्यत्वं मुख्यवृत्त्या प्रतिपादितम् । अत्र तु असच्छब्दस्य मृत्युवाचकस्य समाकर्ष इति विरोध इति कुचोद्यं निरस्तम् । वस्तुतस्तु पुरुषविधब्राह्मणे साकारब्रह्माभिधायके आत्मपुरुषपदे समाकर्षणन्यायो प्रसिद्धकारणशब्दा असदादयस्तद्विषयः इति । आत्मा परमात्मनि प्रसिद्धः 'आत्मा देहमनोब्रह्मस्वभावधृतिबुद्धिषु' इति विश्वात् । पुरुषशब्दश्चात्मनि 'पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः' इति श्रुतेः । असदादयस्तु अप्रसिद्धा इति । न चायं न्यायः कारण-शब्दविषय इति व्युत्पत्तावप्रसिद्धकारणविषय इति विशेषणनिवेशे सोऽविभेदित्यसंगतमिति वाच्यम् । विरुद्धधर्माश्रयत्वात् 'व्रजे स बालको भूत्वा क्रीडते पुरुषोत्तमः' इति व्रजे बाललीलापरत्वात् ।

'कृतागसं तं प्ररुदन्तमक्षिणी कषन्तमञ्जन्मषिणी स्वपाणिना ।
उद्वीक्षमाणं भयविह्वलेक्षणं हस्ते गृहीत्वा भिषयन्त्यवागुरत्' ॥

इति बाललीलावाक्यात् आश्रितत्वादिह तद्योगाच्च जीवधर्मभयस्य योगात् । सुबोधिन्यां ब्रह्मानामशनिरित्यत्र दशधा रसरूपत्वोक्तेः तन्निर्वाहकत्वाद्वा तदात्मनोकुरुतेति बृहदारण्यकान्मनसः करणानन्तरं भयं वा 'कामः संकल्पो विचिकित्सा श्रद्धाश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' इति बृहदारण्यकात् ।

'न चान्तर्न बहिर्यस्य न पूर्वं नापि चापरम् ।
पूर्वापरं बहिश्चान्तर्जगतो यो जगच्च यः' ॥ इति

अज्ञानान्निराकरणं चायुक्तम्। तस्माच्छब्दवैलक्षण्येन श्रुतिविप्रतिषेधो वक्तुं न शक्य इति सिद्धम्॥ १५॥

इति प्रथमाध्याये चतुर्थपादे पञ्चमं समाकर्षाधिकरणम्॥ ५॥

भाष्यप्रकाशः।

अन्येतु स माकर्षादित्यस्य पूर्वप्रकृतपरामर्षादित्यर्थमाहुः। तन्मते भिन्नशब्दप्रयोगप्रयोजनं न किमपि स्फुटति।

माध्वास्तु भगवद्वाचिनां शब्दानां जगति समाकर्षणमर्थमाहुस्तत्रापि तथा बोध्यम्॥ १५॥

इति पञ्चममधिकरणम्॥ ५॥

रश्मिः।

वाक्यात्। शंकररामानुजभास्कराचार्यमतमाहुः अन्ये त्विति। पूर्वप्रकृतेति असद्वा इदमग्र आसीदिति नात्रासन्निरात्मकं कारणत्वेन श्राव्यते यतो—

'असन्नेव स भवति असद्ब्रह्मेति वेद चेत्।
अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः'॥

इतीत्यसद्वादापवादेनास्तित्वलक्षणं ब्रह्मान्नमयादिकोशे परंपरया ब्रह्मप्रत्यगात्मानं निर्धार्य सोऽकामयत इति तमेव प्रकृतं समाकृष्य सप्रपञ्चां सृष्टिं तस्माच्छ्रावयित्वा तत्सत्यमित्याचक्षत इत्यादिना चोपसंहृत्य तदप्येष श्लोको भवति इति तस्मिन्नेव प्रकृतेर्थे श्लोकमिममुदाहरति असद्वा इदमग्र आसीदिति यदि स्वसन्निरात्मकमस्मिञ्छ्लोकेऽभिप्रेयेत ततोन्यसमाकर्षणेऽन्यस्योदाहरणाद-संबद्धवाक्यमापद्येत तस्मान्नामरूपव्याकृतवस्तुविषयः प्रायेणाऽसच्छब्दः प्रसिद्धः इति तद्व्याकरणा-भावापेक्षया प्रागुत्पत्तेः सदेव ब्रह्मासीदित्युपचर्यते इति भाष्यादस्ति ब्रह्मेति पूर्वप्रकृतं ब्रह्म तस्य सोकामयत इत्यत्राकर्षः तस्य तस्मिन्नेव प्रकृतेर्थे यः श्लोकोऽसद्वा इति तत्राकर्षादित्यर्थमाहुः।

रामानुजाचार्याश्चानन्दमयविषयत्वमस्य मन्त्रस्याहुः असद्वा इदमग्र आसीदिति सत्यसंकल्पमा-नन्दमयं विपश्चिद्ब्रह्मैव समाकृष्यत इति तदानीं नामरूपविभागाभावेन तत्संबन्धितयास्तित्वाभावात् ब्रह्मैवासच्छब्देनोच्यते इति च। भास्कराचार्यास्तु जगत्तदासदिवासीत् असदस्पष्टमिवाभूत् इत्यर्थ-यामासुः दूषणमाहुः तन्मत इति अयमभिप्रायः इदंशब्दोक्तप्रत्यक्षकार्यस्य भगवदिच्छयेदंपदार्थस्य स्वकारणे लयो वाच्यः। इदंशब्दस्य परमैश्वर्यकर्तृरूपकार्यवाचकस्यार्थः परमैश्वर्यकर्ता तस्यापि स्वकारणे लयः तस्मिन् वाच्ये सत्यसति लये विशेषाभावादुपचारवैयर्थ्यं ततश्च सदसदिति भिन्नभिन्न-कारणशब्दप्रयोजनं न किमपि स्फुटति 'मेनेऽसन्तमिवात्मानं सुप्तशक्तिरसुप्तदृक्' इति वाक्यं पुराणमते रामानुजाचार्यमतेप्येवम्। असच्छब्दप्रयोगप्रयोजनं न किमपि। भास्कराचार्यमतेप्येवम्। जगत्सदासीदसदासीदिति भिन्नभिन्नकारणशब्दप्रयोगप्रयोजनं न किमपि स्फुटति। ननु कदाचिदस-ज्जगत्कदाचिदसज्जगदिति प्रतीतिः प्रयोजनमस्त्विति वाच्यम्। सिद्धान्तेपि तौल्यात्। आचार्यैस्त्वे-तन्निराकरणायासदित्यत्र पर्युदासमङ्गीकृत्यातः क्वचित् इत्याद्युक्तमिति ज्ञेयम्। शैवविज्ञानेन्द्रभिक्षुमतयो-र्ज्ञेयमाहुः इति। तथा च मध्वाचार्यभाष्यीयपाद्मवाक्यम्—

जगद्वाचित्वात् ॥ १६ ॥ (१।४।१६)

एवं शब्दविप्रतिषेधं परिहृत्यार्थविप्रतिषेधं परिहरति कौषीतकिब्राह्मणे बालाक्यजातशत्रुसंवादे । बालाकिरजातशत्रवे ब्रह्मोपदेष्टुमागतः । आदित्यादिदक्षिणेक्षिपुरुषपर्यन्तं परिच्छिन्नब्रह्मोपासनान्युक्त्वा तथा निराकृते तमेव ज्ञानार्थमुपससाद । ततः सुप्तपुरुषसमीपमुभावागत्य ब्रह्मवाद्यं चक्रतुः ।

भाष्यप्रकाशः ।

जगद्वाचित्वात् ॥ १६ ॥ अधिकरणप्रयोजनमाहुः एवमित्यादि । शब्दविरोधकृतो यो ब्रह्मणि कारणत्वप्रतिषेधस्तं परिहृत्य अर्थविरोधकृतं तमनेनाधिकरणेन परिहरतीत्यर्थः । विषयमाहुः कौषीतकीत्यादि । गार्ग्यनामा बालाकिर्बलाकपुत्रोऽजातशत्रवे काशिराजाय रश्मिः ।

'परस्य वाचकाः शब्दाः समाकृष्यान्तरेष्वपि ।
व्यवह्रियन्ते सततं लोकवेदानुसारतः' ॥ इति ।

वेदो य आकाशे तिष्ठन्नित्याद्यन्तर्यामिब्राह्मणम् । तत्कारणत्वेनेति पूर्वसूत्रे तथाहि । आकाशादिष्ववान्तरकारणत्वेनापि स एव स्थितः । यथा व्यपदिष्टस्यैव परस्य य आकाशे तिष्ठन्नित्यादिना आकाशादिपूक्तेरिति जगति तु जगद्वाचित्वादिति सूत्रे तथाहि । तर्हि कथं तेषां शब्दानां जगति प्रसिद्धिः ॐ जगद्वाचित्वात् ॐ·······जगति हि व्यवहारो लोकस्य न तु परमात्मनि तथा । अतो जगति प्रसिद्धिः शब्दानामिति । तथेति प्रसिद्धः प्रकारो दूषणं बोध्यम् । अयमभिप्रायो द्रष्टव्यः । मण्डूकोपनिषदि ॐ इत्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव यच्चान्यत्किंचित्कालातीतं तदप्योङ्कार एव सर्वं ह्येतद्ब्रह्म अयमात्मा ब्रह्मेति श्रुतेः । उक्त प्रकारः प्रसिद्धो न विषयः सूत्राणामिति संदिग्धस्यैव विषयत्वात् ॥ १५ ॥

इति पञ्चमाधिकरणम् ॥ ५ ॥

जगद्वाचित्वात् ॥ १६ ॥ शब्देति असदादिशब्दविरोधकृतः । अर्थेति जीवरूपोर्थः । कर्तेत्येवमर्थविरोधकृतम् । तमिति ब्रह्मणि कारणत्वप्रतिषेधम् । कौषीतकीत्यादीति कौषीतकिन इति रामानुजाचार्यभाष्यात्कौषीतकाः केचन सामवेदभेदाः सन्ति । तथा च चरणव्यूहे सामवेदस्य सहस्रमासीत्तेष्वनध्यायेष्वधीयानास्ते शतक्रतुना वज्रेणाभिहताः । शेषान्व्याख्यास्यामः तत्र राणायनीयानां सप्तभेदा भवन्ति राणायनीयाः शाट्याः मुग्र्याः कौलेपाः महाकौलेपा लाङ्गलायनाः शार्दूलाः कौथुमाश्चेति अत्र कौषीतका न गणिताः अत शतक्रतुहतेषु भेदोयं द्रष्टव्यः । हननात्पूर्वं ब्राह्मणं कौषीतक्याख्यं तदधुना शंकराचार्यादिभाष्येषु प्रसिद्धम् । न दृप्तबालाकिब्राह्मणमिदमग्रे एक इत्यस्य व्याख्याने पृथक्तया तस्योपादानात् । ते च कौषीतकिनः केशधारिणः । 'कौषातकः कचे' इति विश्वात् । तालव्यस्य मूर्धन्यः आकारस्यैकारश्छान्दसौ यथा लोके पाण्डित्यपदं वेदे तु शाण्डिल्यपदं तद्वत् । लोके मूर्धन्यादिर्वेदे तालव्यादिरेवमत्र वेदे मूर्धन्यषकारमध्ये । लोके तु तालव्यशकारमध्ये इत्यपि द्रष्टव्यम् । गार्ग्योक्तनामेति गर्गस्यगोत्रापत्यं गार्ग्यः तन्नाम गर्ग इति तत् दृप्तबालाकिब्राह्मणे नैकवाक्यताप्यत्रोक्ता गार्ग्यपदेन दृप्तबालाकिर्हानूचानो गार्ग्य आस इति श्रुतेः । बलाकेति अत इञ् । बलाकाया अपत्यमिति विग्रहे स्त्रीभ्यो ढक् स्यात् क्वचिदपवादविषये उत्सर्गस्य

भाष्यप्रकाशः ।

ब्रह्मोपदेशं स्वकीर्त्यर्थं स्वत एवागतः आदित्यचन्द्रविद्युत्स्तनयित्नुवाय्वाकाशाग्न्यबादर्शच्छायाप्रति-श्रुत्काशब्दस्वप्नशरीरदक्षिणाक्षिसव्याक्षिषु यः पुरुषस्तत्पर्यन्तं यान्युपासनान्युक्तवान् यथा आदित्य-निष्ठपुरुषस्य बृहत्पाण्डरवासा अतिष्ठाः सर्वेषां भूतानां मूर्धेत्येवं गुणकोपासने अतिष्ठाः सर्वेषां मूर्धा भवतीति परिच्छिन्नं फलम् । तथान्यत्रापि तत्तद्गुणकोपासने तत्तत्परिच्छिन्नफलमजातशत्रुणा तस्मा उक्तमिति तादृशानि परिच्छिन्नब्रह्मोपासनानि तान्युक्त्वा ततो राज्ञा उक्तप्रकारेण तदुक्ते प्रकारे निराकृते बालाकिस्तमेव पूर्णब्रह्मज्ञानार्थमुपससाद शिष्यत्वेन समित्पाणिर्निकटे गतः । ततो राजा स्नेहेन हस्ते तं गृहीत्वा सभात उत्थाय क्वचिदेकान्ते सुप्तपुरुषसमीपमुभावागत्य, बृहत्पाण्डरवासः सोमराजन्नित्यादिभिः संबोधनैस्तं राजा संबोधयाञ्चक्रे तदापि तं सुप्तं दृष्ट्वा

रश्मिः ।

प्रवृत्तिरित्यगतिकगतिः न च वंशब्राह्मणे । बलाकाकौशिकाद्बलाकाकौशिक इति बलाकाशब्दो न बलाक-शब्द इति शङ्क्यम् । समासौ काश्यपीबालाक्यमाडरीपुत्रात् काश्यपीबालाक्यमाडरीपुत्र इत्यत्र बलाक-शब्दस्य स्वार्थे ष्यञन्तस्य सत्त्वात् । स्त्रीलिङ्गशब्दात् ष्यञः प्रसिद्धेः । स्वेति दृप्तबालाकिमेकवाक्यार्थं वक्ष्यन्ति 'अन्यार्थं तु जैमिनिः' इति सूत्रे तत्रत्यदृप्तत्वं ब्रह्मवित्त्वाद्गर्वितत्वं तदत्राप्येकवाक्यार्थत्वाय च वक्तव्यमित्याशयेन स्वकीर्त्यर्थमिति । आदित्यचन्द्रेत्यादिभाष्यार्थमाहुः आदित्येति सहोवाच गार्ग्यः य एवादित्ये पुरुषः एतमेव ब्रह्मोपास इत्येवंविधेषु । अत्र पुरुषपर्यन्तमिति भाष्याद्य एवादित्ये पुरुष इत्युपासना तमेव ब्रह्मोपास इति तदनुवाद उपासनाया गानत्वादवग्रह इतिवत् ज्ञानमुपासना । आदित्यपुरुष इति श्रुतं श्रवणं प्रति लक्षीकृत्य यः शब्दः स प्रतिश्रुत् स इवेति प्रतिश्रुत्कः स च शब्दश्चेति स च दृप्तबालाकिब्राह्मणे य एवायं यन्तं पश्चाच्छब्दोनूदेत्येतमेवाहं ब्रह्मोपासे इत्यत्रोक्तः । यन्तं गच्छन्तं पुरुषं अनूदेति उत्पद्यते प्रतिश्रुत्काशब्देति पाठे प्रतिश्रुत्का टाप् । शब्दश्च । यानीति दृप्तबालाकिब्राह्मणे च स होवाच गार्ग्यः य एवासावादित्ये पुरुष एतमेवाहं ब्रह्मोपासे इति । स्वसंघाते कर्ता भोक्तेत्येवमुपासे । स यश्चायं पुरुषे यश्चासावादित्ये स एक इति भृगूपनिषत्कात् । तान्यपोद्य मा मैतस्मिन् संवदिष्ठा इति । एतस्मिन् संघाते । यानि अतिष्ठाः सर्वेषां भूतानां मूर्धा राजेति वा अहमेतमुपासे इत्युपासनान्यजातशत्रुरुक्तवानित्यर्थः । बृहत्पाण्डरवासा इति दृप्तबालाकिब्राह्मणे । अतिष्ठाः सर्वेषां भूतानामिति श्रुतौ बृहत्पाण्डरवासा नास्ति । अतिष्ठा इति स य एतमेवमुपास्ते इति श्रुतेः अस्याः श्रुतेः शेषश्रुतिमाहु अतिष्ठा इति । परिच्छिन्नमिति । सर्वभूतातीतत्वं सर्वपूज्यत्वं राजत्वं च । अतीत्य सर्वाणि भूतानि तिष्ठतीत्यतिष्ठाः स्थोतिक्रान्तो तिष्ठ इति वा । अन्यत्रेति चन्द्रादिषु । तत्तद्गुणकेति । यथा दृप्तबालाकिब्राह्मणे बृहत्पाण्डरवासाः सोमो राजेत्येवंगुणकोपासने परिच्छिन्नफलं तु अहरहर्दसुतः प्रसुतो भवतीति श्रुत्युक्ता अस्योपासकस्य प्रकृत्यात्मके यज्ञे अहरहः किल सोमः सुतः कृताभिषवो भवति विकृत्यात्मके च यज्ञे प्रस्तुतः प्रकृष्टं सुतरां स्तुतो भवति सुतो भवतीति वा । उभय-विधयज्ञानुष्ठानसामर्थ्यं भवतीत्यर्थः । एवमन्यत्र विद्युदादिषु । तस्मा इति बालाकये । परिच्छि-न्नेति भाष्यं विवृण्वन्ति स्म परिच्छिन्नेति । तथा निराकृत इति भाष्यार्थमाहुः तत इति । उक्तेति यथा आदित्यनिष्ठपुरुषस्येत्याद्युक्तप्रकारेण । तदुक्त इति बालाक्युक्ते कर्तृभोक्तृत्वेन स्वसंघात उपासनप्रकारे निराकृते । तमेवेति भाष्यार्थमाहुः बालाकिरिति । तमजातशत्रुम् । उपेति यथा दृप्तबालाकिब्राह्मणे स होवाच गार्ग्य उप त्वायानीति त्वा त्वामजातशत्रुम् । ततः सुप्तेति भाष्यं विवृण्वन्ति स्म । ततो राजेति । बृहत्पाण्डरवासः शुक्लवासः । इत्यादिभिरिति कौषीतकि-

भाष्यप्रकाशः ।

यष्ट्या क्षिप्तवान् । स पुरुषस्तत एव समुत्तस्थौ । तदा राजबालाकी वक्ष्यमाणाभ्यां प्रश्नोत्तराभ्यां ब्रह्मवाद्यं चक्रतुः । तत्र, कैष एतद् बालाके इत्यादिके बालाकिं प्रति, पुरुषस्यस्थानं, स्वमावस्था, तत आगमनं चेति त्रयविषयके राजप्रश्ने पुरुषपदेन जीवः प्रक्रान्तः । यदा च बालाकिस्तं न ज्ञातवाँस्तदा राजैव, यत्रैष एतद् बालाके पुरुषोऽशयिष्टेत्यादिनोत्तरं जगाद । तत्र हिताख्यासु हृदयनिकटस्थनाडीषु जीवस्य शयनं, तत्र स्वप्नसुषुप्त्याख्यमवस्थाद्वयं, ततः पुनरत्रागमनं वदता राज्ञा तत एवाग्निविस्फुलिङ्गन्यायेनोत्पत्तिरुक्ता । ततः, स एष प्राण एव प्रज्ञात्मेदं शरीरमात्मानमनुप्रविष्ट आलोमभ्य आनखेभ्यस्तद्यथा क्षुरः क्षुरधानेऽवहितो विश्वम्भरो वा विश्वम्भरकुलाय इति दृष्टान्तद्वयेन ब्रह्मणः प्रज्ञात्मप्राणाख्यस्यानुप्रवेश उक्त इति सर्वोऽपि षष्ठोऽध्यायो

रश्मिः ।

ब्राह्मणाभिप्रायं दृप्तबालाकिब्राह्मणे नास्ति संबोधनत्रयातिरिक्तम् । यष्ट्येति दृप्तबालाकिब्राह्मणे तु स नोत्तस्थौ तं पाणिपेषं बोधयाञ्चकार सहोत्तस्थौ इति श्रुतिः । राजाबालाकी इति द्विवचनान्तम् । ब्रह्मवाद्यमिति वादयितुं योग्यं ब्रह्म चक्रतुः । यद्वा । वाघते ध्वन्यते वदेर्ण्यन्तादचो यत् । तत्रेति भाष्यं विवृण्वन्ति स्म तत्रेति । इत्यादिक इति कैष बालाके पुरुषोऽशयिष्ट क्व वै तदभूत् कुत एतदगात् इत्येवं रूपे । पुरुषेति स्थीयतेऽस्मिन्निति स्थानम् । तत्केतिपदेन पृष्टम् । स्पष्टमन्यत् । तस्मादेवेति भाष्यं विवृण्वन्ति स्म यदा च बालाकिरिति । इत्यादिनेति कुत एतदगादित्यस्याः अग्रे यथा सुप्तः स्वप्नं न किंचन पश्यत्यथास्मिन् प्राण एवैकधा भवतीत्यादिना शयनभवनयोराधार उत्थानापादानं च प्राणपदवाच्यः परमात्मेत्युत्तरार्थः ब्रह्मामृतवर्षिण्याम् । रामानुजाचार्यभास्कराचार्यानुसारेणार्थमाहुः तत्र हिताख्येति । तत्रेत्युत्तरे तत्रेति हितानामनाडीषु अत्र स्वप्न उक्तो न सुषुप्तिः सा दृप्तबालाकिब्राह्मणे पुरितत्यामुक्ता । अथ यदा सुषुप्तो भवतीत्युपक्रम्य पुरितति शेते इति श्रुतेः । तत इत्यवस्थाद्वयात् । अत्रेति हृदये । तत एवेति जागरितावस्थावस्थिताज्जीवादेव । उक्तेति । तथा च श्रुतिः । कुत एतदागादित्यस्याः अग्रे पृष्टमर्थमजानते गार्ग्याय बालाकये स्वयमेवाजातशत्रुणोक्ता हितानाम नाड्यः तासु तथा भवति यथा सुप्तः स्वप्नं न कथंचन पश्यत्यथास्मिन् प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति स यदा प्रतिबुध्यते यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गाः विप्रतिष्ठेरन् एवमेवैतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोका इति । ब्रह्मणोऽप्यनुप्रवेशश्चेति भाष्यं विवृण्वन्ति स्म ततः स एष इति । पुरुषविधब्राह्मणे तु स एष इह प्रविष्ट इति पठ्यतेऽत इयमपि कौषीतकिब्राह्मणस्था । श्रुत्यर्थस्तु । प्राणस्य प्रकृष्टज्ञानात्मकत्वं ब्रह्म ते ब्रवाणीत्युपक्रमात् । आत्मानमिति अत एव विश्वः 'आत्मा देहमनोब्रह्मस्वभावधृतिबुद्धिषु' इति । आलोमभ्य इत्यादि आङभिविधौ मर्यादायामाङिति टीकायाम् । तत्र लोमनखाव्यापकत्वप्रसङ्गः लोमाग्रं नखाग्रमिति व्याख्याने लोमनखयोर्लक्षणापत्तिः । क्षुरः क्षुरधाने क्षुरो धीयतेऽस्मिन् नापितोपस्काराधाने एकदेशेऽवहितः प्रवेशितः स्थितः स्यात् यथा वा विश्वंभरो अग्निः जाठरत्वेन विश्वस्य भरणाद्विश्वंभरकुलाये असाधारणभूतकाष्ठादिलक्षणे नीडे व्याप्य स्थितः । सर्वोऽपीति कौषीतकिब्राह्मणस्य षष्ठाध्याये । दृप्तबालाकिब्राह्मणं

तत्र, 'क्वैष एतद् बालाके पुरुषोऽशयिष्ट'इत्यादौ जीवः प्रक्रान्तः । तस्मादेव सर्वोत्पत्तिरुक्ता ब्रह्मणोऽप्यनुप्रवेशश्च । तत्र संदेहः । जीव एव ब्रह्मसहितः कर्ता ? ब्रह्मैव वेति ? । तत्र जीव एव कर्ता सर्वस्य जगतो ब्रह्मत्वादयस्तस्य धर्माः राजत्ववद् यजमानत्ववद्वा । अस्मिन् प्रकरणे ब्रह्मोपक्रमेण जीवपर्यवसानोक्तेः । सर्वत्रैव ब्रह्मत्वेनोक्तो जीव एव कर्ता । तथा सति लोकेऽपि जीवकर्तृत्वं सहजं भवेद् । बन्धमोक्षव्यवस्था च । एवं सत्यर्थात् प्रकृतेरेव फलिष्यतीत्येवं प्राप्ते

भाष्यप्रकाशः ।

विषयः । संदेहमाहुस्तत्रेत्यादि । पूर्वपक्षमाहुः तत्र जीव इत्यादि । सर्वस्य जगतो जीव एव कर्ता । यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य चैतत्कर्मेति कर्तारं वेदितव्यत्वेनोपक्षिप्य सुप्तपुरुषनिकटगमनाद्युत्तरं तस्मादेव प्राणानां देवानां लोकानां चोत्पत्तिकथनात् । नच ब्रह्मणोऽपि कर्तृत्वम् । तदनुप्रवेशमात्रस्यैव बोधनात् । अतः साहित्यमात्रं ब्रह्मणो भवतु । नच जीवस्य

रश्मिः ।

तु चतुर्थाध्याये बृहदारण्यके । तत्रेत्यादीति क्वैष एतद्बालाके पुरुषोऽशयिष्टेति पुरुषपदमुपक्रमो ब्रह्म ते ब्रवाणीति संदेहबीजं ब्रह्मणोनुप्रवेशस्यावार्यत्वाद्ब्रह्मसहित इति । एतेषामिति स वेदितव्य इति श्रुतिशेषः । श्रुत्यर्थः पूर्वपक्षे जीवपरः यत्तदोर्नित्यसंबन्धात् । यस्य वा एतत्कर्म त्रिविधमिति जीवः कर्ता न ब्रह्म धर्माधर्मलक्षणकर्मानाश्रयत्वात् स जीवो वेदितव्य इति । उपक्षिप्येति प्राप्तकाले कृत्यप्रत्ययेनोपक्षेपो ध्वनितः । सुप्तपुरुषेति आदिपदार्थः पूर्वमुक्तः । तस्मादेवेति जीवादेव । साहित्यमात्रमिति । ब्रह्मणा सहपुरुष इति न तु स यदा प्रतिबुद्ध्यते इत्यनन्तरमेतस्मादात्मनः इत्यत्र ब्रह्मसहितादात्मनो जीवादित्यर्थेन ब्रह्मणो विप्रतिष्ठन्ते इति क्रियायामन्वयः । पुत्रेण सहागतः पिता इत्यत्रेव । ब्रह्मत्वादय इति भाष्यमवतारयन्ति न च जीवस्येति । तथात्रेति अत्र सांख्यमते 'प्रकृतिपुरुषयोः अन्यत्सर्वमनित्यम्' 'असङ्गो ह्ययं पुरुषः' इति च वदतां सांख्यानां न जीवः पुरुषातिरिक्तः तस्य व्यवस्था मायावादिवत् । प्रकृत्यभिमन्तृत्वमिति मलिनबुद्धौ प्रतिबिम्बितत्वं जीवत्वं प्रकृतौ प्रतिबिम्बितत्वमीश्वरत्वं प्रकृतिपुरुषयोरनादिरविवेकः । 'निःसंगेप्युपरागोऽविवेकात्' जपास्फटिकयोरिव नोपरागः किं त्वभिमानः । तथा च प्रकृतेर्जडायाः अप्यभिमन्तृत्वमहं कर्तेति तदेव ब्रह्मत्वं चिदुपरागस्याप्यविवेकानादित्वेनानादित्वात् । तदभिमन्तृत्वमुपाधिस्तदा भवति यदा ज्ञानान्मुक्तिः सा तु मलिनबुद्धिरूपप्रतिबिम्बाधारनिवृत्तिः 'मुक्तिरन्तरायध्वस्तेर्न परः' इति अतस्तेषां ब्रह्मत्वादीनामपि आगन्तुकत्वं मलिनबुद्धिरूपोपाधेः स्वाभाविकत्वात् । अभिमन्ता गीतात्रयोदशाध्याये ।

'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥
कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥
पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान् ।
कारणं गुणसङ्गोस्य सदसद्योनिजन्मसु ॥
उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेस्मिन् पुरुषः परः' ॥ इति

भाष्यप्रकाशः।

कर्तृत्वे उपक्रमोक्तस्य ब्रह्मत्वस्य बृहदादीनां धर्माणां न विरोधः शङ्क्यः। यथा तुल्येऽपि सर्वत्र जीवत्वे क्वचिदेव देहे अन्यनियोजकत्वोपाधिना राजत्वं, कर्मकरणे मुख्यत्वोपाधिना यजमानत्वं चोच्यते, तथात्र प्रकृत्यभिमन्तृत्वोपाधिना तेषामप्यगन्तुकानां वक्तुं शक्यत्वात्। नचोपक्रमस्यासंजातविरोधत्वेन प्राबल्याद् ब्रह्मण एव कर्तृत्वं युक्तमिति शङ्क्यम्। उपसंहारस्यात्र विवरणरूपत्वेन पूर्वोक्तार्थनिर्णायकत्वादत्र ब्रह्मोपक्रमेण जीवपर्यवसानोक्तेर्ब्रह्मत्वेनोक्तो जीवः एव कर्ता। एवमुपक्रमोपसंहारभेदस्तु सर्वत्रैवैतन्न्यायज्ञापनार्थम्। एवमत्र देहविशिष्टस्याभिमानिनो दैहान् प्रति कर्तृत्वे बोधिते सति लोकेऽपि जीवस्य कर्तृत्वं देहसहभाव्येव भवेत्। तत्तत्कर्मणां बन्धमोक्षव्यवस्था च सुखेनोपपद्येत। एवमभिमानिनः कर्तृत्वे सिद्धे सति यो यादृगभिमानी तेन तादृक् कर्तव्यमिति नियमात् सर्वकर्तृत्वं प्रकृत्यभिमानिनः सेत्स्यति। सांख्यमते प्रकृतौ महत्तत्त्वे वा प्रतिबिम्बितस्यैवेश्वरत्त्वोपगमान्मलिनबुद्धौ प्रतिबिम्बितस्यैव जीवत्वात् प्रतिबिम्बस्य चाधारा-

रश्मिः।

मधुसूदन्यामत्र जीवो व्याकृतः प्रकृतिं पुरुषं चैव विद्धीत्यादिश्लोकेषु। अस्मिन्नित्यादि भाष्यमवतारयन्ति स न चोपक्रमस्येति। ब्रह्म ते ब्रवाणीत्यस्य। अग्रे षोडशपुरुषा आदित्यादय उक्ताः। उपसंहारस्येति स एष प्राण एव प्रज्ञात्मेदं शरीरमात्मानमनुप्रविष्ट इत्यस्य। दृप्तबालाकिब्राह्मणे तु सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यमित्यस्य। उपसंहारार्थ उक्तः। द्वितीयस्य तु तस्योपनिषदिति पूर्वमुक्तं तत्र कास्यावुपनिषदित्यत आह सत्यस्येति किं वा सत्यं किं पुनः सत्यमित्यत आह प्राणा इति प्राणा वै सत्यं सच्च सत्यमिति व्युत्पत्तेः। तेषां प्राणानां मध्ये य एष उक्तः आत्मा सत्यमबाध्यं तत्त्वमित्यर्थः। तस्योपनिषदित्यस्य तु तस्याकाशशब्दोदितस्य आत्मनो ब्रह्मणः उपनिषत् इति नाम उपसमीपं निरन्तरं सादयति गमयतीति व्युत्पत्तेः निरन्तरं समीपगमिकेत्यर्थः। रामानुजाचार्यभाष्ये तु सर्वान्पाप्मनो अपहत्य सर्वेषां च भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेदेत्युपसंहारः एकत्र फलस्तुत्योपसंहारोन्यत्र तां विहाय। फलस्तुतेर्व्यतिरिक्तत्वादिति विवेकः। विवरणेति उपक्रमोक्तब्रह्मानुसंधायैष प्राणो ब्रह्म एव प्रज्ञायां बुद्धावात्मा स्वरूपं यस्य जीवस्येत्यन्यत् स्पष्टम्। पूर्वोक्तेति घटः कलश इतिवत्। शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्चेति वाक्यात्। प्रासङ्गिकमाहुः एवमिति। एतन्न्यायेति। उपक्रमस्यासंजातविरोधत्वेपि विवरणेन शक्तिग्रहो नोपक्रमेणेति न्यायज्ञापनार्थम्। तथा सतीति भाष्यं विवृण्वन्ति स्म एवमत्रेति। दैहानित्यादि प्रकृतिजान् 'पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्' इति गीतायाः। कर्तृत्वं भोगकर्तृत्वम्। देहसह सहभावि एव। बन्धमोक्षेति भाष्यार्थमाहुः तत्तदिति। अन्यथैकजीवस्य देहभेदेपि कर्तृत्वस्य प्रकृतिगुणनिष्ठत्वेन प्रकृतेर्बन्धमोक्षापत्तिः बन्धमोक्षव्यवस्था च सहजा भवेदिति भाष्यार्थात्। यादृगिति यादृक्कर्माभिमानी तादृक्कर्म कर्तव्यम्। सर्वेति। आदेहं सर्वकर्मकर्तृत्वम्। आधारेति प्रतिबिम्बाधारः। प्रकृतिमहत्तत्त्वाख्यं मनः मलिनबुद्धिश्च तदधीनत्वे चारुणजपाकुसुमाधीनस्फटिकारुणिमवत्कर्तृत्वं जीवस्याभिमानिन इति भावः। अयं जीवाणुत्ववादे तृतीयः पक्षः। तत्र मूलप्रकृतावेव चित्प्रतिबिम्ब ईश्वर इति आवरणशक्तिप्राधान्येनाविद्यादिशब्दितायां तस्यामेव चित्प्रतिबिम्बो जीव इति च कथनात्। मूलप्रकृतिरविकृतिरिति अविद्यादयो बहुव्रीहिसंविज्ञानेन महत्तत्त्वमलिनबुद्ध्यादयः तैः शब्दितायां

उच्यते । जगद्वाचित्वात् । एतेषां पुरुषाणां कर्ता यस्य चैतत् कर्मेत्युपक्रमे एतच्छब्देन जगदुच्यते । पुरुषशब्देन च जीवः । तज्जडजीवात्मकं जगद् ब्रह्मकर्तृकमिति हि पूर्वसिद्धम् । तदनुरोधेनात्रापि ब्रह्मपरत्वमेवोचितं, न तु सर्वविप्लवोऽश्रुतकल्पना च । अतः सुषुप्तावपि ब्रह्मण्येव लयस्तस्मादेव सर्वमिति ज्ञातव्यम् । प्राणात्मशब्दवाच्यत्वं तु पूर्वमेव सिद्धम् । तस्मान्न जीवाधिष्ठिता प्रकृतिः कारणम् ॥ १६ ॥

भाष्यप्रकाशः ।

धीनत्वात् । नच ब्रह्मानुप्रवेशोक्तिवैयर्थ्यम् । तस्य साक्षित्वमात्रबोधनार्थत्वात् । तत्त्वं तु, स एष इत्यैक्यविधानान्न ब्रह्मेतो भिन्नम् । अतोऽभिमानिन एव कर्तृत्वात् प्रकृतेरेव कर्तृत्वमर्थादेव फलिष्यतीत्येवं प्राप्ते इत्यर्थः । समाधिं व्याकुर्वन्ति एतेषामित्यादि । अत्रापि कारणत्वेनेत्यनुवर्तते । कारणत्वेन ब्रह्मैवादरणीयम् । नात्र जीवः कर्तृत्वेन विवक्षितः । कुतः? जगद्वाचित्वात् । अत्र हि बालाकिनोक्तानादित्यादीन्निराकृत्य अजातशत्रुणा, 'यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य चैतत् कर्म स वै वेदितव्यः' इति सिद्धान्तकथनोपक्रमे, एतेषामित्येतच्छब्देनादित्यमण्डलाद्युल्लेखादुपलक्षणविधया जडं जगदुच्यते । पुरुषशब्देन च जीवरूपम् । तज्जडजीवात्मकं जगद् ब्रह्मकर्तृकमिति हि पूर्वसिद्धम् । आदित्यमण्डलाद्युत्पत्तेः प्रागेव, 'यतो वा इमानि भूतानि जायन्ते', 'तत्तेजोऽसृजत', 'एतस्माज्जायते प्राणः' इत्यादिष्वादिसृष्टिबोधिकासु

रश्मिः ।

तस्यां मूलप्रकृतावेवेति सांख्यमतम् । न च कर्ता कारयिता हरिः इत्युक्तब्रह्मानुप्रवेशो हि कर्तृत्वादेवं तु तदुक्तिवैयर्थ्यमित्याशङ्क्य समाधत्ते न च ब्रह्मेति । 'असङ्गो ह्ययं पुरुषः' इति सूत्रात् । पञ्चविंशतितत्त्वेषु कुत्रास्य प्रतिबिम्बितत्वस्य निवेश इत्याशङ्क्याहुः तत्त्वं त्विति । स एष इत्युपसंहारश्रुतिः । एवं सतीति भाष्यं विवृण्वन्ति स अत इति । ननु भाष्ये एवं सतीत्यस्याभिमानिन एव कर्तृत्वे सतीत्यर्थः । अत्र तु पञ्चम्यन्तं कुत इति चेन्न विवक्षातः कारकाणि भवन्तीति । अर्थादिति असङ्गत्वरूपार्थात् प्रकृतेर्विकारशीलायाः । एतेषामित्यादीति भाष्ये एतेषामादित्यादीनाम् । एतत् एति गच्छतीत्येतत् 'एतेस्तुट् च' इति सूत्रेणादिप्रत्ययस्तस्य तस्य तुडागमश्च । कर्मेति क्रियत इति कर्म 'सर्वधातुभ्यो मनिन्' इति मनिन् । कृति कर्म जगदित्युक्तम्, तच्च जडम् ।

'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया' ॥

इति गीतातः । पुरुषेति पुरुषाणामित्युक्तः पुरुषशब्देन जीवः । प्रकृते । अत्रेमां श्रुतिं सकलामाहुः पूर्वापरसंबन्धाय । अत्र हि बालाकिनेति । निराकृत्येति अत्र हि बालाकिरजातशत्रुणा ब्रह्म ते ब्रवाणीति संवदितुमुपचक्रमे स च कतिचिदादित्याद्यकारणान्पुरुषान् मुख्यब्रह्मदृष्टिभाज उक्त्वा तूष्णीं बभूव तमजातशत्रुर्मृषा वै खलु मा संवदिष्ठा ब्रह्म ते ब्रवाणीति । अमुख्यब्रह्मवादितया तं निराकृत्येत्यर्थः । तत्कर्तारमन्यं वेदितव्यतयोपचिक्षेप तमाहुः अजातशत्रुणेति । एतच्छब्देनेति भाष्यमवतारयन्ति एतेषामित्येतच्छब्देनेति । उक्तार्थस्य भगवदिच्छया प्रसिद्ध्यभावात् प्रसिद्धार्थमाहुः उपलक्षणेति । पुरुषेति भाष्यं विवृण्वन्ति पुरुषशब्देनेति । जीवेति पुरि शेते इति व्युत्पत्त्या जीवरूपं जगदुच्यते । तज्जडेति भाष्यं विवृण्वन्ति तज्जडेति । भूतानीति भूतं क्ष्मादि पिशाचादि च तेजोधाम छान्दोग्यश्रुतिः । इत्यादिष्विति ।

भाष्यप्रकाशः ।

श्रुतिषु सिद्धम् । अत्रापि पूर्वमिन्द्रप्रतर्दनसंवादे एवमेव सिद्धमतस्तदनुरोधेनात्रापि कर्तृत्वस्य ब्रह्मपरत्वमेवोचितम् । न तु पुरुषशब्देन देहमात्रमभिप्रेत्य तत्कर्तृत्वस्य प्रकृत्यभिमानिनि संभवदुक्तिकत्वेन तदङ्गीकृत्य सर्वश्रुत्युपप्लवो विधेयः । नच, न जायते न म्रियते वेति श्रुतेर्जीवोत्पत्तिः सिद्धान्तेऽप्यनिष्टेति जडजीवात्मकजगत्कर्तृत्वकथनमसंगतमिति शङ्क्यम् । 'सर्व एवात्मानो व्युच्चरन्ति' इति श्रुत्यन्तरेण व्युच्चरणरूपाया उत्पत्तेस्तत्राप्यङ्गीकारात् । अतो जडवत् स्वरूपान्यथाभावाभावादेव, न जायत इत्युपपत्तेर्न सिद्धान्ते दोषः । नच सिद्धान्ते उपलक्षणविधावत् पूर्वपक्षे संकोच इति दोषतौल्यात् साम्यं शङ्क्यम् । ब्रह्मण उपक्रमे श्रुतत्वेन तदादरस्य युक्ततया उपलक्षणविधाया अदुष्टत्वात् । प्रकृत्यभिमानिनस्त्वश्रुतत्वेन तत्कल्पने श्रुतत्यागोऽश्रुतकल्पना च स्यादिति दोषाधिक्यात् । नच ब्रह्मपदमत्र सांख्याभिमतजडब्रह्मवाचकमिति शङ्क्यम् । स्वरूपलक्षणविरोधप्रसङ्गात् । अतः सर्वश्रुत्येकवाक्यत्वायात्रापि ब्रह्मैव कर्त्रिति मन्तव्यत्वात् सुषुप्तावपि ब्रह्मण्येव वागादीनामत्रोक्तानां लयः । तस्मादेव सर्वं यथायतनं विप्रतिष्ठत इति ज्ञातव्यम् । नच प्राण एव प्रज्ञात्मेत्यस्य विरोधः । ब्रह्मणि प्राणात्मशब्दवाच्यस्येन्द्रप्रतर्दनसंवादे पूर्वमेव सिद्धत्वादिति । तस्मादत्र प्रकृत्यभिमानी जीवो न तत्कर्तृत्वेन सिद्ध्यतीति न तदधिष्ठिता प्रकृतिः करणमित्यर्थः ॥ १६ ॥

रश्मिः ।

'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथ्वी विश्वस्य धारिणी' ॥

इति । मुण्डके आदिपदेन 'द्यावापृथिवी जनयन् देव एकः' इति । पूर्वसिद्धमित्यस्य भाष्यस्यार्थान्तरमाहुः अत्रापि । पूर्वमिति भाष्येपि पूर्वमनुगमाधिकरणे कौषीतकिब्राह्मणे वा पूर्वम् । एवमेवेति जगद् ब्रह्मकर्तृकमेव सिद्धम् । तदनुरोधेनेति भाष्यं विवृण्वन्ति अतस्तदनुरोधेनेति । अत्रापीति कौषीतकिब्राह्मणेपि । संभवदिति प्राक्तनकर्मद्वारा । कर्मणां प्ररोहैकस्वभावत्वम् । सर्वश्रुतीति यतो वा इमानीति श्रुतिविप्लवः । न जायत इति 'न जायते म्रियते वा विपश्चित्' इति । न च विपश्चित् सूर्य इति शङ्क्यम् । सूर्य आत्मा जगतस्तस्थुषश्चेति आत्मत्वात् । व्युच्चरणेति सर्व एव जीवाः सर्व एवात्मानः इति व्युच्चरणं समागमः । 'अनित्ये जननं नित्ये परिच्छिन्ने समागमः' इति सुबोधिनीकारिकायाः । जडे शब्दरूपरसगन्धस्पर्शपरावृत्तिवज्जीवेष्वित्याहुः अत इति । अन्यथाभावः शब्दादिपरावृत्तिः । अश्रुतकल्पना चेति भाष्यमवतारयन्ति न चेति । उपलक्षणेति एतच्छब्देनोपलक्षणविधया । संकोच इति देहमात्रसंकोचः । शङ्कते न च ब्रह्मेति । सांख्येति सांख्यैरभिमतं जडं प्रकृतिः ब्रह्म असङ्गपुरुषस्तदुभयवाचकमभिमानिवाचकमिति यावत् प्रतिबिम्बं वा जडं ब्रह्म तद्वाचकं चोपक्रमगतं ब्रह्मपदमित्यर्थः । स्वरूपेति सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुत्युक्तम् । अतः सुषुप्तावित्यादिभाष्यं विवृण्वन्ति स्म अतः सर्वेति । अत्रापीति कौषीतकिब्राह्मणेपि । विप्रतिष्ठन्ते इति जागरिते विप्रतिष्ठन्ते तच्च विषयोपपादनं पूर्वमुक्तम् । न जीवादिति भावः । प्राणात्मेति भाष्यं विवृण्वन्ति न च प्राण इति । पूर्वमिति अनुगमाधिकरणे । कौषीतकिब्राह्मणे वा पूर्वम् । तदधिष्ठितेति प्रतिबिम्बाधिष्ठिता प्रतिबिम्बाधारभूता प्रकृतिः । न च गीताविरोध इति वाच्यम् । यद्यपि क्षेत्रक्षेत्रज्ञनिर्देशाध्याये क्षेत्रज्ञनिरूपणं न्याय्यं तथापि क्षेत्रेषु देहेषु द्वा सुपर्णेति श्रुत्या

जीवमुख्यप्राणलिङ्गादिति चेत्तद्व्याख्यातम् ॥ १७ ॥

किंचिदाशङ्क्य परिहरति । नन्वत्र जीव एव प्रक्रान्तः। क्वैष एतद् बालाके पुरुषोऽशयिष्टेति । ब्रह्म त्वयापि न सिद्धमेतादृशं, नैतादृशमिति । अतः शयनोत्थानलक्षणजीवधर्मदर्शनात् तस्यैव ब्रह्मत्वं जगत्कर्तृत्वं च। तत् स्वतोऽनुपपन्नं प्रकृतौ फलिष्यति । अथवा मुख्यप्राणलिङ्गमप्यत्रास्ति । प्राण एवैकधा भवतीति सुषुप्तौ तस्यैव वृत्तिरुपलभ्यते । विद्यमानादेव सर्वोत्पत्तिप्रलयौ। स च

भाष्यप्रकाशः ।

जीवमुख्यप्राणलिङ्गादिति चेत्तद्व्याख्यातम् ॥ १७ ॥ भाष्यमत्र निगदव्या-

रश्मिः ।

जीवमात्रस्याशक्यनिरूपणत्वात् उपद्रष्टेत्यादिना ब्रह्मनिरूपणात् । न चात्र मानाभाव इति शङ्क्यम् । भुङ्क्ते इति जीवे भोक्तृत्वसिद्ध्या भोक्तेति भोक्तृत्वस्य पृथगुक्तस्य मानत्वात् । न चानुवाद इति शङ्क्यम् । गौरवात् । न चानश्नन्नन्योभिचाकशीति श्रुतिविरोधः शङ्क्यः स्वेनाशननिषेधात् । जीवरूपेण भोक्तृत्वस्यावरणात् । अन्यथा माण्डूक्योपनिषदि स्थूलभुक्त्वोक्तेर्विरोधः स्यात् । न च चरणरूपेण स्थूलभुक्त्वमिति शङ्क्यम् । ॐ । न च प्रकृतेरनादित्वं न युज्यत इति शङ्क्यम् । मायया च निषेवितमिति वाक्यात् । माया प्रकृतिरिति । न च क्षेत्रक्षेत्रज्ञनिर्देशविरोध इति शङ्क्यम् । उपक्रमे,

'प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च ।
एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव' ॥

इति ज्ञेयोक्तेः । न च क्षेत्रक्षेत्रज्ञयोरेवं सांख्यरीत्या सर्वनिवेशः क्षेत्रक्षेत्रज्ञनिर्देश इत्यध्यायनाम्नः इति शङ्क्यम् । प्रतिबिम्बस्य विद्वन्मण्डने दूषणात् निरीश्वरवादापत्तेश्चेति ॥ १६ ॥

जीवमुख्यप्राणलिङ्गादिति चेत्तद्व्याख्यातम् ॥ १७ ॥ निगदेति । तथाहि । किंचिदिति प्रतीतार्थत्यागेनायमात्मा ब्रह्मेति शारीरब्राह्मणे जीवस्य ब्रह्मत्वोक्तिरुपक्रमो जीवपरः क्वैष इत्यत्र जीवः स्पष्टः । सुप्तात् सुषुप्ताच्च जीवाच्छ्रौती सृष्टिः तत्कर्तृत्वं प्रतिबिम्बे बाधितम् । प्रकृतौ भविष्यति उपसंहारे स एष प्राण एव विज्ञानात्मेत्येकवचनेन सांख्यवाददर्शनात् फलनिरूपणेपि पापाहत्यादीनां संभव इत्याशङ्केति । ननु ब्रह्म ते ब्रवाणि इत्युपक्रम इति चेत्तत्राहुः ब्रह्म त्विति । अस्तूपक्रमवार्ता अत्रेन्द्रप्रतर्दनसंवादेपि ब्रह्म न सिद्धं प्राणपदं ब्रह्मवाचकमिति सिद्धं ततस्त्वष्टृवधोत्र तु शारीरब्राह्मणोक्तो जीव उपक्रमे उक्तः । अत इति शक्यार्थविचारात् । जीवमुख्यप्राणलिङ्गादित्येकवचनादेकं दुष्टमेकं लिङ्गमित्युक्त्या दुष्टं जीवलिङ्गं व्याख्याय मुख्यप्राणलिङ्गं व्याकुर्वन्ति स अथ वेति । ननु कोऽस्वरसो येन पक्षान्तरोक्तिरिति चेच्छृणु उपक्रम एवासंभवी यतोशयिष्टेति स्वप्नार्थकधातुमात्रं न किं तु सुषुप्तिसहितस्वप्नवाचकः यदा सुप्तः स्वप्नं न कंचन पश्यति इति श्रुतेः दृप्तबालाकिब्राह्मणे पुरीतति शेते इति सुषुप्तिनाडीपुरीतद्रूपाया उक्तेश्च सुषुप्तात्पुरुषात्सृष्टिः सुखमहमस्वाप्सं न किंचिदवेदिषमिति प्रत्ययविरुद्धेति प्रविष्टब्रह्मणः सृष्टिर्युक्तेत्यस्वरस इति । ननु अत्रापि स दोषस्तदवस्थ इति चेत्तत्राहुः सुषुप्ताविति यदा सुप्तः स्वप्नं न कंचन पश्यति अथास्मिन् प्राण एवैकधा भवतीति उपक्रम्य एतस्मादात्मनः प्राणा यथायतनं प्रतिष्ठन्ते प्राणेभ्यो

प्रकृत्यंशोऽतो जडादेव प्रधानात् सृष्टावपि सर्वोत्पत्तिः । अतोऽस्मात् प्रकरणाज्जीवद्वारा साक्षाद्वा प्रकृतेः कारणत्वमित्येवं प्राप्ते उच्यते तद्व्याख्यातम् । एतयोरुभयलिङ्गत्वमेव नास्तीति, आश्रयत्वादिह तद्योगादित्यत्र सर्वमेव कार्यं भगवत एव नान्यस्मादिति । अतोऽस्माद् ब्रह्मवाद एव सिद्ध्यति, न प्रकृतिवादः ॥ १७ ॥

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥ १८ ॥

स्वमतेन परिहारमुक्त्वा नियतधर्मवादेनापि परिहारमाह । स्वापप्रतिबोधौ जीवधर्मावेव । चक्षुरादिलयाधारत्वं प्राणस्येति । तस्मिन्नपि पक्षे अन्यार्थं तद्धर्मकीर्तनम् । भेदे हि तन्निराकरणमवश्यं कर्तव्यमिति तुशब्दः । ब्रह्मप्रति-

भाष्यप्रकाशः ।

ख्यातमित्युपरम्यते ॥ १७ ॥

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥ १८ ॥ अत्र सांख्यमतमाचार्यदेश्यानामन्येषामप्यनुमतं न भवतीति ज्ञापनाय सूत्रप्रयोजनमाहुः स्वमतेनेत्यादि । नियतधर्मवादस्वरूपमाहुः स्वापेत्यादि । परिहारमाहुः तस्मिन्नित्यादि । यस्मिन् पक्ष

रश्मिः ।

देवा देवेभ्यो लोका इति च । प्राणवृत्तयोऽपानादयः प्रतिष्ठन्ते जागरिते परीक्षकैरुपलभ्यन्ते । ननु प्राणोस्तु परं तु ब्रह्मणोनुप्रवेश उक्तः । तस्मादेवात्मनः सकाशात्प्राणप्रतिष्ठाद्युक्तम् । तथा च शंकराचार्यभाष्यं 'परस्माच्च ब्रह्मणः प्राणादिकं जगज्जायते' इति वेदान्तमर्यादेति चेत्तत्राहुः **विद्यमानादिति** । प्राणादिति वृत्तौ मरीचिकाख्यायां लालुभट्टकृतायां वृत्तावप्येवम् । प्राणे विद्यमानाद् ब्रह्मणः सत्त्वादिवत् कर्तृत्वरूपादित्यर्थः अत एव एतस्मादात्मन इति श्रुतावात्मपदं प्राणेष्वात्मपदाभावात् । भाष्यं चातः सुषुप्तावपि ब्रह्मण्येव लयस्तस्मादेव सर्वं ज्ञातव्यमिति स च प्राणः प्रकृत्यंशः । प्रकृतेर्मायारूपाया महत्तत्त्वं महत्तत्त्वादहंतत्त्वं तस्मात्तामसाहंकाराच्छब्दः ततः खं ततः स्पर्शस्ततो वायुरिति प्रकृत्यंशः समष्टिप्राणः व्यष्टीनां प्राणा अपि प्रकृत्यंशाः । सांख्य आह **अत** इति यतो भवतामेवमतोस्माकमपि जडादेवेत्यादिः । **अतोस्मादिति** । कौषीतकिप्रकरणात् । **जीवद्वारेति** प्रकृतौ प्रतिबिम्बो जीवस्तस्मात्सर्वम् । **साक्षादिति** 'प्रधानाज्जगज्जायते' इति । **एतयोरिति** लिङ्गयोः । प्रकरणित्वोपपादने उभयलिङ्गत्वमेव नास्तीति उभयलिङ्गत्वाभावो व्याख्यातः केत्याकाङ्क्षायामनुगमाधिकरण इत्याहुः **आश्रितत्वादिहेति** कथं व्याख्यातमित्याहुः **सर्वमिति** । नन्वेवं सति प्रतर्दनवाक्यनिर्णयेनैवेदमपि वाक्यं निर्णीयेत न निर्णीयते यस्य वै तत्कर्मेत्यस्य वाक्यस्य ब्रह्मविषयत्वेन तत्रानवधारितत्वात् तस्मादत्र जीवमुख्यप्राणाशङ्का पुनरुत्पद्यमाना निवर्त्यते । सिद्धमाहुः **अत** इति शक्यार्थादस्माद्ब्राह्मणात् । एवं निगदव्याख्यातमित्यर्थः ॥ १७ ॥

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥ १८ ॥ अत्र जैमिनिमतोक्तेः प्रयोजनं वक्तुमाहुः **अत्र सांख्येति** । **आचार्यदेश्यानामिति** ईषदूना आचार्या आचार्यदेश्याः 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' इति सूत्रेण देश्यप्रत्ययः । अन्येषामाचार्यदेश्यत्वं प्रत्यधिकरणं स्फुटमेव दूषणात् । **अन्येषामिति** जैमिनीनाम् । **नियतेति** स्वापप्रतिबोधौ जीवस्यैव चक्षुरादिलयाधारत्वं प्राणस्येति नियतधर्मवादः 'तत्प्रमाणं बादरायणस्यानपेक्षत्वात्' इति सूत्रे

पत्त्यर्थमेव जीवलयोद्गमौ। मृतिवैलक्षण्येन प्राणकीर्तनमाश्रयब्रह्मबोधाय। कुत एतदवगम्यते तत्राह उपक्रमोपसंहाराभ्यामेवावगम्यते। 'यो वै बालाक एतेषां पुरुषाणाम्' इत्युपक्रमे मुख्यं ब्रह्मैव निर्दिष्टम्। तज्ज्ञानेनासुरजयः, सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं चेति फलम्। न ह्येतद्द्वयमसुख्ये संभवति। अपि च प्रश्नव्याख्यानाभ्याम्। 'क्वैष एतद् बालाके पुरुषोऽशयिष्टेति प्रश्नः। तत्र जीवस्य ज्ञातत्वादधिकरणमेव न ज्ञातम्। यत्रैष एतद्बालाके पुरुषोऽशयिष्टेति

भाष्यप्रकाशः।

एतयोर्जीवमुख्यप्राणधर्मत्वात् तल्लिङ्गत्वमेव, न ब्रह्मधर्मत्वं, तस्मिन्नपि तद्धर्माणां कीर्तनमन्यार्थं ब्रह्मबोधार्थम्। तथा च ब्रह्मपरिचायनाय तच्छेपत्वेनैतत्कथनान्नैतेन सांख्यमतसिद्धिरित्यर्थः। ननु सूत्रे तुशब्दादस्य पक्षस्य पूर्वस्माज्ज्यायस्त्वमेव कुतो नाद्रियत इत्याकाङ्क्षायां तोः प्रयोजनमाहुः भेदे हीत्यादि। एतस्य मतस्य पूर्वस्माद् भेदे यतो हेतोर्जैमिनिनापि सांख्यमतनिराकरणमवश्यं कर्तव्यमिति ज्ञापनाय तुशब्दो, न तु सिद्धान्तपक्षादस्योत्कर्षज्ञापनार्थः। ग्रामाविश्य च भूतानीत्यादिभिर्भूतादिसर्वकार्यस्य भगवत्कार्यतयैव सिद्धत्वादिति। तर्ह्यस्मिन् पक्षे जीवप्राणयोः कथमन्यार्थत्वमित्यत उपपादयन्ति ब्रह्मप्रतीत्यादि। अपिचेत्यनेन सूचितं हेतुमाहुः

रश्मिः।

जैमिनिना व्यासग्रहणात् जीवस्वरूपं व्यासोक्तं यथाशास्त्रम्। 'जैमिनिः कर्मतरवज्ञः' इति धर्मशास्त्रे नियतधर्मवादः। यथा मध्वादिष्वनधिकारं जैमिनिः। अधिकारं व्यास आह स्वापेत्यादीति श्रुतिं यदा सुप्तः स्वप्नं न कंचन पश्यति अथास्मिन् प्राण एवैकधा भवतीति। न ब्रह्मेति परंपरया न ब्रह्मधर्मत्वम्। नन्वत्रापि ब्रह्मणः एकविधत्वं तत्प्रमाणं बादरायणस्यानपेक्षत्वादित्यौत्पत्तिकसूत्र-शेषादिति शङ्क्यम्। आत्माधिकः कलादिभिर्न भोगः इति जैमिनिसूत्रात् आदित्यादिग्रहेषु कलादिभिः सकलगुणैरधिक आढ्यः न भोगो ग्रहः आत्मेति ज्योतिषजैमिनिसूत्रसुबोधिन्याम्। आत्मलक्षणस्य ज्योतिर्विन्नीलकण्ठैः प्रतिपादनात्। तस्मिन्नपीति वेदवेदान्तादिषट्शास्त्रेषु वेदशास्त्रपक्षे। ब्रह्मपरीति दर्शपूर्णमासयोर्ब्रह्मत्वार्थं ब्रह्मपरिचायनाय। एतदिति जीवमुख्यप्राणलिङ्गकथनात्। ब्रह्मिष्ठो ब्रह्मा तं दर्शपूर्णमासयोः वृणीत इति वाक्यात्। ज्यायस्त्वमिति तोः पूर्वोक्तस्य व्यासपक्षस्य निराकरणस्य तोरर्थात् इति भावः। तु इति पूर्वपक्षिणमिति तुः, तुः पूर्वपक्षनिरास इति भाष्यात्। पूर्वस्मादिति वेदान्तमतात्। कर्तव्यमिति अन्यथा षट्शास्त्रव्यवस्था भज्येत। वेदशास्त्रमेव सांख्यशास्त्रम्। कर्मणः कर्तृत्वादि च न स्यात् प्रकृतेरुपादानत्वे। तथा च पूर्वपक्षिणं सांख्यं तुदतीति तुरिति भावः। भगवदिति। गीतायां न कर्मकार्यतया न सिद्धत्वमित्येवकारव्यावर्त्यम्। ब्रह्मप्रतिपत्तीत्यादीति प्रतिपत्तिर्ज्ञानं तद्ब्रह्मणो जगज्जन्मादिकर्तृत्वेन भवति तज्जगज्जन्मादिकर्तृत्वमेतेषां पुरुषाणां कर्तेत्यने-नोक्तं सुषुप्तावपि ब्रह्मण्यपलयः इति भाष्योक्तो लयः। तावेतौ जीवलयोद्गमौ ब्रह्मप्रतिपत्त्यर्थमेव तल्लक्षणत्वात्। मृतिः शारीरब्राह्मणे उक्ता 'सुषुप्त्युत्क्रान्त्योर्भेदेन' इत्यधिकरणे विवृता तत्र सर्व-प्राणानां भगवन्निकटे गमनमुक्तमत्र तु वागादित्याधारत्वं प्राणस्येति वैलक्षण्यं तेन। प्राणकीर्तनं प्राण एवैकधा भवति इति श्रुत्या। एतदिति आश्रयब्रह्मबोधनार्थत्वम्। जीव प्राणधारणे इति धातुपाठात् साक्षात्प्राणाश्रयजीवमपहायाश्रितत्वं परंपरयावगम्यते। अपि चेति स्वरादेराकृति-

व्याख्यानम्। न हि नाडीर्ज्ञापयितुं व्याख्याति, किं तु प्रतिज्ञातं ब्रह्म। कथमेतदवगम्यते, नाडीव्यतिरिक्त आत्मा ज्ञाप्यत इति तत्राह **एवमेके**। एके शाखिनो वाजसनेयिनः। तत्रापि दृप्तबालाकिब्राह्मणे, 'स होवाचाजातशत्रुर्यत्रैष एतत् सुप्तोऽभूद् य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय, य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते' इत्यत्र आकाशशब्दं ब्रह्म सता सोम्य तदा संपन्नो भवतीति च। स्वं ह्यपीतो भवतीति च। तस्मादाधारभूतब्रह्मज्ञापनार्थत्वाज्जीवमुख्यप्राणलिङ्गात् प्रकृतिवाद इत्यसंगतम्॥ १८॥

इति प्रथमाध्यायचतुर्थपादे षष्ठं त्रिसूत्रं जगद्वाचित्वाधिकरणम्॥ ६॥

भाष्यप्रकाशः।

उपक्रमेत्यादि। फलमिति उपसंहारे निर्दिष्टं फलम्। जीवस्य ज्ञातत्त्वादिति। एष इति पदेन बालाकिज्ञातपदार्थस्यैव निर्देशात् तथेत्यर्थः। शेषं स्फुटम्॥ १८॥

इति षष्ठमधिकरणम्॥ ६॥

रश्मिः।

गणत्वादन्यच्चेत्यर्थे प्रयुज्यते तत्र किं चेत्यनुक्त्वा एतत्प्रयोगः सूचयति सूत्रान्वयान्तरम्। प्रश्नव्याख्यानाभ्यामप्येवमेवैके शाखिनश्चेति तदाहुरपि चेत्यनेनेति हेतुमिति। उपक्रमोपसंहाररूपम्। समुच्चयार्थकेनापि नायं हेतुः समुचित इति भावः। **उपसंहार** इति सर्वान्पाप्मनोपहत्येत्यादिनोक्तस्तस्मिन्। **भाष्ये**। अमुख्ये साक्षात्प्राणाश्रये जीवेऽङ्गीकृते सति संभवत्यपि तु परंपरयाश्रये ब्रह्मण्यङ्गीकृते सति संभवति। सूचितार्थं व्याख्याय वाच्यार्थं वक्तुमाहुः **अपि चेति**। अन्यच्चेत्यर्थकमव्ययम्। मनोरमायां स्वरादेराकृतिगणत्वात्। क्वेत्यत्र किमः सप्तम्यन्तात् किमोदिति अत्प्रत्ययादधिकरणसप्तम्या अधिकरणविषयकः प्रश्नः इत्याहुः तत्रेति। **प्रकृते**। **बालाकिज्ञातेति** ज्ञातमत्र शास्त्रदृष्ट्या प्रत्यक्षं वा। अधिकरणं न ज्ञानमिति जीवाधिकरणं किमिति प्रश्नः। **शेषमिति** उत्तरस्य यद्धर्मप्रकारकयद्विषयी प्रश्नः तद्धर्मावच्छिन्नत्वतदुद्देश्यकं लक्षणादिनिरूपणमिति व्युत्पत्त्या को घटः कम्बुग्रीवादिमान् घट इत्यत्र दर्शनेन तादृशत्वाच्छ्रुत्यन्तरसिद्धमाकाशब्रह्मोत्तरयतीत्याहुः **यत्रैष इति** यत्रेत्यस्याकाशशब्दब्रह्मणि इत्यर्थः। ननु श्रुत्यन्तरे पुरीतति शेते इति यत्रेत्यस्य पुरीतति इत्यर्थः। कुतो नेति चेत्तत्राहुः **नहीति**। **आकाशेति** आकाशः शब्दो यस्य प्रतिपादकस्तदाकाशशब्दं ब्रह्म। यत्रैष जीवः सुप्तोभूत् एतज्जगत्सुप्तोभूत्। स्वयं विवृणोति य एष इति विज्ञानमयो जीवः प्राणानामिन्द्रियाणां विज्ञानं प्रकाशनसामर्थ्यम्। करणे ल्युटा स्वविज्ञानेन प्रत्यक्षप्रणाल्यामङ्गीकृतेनादाय गृहीत्वा हृदय इत्याकाशविशेषणम्। सप्तम्यन्तं न हृदयब्रह्मणोक्तब्रह्मक्षत्रहृदयमिति नपुंसकशब्दात्। अत उक्तमाकाशशब्दं ब्रह्मेति। अन्यच्च **सतेति** सता ब्रह्मणा तदा सुषुप्तौ। स्वमिति स्वमात्मानमपि इतः प्राप्तो भवति। सिद्धमाहुः **तस्मादिति** जीवमुख्येत्यत्र ल्यब्लोपे पञ्चमी आधारभूतब्रह्मज्ञापनार्थत्वात् जीवमुख्यप्राणलिङ्गमाश्रय पूर्वसूत्रोक्तरीत्या प्रकृतिवाद इत्यसंगतमित्यर्थः। संगतिस्तु निर्वाहकरूपा प्रत्यधिकरणम्॥ १८॥

इति षष्ठाधिकरणम्॥ ६॥

वाक्यान्वयात् ॥ १९ ॥ (१।४।७)

पुनर्जीवब्रह्मवादेन प्रकृतिकारणवादमाशङ्क्य निराकरोति । बृहदारण्यके चतुर्थे षष्ठे च याज्ञवल्क्यमैत्रेयीसंवादे, येनाहं नामृता स्यां किमहं तेन कुर्यामिति विरक्तिमुक्त्वा, यदेव भगवान् वेद तदेव मे ब्रूहीति पृष्टे तामभिमुखीकृत्य, न वा अरे पत्युः कामायेत्यादिना अमृतत्वाय ज्ञानमुपदिशति षष्ठे । पुनरुपसंहारेऽप्येतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राजेति ।

भाष्यप्रकाशः ।

वाक्यान्वयात् ॥ १९ ॥ अधिकरणमवतारयन्ति पुनर्जीवेत्यादि विषयमाहुः बृहदित्यादि प्रवव्राजेत्यन्तम् । इदं वाक्यद्वयं प्रकृतिसंबन्धशून्यकेवलपुरुषतत्त्वज्ञापनपरम् । यथार्द्रेन्धाग्नेरित्यारभ्य वागेकायनमित्यन्तेन नामरूपात्मकप्रपञ्चोत्पत्तिलयाधारश्रावणात् । सांख्यमते केवलस्य पुरुषस्य तथात्वाभावात् । किंतु प्रकृतसंसृष्टतत्परम् । तेन तादृशस्य जीवस्य प्रकरणित्वम् ।

रश्मिः ।

वाक्यान्वयात् ॥१९॥ पुनर्जीवेत्यादीति जीव एव ब्रह्मेतिवादेन जीवस्य प्रतिबिम्बत्वात् प्रतिबिम्बस्याकारणत्वात् प्रकृतौ कारणत्वपर्यवसानात् प्रकृतिकारणवादेत्यादि । चतुर्थ इति चतुर्थे ब्राह्मणे षष्ठेध्याये च ब्राह्मणं तु पञ्चमं एतद्ब्राह्मणद्वयं विषयः । येन जन्मना हेतुना 'जातस्य हि ध्रुवो मृत्युः' इति वाक्यात् । अहं मैत्रेयी नामृता न शब्दो नञ् चामृतत्वाभिलाषसूचनायान्यथामृता स्यामित्येतावतैव चारितार्थ्यं लाघवं च । किं चामृतत्वाय ज्ञानोपदेशस्यासंगतिः स्यात् 'नाऽपृष्टो ब्रूयात्' इति सुबोधिन्याः एवं तु किं कुर्याममृतत्वार्थं किं कुर्यामिति प्रश्नव्यक्तेरमृतत्वाय पृष्टोऽमृतत्वाय ज्ञानमुपदिदेशेति अमृतत्वाय ज्ञानोपदेशस्यासंगतिर्नेति । स्यामिति हेतुहेतुमद्भावे लिङ् तेन जन्मना संपूर्णेन किं कुर्यामिति कृतिविषयकप्रश्नः नामृतत्वस्य कृतेश्च कार्यकारणभावः । न मृतत्वस्य कृतेश्च कार्यकारणभावः । कृतिपदेन सेवाकृतिकर्मकृत्योर्विवक्षणात् मृतत्वेप्यसत्कृतिसंभवात् । अतो हेतुहेतुमद्भावे लिङर्थमपि न नञौ । **विरक्तिमिति** । येनाहमिति वाक्यार्थस्य व्यञ्जकत्वात् व्यञ्जनयोक्त्वा वाक्यार्थेन विरक्तिव्यञ्जनात् । भगवान् याज्ञवल्क्यः । मे मम मैत्रेय्या मा इ इति च्छेदे मा मामित्यर्थः । एवं विषयः स्फुटः संशयस्फौट्यमाहुः **संशयबीजमिति** । पूर्वेति पूर्वं शारीरब्राह्मणं ततः पूर्वस्मिञ्ज्योतिर्ब्राह्मणे । *आत्मज्योतिः सम्राडिति होवाचेति श्रुतेर्ब्रह्मणः प्रकृतत्वम्* । **तत्र आत्मन इत्यादीति** । ननु जायापत्योरादित्वमपेक्षितमित्याशङ्क्याहुः **स्वप्रतीत्येति** । स्वप्रतीतिर्दम्पत्योर्नास्ति । ननु दम्पत्योर्मित्रस्वभार्यारूपयोः स्वप्रतीत्या प्रियत्वमस्त्येवेति चेन्न मुक्तस्य विषयरागाभावात् भार्याया अपि 'पुत्रे कृष्णप्रिये रतिः' इति वाक्याद्विषयप्रियत्वाभावात् । जायायाः पत्नीत्वे दम्पत्योः सहाधिकारस्य पूर्वतन्त्रसिद्धत्वात् तयोः प्रियत्वं स्वप्रतीतिगोचरो न भवति तथा च प्रतीतिप्राधान्यात् न पाठक्रम इति भावः । यद्वा पुत्राणामादी पुत्रादी पुत्रा आदयो येषां वित्तब्रह्मक्षत्रादीनां ते पुत्रादयः पुत्रादी च पुत्रादयश्च पुत्रादयस्तेषामपेक्षयेत्यर्थः । **जीवमेवेति** अयमात्मा ब्रह्मेति श्रुतौ जीवे आत्मपदप्रयोगात् । जीवस्येति । **भाष्ये** । तदित्यव्ययं लुप्तषष्ठीकं तस्येति निष्पन्नं तस्यार्थो जीवस्येति अव्ययार्थं आत्मत्वेन बोधानन्तरमिति । तत्रेत्यत्र विषयसप्तमी तदर्थस्तद्विषयकमेव जीवविषयकमेव दर्शनादिकं विधत्ते इति भाष्यान्वयः 'न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिः प्रियो भवति न वा अरे जायायाः कामाय जाया प्रिया भवति आत्मनस्तु

तत्र जीवस्य प्रकरणित्वं ब्रह्मणो वेति संशयः। तत्रात्मनः प्रियत्वं स्वप्रतीत्या पुत्राद्यपेक्षया बोधयञ्जीवमेवोपक्रमे आत्मत्वेन वदति। तदनु तत्र दर्शनादि विधत्ते। तेन सर्वं विदितमिति फलमाह। तत्र कथमात्मज्ञानेन सर्वज्ञानमित्याकाङ्क्षायां, ब्रह्म तं परादादित्यादिना, इदं सर्वं यदयमात्मेत्यन्तेन तस्यैव सर्वत्वमाह।

भाष्यप्रकाशः।

जीवलिङ्गस्य भूयस्त्वात्। अथवा ब्रह्मणः प्रकरणित्वम् मृतस्वरूपस्य फलस्योक्तत्वादित्याशयेनाहुः तत्रेत्यादि। एवंचास्मिन्नपि सूत्रे आनुमानिकं नेत्यानुमानिकसूत्रादाकाशादिषु कारणत्वेन चेत्याकाशादिसूत्राच्चानुवर्तते। तथाच ब्रह्मण्येव वाक्यान्वयाद् ब्रह्मैव कारणत्वेन मन्तव्यं, न तु प्रकृतिविशिष्टो जीवः। सर्वश्रुतीनामेकवाक्यात्। अतो नानुमानिकसूत्रे योजनं पर्यवसतीत्याशयेन पूर्वपक्षमाहुः तत्रात्मन इत्यादि। स्वप्रतीत्येति लौकिक्या स्वप्रतीत्या। जीवमिति प्रकृतिसंसृष्टं पुरुषम्। तदनु तत्रेति जीवस्यात्मत्वेन बोधनानन्तरं तद्विषयकमेव। 'ब्रह्म तं परादात्' इत्यादिनेति ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद क्षत्रं तं परादादित्यादिना। अर्थस्तु— ब्रह्मक्षत्रादिरूपा वर्णाभिमानिनी देवता तं वक्ष्यमाणलक्षणं पुरुषं परादाज्ज्ञानापराधात् पराकुर्यात्। अपराधमाह। योऽन्यत्रात्मनो ब्रह्म वेदेति। यः पुमान् अन्यत्रात्मन आत्मनः सकाशादन्यद् ब्रह्मक्षत्रादि वेदेति। त्रल् सार्वविभक्तिकः। तथाचायमात्माभिन्नत्वेन मां पश्यतीत्यपराधात् तमात्मज्ञानरहितं कुर्यादित्यर्थः। सर्वत्वमाहेति। इदं सर्वं यदित्यन्तमनूद्यभागः। अयमात्मेति विधेयभागः। तथाचात्मनः सर्वत्वादात्मज्ञाने सर्वज्ञानमुपपन्नमिति भावेनात्मनः सर्वरूपत्वमाहेत्यर्थः। तदन्विति एवं प्रतिज्ञोपपादनमुखेन तन्माहात्म्यश्रावणानन्तरं कथमस्मिन् संघाते आत्मज्ञानं भवतीत्याकाङ्क्षायां दुन्दुभ्यादिदृष्टान्तत्रयमाह। यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयात् तद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीत इत्यादि। अर्थस्तु—यथा दुन्दुभेर्हन्यमानस्य सकाशाद् बाह्यान् अतिरिक्ताञ्छब्दान् महाकोलाहले ग्रहणाय ग्रहीतुं न शक्नुयान्न समर्थः पुरुषो भवेत्। किंतु हन्यमानस्य दुन्दुभेरेव शब्दो गृहीतो भवति। तत्र करणं दुन्दुभेर्दर्शनम्। दुन्दुभ्याघातस्य वा दर्शनम्। तदेतदुक्तं, दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वेति। तथा च महाकोलाहलाभिभावके कस्मिंश्चि-

रश्मिः।

कामाय जाया प्रिया भवति' इत्यारभ्य 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि वा अरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितमित्यादिज्ञानोपदेशं जीवविषयकं विधत्ते। भाष्ये। तेनेति आत्मश्रवणादिना श्रुतिराह। प्रकृते। वक्ष्यमाणेति अपराधिनम्। सार्वेति तथा च त्रल् द्वितीयायाः अन्यदित्यन्वयेति। आत्मन इति भाष्यीयस्य तस्येत्यस्यार्थः। प्रतिज्ञेति प्रतिज्ञात्वावच्छिन्ना प्रतिज्ञा तद्विशिष्टं वाक्यमपि प्रतिज्ञावाक्यम्। तन्माहात्म्येति जीवमाहात्म्य श्रावणानन्तरम् परंपरयेत्यादि भाष्यार्थोऽग्रे स्पष्टोऽग्रे। यथा महेति भाष्यं विवरीतुं श्रुतिमाहुः यथा दुन्दुभेरिति आदिपदेन स यथा वीणायै वाद्यमानायै न बाह्याञ्छब्दाञ्छक्नुयात् ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीत इति दृष्टान्तद्वयबोधकश्रुतिसंग्रहो बोध्यः। भाष्यं विवृण्वन्ति स्म यथा दुन्दुभेरिति आघाताख्यः संयोगः। अनुमानेति भाष्यं विवरीतुमाहुः

तदनु कथमस्मिन् संघाते आत्मज्ञानं भवतीत्याकाङ्क्षायां दुन्दुभ्यादिदृष्टान्तत्रयमाह। परंपरया बाह्याभ्यन्तरभेदेन। यथा महाकोलाहले दुन्दुभेर्हन्यमानस्य शब्दो गृहीतो भवति। तत्र करणं दुन्दुभिदर्शनं दुन्दुभ्याघातदर्शनं वा। अनुमानद्वारा चित्ते तत्र निविष्टे तत्साक्षात्कारो भवतीति तथा आत्मनो बोधककार्यानुसंधाने तत्साक्षात्कारो भवतीति। तत्र कथं सर्वत्वमित्याकाङ्क्षायां तत एवोत्पन्नं सर्वं नामरूपात्मकं तस्मिन्नेव लीयत इति। स यथेति द्वयेनाह। मध्ये

भाष्यप्रकाशः।

च्छब्दे श्रुते, कस्यायमिति जिज्ञासायां योग्यतया सजातीयशब्दान्तरेण वा कारणमनुमिनोति। एवमनुमानद्वारा चित्ते तत्र निविष्टे ततः प्रयत्नेनान्यथा वा तस्य दुन्दुभेः साक्षात्कारो भवतीति दृष्टान्तः। तथात्रात्मबुभुत्सायाम्, आत्मनो बोधकानि यानि चेष्टादिरूपाणि तत्कार्याणि तेषां विचारेण चित्तेऽनुमानद्वारा आत्मानुसंधाने तस्यात्मनोऽप्यस्मिन् संघाते श्रवणादिभिः

रश्मिः।

तथा चेति योग्यतयेति एकपदार्थेऽपरपदार्थसंबन्धो योग्यता। एकस्मिन् पदार्थे महाकोलाहलाभिभावके शब्देऽपरपदार्थस्य दुन्दुभेः संबन्धः। स्वान्वितान्वितत्वं संबन्धः स्वं शब्दः तस्माद्वा एतस्मादात्मनः इति श्रुतेः तेनान्वित आकाशस्तेनान्वितो वायुरित्येवं संबन्धः स्वरूपः। अनया कारणानुमानं दुन्दुभिशब्दः क्वचिदाश्रितः गुणत्वाद्रूपादिवदिति। ननु रूपादिकं न दृष्टान्तः साध्यतावच्छेदकस्वरूपसंबन्धेन हेतुतावच्छेदकसमवायसंबन्धेन हेतुमति घटादिरूपादौ साध्याभावात्। प्रत्युत साध्याभाववद्वृत्तित्वेन साधारणो हेतुरिति चेन्न घटादिभिन्नौपधिवृत्तिरूपादीनां दृष्टान्तत्वात्। तथा च श्रुतिः 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः आकाशाद्वायुर्वायोरग्निरग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः' इति। स्वरूपं रूपं तेजसस्तन्मात्रा तत्राश्रयो दुन्दुभिरेव संबद्धत्वात् ततश्च शब्दः दुन्दुभ्याश्रित इत्यनुमितिः। अत्र नैयायिकैः साध्यतावच्छेदकसंबन्धशैथिल्यप्रयुक्तसमवायाङ्गीकारेण शब्द आकाशाश्रित इत्यनुमित्यापत्त्यार्थान्तरं निग्रहस्थानमित्यरुच्या पक्षान्तरमाहुः सजातीयेति।

'सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते।
वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता'॥

इति भाषापरिच्छेदस्य मुक्तावल्याम्। दूरस्थशब्दस्याग्रहणादाह श्रोत्रेति ननु मृदङ्गाद्यवच्छेदेनोत्पन्ने शब्दे श्रोत्रे कथमुत्पत्तिरित्यत आह वीचीति आद्यशब्दस्य बहिर्देशदिगवच्छिन्नोन्यशब्दस्तेनैव शब्देनोत्पाद्यते एवाद्यशब्दव्यापकः। एवं क्रमेण श्रोत्रोत्पन्नः शब्द उपलभ्यत इति। एवं च श्रोत्रोत्पन्नेन तत्कारणं शब्दाद्यनुमिनोति तेन शब्देन तत्कारणं तेन तत्कारणमित्येव सजातीयशब्दान्तरेण कारणं दुन्दुभिमनुमिनोति शब्दान्तरं कारणजन्यं कार्यत्वात् घटवदिति कारणं दुन्दुभ्यादिकमिति। अनुमानेति भाष्यं विवृण्वन्ति एवमनुमानद्वारेति। तत्रेति दुन्दुभ्यादौ जानाति इच्छति यतते इत्यत्रेच्छा न नियतेत्याशयेनाहुः ततः प्रयत्न इति। अन्यथेति। अप्रयत्नकर्तृत्वेन द्वितीयपक्षे दुन्दुभिसाक्षात्कारोनुमितिः सोक्ता। तथेति भाष्यं विवृण्वन्ति तथात्रात्मेति। बुभुत्सेति बोद्धुमिच्छायां सन् भष्भावः खरि चेति चर्त्वम्। तत्कार्याणीति शरीरकार्याणि शरीरसमवेतचेष्टयेति अग्रे ग्रन्थात्। अनुमानेति अनुमानं च संघातः आत्मवान् चेष्टावत्त्वात् देवदत्तसंघातवत्। कार्यादिति वा हेतुः। भाष्यप्रकाशे तत्र कार्यलिङ्गकानुमानमित्यग्रे वक्ष्य-

भाष्यप्रकाशः ।

साक्षात्कारो भवतीति अत्र प्रथमो दुन्दुभिदृष्टान्तः परंपरया ज्ञानजनने । शरीरसमवेतचेष्टया निमित्तभूतस्यात्मनो ज्ञानात् । द्वितीयस्तु बाह्याद् भेदेन ज्ञानजनने । तत्र बाह्यशब्दा रागादिभेदज्ञापकास्ते शब्दप्रयोजकं नेतरभेदेन प्रत्याययन्तीति तांस्तद्ग्रहणाय न शक्नुयात् । वीणाया वीणावादस्य वा ग्रहणेन तु अयमीदृशः शब्दो न केवलमङ्गुलीसंसर्गप्रयुक्तः, किंतु मनोव्यापारविशेषप्रयुक्त इति ज्ञायते । अतः स शब्दस्तत्कारणस्य बाह्याद् भेदेन ज्ञापकतया गृहीतो भवति ।

रश्मिः ।

माणत्वात् । एतदनुमानद्वारा संघातात्मवान् इत्यनुमितिविषयास्यात्मनोनु अनुमितेरनु पश्चात् चित्तप्रवेशस्यानुपश्चाद्वा संधनेनुमितिविषयत्वेन ज्ञाने संघट्टने 'संधानं स्यादभिषवे तथा संघट्टनेपि च' इति विश्वात् । चित्तस्याधिकरणत्वोक्तेः । मनसि धीरिव चित्तेपीति । भवतीति यथा चैषदेहोस्थितं ज्योतिरित्यत्र भगवत्प्रमेयबलेन जीवदर्शनं तथा द्रष्टव्य इति श्रुतिबलेन भवति । अत्रेति मैत्रेयीब्राह्मणे । अनेन प्रकारेण परंपरयेति भाष्यं विवृतम् । ज्ञानेति आत्मनो ज्ञानजनने । उपपादयन्ति शरीरेति चेष्टाक्रिययोर्भेदोऽस्मन्मतेऽतः शरीरसमवेता चेष्टा । निमित्तेति शरीरसमवेतचेष्टानिमित्तभूतस्य अनेन आत्मनो बोधकानि यानि चेष्टादिरूपाणि कार्याणि तैश्चित्ते चात्मानुसंधाने जीवसाक्षात्कारो भवतीति भाष्यार्थः । ननु चेष्टावत्त्वं हेतुरर्थान्तरसाधकम् । संघात इन्द्रियवान् चेष्टावत्त्वादिति चेत् तत्र द्वितीयदृष्टान्तमाहेत्याहुः द्वितीयस्त्विति बाह्यादात्मनः सकाशाद्बाह्यादिन्द्रियसमूहात् लिङ्गदेहात् वृत्तावप्येवमर्थो बाह्यशब्दस्य मनसः आत्मनो वा भेदेन ज्ञानजनने । तत्रेति तत्र श्रुतौ । वीणायां वा विचार्यमाणायाम् । वीणाशब्दाच्चतुर्थ्यौ षष्ठ्यर्थे । कोलाहलाभावात् परमैश्वर्यवद्योग्यशब्दा रागाद्यनुकूला बाह्या अतिरिक्ताः शब्दाः रागतानमूर्च्छनानां भेदा भैरवादयस्तेषां ज्ञापकाः शब्दसामान्यं विहाय रागादिपदं वीणापदसूचितम् । वीणैश्वर्यवद्बृहे वाद्यते इति श्रुतिप्रसिद्धार्थात् ते शब्दाः शब्दप्रयोजकं मनोव्यापारं नेतरभेदेन इतरलिङ्गशरीरं ततो भेदेन न प्रत्याययन्ति मनोव्यापारो न लिङ्गभिन्नः रागादिभेदज्ञापकशब्दप्रयोजकत्वात् असदाद्यभ्यस्तरागशब्दवत् । इति तानिति इति हेतोः तान् शब्दान् तद्ग्रहणाय लिङ्गभिन्नमनोव्यापारग्रहणायात्मपदार्थमनोग्रहणाय वा । न शक्नुयान्न शक्तान् हेतून् पुरुषः कुर्यात् इति श्रुत्याज्ञाविधौ लिङ् । तर्हि कं शब्दं शक्नुयात् इत्याह वीणाया इति । ग्रहणं ज्ञानम् । तद्यथा रागादिभेदज्ञापकशब्दानामभिभावके कस्मिंश्चिच्छब्दे श्रुते कस्यायं शब्द इति जिज्ञासायां योग्यतया सजातीयशब्दान्तरेण वा कारणमनुमिनोति । एवमनुमानद्वारा चित्ते तत्र प्रविष्टे प्रयतनेनान्यथा वा तस्य वीणायाः तद्वादस्य वा साक्षात्कारो भवतीति । एतादृग्ग्रहणे न तु अयमीदृशः वीणासंबन्धी शब्दः समानो व्यापारो रागादिभेदज्ञापकशब्दप्रयोजको न त्वङ्गुलीचालनविशेषजन्यशब्दप्रयोजकोऽतो मनोव्यापारविशेषप्रयुक्त इत्युक्तम् । स शब्दो वीणाशब्दः । तत्कारणस्येति मनोव्यापारविशेषस्य मनसो वा विलक्षणस्य बाह्यालिङ्गात् । तथा च मनोव्यापारविशेषं लिङ्गभिन्नं वीणाशब्दप्रयोजकत्वात् आत्मवत् यन्नैवं तन्नैवं गन्धवत् । ननु पक्षः पक्षतावच्छेदकावच्छिन्नभेदवान् कथमिति चेन्न मनोव्यापारविशेषं पक्षः । तस्य षोडशकलिङ्गभेदात् मनोव्यापारस्य लिङ्गनिवेशेपि तद्विशेषस्य लिङ्गनिवेशाभावात् । नन्वस्त्वेवं प्रकृते आत्मविषये किमायातमिति चेन्न मनस आत्मत्वात् । तद्व्यापारतद्विशेषयोरप्यात्म-

१. दर्शपदं कुत्रचित्पुस्तकेऽनर्थकमिति ।

रश्मिः ।

त्वात् । नन्वन्नमयादि व्यतिहायात्र मन आत्मग्रहणे किं कारणमिति चेन्न 'मनसैवानुद्रष्टव्यः' इति श्रुतेरुक्तात्मनो मनोग्राह्यत्वात् । ननु ग्राहकस्य किं प्रयोजनमात्मत्वेन निरूपणे इति चेन्न आत्मनः स्वग्राह्यत्वात् । 'स्वयमेवात्मनात्मानं वेत्थ' इति गीतायाः । ननु स यथा वीणायै इति श्रुतौ यथा-पदात्तथेत्यायाति तस्य संदर्भस्य कोर्थ इति चेच्छृणु । तथात्मनो वाद्याद्भेदबुभुत्सायां आत्मा वाद्यभिन्नः प्राणधारकत्वात् जीववत् । 'जीवो जीवमजीवयत्' इत्यत्रात्मवाचकत्वं जीवपदस्य आत्मा लिङ्गभिन्नः वीणाशब्दप्रयोजकत्वाद् वा । मनोव्यापारविशेषवदिति दृष्टान्तः तथा चेष्टया इन्द्रियाणि सिद्ध्यन्तु नाम परं तु चेष्टया तद्भिन्नात्मसिद्धौ बाधकाभाव इति भावः । सकलेन्द्रिय-रहितसंघाते चेष्टावत्त्वस्य साधारण्याच्च । ननु वाद्याद्भेदसाधनेपि न मनोभिन्न आत्मा मनसैवानु-द्रष्टव्य इति श्रुतेः मनोग्राह्यत्वात् । 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम' इति गीतावाक्यादिति चेत्तत्राहुः **तृतीयस्त्विति** । मनसः सकाशात्प्राणस्य प्राणब्राह्मण उपसंहारब्राह्मणे वा त्रयं वा इदं नामरूपकर्मेत्यारम्भके निरूपितस्य नामरूपकर्मात्मकस्य तदेतत्त्रय८सदेकमयमात्मेति श्रुतेः आत्म-रूपस्य भेदज्ञानजनने । तत्रेति ध्मा शब्दाग्निसंयोगयोः भ्वा. प. अ. धमतीति ध्मा कर्तरि क्विप् अत्विकारश्छान्दसः शङ्खस्य ध्मः शङ्खध्म इति । बाह्या अतिरिक्ताः शङ्खशब्दाः प्राणेन मनोभेद-ज्ञापकाः प्राण आत्मा मनोभिन्नः परंपरया शङ्खशब्दस्तस्य प्रयोजनकत्वादित्यत्र हेतोः स्वरूपा-सिद्धत्वात् । परंपरया शङ्खशब्दप्रयोजकत्वस्य हेतोरवान्तरशब्दादौ सत्त्वेन प्राणेऽभावात् । ग्रहणं ज्ञानं पूर्ववत् अनुमानं तु प्राण आत्मा मनोभिन्नरूपनामकर्मात्मत्वात् । यन्नैवं तन्नैवं मनोवत् । साक्षाच्छङ्खशब्दप्रयोजकत्वाद्वा । ननु साक्षाच्छङ्खशब्दप्रयोजकत्वं मनोमये वेदे ।

'स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः ।
मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः' ॥ इति ।

एकादशस्कन्धवाक्यात् । तथा हृदि च वर्तते मनोभिन्नत्वं नास्तीति हेतोः साधारण्यमिति चेन्न मनोमयस्य कारणत्वेन प्रयोजकत्वाभावात् हृदस्त्वन्यथासिद्धत्वात् मनोनिविष्टमनसैव स्थविष्ठ-व्यक्तेः संभवाद्धृदन्यथासिद्धमिति भावः । जीवादीनां साक्षाच्छङ्खशब्दप्रयोजकत्वं वर्तते तेषां मनो-भिन्नत्वमपि वर्तत इत्यदोषः । **मुख्यप्राणस्येति** आसन्यप्राणस्य आसन्यस्य सेवायामिन्द्रियाणां देवतात्वमिति शास्त्रार्थनिबन्धटीका । अस्योक्तत्रयस्यामरत्वमुक्तश्रुतेः । आत्मनः अमृतत्वम् । एकः सन्नेतत्त्रयं तदेतदमृतमिति श्रुतेः एक इत्यात्मा पूर्वमुक्तः । अमृतस्य प्राणत्वं प्राणो वामृतमिति श्रुतेः । ननु दुन्दुभिदृष्टान्तेन संघात आत्मज्ञानमुक्तम् । द्वितीयेन दृष्टान्तेन मनस्तदात्मकं करणम-प्युक्तम् । तृतीयेन प्राण उक्तः । स क इति चेच्छृणु प्राणपदेन प्राणादयः पञ्चोपस्थाप्यन्ते आत्म-पदेनात्मत्वमप्युपस्थाप्यते एवं च प्राणा आत्मरूपाः प्राणपदार्थः । ते च संध्यायां ओमित्येकाक्षरं ब्रह्मेति ब्रह्मपदेनात्मानमुपक्रम्य गायत्री छन्दसां मातेदं जुषस्व म इति गायत्र्यभेद उक्तः माता मातरं अमो डा संध्याव्याख्याने तु गायत्रीं गायत्रीमातेव मातेति व्याख्यानं भट्टोजीदीक्षितकृतम् । ननु स्त्रीत्वान्वयः कथमिति चेन्न भगवत्सेवानुकूल्यरूपपुंस्त्वस्योमित्यनेन प्राप्तेः । गायत्र्यां प्रसादरूप-शक्तेरेव स्त्रीत्वात् भगवत्सेवाप्रातिकूल्यरूपस्त्रीत्वस्येह जुषस्वेति श्रुतिपदविरुद्धत्वात् । तदुक्तं गोपाल-तापिनीये प्रणवत्वेन प्रकृतित्वं वदन्ति ब्रह्मवादिन इति महोपनिषच्चतुर्थे ॐ देवा ह वै प्रजापतिम-ब्रुवन् अनुष्टुभस्य मन्त्रराजस्य नारसिंहस्याङ्ग मन्त्रान्नो ब्रूहि स होवाच प्रजापतिरोङ्कारं सावित्रीं

भाष्यप्रकाशः ।

तृतीयस्त्वभ्यन्तरान्मनसोऽपि भेदज्ञानजनने तत्र वाह्याः शब्दा मन्द्रतारादयस्ते प्राणस्य न मनोभेदज्ञापकाः । शंखस्य शंखध्मस्य वा ग्रहणेन तु शब्दस्तत्कारणस्यान्तःकरणाद् भेदेन ज्ञापकतया गृहीतो भवति । मुख्यप्राणस्यायं शब्द इति । एवं संघाताद् भिन्नतया संघातेऽन्तरात्मज्ञाने उपायो मननात्मक उक्तः । तत्र कार्यलिङ्गमनुमानमात्मनि चित्तं निवेशयतीति सिद्धम् । तत्रात्मकार्यविवक्षयैव इतः पूर्वमात्मज्ञाने सर्वज्ञानस्योक्तत्वादात्मा सर्वत्वेन वक्तव्यः । तत्र कथमात्मनः सर्वत्वमित्याकाङ्क्षायां तत एवोत्पन्नं सर्वं तत्रैव लीयत इति घटादेः पूर्वं पश्चाच्च मृदिव सर्वस्यात्मेति बोधनाय, स यथा आर्द्रैधाग्नेरिति स यथा सर्वासामपामिति कण्डिकाद्वयेनाह । तेन नैयायिकाद्यभिमतं निमित्तमात्रत्वं निराकृतम् । तथापि स्थितिदशायां

रश्मिः ।

गायत्रीमित्यङ्गानि जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति अग्रे ओंभूर्लक्ष्मीर्भुवर्लक्ष्मीः सुवः कालकर्णी तन्नो महालक्ष्मीति श्रुतिः अत्र ओं सुवः महालक्ष्मीत्यभेदेनोक्तिः । पद्मपुराणे चोत्तरखण्डे ।

'वृषभानुरिति ख्यातो गोपो ज्ञातिमतां वरः ।
तस्य पत्नी महाभागा नाम्ना सौभाग्यसुन्दरी ॥
तावुभौ ब्रह्मसावित्र्यौ स्वांशेन जगतीं गतौ ।
तयोर्गेहे महालक्ष्मीः प्रादुर्भूता सुरेश्वरी ॥
अयोनिजा विशालाक्षी कृष्णस्यानन्दकारिणी ।
मासे भाद्रपदेऽष्टम्यां भौमे मूलर्क्षमण्डिते' ॥ इति ।

तस्य वाचकः प्रणव इति योगसूत्रम् । तस्यासङ्गपुरुषस्य । तथा चात्मतद्ग्राहके मनसि उक्त्वा आत्मवाचकः प्रणवः उक्तः । स प्राणपदार्थः । नामरूपकर्मत्वात् । कर्म च 'क्रिया सा राधिका देवी' इति कुत्रचिद्वाक्यात् राधिका । ननु आकाशस्य शब्दो न प्राणस्य नामरूपकर्मरूपस्य श्रुतेस्तु शब्दमूलत्वात् आकाशशरीरं ब्रह्म कार्यत्वेनाकाशसमन्वयाच्च । ननु स यथेत्यत्रापि श्रुतौ दर्शनात् तथेत्यायाति तस्य संदर्भस्य कोर्थ इति चेच्छृणु तथाह्यात्मबुभुत्सायां आत्मा प्राणभिन्नः प्राणकर्तृत्वात् कुलालवत् ।

'आसीज्ज्ञानमथो ह्यर्थः केवलं निर्विकल्पितम् ।
वाङ्मनोगोचरातीतं द्विधा समभवद् बृहत् ।
तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका' ॥ इति ।

एकादशस्कन्धसार्धश्लोकात् । सिद्धमाहुः एवमिति । संघातादिति सूक्ष्मदेहात्ममनसश्च । ननु सूक्ष्मदेहग्रहणेनैव मनोग्रहणात् । पृथङ्मनोग्रहणमपार्थमिति चेन्न श्रुतिप्रामाण्यात् सूक्ष्मदेहे वक्तव्ये पञ्चदशग्रहणात् । तथा सकीचकैर्मारुतपूर्णरन्ध्रैरित्यत्र न कीचकपदस्य मारुतपूर्णरन्ध्रत्वविशिष्टे वेणौ शक्तिः किं तु वेणावेवैवमत्रापि वाद्यपदस्य पञ्चदशके शक्तिर्न तु षोडशत्वविशिष्टे इति । मननेति दुन्दुभ्यादिदृष्टान्तत्रयेणात्मज्ञानोक्त्या दृष्टान्तावधारणमात्रेणात्मनोपि दृष्टान्तोक्तरीत्यानुचिन्तनरूपं मननं तदात्मक इत्यर्थः । 'अत्र मां मार्गयन्त्यद्धा युक्ता हेतुभिरीश्वरम्' इति वाक्यादाहुस्तत्रेति । युक्तिषु कार्यलिङ्गकानुमानम् । तच्च संघात आत्मवान् चेष्टावत्त्वादिति चेष्टाया आत्मकार्यत्वात् । कार्यादिति हेतुर्वा । तत्र कथमिति भाष्यं विवरीतुमाहुः तत्रात्मकार्येति

स एव नातिरिक्तं विशतीति, स यथा सैन्धवघन इत्यनेनाह । आधेयत्वेन तावन्मात्रतानिराकरणायाह न प्रेत्य संज्ञास्तीति । कार्यातिरिक्तरूपं कथयितुं न शक्यत इति तत्र विशेषाकाङ्क्षायामतिरिक्ताकथने वञ्चकत्वमाशङ्क्य तत्परिहा-

भाष्यप्रकाशः ।

भेददर्शनात् पूर्वोक्तं सर्वमुपचारमात्रं मंस्यत इति तन्निवारणाय मध्ये स्थितिदशायामपि स आत्मैव केवलो, नातिरिक्तं किमप्याधेयत्वेन विशतीत्यन्तर्बहिस्त्सवानन्तरत्वमबाह्यत्वमैकरूप्यं चाह । 'स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव स्यादेवं वा अरे इदं महद्भूतमनन्तमपारं कृत्स्नः प्रज्ञाघन एव' इति । तर्हि सर्वदा कुतो न प्रतीयते इत्यत आह । एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यतीति । एतानि शरीरात्मकानि महान्ति च भूतानि कार्यत्वादस्य ज्ञापकानीति तेभ्यः समुत्थाय तद्द्वारा स्वं ज्ञापयित्वा तानि विनश्यन्ति सन्त्ययमात्माऽप्यनुविनश्यत्यदर्शनं प्राप्नोतीति तर्हि समुत्थानानुविनाशक्रियादर्शनात् कालपरिच्छिन्नो भविष्यतीत्याशङ्कायां तावन्मात्रतानिराकरणायाह न प्रेत्य संज्ञास्तीति । प्रेत्य भूतलयोत्तरं संज्ञा सम्यग् ज्ञापकं नास्ति । कार्यमेव तस्य ज्ञापकं रूपम् । अतस्तस्मिन् लीने कार्यातिरिक्तं तस्य रूपं वक्तुं न शक्यत इति न ज्ञायते । न तु स एव नास्तीत्यतो न ज्ञायत इति । तथाच तदानीमपि विद्यमानत्वान्न स कालपरिच्छिन्न इत्यर्थः । एवमुक्ते मैत्रेय्या मोहो जातः । सा होवाच मैत्रेयी, अत्रैव मा भगवान् मोहान्तमापीपदन्न वा अहमिदं विजानामि न प्रेत्य संज्ञास्तीति । मोहान्तं मोहमध्यमापीपदद् आपादितवानसि शेषोऽर्थः स्फुटः । एवं मैत्रेय्या उक्ते तत्र विशेषाकाङ्क्षायामतिरिक्ताकथने वञ्चकत्वमाशङ्क्य तत्परिहारायाह ।

रश्मिः ।

तन्तुकार्यपटवत् । इतः पूर्वं विषयश्रुतौ विवृण्वन्ति तत्र कथमिति । **निमित्तेति** 'संसारमहीरुहस्य बीजाय' इति नैयायिकाः । मायावादिनस्तु सगुणात् सृष्टिरिति, सांख्याः 'प्रधानाज्जगज्जायत' इति तेषामभिमतं निमित्तमात्रत्वमात्मनो निराकृतमभिन्ननिमित्तोपादानत्वं मृद्विवेति दृष्टान्तेन समन्वयाधिकरणोक्तं स्मारितम् । मध्येपीति भाष्यं विवरीतुमाहुः **तथापीति** । पूर्वोक्तं मृदिव घटादेः पूर्वं पश्चाच्च सर्वस्यात्मेति बोधनाय कण्डिकाद्वयोक्तम् । तावन्मात्रेति भाष्यं विवरीतुमाहुः **तर्हीति** । **कालेति** कालपरिच्छेदः शरदः शतं सूर्यपरिस्पन्दस्तद्विषयस्तावदिति । कार्यमात्रतानिराकरणाय । **कार्यातिरिक्तेति** भाष्यं विवरीतुमाहुः **कार्यमेवेति** । कार्यमिति शरीरं जीवपक्षे जगत् सिद्धान्ते कार्यं तस्य जीवस्य ज्ञापकमपि व्यक्तिस्थानं सिद्धान्ते जगत्कर्तृत्वं लक्षणम् । **स एव जीव एव** । **तदानीमिति** संघातादिलयकाले । स इति जीवः । **मोहान्तमिति** 'अन्तः प्रान्तेन्तिके' इति विश्वात् । एकस्य मध्यवाचकत्वात् । कोशान्तराद्वा मध्यार्थकत्वदाहुः **मोहमध्यमिति** मोहमध्यं यथा भवति तथा । मोहमध्ये इति यावत् । आसमन्तात् प्रापितवानसि । **शेष इति** न वा इत्यादेरर्थः शेषः स स्फुट इत्यर्थः । **तत्र विशेषेति** भाष्यं विवृण्वन्ति एवं **मैत्रेय्येति** तृतीयान्तं संहिताविवक्षाभावान्नाद्गुणः विवक्षातः कारकाणि भवन्तीति षष्ठ्यन्तं वा । **तत्रेति** विज्ञानघन एवेति प्रतिज्ञाय पुनर्न प्रेत्य संज्ञास्तीति विरुद्धवदने । **कार्येति** कार्यवैलक्षण्यं नित्यत्वेनेश्वरस्य ।

रायाह स होवाचेति । अविनाशीत्यनेन कार्यवैलक्षण्यं सिद्धवत्कारेणोक्त्वा विषयसंबन्धेन संसारमाह मात्रासंसर्गस्त्वस्य भवतीति । विशेषतस्त्वकथने हेतुमाह यद्वैतमित्यादिना, यावत्समाप्ति । चक्षू रूपमेव पश्यति, नात्मानम् ।

भाष्यप्रकाशः ।

स होवाचेत्यादि । स होवाच याज्ञवल्क्यः । न वा अरे मोहमहं ब्रवीम्यविनाशी वा अरे अयमात्मा अनुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवतीति । अत्र, अविनाशीत्यनेन स्वरूपनित्यत्वस्य, न विद्यते उच्छित्तिर्येषां तेऽनुच्छित्तयस्तादृशा धर्मा यस्येत्यनुच्छित्तिधर्मेत्यनेन स्वरूपधर्माणां च नित्यत्वस्य बोधनात् कार्यवैलक्षण्यं सिद्धवत्कारेणोक्त्वा विषयसंबन्धेन संसारमाह । मात्रासंसर्गस्त्वस्य भवतीति । तथाच यद्यनित्यः स्याद् विषयसंबन्धेन पुनः संसारः कस्य स्यादतः सोऽविनाशीत्यर्थः । यद्येवं तर्हि तद्दर्शनार्थं विशेषोऽपि वक्तव्य इत्याकाङ्क्षायां विशेषतस्त्वकथने हेतुमाह यद्वै तमित्यादिना, यावत्समाप्ति यद्वै तन्न पश्यति पश्यन् वै तद् द्रष्टव्यं न पश्यति । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वात् । न तु द्वितीयमस्ति ततोऽन्यद् विभक्तं यत् पश्येदिति । तन्न पश्यतीत्यत्रानुस्वारस्य परसवर्णः । यतश्चक्षू रूपमेव पश्यति, नात्मानमतो यद्वै तन्न पश्यतीत्यनेनात्मदर्शनाभावमनूद्य कार्यस्य कारणात्मकत्वात् । ननु रूपमप्यात्मेति कथमदर्शनमुच्यत इति चेत् तत्राह । पश्यन् वै तद्द्रष्टव्यं न पश्यति । रूपात्मकमात्मानं पश्यन्नपि द्रष्टव्यत्वेन न पश्यतीति । तथाचेदं तस्य दर्शनाभावस्य स्वरूपं, न तु सर्वथा अविषयतया तद्दर्शनाभावरूपमित्यर्थः । ननु कथमेतदवगम्यते अस्येदमेव स्वरूपं, न सर्वथा तद्दर्शनाभावरूपमित्यतो युक्तिमाह । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वादित्यादि । दृष्टेरिति पञ्चमी । घ्राणाद् रसादित्यादिपञ्चमीप्रायपाठस्यैवाग्रे दर्शनात् । तथाच द्रष्टुरात्मनो दृष्टेश्चक्षुरिन्द्रियाद् विपरिलोपो विरुद्धः परिलोपः सर्वथा अदर्शन-

रश्मिः ।

सिद्धवत्कारसूचकं वैपदं निश्चयवाचकम् । वै निश्चयेनाविनाश्यनुच्छित्तिधर्मेति । विशेषत इति भाष्यं विवरीतुमाहुः यद्येवमिति । विवृण्वन्ति विशेषतस्त्विति । चक्षू रूपमिति भाष्यं विवरीतुं व्याख्येयां श्रुतिमाहुः यद्वै तन्नेति । यद्वै तन्नित्यादीति भाष्ये परसवर्णकथनादाहुः तन्न पश्यतीत्यत्रेति 'अनुस्वारस्य ययि परसवर्णः' इति सूत्रेण । विवृण्वन्ति यतश्चक्षुरिति अत्र यदित्यव्ययं यत इत्यर्थे, वै निश्चयेन । द्रष्टुर्दृष्टेर्वक्ष्यमाणाया कर्तृत्वमभिप्रेत्योक्तं चक्षुरिति । रूपमेवेति आत्मकर्मकदर्शनाभावस्य किंचित्कर्मकदर्शनरूपप्रतियोगिनिरूपणाधीननिरूपणकत्वाद्रूपमेव पश्यतीति लब्धम् । ननु द्रव्यमपि पश्यन्तीति चेन्न । बाह्यास्तावद्रूपातिरिक्तं द्रव्यं नेच्छन्ति तद्वादानुरोधिरूपं भगवत उक्तमिति । नात्मानमिति तन्न पश्यतीत्यस्यार्थः । एतेन भाष्यमपि व्याकृतम् । ननु रूपमिति भाष्यं व्याचक्रुः कार्यस्येति । तत्राहेति एतेन तन्नेति भाष्यं क्रियाध्याहारेण व्याकृतम् । पश्यन् वा इति भाष्यं व्याचक्रुः पश्यन्वेति । व्यत्ययो बहुलमिति सूत्रविभागेन ।

'सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च ।
व्यत्ययमिच्छति शास्त्रकृदेषां तदपि च सिद्ध्यति बाहुलकेन' ॥

इति लिङ्गव्यत्ययः पश्यन्तीत्यर्थः । द्रष्टुर्दृष्टिः । द्रष्टव्यत्वेनेति किं तु रूपत्वेन पश्यति । इदमिति द्रष्टव्यत्वेनादर्शनम् । सर्वथेति रूपत्वेनापि । तद्दर्शनेनेति आत्मदर्शनाभावरूपम् ।

ननु रूपमप्यात्मेतिचेत् । तत्रापश्यन् वै तद् द्रष्टव्यत्वेन न पश्यति । न हि द्रष्टृस्वरूपं दृश्यज्ञानेन ज्ञातं भवत्यतद्रूपत्वात् । एवं द्रष्टृदृश्यव्यवहारे अज्ञानावस्थायां विशेषतस्तज्ज्ञानमशक्यमुक्त्वा ज्ञानोत्तरं कर्मकर्तृभाव एव नास्तीत्याह यत्र

भाष्यप्रकाशः ।

रूपो न विद्यते । कुतः । अविनाशित्वात् । स्वरूपतः स्वरूपधर्मतश्च नित्यत्वात् । तर्हि पश्यत्त्वमेव, नापश्यत्त्वं तत्राह । न त्वित्यादि । यद् द्वितीयं पश्येद् यद् दर्शनकरणमिन्द्रियं तत्तु तत आत्मनोऽन्यद् विभक्तं नास्ति । भेदे विभागे च सति द्रष्टृदृश्यभावः । स तु कार्ययो रूपचक्षुषोरेवातो रूपदर्शनम् । न तु कार्यस्य रूपस्य चक्षुषश्च कारणादात्मनो भेदो विभागो वा । अतस्तदभावाच्चक्षुः सकारणमात्मानं न पश्यतीत्यपश्यत्त्वम् । न हि द्रष्टुः स्वरूपं दृश्यज्ञानेन ज्ञातं भवति । अतद्रूपत्वात् एवमग्रेऽपि बोध्यम् । एवं द्रष्टृदृश्यव्यवहारे अज्ञानावस्थायां विशेषतस्तज्ज्ञानमशक्यमुक्त्वा ज्ञानदशायां विशेषतो वक्तुं शक्यो भविष्यतीत्याकाङ्क्षायां ज्ञानोत्तरं कर्मकर्तृभाव

रश्मिः ।

स्वरूपत इति आत्मत्वादिरूपतः । स्वरूपधर्मो अविनाशित्वं जगज्जन्मादिकर्तृत्वं समन्वयाधिकरणोक्तमभिन्ननिमित्तोपादानत्वमिदमित्थतया शब्दाप्रतिपाद्यत्वं चेक्षत्यधिकरणोक्तं तथा च रूपेऽप्यस्तिभातिप्रियत्वेनान्वयात् रूपत्वेन विरुद्धः परिलोपोऽदर्शनरूपो न विद्यत इति भावः । **पश्यत्त्वमिति** चक्षुष आत्मनः पश्यतीति पश्यस्तत्त्वम् । अपश्यत्त्वं स्वाभिन्नात्मनश्चक्षुषोऽपश्यत्त्वं न रूपतौल्यात् । **भेदे विभागे चेति** । ननु च न तु तद्द्वितीयमस्तीत्यत्राभावप्रतियोगिद्वितीयं चक्षुरादीन्द्रियं तत्र द्वितीयत्वं अन्यदित्युक्तभेदप्रयोज्यमस्तु विभक्तमित्यधिकमिति चेन्न समवायाभ्युपगमाच्च साम्यादनवस्थितेरिति सूत्रे गुणादिष्वपि विचारे इत्यादिना विभागस्यापि स्वरूपानतिरेक उक्तः स न क्षोदक्षमः । पदार्थतत्त्वविवेचनग्रन्थे शिरोमणिना विभागतत्त्वाविवेचनात् । यथा दिक्कालौ नेश्वरादतिरिच्येते इति दिक्कालतत्त्वे विवेचिते तथा । एवमपि भिन्नो घटः पटाद्विभक्तः । इति प्रत्यये विभागो भेदस्वरूप एवमन्यत्रापि स्वरूपानतिरेको द्रष्टव्यः । ततोन्यद्विभक्तमिति श्रुतिरिति । विभागो गुणान्तरमिति नैयायिकाः । न चैवंसति न तु द्वितीयमस्तीत्युक्त्वा ततोन्यदिति विभक्तमिति चोभयोरेकपदमस्तु तावतैव चारितार्थ्यमिति दोषानुद्धार इति वाच्यम् । सजातीयविजातीयस्वगतद्वैतवारणाय द्वितीयान्यविभक्तपदानामावश्यकत्वेनादोषात् । यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदिति वक्ष्यमाणत्वात् । द्वितीये सजातीयमन्यद्विजातीयं घटः पटादन्यो न तु घटो घटात् अन्य इति प्रत्ययात् । विभक्तत्वं स्वमते । यथाविभागमविभागः स्वगतः यत्र कपाले कर्म ततः कपालद्वयविभागः । ततो घटारम्भकसंयोगनाशस्ततस्तेनैवं कपालविभागेन सकर्मणः कपालस्याकाशादिविभागो जन्यते ततः पूर्वसंयोगनाशः तत उत्तरदेशसंयोगः ततः कर्मनाश इति मुक्तावल्याम् । 'अविभक्तं च भूतेषु विभक्तमिव च स्थितम्' इति गीता ब्रह्मणि । एकमेवाद्वितीयं ब्रह्म इति च । **नहीति** भाष्यं विवृण्वन्ति **नहीति** स्पष्टम् । विरुद्धधर्माश्रयत्वादाहुः **अतद्रूपेति** । अरूपवत्सूत्रे जगद्विलक्षणं ब्रह्मेति प्रतिपादनात् । अत एव रूपब्रह्मज्ञाने तत्तुल्यचक्षुरादिसाधनं आत्मज्ञाने तु भक्त्यादीति युज्यते । ननु रूपमेव चक्षुःस्थले कुतो नोक्तं कार्यत्वसाम्यादिति शङ्क्यम् । भाष्ये दृश्यज्ञानेनेत्यत्र दृश्यपदेन रूपं गृहीतम् । तस्याः तद्रूपत्वप्रतिपिपादयिषायाः । युगपदेकत्रैवात्माभेदाभेदौ न प्रतिपत्तुं शक्येते इति अतो रूपं नोक्तम् । चक्षुरुपात्तं प्रकाशे । अतिदिशति **एवमग्रेपीति**

वा अन्यदिव स्यादित्यादिना। इदमेव हि ज्ञानममृतत्वमिति।

भाष्यप्रकाशः।

एव नास्तीत्याह। यत्र वा अन्यदिव स्यात् तत्रान्योऽन्यत् पश्येदित्यादि। यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येदित्यादि। तथाचावस्थाद्वयेऽप्यशक्यवचनत्वाद् विशेषतो न वक्तुं शक्य इत्यर्थः। तदेतन्निगमयति येनेदं सर्वं विजानाति तं केन विजानीयाद्, विज्ञातारमरे केन विजानीयादिति। एवमुपदिश्योक्तमुपसंहरति उक्तानुशासनासि मैत्रेय्येतावदरे खल्वमृतत्वमिति। इदमेव हि ज्ञानं सर्वनिमित्तोपादानभूतमविनाश्येकमेव तत्त्वमित्याकारकज्ञानोत्तरं यन्निर्विषयमात्मरूपं ज्ञानं तदेवाऽमृतत्वमित्यर्थः।

रश्मिः।

यद्वै तन्न जिघ्रतीत्यादौ यद्वै तन्न रसयतीत्यादौ यद्वै तन्न वदतीत्यादौ यद्वै तन्न शृणोतीत्यादौ यद्वै तन्न मनुते इत्यादौ यद्वै तन्न स्पृशतीत्यादौ यद्वै तन्न विजानातीत्यादौ। एवं द्रष्टीति भाष्यं विवृण्वन्ति स एवं द्रष्टिति। यत्र वा अन्यदिव स्यात्तत्रान्योन्यत्पश्येदन्योन्यज्जिघ्रेदन्योन्यद्रसयेत् अन्योन्यदभिवदेत् अन्योन्यं शृणुयादन्योन्यन्मन्वीतान्योन्यत्स्पृशेदन्योन्यद्विजानीयादिति। अग्रिमां श्रुतिमाहुः यत्र त्वस्येति। इत्यादीति तत्केन कं जिघ्रेत् तत्केन कꣳरसयेत्तत्केन कमभिवदेत् तत्केन कꣳ शृणुयात् तत्केन कं मन्वीत तत्केन कं स्पृशेत् तत्केन कं विजानीयात् इति। अग्रिमामाहुः येनेदमिति येनेदꣳसर्वमिति क्वचित्पाठः। श्रुत्यर्थः स्पष्टः। इतीति श्रुतिस्थं पदम्। अग्रिमाया आभासमाहुः एवमुपेति इदमेव हीत्यादिभाष्यं विवृण्वन्ति इदमेवेति। सर्वस्य निमित्तोपादानभूतं अविद्वद्दशायां सखण्डब्रह्मज्ञाने विचारविषये 'आत्मा वा अरे द्रष्टव्यः' इत्यादिभिः ज्ञानं प्रवृत्तं तदत्रोक्तम्। यन्निर्विषयमात्मरूपं ज्ञापितं विद्वद्दशायामखण्डब्रह्मज्ञाने विचारविषये यत्र त्वस्य सर्वमात्मैवाभूदित्यादिभिर्ज्ञानं तदत्रोक्तम्। इदमखण्डसखण्डभेदेन द्वैराश्यं प्राप्तं ज्ञानं मैत्रेयीब्राह्मणे एकस्मिन्नमृतत्वप्रश्ने उक्तमित्येतदेवामृतत्वम्। निष्क्रान्तं विषयेभ्यः इति निर्विषयं ग्राहकस्य मन आदेरात्मरूपत्वात् तद्विषयादपि निष्क्रान्तम्। श्रुत्यन्तरेति शारीरब्राह्मणस्थेन। तस्येति जीवस्य ब्रह्मत्वमेतदात्मत्वम्। ननु सिद्धान्ते जीवस्यैतद्ब्रह्मत्वं दूषणाय कुतः पूर्वपक्षिज्ञानविषयमाचार्यमतस्याधुनिकत्वाच्चेति चेन्न पूर्वपक्षिपूर्वपक्षत्वात् जीवीयब्रह्मत्वस्याचार्यमतस्याधुनिकत्वेपि छान्दोग्ये ऐतदात्म्यमिदं सर्वमिति मतस्यानाधुनिकत्वाच्च। अतिरिक्तत्वादिति 'अधिकं तु भेदनिर्देशात्' इति सूत्रभाष्ये एतदुक्तम्। अत्र चेति ब्राह्मणे। स यथार्द्रैधाग्नेरभ्याहितस्य पृथग्धूमाविनिश्चरन्त्येवं वा अरे अस्य महतो भूतस्य निःश्वसितमेतदृग्वेदो यजुर्वेदः सामवेदोथर्वाङ्गिरस इतिहासः पुराणविद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि दत्तं हुतमाशितं याचितमयं लोकः परलोकः सर्वाणि भूतानि अस्यैवैतानि सर्वाणि प्रतिष्वसितानीत्यत्र। ब्रह्म तं परादाद्योन्यत्रात्मनो ब्रह्म वेद क्षत्रं तं परादाद्योन्यत्रात्मनो इत्याद्युक्त्वा इदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीदꣳ सर्वं परमात्मेत्यत्र चात्राभ्याहितस्येत्यस्य प्रज्वलितस्येत्यर्थः। अभित आसमन्ताद्धितस्य अन्यत्रेत्यत्र सार्वविभक्तिकस्त्रल्। अन्यत्। जगत्कर्तृत्वेति यथाक्रममुक्तश्रुत्यर्थौ आदिपदेनेदं ब्रह्मेत्यत्र ब्रह्मसमन्वयेन ब्राह्मणजातित्वरूपं ब्रह्मत्वं ब्रह्मलिङ्गम्। अभ्यर्हितेति अभ्यर्हितत्वं सेश्वरसांख्ये इवानीश्वरसांख्ये ईश्वरवज्जीवप्रतिपादकब्राह्मणप्रतिपाद्यत्वम्। तस्मिन्निति जीवे शारीरब्राह्मणोक्तं ब्रह्मत्वं जगत्कर्तृत्वं च। असङ्गपुरुषादुत्कृष्य जीव उत्कर्षः उत्कर्षणं तस्मै। सिद्धान्ते तु जीवे एतदात्मत्वम् ब्रह्मत्वं जगज्जन्मादिकर्तृत्वं ब्रह्मत्वमंशमात्रं तत्त्वमसीत्यत्र तस्य त्वं तत्

तत्रादिमध्यावसानेषु जीवप्रकरणमित्येव प्रतिभाति। तस्य ब्रह्मता जगत्कर्तृत्वमित्युत्कर्षः। न तु तस्मादन्यद् ब्रह्मत्वेन वक्तुं युक्तम्। अर्थविरोधाच्च। तस्माद् वेदे सृष्टिवाक्यानामेतन्न्यायेनान्यार्थत्वान्न ब्रह्म जगत्कारणमिति प्रकृति-

भाष्यप्रकाशः।

एवं विषयवाक्यं व्याख्याय पूर्वपक्षी स्वाभिप्रायमाह तत्रादीत्यादि। नन्वयमात्मा ब्रह्मेति श्रुत्यन्तरे एतस्य ब्रह्मत्वं विहितं, न तु ब्रह्मण एतदात्मत्वमतोऽस्मादात्मनो ब्रह्मणोऽतिरिक्तत्वादत्र च जगत्कर्तृत्वजगदात्मकत्वादिरूपब्रह्मलिङ्गादस्य ब्रह्मप्रकरणत्वमेवास्त्विति चेत् तत्राह तस्य ब्रह्मतेत्यादि। तथाचाभ्यर्हितत्वात् तस्मिन्नेतद्द्वयमुत्कर्षायोच्यते। ननु किमत्र मानमिति चेदन्यथाऽनुपपत्तिमेव जानीहि। एतावदरे खल्वमृतत्वमित्यनेनाऽमृतत्वस्यात्रैव नियमितत्वान्न तु तस्मादन्यद् ब्रह्मत्वेन वक्तुं युक्तमर्थविरोधाच्च। ब्रह्म ह्यविकारं कथं कार्यरूपेण विकुर्यादित्यर्थविरोधादित्यर्थः। सिद्धमाह तस्मादित्यादि। [अर्थविरोधेन ब्रह्मणः कारणताया बाधितत्वादात्मातिरिक्तब्रह्माभावाच्च वेदे सृष्टिवाक्यानामेतन्न्यायेन अत्रार्द्रैधाग्नेरिति दृष्टान्ताद्यथा तत्संसृष्टस्याग्नेर्नानाविधधूमजनकत्वं तथा प्रकृतिसंसृष्टस्यैव जीवस्य रूपनामात्मकप्रपञ्चजनकत्वमिति सिध्यतीत्येतन्न्यायेन] जीवस्तुत्यर्थत्वान्नातिरिक्तं ब्रह्म जगत्कारणमिति जीवाधिष्ठिता प्रकृतिरेव कारणम्। तेन प्रकृतिकारणवाद एव युक्त इति प्राप्ते इत्यर्थः। सूत्रं

रश्मिः।

त्वमसीति प्रकारद्वयदर्शनात्। न त्वित्यादि भाष्यमवतारयन्ति स्म ननु किमिति। अन्यथेति तथा हि अत्रोपसंहारस्यार्थस्यामृतत्वरूपस्य निर्णायकत्वेन तत्र च ब्रह्मता जगत्कर्तृत्वं चेत्येतद्द्वयविशिष्टजीवं एतावत्पदेन परामृश्यामृतत्वोक्तिः प्रमितार्थः। जीवस्यामृतत्वं तद्ब्रह्मतारूपार्थान्तरं विनानुपपद्यमानस्तस्योपपत्तयेर्थान्तरकल्पना जीवस्य ब्रह्मत्वकल्पनार्थापत्तिस्तन्मानमिति प्रस्थानरत्नाकरेर्थापत्तिस्तु प्रत्यक्षेण शब्देन वा प्रमितस्यार्थस्यार्थान्तरं विनानुपपद्यमानस्य उपपत्तये यथार्थान्तरकल्पना एवमर्थापत्तेर्मानतोक्ता। तथापि लाघवाज्जीवस्य ब्रह्मत्वजगज्जन्मादिकर्तृत्वयोः कल्पनाप्रकारान्यप्रकारेणोपक्रमोक्तस्य ब्राह्मणेऽमृतत्वानुपपत्तिरित्यन्यथानुपपत्तिर्मानं जानीहीत्युक्तम्। सांख्यमते प्रमाणानां त्रैविध्यात् 'त्रिविधं प्रमाणं तत्सिद्धौ सर्वसिद्धेर्नाधिक्यसिद्धिः' इति सूत्रात्। तदपि मानत्वमनुमानत्वेनान्यथानुपपत्तेर्नान्यथानुपपत्तित्वेन यथा नैयायिकानाम्। तदनुमानं तु जीवन्देवदत्तो गृहे नास्तीत्यत्र देवदत्तो बहिरस्ति जीवत्वे सति गृहेऽसत्त्वात् इति केवलव्यतिरेकि सांख्यमतत्वादुपात्तम्। यादृशार्थान्तरं विनानुपपद्यमानत्वं तादृशार्थान्तरं ब्रह्म जगत्कर्तृत्वविशिष्टजीवरूपं भाष्ये वक्ष्यते इत्याशयेन विवरीतुमाहुः एतावदिति। अत्रैवेति। त्रिविधप्रमाणेषु शब्दप्रमाणेन जीव एव। विवृण्वन्ति न तु तस्मादिति। अर्थेतिभाष्यं निक्षिप्य व्याचक्रुः अर्थेति। विकुर्यादिति परिणामवादिनः सांख्याः। आहेति पूर्वपक्ष्याह। ब्रह्मण इत्यविकृतस्येत्यर्थः। आत्मेति आत्मा जीवः तदतिरिक्तस्य ब्रह्मणोऽभावात्। ननु वेदे 'प्रजापतिरकामयत प्रजाः सृजेय' इति तृतीयाष्टके सृष्टिरुक्ता तस्याः का गतिरित्यत आहुः वेदे सृष्टीति। एतन्न्यायो मैत्रेयीब्राह्मणन्यायस्तेन। अतिरिक्तमिति जीवातिरिक्तं तदुक्तं 'जन्मादिरवस्थातः पुरुषबहुत्वम्' इति 'उपाधिभेदेप्येकस्य नानायोग आकाशस्येव घटादिभिः' इति च सूत्राभ्याम्। कापिलसांख्यप्रवचनसूत्रवृत्तौ।

वाद एव युक्त इत्येवं प्राप्ते उच्यते वाक्यान्वयात् । इदं वाक्यं भगवत्येवान्वेति,

भाष्यप्रकाशः ।

पठित्वा सिद्धान्तं व्याकुर्वते इदमित्यादि । अत्रापि कारणत्वेनेत्यनुवर्तते [इति प्रागेवोक्तम्] । कारणत्वेन ब्रह्मैवात्रावगन्तव्यं, न जीवः । कुतः? वाक्यान्वयात् । वाक्यस्यान्वयो वाक्यान्वयस्तस्मात् । सर्वस्मिन् वेदरूपे महावाक्ये ब्रह्मण एव कारणत्वेनानुगमदर्शनादिदमपि

रश्मिः ।

तेनेति जीवेपि बाधात् प्रकृतिमात्रपर्यवसानेन । अनुवर्तत इति मण्डूकप्लुत्यानुवर्तते । 'कारणत्वेन चाकाशादिषु यथा व्यपदिष्टोक्तेः' इति सूत्रात् । वाक्य इति सप्तमीसमासः वाक्ये अन्वय इति । पाठः प्रमादात् । यद्वा श्रुतिः स्ववाक्यं कर्म भगवत्येवान्वेति अन्तर्भावितण्यर्थः । कर्मणि घञ् अन्विधातोः संहिताया नित्यत्वात् 'नित्या धातूपसर्गयोः' इति वाक्यात् । वाक्ये अन्वयः इति पाठे । ननु वाक्यं भगवत्येवान्वेतीति भाष्याय प्रतीतार्थमादाय कर्तर्युपपदे समासोस्त्विति चेत्सत्यं कर्तरि कृदित्यस्य तत्रोपपदं सप्तमीस्थमित्यत्राविचारितत्वात्, प्रत्ययस्याचो विधानेपि एरजित्यनेन चयो जयोऽय इति साधनान्न कर्तर्युपपदेऽज्विधानमिति । एतदाशयेनाहुः सर्वस्मिन्निति । वेदरूप इति वेदान्तरूपेपि । वेदपदस्य वेदान्तेपि शक्तेः । वेदेनुगमो वेदार्थो रामकृष्णयोरिति कृष्णोपनिषदः 'गूढं ब्रह्मणि वाङ्मये' इति श्रीभागवततृतीयस्कन्धे अनुगमपदेन वेदान्तेनुगमाधिकरणे शब्दसंदेह-वारकप्रथमपादे संदिग्धतत्पराणां वाक्येषु ब्रह्मण एव कारणत्वेनानुगमप्रतिपादनात् स स्मार्यते । एवं सूत्रं व्याख्याय कुम्भकारः कारः करः कृतिः कर्तेत्येवमादिषु धातोरेकस्मादप्युपपदेऽनुपपदे प्रत्ययनियमाभावात् कर्तर्युपपदेऽच् प्रत्यय इति संभवेन भाष्यं विवृण्वन्ति इदमपीति । तथा च महावाक्यस्यान्वयो वाक्यान्वयः इति भाष्ये विग्रहः सप्तमीसमासे योगविभागस्येष्टसिद्ध्यर्थत्वात् षष्ठीतत्पुरुषः कर्तृकर्मणोः कृतीति कर्तुर्वाक्यात्षष्ठी सुप्तिङ्चयो वाक्यं भगवति भगवद्विषयं वैषयिकाधारे सप्तमी । अन्वयं सुप्तिङ्संबन्धं प्रतिपाद्यप्रतिपादकभावं करोतीत्यर्थः । अत्र वाक्ये कर्तर्युपपदे एरजित्यच् । ननु यथा कर्मण्यणित्यादौ कर्मणीत्यादिः सौत्री प्रथमार्थे सप्तमी धातोरण् भवति कर्म चोपपदसंज्ञमिति तदर्थं इतीति चेन्न भाष्ये कर्तर्युपपदे ध्वनितेऽचि धातोरज् भवति कर्ता चोपपदसंज्ञः इति कर्तरि कृदित्यनुसंधायैरजिति सूत्रार्थ इत्यस्यापि वक्तुं शक्यत्वात् । ननु 'तत्रोपपदं सप्तमीस्थम्' इति सूत्रमत्र तत्रेतिपदेन सामान्यतः सप्तम्यन्ते पदे कर्तरीत्यादौ वाच्यत्वेन स्थितं वाक्यादि तद्वाचकं पदमुपपदसंज्ञं स्यादिति वृत्तौ संभावितायामपि वृत्तिकारः सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं कुम्भादि तद्वाचकं पदमुपपदसंज्ञं स्यादित्याहेति कर्त्रुपपदेऽज् दुर्लभ इति चेन्न 'श्यालः स्वस्रोरथाग्रहीत्' इत्यत्र पुमान् स्त्रियेति सूत्रविचारदर्शनात् अत्राप्यसति दोषे तत्रोपपदं सप्तमीस्थमित्यस्य विचारे बाधकाभावात् । तथा च सिद्धान्तकौमुद्या अयमर्थः । तत्रोपपदमिति सूत्रेण मुख्यस्य कर्तुस्तत्रेतिपदेन गौणमुख्यन्यायसनाथेन ग्रहणात् कर्मण्यणित्यादेरग्रहणापत्त्या कुम्भकार इत्यत्र कर्मणि घञ् प्रसक्तिरतः कर्तुर्मुख्यस्योपपदेन्वयः । संस्कारः सकर्मणीत्यादौ सप्तम्यन्त उपपदेपि यथा प्रयाजशेषेणाभिघारयति अत्र प्रधानक्रमानु-रोधेनादावाग्नेयहविषोरभिघारणं पश्चादैन्द्रस्येति मुख्यक्रमेण ज्ञाप्यते तथेत्याह वृत्तिकृत् गौणमुख्य-न्यायं बाधितुं सप्तम्यन्ते पदे कर्मणि इत्यादावित्यादि । तस्मिंश्च सत्येव वक्ष्यमाणः प्रत्ययः स्यादिति

१. कुम्भादि । २. वाक्यादिः ।

नात्र जीवप्राधान्यगन्धोऽपि । सर्वत्र भगवदन्वयेनैव जीवस्यापि प्रियत्वम् ।

भाष्यप्रकाशः ।

वाक्यं भगवत्येवान्वेति । नात्र जीवप्राधान्यगन्धोऽपि, येन प्रकृतिवाद आशङ्क्येत । न [नु] चोपक्रमे । 'न वा अरे' इत्यादिना निरुपधिप्रियत्वेन जीवात्मन एव प्रकृतत्वात् कथं न तस्य प्राधान्यमिति [अत आहुः सर्वत्रेत्यादि । अत्रायमर्थः । अत्र मैत्रेय्यै मोक्षोपायमुपदेष्टुं निरुपधिप्रियमात्मानं प्रकृत्य मोक्षोपायभूतं तद्दर्शनं दर्शनोपायभूतं श्रवणादित्रयं चोपदिशति । तत्र प्रियत्वस्यापाततो विचारे देह एव तादृशः प्रतिभातीति तन्निवारयितुमात्मदर्शनादिना सर्वज्ञानं सर्वत्रात्मभेदद्रष्टुरपराधं च वदन् सर्वस्याप्यात्मत्वं बोधयति तादृशसर्वात्मकत्वं च देहस्य न संभवति, इति तद्भिन्नः कश्चिदात्मात्र द्रष्टव्यत्वादिनोपदिश्यते इति तस्याः ज्ञाने श्रवणेन जाते ततः स क इत्याकाङ्क्षायां दुन्दुभ्यादिदृष्टान्तत्रयं मननार्थं वक्ति तत्र देहचेष्टादिभिः परंपरया ज्ञापयितुमाद्यो दृष्टान्तः । ततो बाह्याद्भेदं ज्ञापयितुं द्वितीयः । ततोऽभ्यन्तराद्भेदं ज्ञापयितुं तृतीयस्तेषु त्रिष्वपि दुन्दुभिदुन्दुभ्याघातः वीणावीणावादः शङ्खशङ्खध्मरूपेण द्वौ द्वौ वदन् द्वौ जीवपरमात्मानौ देहाद्भिन्नाविति साधयति ततो यदि द्वावपीदृशौ तदा द्रष्टव्ये आत्मन्येकवचनं किमित्युक्तं ? यद्येक एव तादृशस्तदा जीवे तादृशस्याननुभवात् पूर्वदृष्टान्तत्रये द्वौ द्वौ किमित्युक्ताविल्याकाङ्क्षायां जीवस्य तदंशत्वेन तदधीनत्वं वक्तुं 'स यथार्द्रैधाग्नेः' 'स यथा सर्वासामपाम्' इति कण्डिकाद्वयेन सर्वोत्पादकं प्रलये सर्वाधारं च साधयति तेन नियामकादात्मनो नियम्यस्यात्मनो भेदः आत्मत्वेनैकरूप्याच्चाभेद इति सिध्यति । एवं सिद्धे भेदे सर्वोत्पत्तिलयाधारो य आत्मा स एव मोक्षार्थं निदिध्यासितव्य इति बोधयति तथा च] शङ्क्यम् ।

रश्मिः ।

कौमुदी । वक्ष्यमाणः कर्मणि घञ् । उपात्तकर्मानुरोधेनोक्तम् । तेन अन्येप्यजादयः प्रत्यया भवन्त्येव यथा वाक्यान्वय इत्यत्रैरच् । ननु तर्हि चयो जयो अय इति प्रयोगा न स्युः उपपदाभावादिति चेन्न भगवदिच्छया प्रवृत्तानामदुष्टत्वात् ।

'लोके शब्दार्थसंबन्धो रूपं तेषां च यादृशम् ।
न विवादस्तत्र कार्यो लोकोच्छित्तिस्तथा भवेत्' ॥

इति पत्रावलम्बनात् । लौकिकत्वाच्च छन्दोवत्सूत्राणि भवन्तीति वाक्यान्वयादित्यलौकिकः प्रयोग इति । तेन वाक्यान्वयपदं द्वेधा व्याकृतम् । वाक्येऽन्वयो वाक्यान्वयः । वाक्यस्यान्वयो वाक्यान्वय इति । ननु वाक्यस्यान्वय इति भाष्योक्तमस्तु योगविभागस्येष्टसिद्ध्यर्थत्वाद्भाष्यप्रकाशोक्तमपि मा स्त्विति चेन्न । इष्टसिद्धिसत्त्वात् । अनुव्याख्यानस्यापि निःश्वसितत्वात् । एवं वाक्यं महावाक्यमित्यङ्गीकृत्योक्तम् । वाक्यमित्यत्र महत्त्वाभिनिवेशे तु एकत्वमविवक्षितमित्याशयेन वृत्तौ वाक्यानामन्वय इत्युक्तम् । अन्यथा भाष्ये महावाक्यमिति वदेयुः । अत एव भाष्यभाष्येप्ये कवचनान्तेन समासः । वाक्यस्यान्वय इति । वाक्यं हीदमिति शंकरभाष्येप्येकवचनम् । नात्रेति भाष्यं विवृण्वन्ति नात्रेति । गन्धशब्दस्तु लेशे संबन्धिनि वा जीवप्राधान्यसंबन्धिवाक्यमपीत्यर्थः । 'गन्धो गन्धक आमोदे लेशे संबन्धिगर्वयोः' इति विश्वात् । येनेति जीवप्राधान्येन । जीवस्य ब्रह्मानतिरेकादसंगित्वेन प्रकृतिकारणवादः । न चोपक्रम इति इत आरभ्य क्वचित्पुस्तके **लघुबृहद्व्याख्यानं तयोः सूचीकटाहन्यायेन लघुव्याख्यानं व्याक्रियते । सर्वत्रेति**

तस्यैव सुखरूपत्वात् । सर्वोपनिषदनुरोधेनैवास्याप्यर्थस्य वक्तुमुचितत्वात् ।

भाष्यप्रकाशः ।

आत्मनः प्रकृतत्वेऽपि प्रियत्वेनैव प्रकृततया स्वेन रूपेणाप्रकृतत्वात् प्रकृततावच्छेदकविचारे सर्वत्र भगवदन्वयेन जीवेऽपि तस्य सत्त्वात् तदन्वयेनैव जीवस्यापि प्रियत्वम् । प्रियत्वस्य सुखधर्मत्वाद्, यो वै भूमा तत् सुखं नाल्पे सुखमस्तीति श्रुत्या ब्रह्मण एव सुखरूपत्वादत्र प्रतीयमानस्यापि [प्रियत्वादिरूप]प्राधान्यस्य ब्रह्मण्येव पर्यवसानेनोपक्र[मस्य जीवबोधकताया निश्चेतुमशक्यत्वादुपक्र]माद्यपेक्षया उपपत्तेर्बलिष्ठत्वात् । [अतः परमात्मैव मोक्षार्थे ज्ञेय इत्यर्थः । ननु आर्द्रैधाग्नेर्दृष्टान्तेन प्रकृतिसंसृष्टस्यैवात्मनः प्रकृतत्वात्तत्र च सत्त्वगुणसंसर्गेण प्रियत्वस्यापि शक्यवचनत्वान्नेयमुपपत्तिरिति चेत्तत्राहुः सर्वेत्यादि 'आत्मैवेदमग्र आसीत्' 'स ऐक्षत लोकान्नु सृजै' 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' 'सदेव सोम्येदमग्र आसीत्' 'तत्तेजोऽसृजत' 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' इत्यादिषु सर्वेषु सावधारणेषु वाक्येषु केवलस्यैवात्मनः प्रकृतत्वात् । बहूनामनुग्रहस्य च न्याय्यत्वात् सर्वोपनिषदनुरोधेनैवैतद्वाक्यार्थो वक्तुमुचितः । न च दृष्टान्तबाधः । ऐक्षत इत्यादिनेच्छाया उक्तत्वात् तत्संसर्गेणैव दृष्टान्तोपपत्तेः । किंच तन्मते प्रकृतेर्नित्यत्वेनानश्वरत्वादार्द्रैधसां च नश्वरत्वेन तेषां प्रकृतिस्थानीयत्वेन वक्तुमशक्यत्वाच्च । दृष्टान्ते विवक्षितार्थमात्रग्रहणे तु इच्छामात्रसंसर्गस्यैव वक्तुमुचितत्वम् । न त्विच्छाया द्वितीयत्वं धर्मत्वेनात्मान्तःपातित्वात् भिन्नाभिन्नत्वम् । किंच याज्ञवल्क्यो मोक्षार्थमुपदिशति । मोक्षस्तु ब्रह्मात्मज्ञानादेव संगतो भवतीत्याहुः

रश्मिः ।

भाष्यमवतारयन्ति न चोपक्रम इति । प्रियत्वेनेति ।

'अहमात्मात्मनां धातः प्रेष्ठः सन् प्रेयसामपि ।
अतो मयि रतिं कुर्याद्देहादिर्यत्कृते प्रियः' ॥

इति श्रीभागवते प्रेयांस आत्मानो मैत्रेयीब्राह्मणद्वये जीवाः तेषां मध्ये हे धातः अहं प्रेष्ठः । देहादिर्यत्कृते प्रिय इत्यत्र निरुपधिप्रीतिविषयत्वस्य स्वस्मिन्नुक्तेरानन्दधर्मत्वाच्च प्रियत्वं ब्रह्मधर्मस्तेन । एवकारेणात्मत्वे व्यवच्छेदो येन जीवोपि संभाव्येत । एतदेवाहुः स्वेनेति । आत्मत्वेन जीवत्वेन वा । प्रकृततावच्छेदकं प्रियत्वं अन्यब्राह्मणेषु प्रकृतान्येषु सर्वेष्वत्र ब्राह्मणे तां प्रियत्वमवच्छिनत्ति इति तस्य विचारे इत्यर्थः । भाष्यं विवृण्वन्ति सर्वत्रेति जगति समन्वयाधिकरणोक्तेनास्तिभातिप्रियत्वेन भगवदन्वयेनेत्यर्थः । तस्येति ब्रह्मधर्मस्य प्रियत्वस्येत्यर्थः । तस्यैवेति हेतुभाष्यं विवृण्वन्ति प्रियत्वस्येति । सुखेति सुखरूपस्येति भाष्ये व्युत्पत्त्या तु सुखधर्मेति । यद्वा सुखधर्मत्वात् सुखरूपत्वं धर्मधर्मिणोरैक्यादित्यर्थः । शोभनानि खानि येन प्रियत्वेनेति सुखं प्रियत्वं भवति । ननु भूमाधिकरणे ब्रह्मणः सुखत्वमुक्तमत आहुः यो वै भूमेति । एवकारोप्यर्थे ब्रह्मणोपीत्यर्थः । ब्रह्मण्येवेति प्रियत्वावच्छिन्ने इत्यर्थः । उपक्रमेति ।

'अलौकिको हि वेदार्थः न युक्त्या प्रतिपद्यते ।
तपसा वेदयुक्त्या च प्रसादात् परमात्मनः' ॥

इति श्रुतेरुपक्रमादिन्यायरूपयुक्तिर्दुर्बला । का सा बलिष्ठोपपत्तिरित्याकाङ्क्षायां सर्वोपनिषदि

'तमेव विदित्वा अतिमृत्युमेति' 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते'

भाष्यप्रकाशः ।

तमेव विदित्वेत्यादि । तथा च सावधारणश्रुत्या न प्रकृतिसंसृष्टज्ञानान्मोक्ष इत्यर्थः । किंचाग्रे सर्वासामपां समुद्र एकायनमेवमित्यादिना अप्स्पर्शानां त्रयोदशानां समुद्रादयस्त्रयोदश यथा आधारभूतास्तथा आत्मा आधारभूत इत्युक्तं तत्र आपः समुद्रसजातीयाः स्पर्शादय पञ्च त्वगादीनां ग्राह्याः । संकल्पादयः सप्त मनआदीनां कार्याणि । अध्वशब्दश्च गवौ यौगिकः । अत्ति बल-मित्यध्वेति व्युत्पत्तेः । अयनशब्दश्चाधिकरणव्युत्पन्नः यन्त्यस्मिन्निति व्युत्पत्तेः । तथा च यथा सजातीयानि सजातीये ग्राह्याणि ग्राहके कार्याणि कारणे लीयन्ते इति तेषां तल्लयस्थानमेव-मात्मापि सजातीयानां ग्राह्याणां कार्याणां च लयस्थानमिति सिद्ध्यति । तच्च तदेकमव्यक्तम-नन्तरूपमिति श्रुत्युक्तप्रकारके भगवत्युपपद्यते सांख्यमते भूतानां मात्रासु तासामिन्द्रियाणां चाहं-कारे तस्य महति महतश्च प्रकृतौ लयः । आत्मनि तु न कस्यापि लयः इत्यतः प्रकृतिस्तत्संसृष्टो वा न वक्तुं शक्यते । अतो लयस्थानविचारेपि आत्मा ब्रह्मैव आयाति न तु प्रकृतिसंसृष्ट इत्याशये-नाहुः आनन्दाद्ध्येवेत्यादि । अत्रापि सावधारणश्रुत्योत्पत्तिस्थितिलयहेतुत्वस्थानं च ब्रह्मैवे-त्युक्तं तेनापि तथा । अतो यत्पूर्वपक्षिणोक्तं ब्रह्मता जगत्कर्तृत्वं च तस्योत्कर्षार्थं तदसंगतमित्यर्थः । ननु सांख्यप्रवचने 'ईदृशेश्वरसिद्धिः सिद्धा', इतिसूत्रायादृशः पूर्वमुक्तस्तादृशः प्रकृतिसंसृष्ट एवास्त्विति चेत्राहुः सर्व एवात्मान इति । अस्यां सावधारणश्रुतौ हि बहूनामात्मनां ब्रह्मणः सकाशाद्व्युच्चरणमुक्तं तथा सति 'एष उ एव इत्यादिश्रुते स यं व्युच्चरितमात्मानं यथा करोति स तथा भवतीत्युपपद्यते । सांख्यमते तु नित्या बहवः आत्मानस्तेषु यः प्रकृतिसंसृष्टस्तस्य कार्येश्वरत्वं तच्चासंगतम् । बहुषु समानेष्वेकस्यैव प्रकृतिसंसृष्टस्येश्वरत्वं नान्येषामित्यत्र नियामकाभावात् । न च कर्मानादित्वात्तदुपपत्तिस्तेषां मते प्रकृतिपुरुषातिरिक्तस्यानादित्वाभावात् । नापि प्रकृतिस्वभावात्तदुपपत्तिस्तस्याः आत्मनां च स्वस्वभावस्यैकरूप्यादेकस्यैव संगो नान्येषा-मित्यत्र तन्मते नियामकस्य वक्तुमशक्यत्वादतस्तन्मतमप्यसंगतम् । किंच तन्मते चिद्रूपस्य जीव-स्याहंताममतानाशे स्वरूपेणावस्थानं मोक्षस्तदसंगतमित्याहुः 'एष ह्येवानन्दयाति' तथा च श्रुतौ निरुपधिसुखस्यैव मोक्षरूपत्वात् ब्रह्मणः अतस्तन्मते मोक्षवाक्यमप्यसंगतं स्यात् । तदेतत्सर्वं हृदिकृत्याहुः संदिग्धादित्यादि ।] किंचेदमवान्तरवाक्यं महावाक्याद् दुर्बलम् । तच्छेषत्वात् । महावाक्यं तूपनिषत् । ततोऽपि महावाक्यं वेदः । स तु सर्वोऽपि भगवत्पर एव । सर्वे वेदा इति श्रुतेः । वेदैश्च सर्वैरित्यादिस्मृतेश्च । उपनिषद्विचारेऽपि, तं त्वौपनिषदमिति, आत्मैवेदमग्र आसीदित्यादिवाक्यदर्शनात् तस्या अपि तत्परत्वमेव ।

रश्मिः ।

त्यादिभाष्यमित्याशयेनाहुः किंचेदमित्यादि । किंचेति साकल्ये उपपत्तेः साकल्याद्वक्तुमुचितत्वादि-त्यर्थः । बलिष्ठोपपत्तिरारभ्यत इति वा । 'किंचारम्भे च साकल्ये' इति विश्वः । इदं ब्राह्मणद्वयम् । तं त्वौपनिषदमिति साकल्यब्राह्मणे आत्मैवेदमिति पुरुषविधब्राह्मणे । अन्यत्रापीति मैत्रेयी-

[ ] एतच्चिह्नान्तर्गतः प्रकाशः पश्चात् तत्कर्तृभिः प्रणीय योजितः इति ज्ञायते । मूलश्रीहस्ताक्षरलिखितपुस्तकेऽयं भागो नास्ति कर्तृभिर्नवीनो निर्मितः । पुस्तकान्तरे तैरेव स्वकरेणाधिकतया पत्रप्रान्तभागे निवेदितोस्ति सोप्यत्र मुद्रितोस्ति ।

भाष्यप्रकाशः ।

[अत उदाहृतजातीयैः श्रुतिसहस्रैस्तथाप्रतिपादनादत्रापि प्रियत्वबोधनेन नित्यनिरवधिसुखात्मकं तत्स्वरूपम् । आर्द्रैधाग्निरित्यादिकण्डिकाद्वयेन तत्कार्यं सर्वाणि भूतान्यस्यैव निःश्वसितानीति-कथनादंशाश्च प्रतिपादिता इतीदमपि वाक्यं ब्रह्मपरमेवोचितमित्यर्थः । एतावानर्थस्तद्बोधक-वाक्यसमूहश्च मैत्रेयीब्राह्मणद्वयेपि समानः । अग्रे तु तयोर्भेदः । तत्र यौ द्वावात्मानौ पूर्वं कार्यद्वारा परिचायितौ तयोः किं सर्वथा भेदः किं वा कार्यकारणयोरिव भेदाभेदावुत अंशांशिनोरिव तावुत सर्वथा अभेदः तयोः स्वरूपं च किमित्याकाङ्क्षायां मैत्रेय्या अधिकार-परीक्षार्थं प्रथमे ब्राह्मणे 'स यथा सैन्धवखिल्यः' इत्यादिना दृष्टान्तेनांशत्वं 'एवं वा अरे इदं महद्भूतम्' इत्यादिना दार्ष्टान्तिकस्य जीवस्य स्वरूपं च वदति । स यथा सैन्धवखिल्यः स जीवः सिन्धुरुदकं तत्र भवं सैन्धवं लवणं तस्य खिल्यः शकलः उदके जले प्रास्तः प्रक्षिप्तः सन् उदकमेवानुक्षेपाधारभूतमुदकमेव लक्ष्यीकृत्य विलीयेतोदकभावमापद्येत नाहास्य न कश्चिदस्य सैन्धवखिल्यस्योद्ग्रहणाय उद्धृत्य पूर्ववत् ग्रहणायेव स्यात् इवशब्दोनर्थकः शक्तः स्यात् । यतो हेतोर्यतः यस्मादुदकदेशादाददीत आस्वादनाय तद्गृह्णीयात् लवणमेव लवणरसमेवास्वादयेत् । अतो लवणभावेनांशत्वेपि उदकरूपेणैव तस्य सत्ता । न तु खिल्यभावेनेति लयदृष्टान्तं व्याख्याय 'एवं वा अरे इदं महद्भूतमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञास्ति' इति लयं निरूप्य यथायं लवणदृष्टान्त एवमेवारे मैत्रेयि इदं जीवात्मतत्त्वं महदादिलक्षणकत्वाद्ब्रह्मैव महदनवच्छिन्नं भूतं सिद्धं अनन्तमविनाशिअपार-मनादिविज्ञानघने ज्ञप्तिमात्रस्वरूपे एव । प्रथमान्तपक्षे ज्ञप्तिस्वरूप एव इत्यर्थो वाच्यः । तादृशः सन्नेव एतेभ्यः स्थूलसूक्ष्मशरीराकारेण परिणतेभ्यो भूतेभ्यः समुत्थाय भूसूर्यरश्म्यादिभ्यो रसः सैन्धवभावमिव पराभिध्यानादहमाविशेषफलभोक्तृभावं प्राप्य तेन स्वस्वरूपं ज्ञापयित्वा तानि विनश्यन्ति सन्ति अनु पश्चात् विनश्यति भोक्तृभावं त्यजति न प्रेत्य संज्ञास्ति विमुच्यानन्तरं संज्ञा देवमनुष्यादिसंज्ञा नास्ति किंतु ज्ञप्तिमात्रस्वरूप एव भवति । इत्येवं लये संज्ञाभावं व्याख्याय तन्निरूपणार्थं मिष्टोदके तत्प्रक्षेपे अविभागदशायामपि भेदज्ञानान्न संज्ञाया अभावे इति मैत्रेय्या मोहो जातः प्रेत्य सम्यग्ज्ञानाभावः कथं किमात्मनः स्वरूपनाशादुत दर्शनाभावात् तत्र यदि स्वरूपनाशात्तदा विज्ञानघने आत्मनि अनन्तमपारमिति विशेषणाभ्यां अनादिनिधनत्वं यदुक्तं तत्कथं संगच्छते अहं च कथममृता भविष्यामि यदि दर्शनाभावात् तदा स्वरूपसद्भावे कथं दर्शनाभाव इति मैत्रेय्या मोहे जाते याज्ञवल्क्यः आत्मन स्वरूपसद्भावमभिप्रेत्य सर्वात्मना दर्श-नाभावस्य प्रकारमाह यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्युपक्रम्य जिघ्रति अभिवदति शृणोति मनुते विजानातीत्यन्तमाह यत्र यस्यां विभागदशायां हि निश्चये तद् द्वैतमिव भवति वास्तवद्वैताभावेपि द्वैताविरुद्धमद्वैतं भवति तत्र इतरइतरं पश्यत्येवं सर्वेन्द्रियव्यापारजनकभेदक-धर्मस्य स्थूलसूक्ष्मदेहरूपस्य सत्तायां द्वैतदर्शनकथनपूर्वकं यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् जिघ्रेत् अभिवदेत् शृणुयात् मन्वीत विजानीयात् येनेदं सर्वं विजानाति तं केन विजा-नीयात् विज्ञातारमरे केन विजानीयादित्यन्तेन । यत्राविभागदशायामेतदीयभेदकधर्मस्य स्थूलसूक्ष्मदेहरूपस्य लये कटककुण्डलाकारलये तयोः सुवर्णभावे कटककुण्डलादिकार्यभूतहस्तकर्ण-

१. परलोकगमनानन्तरम् ।

भाष्यप्रकाशः।

शोभाजननाद्यकरणवत् देहयोः विज्ञातृभावाद्ब्रह्मरूपतायां तयोरपि ज्ञानजननरूपस्वकार्यकरणाभावात् सम्यक्ज्ञानाभावः। समुद्रे लवणस्येव ब्रह्मणि लीनस्य जीवस्य स्वस्मिन् भगवतो भिन्नत्वेन प्रतीतिराहित्यं अन्यस्य ब्रह्मविदोपि तस्मिन् जीवे तथाप्रतीतिराहित्यं न्यरूपयदिति सिद्ध्यति। अत्र च भूतरूपदेहद्वयनाशो न विशेषदर्शनात् शुक्तिकारजतनाशवत् अभिप्रेतः किं तु कार्यस्य कारणे लये कार्यरूपादर्शनवदभिप्रेतः। 'यत्र त्वस्य सर्वमात्मैवाभूत्' इतिवाक्यसामञ्जस्यात्। एवं जीवस्यापि लये स्वकार्याक्षमत्वं तेन दर्शनादिकर्तृत्वाभावोपि बोध्यः। तेनेदं सिद्ध्यति यत्पूर्वं मोक्षार्थं ससाधनमात्मज्ञानमुपदिष्टं तत् जीवदशायामेव श्रवणादिभिः साधनीयम्। लयेऽविभागे सति तस्य कर्तुमशक्यत्वादिति। जीवस्वरूपं किमित्याकाङ्क्षा तु 'इदं वा अरे महद्भूतमनन्तमपारं विज्ञानघन एवेत्यनेन पूरिता। तेन मोक्षार्थिनो जीवस्य स्वरूपज्ञानार्थमत्र ब्रह्मोपदेशः। तथा च करणग्रामाभावात् तस्य ज्ञानाभावः। तेनांशरूपस्य विज्ञानात्मनः सत्त्वादिदानीं च करणग्रामस्यापि सत्त्वात् पूर्वोक्तैः दर्शनसाधनैस्तवामृतत्वाय परमात्मा द्रष्टव्य इति तव तस्य ज्ञानमित्युक्तं भवति। एवमधिकारपरीक्षायां ज्ञातायां तस्मै मोक्षार्थं ब्रह्मस्वरूपमुपदेष्टुं द्वितीयब्राह्मणे वागेकायनमित्यन्तं पूर्ववदुक्त्वा 'स यथा सैन्धवघनः अनन्तरोऽबाह्यः कृत्स्नो रसघन एव स्यादेवं वा अरे इदं महद्भूतमनन्तमपारं कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञास्ति' इत्यादिपूर्ववदाह तेन जीवस्वरूपाद्विशेषो बोधितः। अयं तु यथा सैन्धवघनः अनन्तरोऽबाह्यः कृत्स्नो रसघन एव स्यादिति दृष्टान्तं निरूप्य दार्ष्टान्तिकेऽनन्तरत्वमबाह्यत्वं च संगृह्णन् अग्रे कृत्स्नत्वं प्रज्ञानघनत्वं चाह इदं महद्भूतमनन्तमपारमिति पूर्ववदाह तेन ब्रह्मणो महदादिभिश्चतुर्भिर्विशेषणैरेव जीवसाम्यं प्रज्ञानघनत्वेन स्वरूपसाम्यं वस्तुतस्तु तत्र विज्ञानघनपदादत्र च प्रज्ञानघनपदात्ततः कश्चिद्विशेषोपि, अनन्तरत्वमबाह्यत्वं कृत्स्नत्वं च ततोधिकं तेन ब्रह्म जीवादधिकमिति बोधयन् जीवस्य सान्तरत्वं सबाह्यत्वमकृत्स्नत्वं च सूचयति तेन तस्य खिल्यतां द्रढयति भूतसमुत्थानानुविनाशप्रेत्यसंज्ञाभावात् पूर्ववदाह तत्र मैत्रेय्याः ब्रह्मनिष्ठयोर्भूतसमुत्थानविनाशयोर्न संदेहः। हृदि द्वयोर्जीवपरमात्मनोराध्यात्मिकाधिदैविकतया स्थितत्वेन जीवे तथात्वस्येव परमात्मनि तथात्वस्य सुखेन बोद्धुं शक्यत्वात्। प्रेत्यसंज्ञाभावस्तु लोकान्तरगत्यनन्तरं सम्यग्ज्ञानाभावरूपः स तु जीवेन्द्रियाणां लये सति जीवविषयो भवति ब्रह्म तु न विलीयते जीवोपि इदानीं वर्तत इति ब्रह्मविषयकः संज्ञाभावो जीवस्य लोकान्तरगमनोत्तरं कथमित्येवं मैत्रेय्या मोहे जाते तन्निवारणार्थं अविनाशी वा अरे अयमात्मा अनुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवति इत्याह तत्र मात्रारूपाणां विषयाणां यः संसर्गः स ब्रह्मण्यनुपपन्नः इति तेन जीवलिङ्गेन जीवरूपमेव अत्र ब्रह्मास्तु न तु ततोधिकम्। अन्यथैतद्विरोधापत्तेरित्यत आहुः सर्वव्यवहारेत्यादि। तथा च पूर्वं जीवमुख्यप्राणलिङ्गसूत्रे जीवस्य ब्रह्माश्रितताया उक्तत्वात् जीवीयसर्वव्यवहारस्य तन्मूलकत्वात् हस्तपुस्तकसंयोगे पुरुषपुस्तकसंयोगवत् विषयस्पर्शोपि ब्रह्मण उपपद्यते अग्रिमवाक्योक्तं विज्ञातृत्वमपि ब्रह्मण एव धर्मः नान्योऽतोस्ति द्रष्टा इत्यादिश्रुतेर्द्रष्टृत्वस्य तत्रैव नियमनात् स च धर्मस्तदंशत्वात् जीवेपि भासते इति नात्र जीववाक्यशङ्केत्यर्थः। ननु तथापि मात्रासंसर्गे सत्यदर्शनं कथमुपपद्यत इत्याकाङ्क्षायामाहुः एवं सतीत्यादि। अयमर्थः। अत्र हि यद्वै तं न पश्यति इत्यादिना आत्मविषयक-

भाष्यप्रकाशः ।

सर्वेन्द्रियजन्यज्ञानाभावस्य स्वरूपं प्रकारश्चोच्यते तथा हि यद्वै तन्नेत्यत्रानुस्वारस्य परसवर्णः । तं प्रज्ञानघनमात्मानं यत्र पश्यति तत्पश्यन् वै तद्द्रष्टव्यं न पश्यति द्रष्टव्यत्वेन पश्यति । ननु रूपमप्यात्मा इति द्रष्टव्येन दर्शनसत्त्वे कथमदर्शनमित्याकाङ्क्षायामदर्शनमुपपादयति नहीत्यादि । अदर्शनं लोपः विरुद्धः सर्वतो लोपः विपरिलोपः दृष्टेरिति पञ्चमी घ्राणादित्या प्रायपाठात् हि यतो हेतोः द्रष्टुर्दृष्टेर्विपरिलोपः द्रष्टुरात्मनो दृष्टेः दर्शनात् विपरिलोपः विरुद्धदर्शनसामर्थ्य-कृतं अदर्शनं न विद्यते तत्र हेतुरविनाशित्वात् । ज्ञानात्मकस्य स्वरूपस्य धर्मस्य च नित्यत्वात् । तेन जीवस्य पश्यत्त्वम् । तर्हि कथमपश्यत्त्वं तत्राह न त्वित्यादि । यदन्यत्कार्यं रूपमिन्द्रियं करणं विभक्तमंशरूपं जीवतत्त्वं द्रष्टृ पश्येत् परमात्मविषयकं दर्शनं कुर्यात् तत्तु ततः परमात्मनः सकाशात् द्वितीयमन्यद्भिन्नं नास्ति तथा च दर्शनसाधनस्य द्रष्टुश्च परमात्मनः सकाशादन्यत्वाभावेन विभक्तत्वाभावेन च द्वितीयत्वाभावात् द्रष्टव्यत्वेनादर्शनं तथा च सामान्यतो द्रष्टव्यत्वेन रूपात्मकस्यात्मनो दर्शनात् पश्यत्त्वं तेन मात्रासंसर्गात् द्रष्टृदृश्यव्यवहारदशायां विशेषतः कारणत्वेनाविभक्तत्वेन द्वितीयत्वेन च अदर्शनादपश्यत्त्वमित्युभयमपि संगच्छते एवं सर्वत्रापि । ननु तर्हि ज्ञानस्वरूपत्वात् ज्ञानधर्मकत्वाच्च द्रष्टृत्वे सिद्धे स्वरूपेणैव परमात्मानं कुतो न पश्यति इत्यतः किंचित्पाठभेदेन पूर्ववदाह यत्र अन्यदिव स्यादित्यादि तथा च स्वरूपे धर्मे च विद्यमानेपि ब्रह्मणि लीनत्वेन द्रष्टृदृश्यभावाभावात् न विजानीयादित्यर्थः । तथा च साधकस्य संसारदशातो-ऽग्रिमे लोकान्तरे मात्रारूपविषयसंसर्गे सत्यपि तस्य संसर्गस्यैतदात्म्येऽनुसंहिते द्वितीयत्वाभावा-त्सम्यग्दर्शनाभावः । मुक्तौ तु अविभागे सति द्रष्टृदृश्यत्वाभावात् सम्यग्ज्ञानाभावः । तेन ब्रह्माविभक्ततया ब्रह्मात्मकत्वेनावस्थाने ब्रह्मैव विज्ञातृ सर्वज्ञेयं तु ज्ञप्तिमात्रस्वरूपो ज्ञप्तिधर्मा च कार्यकारणशक्तिरहितस्तिष्ठति न तु सविषयज्ञानवान् । इदमेवामृतत्वमित्युपसंहरति । उक्तानु-शासनासि मैत्रेयि एतावदेव खल्वमृतत्वमिति प्रव्रजति च । तत एतस्य ब्राह्मणस्य पूर्वब्राह्मणार्थ-निश्चायकं इत्याशयेन सिद्धमाहुः अतो वाक्येत्यादि । एवं प्रकृतिकारणवादे निरस्ते यो याज्ञ-वल्क्येनोक्तः परमात्मा स मैत्रेय्या श्रुत इति पूर्वोक्तरीत्या मननं निदिध्यासनं च त्वया कर्तव्यं जीवदशायां ततः साधनपरिपाकेन दर्शने मुक्तौ जीवस्य विज्ञातृभावरूपो ब्रह्मभाव इति फलं सिद्ध्यति । एतदेव तत्त्वदीपे तत्प्रकाशे चाचार्यैः—

'व्यापकत्वश्रुतिस्त्वस्य भगवत्त्वेन युज्यते ।
आनन्दांशाभिव्यक्तौ तु तत्र ब्रह्माण्डकोटयः ।
प्रतीयेरन् परिच्छेदो व्यापकत्वं च तस्य तत्' ॥

इत्येनेनोक्तं व्याख्यातं च । किं चायमेव संवादो न प्रेत्यसंज्ञास्तीति प्रेत्यसंज्ञाभावं बोधयन् एतावदेव खल्वमृतत्वमिति मोक्षस्यैतावत्त्वं च बोधयन् निःसंबन्धो निरानन्दो मोक्ष इतिवादमुत्था-पयति तथा आत्मनः प्रज्ञानघनं नित्यमेकरसं स्वरूपं बोधयन् अनुच्छित्तिधर्मपदस्याविनाशिपद-व्याख्यानत्ववादिमते निर्धर्मकनिर्विषयकनित्यज्ञानात्मकस्वरूपेणावस्थानं मोक्ष इतिवादमुत्थापयति सिद्धान्ते तु आनन्दधर्मस्य प्रियत्वस्य परमात्मनिष्ठत्वात् परमात्मनश्च सर्वत्रैव जीवेप्यन्वयात् सोपि धर्मो मुक्तावभिव्यज्यते । अनुच्छित्तिधर्मपदं च धर्मनित्यत्ववाचकमिति पूर्वं व्याख्यातम् । तथा सति जीवीयज्ञानपरिमाणादीनां धर्माणां नित्यत्वात् निर्विषयकज्ञानस्वरूपः, सविषयज्ञानधर्मा

'सर्व एवात्मानो व्युचरन्ति' 'एष ह्येवानन्दयाति' इत्यादिश्रुतिसहस्रैर्निःसंदिग्धं ब्रह्मणः स्वरूपं कार्यमंशाश्च प्रतिपादिता इतीदमपि वाक्यं तत्परमेवोचितम् ।

भाष्यप्रकाशः ।

लयः श्रावणाचाणुः ब्रह्माविभक्तत्वादनु च ब्रह्मधर्मो ब्रह्मभूतो मुक्ताववतिष्ठते । इत्येवद्बोधनाय निबन्धे तथोक्तमिति ज्ञेयम्] एवमन्यत्रापि । अतः सर्वोपनिषदनुरोधेनैवास्याप्यर्थस्य वक्तुमुचितत्वात् तासु च, तमेव विदित्वा अतिमृत्युमेतीत्यवधारणदर्शनादत्रापि श्रवणादिविधीनां ब्रह्मविषयत्वमेव मन्तव्यम् । तथा अत्रोक्तं यथार्द्रैधाग्नेरित्यादिदृष्टान्तसिद्धं कारणत्वं समुद्रादिदृष्टान्तसिद्धं प्रलयाधारत्वं च तदैव संगच्छेत यदा प्रियं ब्रह्मैवात्राद्रियेत । आनन्दद्ध्येवेति सावधारणश्रुत्या तत्रैव तन्नियमनात् । नच जीव एव ब्रह्मेति युक्तम् । सर्व एवात्मानो व्युचरन्तीति श्रुतिविरोधात् । अमृतत्वरूपं फलमपि तत एव । एष ह्येवानन्दयातीति सावधारणश्रुतेः । अत

रश्मिः ।

ब्राह्मणद्वयेपि । अस्यापीति मैत्रेयीब्राह्मणद्वयस्यापि । तमेव विदित्वेति भाष्यं विवृण्वन्ति स तासु चेति । मैत्रेयीब्राह्मणेन सहैक्यतां वक्तुं तद्विभजन्ते अत्रापीति । ननु प्रियत्वेनोपक्रमात् 'प्रेमा ना प्रियता हार्दं प्रेम स्नेहः' इति कोशात् मैत्रेयीब्राह्मणद्वयस्य भक्तिप्रतिपादकत्वेपि एकवाक्यताया उपात्ताया महानारायणोपनिषदः कथं भक्तिप्रतिपादकत्वमिति चेन्न । तमेवेत्यत्रैवकारो नान्यथा व्याख्येयः तं विदित्वैवेति किं तु तमात्मानमेव विदित्वेति ततश्चात्मज्ञानं तु भक्त्या । भक्त्या जानाति चाव्ययमिति श्रुतेः । 'भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः' इति गीतायाश्चेति भक्तिरर्थापत्तिलभ्येत्यदोषात् । न च भक्त्या ज्ञानं कुतो नेति शङ्क्यम् । 'नायमात्मा बलहीनेन लभ्यः' इति मुण्डके बलपदवाच्यभक्तिहीनालभ्यत्वोक्तेः । सिद्धान्तमुक्तावल्यां 'ज्ञानाधिको भक्तिमार्ग एवं तस्मान्निरूपितः' इति तट्टीकायां च प्रभवः उपपादयांचक्रुः मृत्युमतिक्रामतीति मृत्युमतिक्रान्तो मोक्षः । ब्रह्मविषयत्वमिति एवकारेण विभूतिव्युदासः । भक्तिहंसेऽयं विषयः स्पष्टः । आर्द्रैधाग्नेरिति व्याकृतम् । समुद्रादीति स यथा सर्वासामपां समुद्र एकायनमेवं सर्वेषां स्पर्शानां त्वगेकायनमेवं सर्वेषां गन्धानां नासिके एकायनमित्यादि । आनन्देति । ननु प्रियं प्रीतिविषयमानन्दः सुखमिति कथं पर्यायतेति चेन्न ततु समन्वयादित्यधिकरणे ब्रह्मणोस्तिभातिप्रियत्वेनान्वयोक्तेः । अस्ति सत्त्वधर्मः, भाति ज्ञानधर्मः, प्रियत्वमनन्तानन्दधर्म इति सिद्धया प्रियत्वेनोपक्रान्तधर्मप्रियत्वस्यानन्दे सत्त्वादानन्दस्य पर्यायत्वम् । तत्रैवेति प्रिये ब्रह्मण्यानन्दरूप एव भूतकर्तृत्वादिनियमनात् । सर्व एवेति भाष्यं विवरीतुमाहुः न चेति । आत्मान इति । आत्मानोऽवतारा जीवास्तु पृथगुक्ता व्युच्चरन्त्येवेति माध्वाः । तद्यत्रात्मजीवयोः पृथग्व्युच्चरणं श्रुतं तत्रास्त्येव । भाष्यं तु केवलात्मव्युच्चरणबोधिका श्रुतिस्तद्विषयमात्मपदं यत्रात्मजीवोभयविषयं तच्छ्रुतिसंग्राहकं च । अमृतत्वेति उपसंहारोक्तामृतत्वरूपम् । तत इति ब्रह्मणः 'फलमत उपपत्तेः' इति व्याससूत्रात् । अमृत आनन्द इति भाष्यादाहुः एष ह्येवेति । एष आकाश आनन्दः । आनन्दममृतं करोतीत्यर्थः । अत इति । तमेवेति भक्तिरसविषयं ब्रह्मणो रूपं तत्पदेनोक्तं प्रसिद्धं सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुत्या । नन्वत्राम्भसपारे भुवनस्य मध्ये इति महानारायणोपनिषदो रामानुजाचार्यभाष्येण रसो वै स इति श्रुत्यनुवर्तितरसपदीयानारायणोऽनात्मा तत्पदार्थ इति चेन्न, पुरुषसूक्तोक्तसाकारब्रह्म तत्पदार्थः सान्निध्यात् । तस्य च दशरसरूपत्वं सर्वरस इति श्रुतेः विरुद्धसर्वधर्माश्रयत्वेनानन्तरूपत्वेन

सर्वव्यवहारस्य तन्मूलकत्वेन पूर्वमुक्तत्वात् । विषयस्पर्शो विज्ञातृत्वमपि तस्यैव ।

भाष्यप्रकाशः ।

उदाहृतजातीयैः श्रुतिसहस्रैस्तथा प्रतिपादनादिदमपि वाक्यं ब्रह्मपरमेवोचितमित्यर्थः । ननु सत्यमेवं, तथापि मात्रासंसर्गस्तस्य भवतीति विषयसंसर्गरूपेण लिङ्गेनात्र जीव एव वक्तव्योऽन्यथा तद्विरोधस्य दुर्वारत्वादित्यत आहुः सर्वेत्यादि । पूर्वमिति । जीवमुख्यप्राणलिङ्गसूत्रे । तथाच जीवस्य ब्रह्माश्रितत्वाज्जीवधर्मा ब्रह्मण्युच्यन्त इति विषयस्पर्शोऽप्युपपद्यते । न त्वेतावतात्र जीववाक्यत्वम् । विज्ञातृत्वं तु ब्रह्मधर्म एव । नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतेः ।

रश्मिः ।

च रसरूपत्वमेतस्य ज्ञानं तु भक्त्येत्युक्त्यान्यनिष्ठभक्तिरसविषयं च शास्त्रार्थनिरूपकद्वितीयस्कन्धनवमाध्यायोक्तमिति आनन्दाद्ध्येवेति कार्यं माहात्म्यज्ञानाय तेन सुबोधिन्युक्तम्—

'माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोधिकः ।
स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा' ॥

इति श्रुतिवाक्यद्वयेन सिद्धम् । आनन्दस्य प्रियशिरस्त्वादिकमानन्दमयाधिकरणे प्रपञ्चितम् । सर्व एवात्मान इत्यंशाः आत्मपदवाच्या जीवाः अंशो नानाव्यपदेशादिति सूत्रात् । एष ह्येवानन्दयातीति फलमानन्दस्य फलत्वात् । एतच्चतुष्टयादित्यर्थः । सजातीयैरिति सजातीयत्वं च भक्तिरसविषयब्रह्म-भक्तिजनकमाहात्म्य-जीव-फलेतिचतुष्टयप्रतिपादकत्वेन । श्रुतीति यथा अन्तस्तद्धर्माधिकरणे छान्दोग्ये प्रथमप्रपाठके य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यते इति स एष सर्वेभ्यः पाप्मभ्य उदित इति भक्तिजनकमाहात्म्यं, उदेति ह वै सर्वेभ्यः पाप्मभ्य इति फलम् । य एवं वेदेति जीवः । तमेव विदित्वेति समानम् । यथा तल्लिङ्गाधिकरणे छान्दोग्ये प्रथमप्रपाठके सर्वाणि ह इमानि भूतानि आकाशादेव समुत्पद्यन्त इति भक्तिजनकमाहात्म्यं परोवरीयसो ह लोकान् जयति इति फलं य एतदेवं विद्वान् परोवरीयांसमुद्गीथमुपास्ते इति जीवः । तमेव विदित्वेति समानम् । यथातिदेशाधिकरणे तत्रैव कतमा सा देवता प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमुज्जिहते इति भक्तिजनकमाहात्म्यं तांश्चेदविद्वान् प्रस्तोष्यः इति जीवः, मूर्धा ते व्यपतिष्यदिति फलम् । लङ् । न त्वं प्रस्तोष्यसि न ते मूर्धा व्यपतिष्यतीत्यर्थः । तमेव विद्वानिति समानं इत्येवं श्रुतिसहस्रैरित्यर्थः । तैश्चासंदिग्धैः निःसंदिग्धत्वमिति भाष्यात् पूर्वं संदिग्धत्वेपि केषुचिच्छ्रुतिवाक्येषु न्याय(सूत्र)प्रापणानन्तरमसंदिग्धत्वमिति श्रुतिसहस्राणां निःसंदिग्धैरितिभाष्ये विशेषणं तथा भाष्ये ब्रह्मणः स्वरूपं तमेव विदित्वेति श्रुत्युक्तं भक्तिविषयं तं लोकवेदप्रसिद्धं पुरुषोत्तममिति पुरुषोत्तमरूपम् । ॐ स्वराट् जन्माद्यस्य यतोन्वयादितरतश्चेति वाक्यात् । इमानि भूतानीति कार्यं प्रसिद्धमंशा जीवा इति प्रसिद्धं चकारेण फलम् । तत्परं ब्रह्मपरम् । प्रकृते । तद्विरोधस्येति विषयवाचकमात्रापदवाच्यमात्रासंसर्गविरोधस्य । सर्वेत्यादीति सर्वो यो 'व्यवहारः सन्निपातो मनोमात्रेन्द्रियासुभिः' अहंममेति मतिः अहमित्यस्मत्प्रत्ययः ममेत्यस्मत्प्रत्ययगोचरसंबन्धिनो जीवजडधर्मास्ते तत्रैव 'जीवमुख्यप्राणलिङ्गादिति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्' इति सूत्रभाष्ये उद्दिष्टास्तद्विषयिणी मतिर्या सापि व्यवहारस्तस्य ब्रह्म मूलं परंपरा च यस्यार्थात्साक्षात्कारणं व्याख्यानात् स तन्मूलको व्यवहारःस्तत्त्वेनेत्यर्थः । अत्रेति मैत्रेयीब्राह्मणद्वये । विज्ञातृत्वमितिभाष्यं विवृण्वन्ति विज्ञातृत्वमिति । अत इति ब्रह्मणः । भाष्ये । तस्येति साकारब्रह्मणः । अत्र पक्षे तन्मूलकत्वेनेति भाष्यस्य तानि ब्रह्मणः स्वरूपकार्यांशफलानि मूलानि कारणानि यस्य व्यवहारस्य स

भाष्यप्रकाशः।

स च धर्मस्तदंशत्वाज्जीवेऽपि भासत इति न तेनापि जीववाक्यत्वशङ्का। ननु यथात्र लयाधिकरणदृष्टान्तनिरूपणोत्तरं, स यथा सैन्धवघन इत्यादि श्राव्यते, तथा पूर्वस्मिन् मैत्रेयीब्राह्मणे सर्वासामपामित्याद्युत्तरं, 'स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत नाहास्योद्ग्रहणायेव स्याद् यतो यतस्त्वाददीत लवणमेव' इति श्राव्यते। खिल्यश्च शकल इति ब्रह्मांशस्तत्र प्रतीयत इतीहापि जीव एवास्त्विति चेत् तत्राहुः एवं सतीत्यादि। सर्वस्यापि व्यवहारस्य ब्रह्ममूलकत्वे सिद्धे सति यदत्रोक्तं यत्र वा अन्यदिव स्यादित्यादिना कर्मकर्तृभावराहित्यं, तदपि, यद्वै तन्न पश्यतीत्यादिना जीवस्य स्वरूपतो धर्मतश्च नित्यत्वं प्रतिपाद्य विभक्तत्वनिषेधेनाविभागानुसंधानदशायां द्वितीयस्य विभक्तत्वेन दर्शनं निषिध्य सर्वस्यात्मभावं च

रश्मिः।

तथोक्तः तत्त्वेन। अयमर्थः। चत्वारोर्थाः प्रतिपाद्यन्त इति नवार्थ्यां वेदटीकायां कारिकासूपपाद्य स्माभिः अतश्चतुर्भ्योर्थेभ्यः नातिरिक्तं किंचिदिति सर्वव्यवहारस्य तन्मूलकत्वम्। तेन पूर्वं सर्वत्र प्रसिद्धोपदेशादित्यधिकरणेऽनुगमाधिकरणेवेत्यर्थः। प्रलयेति स यथा सर्वासामपां समुद्र एकायनमित्यादिप्रलयाधिकरणदृष्टान्तः। इत्यादीति स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव स्यादेवं वा अरे इदं महद्भूतमनन्तमपारं कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीत्यन्ताः श्रुत्यर्थाः स्पष्टाः। कर्मकर्त्रीति यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदित्यत्र तत्कर्तृकं कर्माणमिति कर्मकर्तृभावस्तद्राहित्यम्। केनेति करणभावराहित्यमुपलक्षणविधया द्रष्टव्यम्। इतः पूर्वं प्रमेयमाहुः तदपि यद्वैतमिति यत् यतश्चक्षुस्तमात्मानं न पश्यतीत्यर्थः। स्वरूपतः इति स्वतः। धर्मत इत्यविनाशित्वतः। यद्वै तन्न पश्यति पश्यन् वा इत्यादिना। विभक्तेति न तु तद्द्वितीयमस्ति ततोन्यद्विभक्तं यत्पश्येदिति विभक्तत्वनिषेधः। तत आत्मनोन्यद्विभक्तत्वं नास्तीत्यर्थात् अन्यत्रास्ति विभक्तं नास्तीत्यन्वयः। अविभागेति विभागाननुसंधानदशायामिति नोक्तम्। अविभक्तं च भूतेषु इत्यविभागस्य प्राप्तत्वात्। द्वितीयस्येति द्वितीयत्वेन द्वितीयं चक्षुरादीन्द्रियं तद्द्वितीयत्वेन वर्तते एव। सात्त्विकज्ञानाभावात्। अन्यत्वेन वर्तते तत एव अतो विभक्तमिव च स्थितमिति गीता तादृशविभक्तत्वेन दर्शनं निषिद्धं। न चान्यत्वेन द्वितीयत्वेन कुतो न दर्शनं निषिद्धमिति शङ्क्यम्। ब्रह्मणो द्वितीयत्वमिन्द्रियेषु अविभागानुसंधानदशायामस्ति अन्यत्वं च। यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदित्यत्रात्ममात्रानन्तरं न किमप्यस्तीत्यनुक्त्वा केनेति करणनिषेधः कमिति कर्मनिषेधश्च ज्ञापयति श्रुतिश्चात्मैवेदमग्र आसीत्पुरुषविध इति। विधापदादिन्द्रियेषु द्वितीयत्वमिन्द्रियेष्वन्यत्वं चास्ति सप्रतियोगित्वाल्लीलायाः 'अन्तरा भूतग्रामवत् स्वात्मनः' इति व्याससूत्राच्चात्र आत्मत्वेन साजात्ये 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' इति फलाध्यायसूत्रात्। अतः प्रतियोगिसजातीयं द्वितीयम्। एकमेवाद्वितीयं ब्रह्मेति तु स्वगतद्वितीयव्यूहेतरविषयं गोपालतापिनीये कथं चतुर्भिरेको देवो भवेदिति प्रश्ने एकमेवेति श्रुतिप्रवृत्तेः।
१ व्यूहानां परस्परं द्वितीयत्वमस्त्येव अन्तरा भूतेति सूत्रोक्तो भेदोपि योगमाया। मायाभिन्नमायासदृशी, अतम इति श्रुतौ तमोभिन्नं तमःसदृशमिति पर्युदासार्थकनञोङ्गीकारात्। न चान्यत्वद्वितीयत्वे इन्द्रियेषूक्ते इति वासुदेवादिव्यूहेषु कुत उक्ते इति वाच्यम्। तरुणोगोपवेषोश्रामोऽनादिमत्कमनोरथेन फलाध्यायोक्तलीलास्थैर्वादनादिना भक्तमनोरथपूरणायेच्छाविषयीकृतः सकललीलासामग्रीरूप-

एवं सति सर्वमेव संगतं भवेत् । अतो वाक्यान्वयान्न जीवपरत्वं येन प्रकृतिवादः स्यादिति ॥ १९ ॥

भाष्यप्रकाशः ।

बोधयित्वोक्तम् । अतस्तदपि सर्वस्य जीवजडरूपस्य वस्तुतो ब्रह्मत्वादेव संगतं भवेत् । यच्च तत्रोक्तं खिल्यत्वं जीवस्य संज्ञाभावादिकं च तदपि संगतं भवेत् । तत्रापि प्रियत्वरूपस्य प्रकृततावच्छेदकस्य महावाक्यशेषत्वादीनां च तुल्यत्वात् तस्यापि ब्रह्मण्येव तात्पर्यादविरुद्धं भवेत् । तत्र यद्, यद्वै तन्न पश्यतीत्यादिवाक्यराहित्यं पाठभेदादिकं च तदपि मैत्रेय्या अधिकारपरीक्षार्थम् । अत एव तत्र, उक्तानुशासनासीति नोक्तम् । पुनरुपदेशस्य चिकीर्षितत्वात् संन्यस्तमपि न इह तदुभयमुक्तमतोऽर्थभेदेऽपि तात्पर्यैक्यादैकार्थ्यम् । एतस्य तदर्थनिश्चायकत्वादस्यैव च प्राबल्यम् । तदेतद्धृदि कृत्वा सिद्धमाहुः अत इत्यादि ॥ १९ ॥

रश्मिः ।

संकर्षणव्यूहः तस्य तत्तल्लीलासामग्रीरूपेण भवने प्रद्युम्नव्यूहः अयं धर्मो यद्भक्तमनोरथपूरणं तदेव वासुदेवव्यूहरूपं वासुदेवस्य मोक्षत्वात् लोकवत्तु लीलाकैवल्यमिति व्याससूत्रात् । इति चतुर्व्यूहानुपक्रम्यैकमेवाद्वितीयमिति श्रुतिसंनिवेशात् तथा चाविभागदशायां भेदरूपान्यत्वार्थो विभागजन्योऽद्वितीयत्वं जनयति तत्रान्यत्वं योगमाया 'योगमायामुपाश्रितः' इति वाक्यात् । विभागश्च विभक्तमिवेति वाक्योक्तः द्वितीयत्वं च स्वरूपे प्रतीतं विभागानुसंधानदशायां तु माया भिदारूपा औपाधिकं द्वितीयत्वं चेति । इदमात्मा न पश्यति विभागजन्ययोगमायाजन्यत्वात् । भक्तिमार्गे द्वितीयस्कन्धनवमाध्यायोक्ते नित्यलीलावादोक्ते चात्मनि । न तु विभक्तत्वमिति विभक्तमिव च स्थितमिति गीतायाः । किं च इदं सर्वं यदयमात्मेति ब्रह्म तं परादात् योऽन्यत्रात्मनो ब्रह्म वेदेत्युक्त्वोक्तम् । तदपि यद्वै तन्न पश्यतीत्यादिभिरिन्द्रियाणां सर्वेषामात्मत्वं बोधितम् । अत्र सर्वपदं सर्वेषां नाम्नि शक्तम् । अतोपि द्वितीयत्वं भेदश्चातोपि द्वितीयत्वेनान्यत्वेन च दर्शनं न निषिद्धं तदेतदाहुः **सर्वस्येति** चक्षुरादेः । अग्रे सर्वत्र ततोन्यद्विभक्तं यज्जिघ्रेततोन्यद्विभक्तं यद्रसयेदित्येवमात्मत्वं बोधयित्वेत्यर्थः । किमनेन सिद्धमित्याकाङ्क्षायामाहुः **अतस्तदपीति** । सर्वपदात्सर्वस्य चान्यत्वद्वितीयत्वाभ्यां विनाऽनिरूप्यत्वात् । **तदपि** कर्तृकर्मभावराहित्यमपीत्यर्थः । **एवेति** प्रकृतिव्युदासकं न प्रकृतित्वात् । **संगतमिति** इदं सर्वं यदयमात्मेति श्रुतौ सर्वस्यात्माभेदोक्तेः । न च प्रकृत्यभेदोऽस्त्विति शङ्क्यम् । गौणश्चेन्नात्मशब्दादिति व्याससूत्रात् । अत इदं सर्वमित्यत्रात्मपदं न प्रकृतिप्रतिबिम्बवाचकं गौणत्वापत्तेः, एवमसंगतं भवेत् । ब्रह्मपरिग्रहगुणमाहुः **यच्चेति** आदिपदेन मात्रासंसर्गस्त्वस्य भवतीत्युक्तं मात्रासंसर्गः तदपि आश्रितत्वादिह तद्योगात् संगतं भवेत् । प्रकृतिपरिग्रहे तु सत्त्वरजस्तमसां साम्यावस्थायां प्रकृतावस्वच्छायां प्रतिबिम्बासंभवेन तद्धर्मानाश्रितत्वात् । उपक्रमस्याप्रतिबिम्बसाधारण्यमाहुः **तत्रापीति** ब्रह्मण्यपि । तुल्यत्वं 'अतो मयि रतिं कुर्याद्देहादिर्यत्कृते प्रियः' इति । महावाक्यशेषत्वादयो अत्रैव पूर्वमुक्ताः । तत्रात्रोक्तप्रियस्य ब्रह्मणो हि प्रतिपादकस्य ब्राह्मणद्वयस्य महावाक्यवेदरूपस्य शेषत्वं तादर्थ्यं भक्तार्थब्रह्मप्रतिपादकत्वेन पूर्णतात्पर्यत्वमिति यावत् । अन्यथा ज्ञानत्वेन प्रसिद्धस्वयंप्रकाशत्वप्रतिपादकत्वेन न्यूनताख्यनिग्रहस्थानापत्तेः । **तत्रेति** द्वितीये ब्राह्मणे । **उपदेशस्येति** पष्ठ इत्यर्थः । पष्ठस्य तात्पर्यानुक्तौ तात्पर्यमाहुः **एतस्येति**, तेन,

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ २० ॥

नियतधर्मवादिनामपि मतेन प्रकृते सिद्धान्तं वक्तुं पक्षान्तराण्याह । तत्र ब्रह्मवादैकदेशिवादाः सन्ति । तत्र जीवो नाम स्वस्य भोगनिष्पत्त्यर्थं स्वांशो भगवता कृतो विस्फुलिङ्गवदित्याश्मरथ्यो मन्यते । अनादिसिद्ध एव जीवश्चै-तन्यमात्रं शरीरादिसंघाते प्रविष्ट इति चिति तन्मात्रेण प्रवेशो च मोक्ष इति च औडुलोमिराचार्यः । काशकृत्स्नस्तु आसत्त्या विषयभोक्तृरूपं भगवत एव जीव इति । तेऽपि स्वमतानुसारेणात्र परिहरन्ति । तत्र पुत्रादिप्रियसहवचनाज्जी-वप्रकरणमेवैतदित्याशङ्क्य जीवोपक्रमस्यान्यत् प्रयोजनमित्याह । प्रतिज्ञा-सिद्धेरिति षष्ठी । तस्या लिङ्गमंशत्वाज्जीवस्य तदभेदेनोपक्रमः प्रतिज्ञासिद्धेर्लिङ्गं भवति । एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञा ।

भाष्यप्रकाशः ।

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ २० ॥ सूत्राण्यवतारयन्ति नियतेत्यादि । अत्रोक्तं प्रियत्वं जीवधर्म एवेतिवादिनां मतेन मैत्रेयीब्राह्मणे प्रकृतिवादनिरासरूपं सिद्धान्तं वक्तुं संमत्यर्थं पक्षान्तराण्याहेत्यर्थः । अत्र आश्मरथ्यमते श्रुतिर्भाष्य एव सूचिता । औडुलोमिमते तु,

'यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं यन्ति नामरूपे विहाय ।
तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्' ॥

इति मुण्डके श्रुतिर्मूलं बोध्यम् । नामरूपेति स्वीये नामरूपे । नदीदृष्टान्ताच्च भिन्नत्वं शरीरे प्रवेशश्च नामरूपव्याकरणश्रुत्या । चैतन्यात्मकत्वादिकं तु भाष्य एव स्फुटम् । काशकृत्स्न-मतेपि व्याकरणश्रुतिः 'सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाऽभिवदन्यदास्ते' इति पुरुषसूक्त-श्रुतिश्च मूले इति बोध्यम् । पुत्रादिप्रियसहवचनादित्यादि पुत्रादिरूपा ये लौकिकाः प्रियास्तैः सह वचनादत्रात्मनोऽपि लौकिकमेव प्रियत्वं प्रतीयत इति जीव एवात्रात्मपदेन परामृश्यते । अतो जीवप्रकरणमेवेदमित्याशङ्क्येत्यर्थः । तदभेदेनेति ब्रह्माभेदेन । एकविज्ञानेन सर्वविज्ञानमिति

रश्मिः ।

'अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत्' ॥

इति व्यापकजीवो जीवन्मुक्तोपि आध्यात्मिकादित्रितयविदाश्रयः प्रकृतिरपि न समवायिनी किं तु प्रियत्वरूपब्रह्मधर्माविष्टो जीव इति भगवानेवाश्रयः इति सिद्धम् ॥ १९ ॥

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ २० ॥ एवेति निराकारे आश्मरथ्योररीकृते द्वितीय-पादे प्रियत्वं बाधितम् । नियतो जीवधर्म इत्येवकारः । भाष्ये । सन्तीति कृष्णद्वैपायनमता-
१ देकदेशविदः परे । 'वदन्ति ते यथाप्राज्ञं न विरोधः कथंचन' इतिपाद्मात् । स्वस्येति निराकारस्य द्वितीयपादे आश्मरथ्यमतकथने उक्तत्वात् । व्यासमते स्वसिद्धान्ते तु स्वस्य 'अनश्नन्न्योभिचाकशीति' इति श्रुतेर्जीवस्यैव भोगः । भगवतेति निराकारेणेत्येव साकारेणेति वार्थः । तदभेदेनेति क जीवस्यैवोपक्रम इति शङ्क्यम् । गौणमुख्यन्यायबाधात् प्रतिज्ञासिद्धेश्च । प्रकृते । जीवात्मकथन-

तस्यैवाग्रे व्युत्पाद्यमानत्वात् तस्या एतत् साधकम् । यथा जीवो भगवानेवं जड इति । एवमाश्मरथ्यो मन्यते । श्रोतव्यादिविषयस्तु भगवानेव । तस्मान्नियतधर्मजीववादेऽपि न जीवोपक्रमो दोषः ॥ २० ॥

उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ॥ २१ ॥

लिङ्गमित्यनुवर्तते । यदत्र जीवोपक्रमेण भगवतः श्रवणादिकमुक्तं तत् संसारभावादुत्क्रमिष्यतो जीवस्य लिङ्गम् । मुक्तौ जीवो भगवानेव भविष्यतीति ज्ञापकम् । अन्यथा सैव कथममृता भवेत् । इतिशब्दो हेतौ । स्त्रिया विश्वासार्थं

भाष्यप्रकाशः ।

मैत्रेय्यात्मनि वा अरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितमिति वाक्योक्तं तत् । प्रतिज्ञासिद्धेरिदं कथं लिङ्गमित्यत आहुः तस्यैवेत्यादि । तस्यैवेति सर्वत्वस्यैव । तस्या एतत्साधकमिति । उपक्रमे जीवात्मकथनं प्रतिज्ञायाः साधकम् । अन्यथा एतद्व्युत्पादनकोटौ जीवस्या[स्फुटतयाऽ] कथनाज्जीवज्ञानाभावे प्रतिज्ञा बाधिता स्यात् । कृते तूपक्रम उल्लेखे सोऽपि ब्रह्मक्षत्राद्यभिमानितया तत्र निविशेदत स्तथेत्यर्थः । [यथा जडे ब्रह्मकार्यत्वाद्ब्रह्मत्वोपचार एवं जीवेपि ब्रह्मांशत्वा ब्रह्मोब्रह्मत्वोपचार इत्यर्थः ।] तथा सत्यस्मिन् मते प्रतिज्ञैवास्य ब्रह्मणः प्रकरणत्वनियामिकेति ज्ञेयम् । एवमेवाग्रिमे मतद्वयेऽपि ॥ २० ॥

उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ॥ २१ ॥ एवंभावादित्यस्य विवरणं संसारभावादिति । एवं कथनस्य मुक्तिप्राप्तिलिङ्गत्वे किं गमकमित्यत आहुः अन्यथेत्यादि । चिद्रूपे ब्रह्मणि जीवस्य प्रवेशो हि तन्मते मोक्षः । ब्रह्म तु चिद्रूपं व्यापकमितीदानीमपि जीवस्तत्र प्रविष्टोऽस्त्येव । परं संघातान्तरायेण । यथा कुसूलस्थं वस्तु गृहे । तद् यदा ततो बहिः

रश्मिः ।

मिति तदभेदेनेत्येव । अन्यथेति जीवात्मकथनत्वे प्रकारे । बाधितेति सर्वविज्ञानाभावप्रसक्तेरिति भावः । उल्लेख इति आपाततः । प्रियपदसमभिव्याहारेण जीवस्योल्लेखे सोपि आत्मापि पूर्वोक्तब्रह्मक्षत्राद्यभिमानवत्येत्यादिः । तथेति ब्रह्माभेदेन जीवात्मकथनत्वम् । अत्र प्रायेन विरोध इत्युक्तं तत्तट्टीकाविषयकम् । प्राज्ञपदान्न तुरीयविषयकं च । किं च आचार्यवान् पुरुषो वेदेति छान्दोग्यादेकदेशिमतानि तत्तद्भाष्यनियतानि । एवं च तत्तदर्थानां पदस्यान्यस्य संनिधेः कारणाद् बोधे श्रुतिसिद्धार्थबोधे बाधकाभावः । यथेह सहकारतरौ मधुरं पिको रौति अत्र पिकपदशक्तिग्रहः । तथात्र वाल्लभं भाष्यमिति । सिद्धमाहुः तथा सतीति । एवमेवेति यथात्वेपि प्रतिज्ञाया विषयवाक्योक्ताया अन्वयो नोक्त इति तत्स्मारणम् ॥ २० ॥

उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ॥ २१ ॥ संसारभावादिति । एवमिति शब्देन संसारबोधः स चेत्थम् । संसारिणो विषयवाक्ये मात्रासंसर्गस्त्वस्य भवतीति पूर्वमुक्तत्वेन यत्र वा अन्यदिव स्यादित्यादिना यत्रेति संसार इत्यर्थात् । यत्र त्वस्य सर्वमात्मैवाभूत् इत्यत्र यत्रेति मोक्षे ज्ञाने इत्यर्थात् । तत्रैवंभावादुत्क्रमिष्यतो जीवस्य लिङ्गमित्येवंभावात् इत्यस्य संसारभावादित्यर्थः । एवमित्यस्य पूर्वोक्तादित्यर्थात् । एवंभावात्पूर्वोक्तभावादित्यर्थः । पूर्वोक्तः संसारः । भाष्ये । जीवस्येत्यस्याज्ञादिसिद्धस्येत्यर्थः । औडुलोमिमते तथेति । अनादिसिद्धत्वं तु आर्त्विज्यमिति सूत्रे

गौणप्रियवैराग्यार्थं च जीवोपक्रमः कर्तव्य एवेति औडुलोमिराचार्यो मन्यते। तस्माद् भिन्नजीवपक्षेऽपि नात्र दूषणम् ॥ २१ ॥

अवस्थितेरिति काशकृत्स्नः ॥ २२ ॥

लिङ्गमित्येव। भगवत एवावस्था जीव इति। अतः संसारदशायामपि जीवो ब्रह्मेति नात्रोत्क्रमणमुपचारो वा। अन्यथा कथमात्मनस्तु कामाय सर्वं

भाष्यप्रकाशः ।

प्रक्षिप्यते तदा गृहस्थं भवति। तथा जीवोऽपि संघाताद् बहिर्भूय यदा साक्षाच्चित्संबद्धः स्यात् तदा मुच्येतेति संघाताद् भिन्नत्वबोधनार्थमेव जीवोपक्रमः। सा हि मोक्षेच्छुर्विद्यां पृच्छति। तद् यदि तस्यै मोक्षयोग्यं जीवस्वरूपं न ज्ञापयेत् सैव कथममृता भवेत्। अतो, येनाहं नामृता स्यामित्यादिकं तद्वाक्यमेवैवं कथनस्य मुक्तिलिङ्गत्वे गमकमित्यर्थः। तदेतदाहुः इतिशब्द इत्यादिना। दूषणमिति प्रकृतिवादापत्तिरूपं दूषणम् ॥ २१ ॥

अवस्थितेरिति काशकृत्स्नः ॥ २२ ॥ जीवस्य ब्रह्मावस्थाविशेषत्वबोधनार्थं जीवोपक्रम इत्यत्र किं गमकमित्यपेक्षायामाहुः अन्यथेत्यादि। यदि हि जीवस्य ब्रह्मावस्थाविशेषत्वमत्र

रश्मिः ।

क्रतौ यजतीति ऋत्विगिति व्युत्पत्त्यार्त्विज्यमनादीति। मुक्ताविति ज्ञाने। 'आर्त्विज्यमित्यौडुलोमिः तस्मै परिक्रीयते' इति तृतीयाध्यायस्य चतुर्थचरणे 'चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः'इति चतुर्थेऽध्याये चतुर्थपादे। ज्ञापकमिति एतेन प्रतिज्ञापि व्याख्याता। प्रकृते। सैवेति एवकारेण कात्यायन्या व्यवच्छेदः याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः। अमृतेति संघाताद्भिन्न आत्मा मैत्रेय्या अमृता मुक्तिर्हित्वान्यथारूपमिति वाक्यात्। नामृतेति अत्र ना पुमान् भगवत्सेवानुकूलत्ववत्त्वहमिति सिद्धान्ते वर्णागमोन्यत्र नकारो वर्णः। यद्वा न अमृता स्याम् किं तु शरीरे मृतेऽमृता स्यामित्यर्थः। टीकायां तु येनाहममृता न स्यां तेन कर्मणा किं कुर्याम् किं तु यदेवामृतत्वसाधनं मे मह्यं ब्रूह्युपदिशेत्यर्थः। मुक्तीति। लिङ्गत्वं हेतुत्वम्। भाष्ये। स्त्रिया इति 'स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा' इति वाक्ये विश्वासात् त्रयी न श्रुतिगोचरेत्यर्थात्। गौणेति स्वोत्कृष्टत्वज्ञानस्य स्वस्मिन् वैराग्यजनकत्वनियमेन गौणमुख्यन्यायमनादृत्य गौणेत्यादिः। भिन्नेति संघाताद्भिन्नेत्यर्थः। अनादिसिद्धजीव इति ॥ २१ ॥

अवस्थितेरिति काशकृत्स्नः ॥ २२ ॥ अवस्थितिरवस्था संसारावस्था इति यावत्। भाष्ये। अवस्थितेरवस्थाया लिङ्गं हेतुः विषयवाक्ये उपसंहारेण प्रकारेणेति इतिशब्दार्थं इत्याहुः लिङ्गमित्येवेति। कस्यावस्थेत्याकाङ्क्षायामाहुः भगवत एवेति। प्रतिज्ञासूत्राद्ब्रह्मेत्यनुवृत्त्या भगवतः एवकारेण मायाव्युदासः। अवस्थेति मात्रासंसर्गस्त्वस्य भवतीत्युक्त्वाऽऽसक्त्याविषयभोक्तृरूपावस्था जीवः। पूर्वसूत्रे दोषमाहुः अत इति उपक्रमोपसंहाराभ्यामित्यर्थः। नात्रोत्क्रमणमिति विषयवाक्ये यत्र त्वस्य सर्वमात्मैवेत्यादिना ज्ञानोक्तौ उत्क्रमणं नोक्तमत एव न ज्ञानोपचारः

प्रियं भवतीति। न ह्यन्यस्य सर्वं प्रियं भवति। मोक्षस्तु ज्ञानमेव। उत्तरत्र कर्तव्याभावात्। अवस्थया व्यवसायात् सिद्धान्ताद्विशेषः। इतिशब्देनैतावदरे खल्वमृतत्वमित्युपसंहारो हेतुरस्य पक्षस्येति काशकृत्स्नो मन्यते। तस्माज्जीवोपक्रमो, भगवत एवावस्थाविशेषो जीव इत्यस्य पक्षस्य लिङ्गम्। तस्मान्मैत्रेयीब्राह्मणेनापि जीवद्वारा प्रकृतिकारणवादासिद्धिरिति सिद्धम् ॥ २२ ॥

इति प्रथमाध्याये चतुर्थपादे सप्तमं वाक्यान्वयाधिकरणम् ॥ ७ ॥

भाष्यप्रकाशः ।

बोधनीयं न स्यात् तदा, आत्मनस्तु कामाय सर्वं प्रियं भवतीति सर्वभोक्तृत्वमात्मनो न वदेत्। ब्रह्मातिरिक्तस्य सर्वभोक्तृत्वाभावेन सर्वस्मिन् प्रियत्वाभावात्। अतः सर्वभोक्तर्येकस्मिन्नात्मनि वक्तव्ये प्रतिनियततत्तद्विषयभोक्तारं तदवस्थाविशेषमुपक्रमे वदति। तथाच सर्वप्रियत्ववाक्यमेव तद्गमकमित्यर्थः। येनाहं नामृता स्यामिति मोक्षार्थं प्रश्नात् तत्रानुत्तरे तदपूर्तिरित्याशङ्कायां तन्मतेन समाधिमाहुः मोक्ष इत्यादि। सिद्धान्ताद् विशेष इति सिद्धान्ते[तूपपत्तिपक्षादरात्सर्वं नित्यं यथास्थितमेव ब्रह्मरूपं तेन कालकृतविशेषरूपयाऽवस्थया न तादृशरूपव्यवसायः। अत्र त्ववस्थया व्यवसाय इति सिद्धान्ताद्विशेष इत्यर्थः]त्वंशत्वे व्यवसाय इति तथा। अस्य पक्षस्येति ज्ञानमेव मोक्ष इति पक्षस्य। शेषमतिरोहितार्थम् ॥ २२ ॥

इति सप्तमाधिकरणम् ॥ ७ ॥

रश्मिः ।

जीवे। प्रकृते। न ह्यन्यस्येति भाष्यं विवृण्वन्ति ब्रह्मातीति। प्रियत्वेति भोक्तृत्वनिबन्धनप्रियत्वाभावात्। भाष्ये। अस्य पक्षस्यापूर्वत्वाद्धेतुमाहुः इतिशब्देनेति। हेतुरिति। इति शब्दार्थे तृतीयार्थः। प्रकृते। ज्ञानमेवेति श्रुतावेतावत्पदेन पूर्वोक्तज्ञानमनूद्यामृतत्वविधानात्। 'आत्मा वा अरे द्रष्टव्यः' इति ब्रह्ममात्रविषयकं तत्। इति पक्षस्येति इत्येवं सर्वस्य काशकृत्स्नपक्षस्य आश्मरथ्यौडुलोमिमतयोः सूत्रान्तरसत्त्वात्। अतिरोहितेति भाष्ये। काशकृत्स्नमतसिद्धमाहुः तस्मादिति उपसंहारस्यार्थनिर्णायकत्वात्। अधिकरणसिद्धमर्थमाहुः तस्मादिति। ब्रह्मैकदेशिवादात्। जीवद्वारेति 'अपरेयमितस्त्वन्यां' 'जीवभूताम्' इति गीतायाः काशकृत्स्नमते त्वियं शक्तिः संसारदशापन्नापि इत्येवमतिरोहितार्थम्। शंकराचार्यमते पूर्वसूत्र एव पूर्वपक्षः सिद्धान्तस्तूपिमतभेदात्। माध्वास्त्वत्राध्यायसमाप्तिवाक्यशब्दाक्षराणां ब्रह्मणि समन्वयमाहुः। रामानुजाचार्यास्तु सांख्यात्मा वा परमात्मा वेति संशयमाहुः। भास्कराचार्यास्तु शंकराचार्यवत् पूर्वसूत्रं व्याख्याय वाक्यं नामैकार्थप्रतिपादनपरं विभज्यमानमाकाङ्क्षावत्पदं पदजातमुच्यत इति वाक्यलक्षणमुक्त्वा त्रिसूत्र्यां भेदाभेदावुक्त्वा प्रतिपादिता भेदे भेदोपीत्याहुः भेदोप्यस्ति यतः संसारी न कदाचिन्मुक्तपूर्वः। तस्य मुक्त्यर्थं विद्योपदेशोऽर्थवानिति त देतत्रातिविरुद्धम्। माध्वोक्तवाक्यान्वयः श्रुतिषु स्मृतिषु च स्पष्ट इति न सूत्रविषयवाक्यत्वमर्हतीति भाष्ये प्रकाशे नानूदितानि मतानीति ध्येयम्। रामानुजभाष्ये तु काशकृत्स्नमतेन व्याससिद्धान्तसमाप्तिस्तदेकदेशिमतवाक्यं विरुणद्धि। भास्करभाष्येपि 'भार्गोज्ज्ञानमयो पर्धः' इत्यस्य विरोधः। जीवानामपि सत्त्वात् ॥ २२ ॥

इति सप्तममधिकरणम् ॥ ७ ॥

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ २३ ॥ (१।४।८)

एवं प्रकृतिकारणवादनिराकरणेन ब्रह्मण एव कारणत्वे सिद्धेऽप्यर्धजरतीयतयोभयस्थापनपक्षं परिहर्तुमधिकरणमारभते।

भाष्यप्रकाशः।

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ २३ ॥ अधिकरणप्रयोजनमाहुः एवं प्रकृतीत्यादि। आनुमानिकाधिकरणमारभ्य वाक्यान्वयाधिकरणान्तग्रन्थे आद्यैस्त्रिभिः सांख्यमतस्याशब्दत्वसाधनात् प्रकृतिकारणवादनिराकरणेन, यथाव्यपदिष्टाद्यधिकरणत्रये श्रुतिविप्रतिषेधपरिहाराद्, वाक्यान्वयाधिकरणे जीवब्रह्मवादनिराकरणात् पुरुषच्छायायुक्तप्रकृतिकारणवादनिराकरणेन ब्रह्मण एव जगत्कारणत्वे सिद्धेऽपि ब्रह्मणो निर्विकारत्वात् कार्ये त्रिगुणात्मकत्वादिदर्शनाच्च ब्रह्मणो निमित्तत्वं, स्मृतिसिद्धस्य प्रधानस्य समवायित्वमित्यभ्युपेयम्। यदि च श्रौत एवाग्रहस्तदाऽपि श्वेताश्वतरादावजावाक्यस्थस्याजापदस्य छागीशरीराभिधायकत्वाच्छागीशरीरं यथा तदधिष्ठातृशारीरात्मशक्तिविधया नानाप्रजाजनकं, तथा सांख्योक्तं प्रधानमपीश्वरोपाधिभूतं सन्नानाविधप्रजाजनकमित्येतमर्थं रूपकातिशयोक्त्या बोधयितुं शक्नोति। यदि चेदं नोपेयते तदापि,

रश्मिः।

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ २३ ॥ सांख्यराद्धान्तीयप्रकृतिनिराकरणात् स्मृताया गीतोक्तायाः 'अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्। जीवभूताम्' इति जीवरूपायाः उपेक्षानर्हत्वात् प्रसङ्गसंगत्या निरूपणमित्याहुः वाक्यान्वयाधिकरण इति। जीवब्रह्मेति।

'भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा' ॥

इति गीतायामष्टसु प्रकृतिपदम्। कापिलसांख्यप्रवचनसूत्रवृत्तौ विषयाध्याये 'सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोऽहंकारात् पञ्चतन्मात्राण्युभयमिन्द्रियं स्थूलभूतानि पुरुष इति पञ्चविंशतिर्गुणाः' इति सूत्रम्। तत्र पुरुषो जीवः। गीतायाम्

'अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो ययेदं धार्यते जगत्' ॥

इति नवमी प्रकृतिः। स जीवब्रह्मवादः अंशत्वाज्जीवस्य तदभेदेनोपक्रम्य मैत्रेयीब्राह्मणे तस्य निराकरणात्। पुरुषच्छायेति पुरुषो जीवः सांख्योक्तः। छायाऽर्कयोषिद् युक्ता प्रकृतिर्जगत्कर्त्री व्यामोहिका च ताभ्यां युक्तो यः प्रकृतिकारणवादः तस्य निराकरणेन। यद्वा। पुरुषो महत्तत्त्वं तस्य छाया प्रतिबिम्बो जीवः तेन युक्तो यः प्रकृतिकारणवादस्तस्य निराकरणेन। अर्धजरतीयतयेत्यादि भाष्यं विशदयन्ति ब्रह्मणो निर्विकारत्वादिति। एवमपि चिन्तामण्यादिवदविकृतं ब्रह्म कारणमिति चेत्तत्राहुः कार्ये त्रिगुणेति। स्मृतीति सांख्यस्मृतिसिद्धस्य 'प्रधानाज्जगज्जायत इति' इति सूत्रं स्मृतिः। अभ्युपेयमिति कार्ये त्रिगुणात्मकत्वायाभ्युपेयम्। अजेति अजामेकां लोहितेत्यादिवाक्यस्थस्य। छागेति कल्पनोपदेशसूत्रभाष्ये व्युत्पादितम्। छागीति पाठे जातित्वं विवक्ष्य यथाकथंचित्प्रयोगः। छागा शरीराधिष्ठाता जीवः तस्य शरीरात्मकशक्तिस्तत्कर्मार्जितत्वात्। अतस्तद्विधया। रूपकेति

भाष्यप्रकाशः ।

'यस्तन्तुनाभ इव तन्तुभिः प्रधानजैः स्वभावतो देव एकः समावृणोति स नो दधातु ब्रह्माऽव्ययम्' इति तत्रत्यवाक्यान्तरे तन्तुनाभशरीरस्य दृष्टान्तितत्वेन तन्तूनां प्रधानजत्वकथनेन च ईश्वरशरीरात्मकप्रधानांशैः शरीरैर्जीवानावृणोतीति सिद्ध्यति । अत एव, 'कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः' इत्यपि क्वचिदुच्यते तेन शुद्धसत्त्वात्मिका ईश्वरोपाधिः । रजस्तमोमिश्रमलिनसत्त्वात्मिका जीवोपाधिरित्युपाधिविभागोऽपि युज्यते । अत ईश्वराऽधिष्ठिता तच्छरीरभूता प्रकृतिरपि कारणम् । नच सा प्रथमकार्यरूपेति युक्तम् । चूलिकोपनिषदि,

'विकारजननीं मायामष्टरूपामजां ध्रुवाम् ।
ध्यायतेऽध्यासितां तेन तन्यते प्रेर्यते पुनः ॥
सूयते पुरुषार्थांश्च तेनैवाधिष्ठिता जगत् ।
गौरनाद्यन्तवती जनित्री भूतभाविनी' ॥ इति ।

श्रावणेन तद्विरोधात् । नच माया काचिदतिरिक्तैवेति वाच्यम् । विकारजननीमित्यनेन षोडशविकारजनकत्वस्य, अष्टरूपामित्यनेन प्रकृतिप्रकृतिविकृतिभेदेनाष्टरूपत्वस्य प्रकृतिधर्मस्य तस्यां श्रावणेन, श्वेताश्वतरे 'मायां तु प्रकृतिं विद्यात्' इति श्रावणेन, गीतायामपि, 'दैवी ह्येषा गुणमयी मम माया' इति, 'सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः' इति स्मरणेन च मायाशब्दस्य पर्यायतायामेव पर्यवसानात् । श्वेताश्वतरे, 'कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम्' इति सर्वान् वादानपास्य, 'ते ध्यानयोगनुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्' इति परमेश्वरशक्तेः स्वगुणनिगूढत्वश्रावणान्मैत्रायणीयोपनिषदि च, 'तमो वा इदमग्र आसीदेकं तत्परे स्यात् तत्परेणेरितं विषमत्वं प्रयात्येतद्रूपं वै रजस्तद्रजः खल्वीरितं विषमत्वं प्रयात्येतद्वै सत्त्वस्य रूपम्' इति श्रावणाद् गुणा अपि सत्त्वादय एव ग्राह्याः । अतः पूर्वोक्तन्यायैः सिद्धेऽपि ब्रह्मणः कारणत्वे शरीराख्यशक्तिरूपां तां विना कारणतानिर्वाहाभावादर्धजरतीयतया मायायाः समवायित्वं, ब्रह्मणो निमित्तत्वमित्युभयकारणत्वस्थापनपक्षपरिहारः प्रयोजनमित्यर्थः । एवं सति श्रुत्युक्तत्वाविशेषात् समवायिकारणं, प्रकृतिर्निमित्तकारणं ब्रह्म ? उत सर्वविधं कारणं

रश्मिः ।

'रूपकातिशयोक्तिः स्यान्निगीर्णाध्यवसानतः ।
पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति शिताः शराः' ॥ इति ।

ननूक्तमजापदं सूष्टिलक्षकमिति चेत्तत्राहुः यदि चेदमिति । क्वचिदिति तत्त्वानुसंधानग्रन्थादावुच्यते । अष्टरूपां गीतोक्ताम् । अध्यासितामिति ब्रह्मणाऽध्यासाख्यसंबन्धेन संबद्धाम् । अथ वा अन्यसंबन्धेन संबद्धाम् । गौरिति गौरनादवती सा त्विति पाठस्त्वन्यतः । प्रकृतीति एका प्रकृतिः सप्तप्रकृतिविकृतयः । इति श्रावणेनेति अभेदश्रावणेन । न्यायाः सूत्राणि । कारणतेति कुलालादौ तथादर्शनादिति भावः । अर्धजरतीयेति समन्वये सति जीवपरमात्मा ब्रह्म तदधीनं जगदभिन्ननिमित्तोपादानत्वमत्रार्धजरतीयम् । अर्धनारीश्वरवत् । निमित्तं ब्रह्म समवायी

ननु ब्रह्मकारणतां न निराकुर्मः श्रुतिसिद्धत्वात्। किंतु समवायिकारणं प्रकृतिरेव। कार्यकारणयोरवैलक्षण्यात्। समवायिकारणानुरोधि हि कार्यम्। अन्यत् सर्वं भगवानस्तु। अपेक्ष्यते च समवायिनिमित्तयोर्भेदः। कर्मण्यपि श्रुतिस्मृतिसमवायो धर्मे। एवं ब्रह्मवादेऽपि स्मृत्युक्ता प्रकृतिः समवायिकारणम्।

भाष्यप्रकाशः।

ब्रह्मेति संशयः। स च प्रयोजनकथनादर्थादेव लभ्यते इत्यतो नोक्तः। पूर्वपक्षमाहुः नन्वित्यादि। कार्यकारणयोरवैलक्षण्यं व्युत्पादयति समवायीत्यादि। तथाच कार्येषु क्वचिद् रजसः, क्वचित् तमसः क्वचित् त्रयाणामपि गुणानां प्रकाशप्रवृत्तिनियमादिभिरनुवृत्तिदर्शनाद्धेयत्वतुच्छत्वादेर्दर्शनाच्च कार्यमात्रं प्रकृत्यनुरोधीत्यतः प्रकृतिरेव समवायिकारणमित्यर्थः। ननु सत्तायाः सर्वत्रानुवृत्तिदर्शनाद् ब्रह्मणोऽपि समवायित्वमस्तु, किं बाधकमित्यत आह अपेक्ष्यते चेत्यादि। यदि हि भगवतः समवायित्वं स्यात् तद्गुणा अपहतपाप्मत्वादयः स्वरूपधर्माः सच्चिदानन्दाश्चानुवर्तेरन्। नचात्र भगवत्सत्तानुवर्तते। प्रतीयमानायास्तस्या भावविकारत्वेन ब्रह्मधर्मत्वाभावात्। किंच। यदि भगवानेव समवायी निमित्तं च स्यात् सर्वं कार्यं सर्वदा स्यात्। अपेक्षितस्य सामग्रीमात्रस्य भगवद्रूपतया सत्त्वात्। नचेयं लौकिकी युक्तिर्न वैदिकैरादरणीयेति वाच्यम्। यतः कर्मकाण्डेऽपि श्रुतिस्मृतिसमवायो धर्मेऽङ्गीक्रियते। अस्मदादिकृतेश्च निमित्तत्वम्। एवं ब्रह्मवादेऽपि स्मृत्युक्ता प्रकृतिः समवायिकारणं, ब्रह्म निमित्तकारणमित्येवाङ्गीकार्यम्। न चैवं तस्याः श्रौतत्वहानिः। यथा हि ब्रह्मणोऽनुमानगम्यत्वेऽपि मुख्यतया उपनिषद एव गमयन्तीत्यौपनिषदत्वमेवं प्रकृतिं मुख्यतया स्मृतिरनुमानं च गमयतीति तस्या आनुमानिकत्वं स्मार्तत्वं चाभिलप्यत इति तावन्मात्रेण तद्धानेरभावादित्येवं प्राप्ते इत्यर्थः।

रश्मिः।

जीव इति। इत्युभयकारणव्यवस्थापनपक्षो मैत्रेयीब्राह्मणे तस्य परिहारः। **प्रयोजनेति**। तदुक्तं पूर्वपक्षमिति। पूर्वोक्तसंशयप्रकारं स्फुटं सूचयन्तः पूर्वपक्षमाहुरित्यर्थः। **भाष्ये। न निराकुर्म इति**। मैत्रेयीब्राह्मणविचारेण न निराकुर्म इति। किंतु समन्वयसूत्रे तेन ब्राह्मणेनार्धजरतीयमुच्यते इत्यर्थः। **किंतु समवायीति**। अत्र सूत्रे पादार्धमहिम्ना एकसंबन्धिज्ञानमपरसंबन्धि स्मारकमिति 'प्रधानाज्जगज्जायत इति' इति सूत्रस्मरणात्। प्रकृतिः समावायिनी चेति स्फूर्त्या समन्वयसूत्रे मैत्रेयीब्राह्मणेन किंतु समवायिकारणं प्रकृतिरेवेत्यर्थः। यद्यपि 'न समवायोस्ति प्रमाणाभावात्' इति सांख्यसूत्रं तथापि प्रसिद्धाभिप्रायेण तदुक्तिरतो न व्याससूत्रविरोधः। **प्रकृते। प्रकाशे**त्यादि। तथा च सूत्रं 'प्रकृतेराद्योपादानतामन्येषां कार्यत्वश्रुतेः' 'प्रकाशस्तत्सिद्धौ कर्मकर्तृत्वविरोधः'। तत्सिद्धौ जीवसिद्धौ। कर्म जीवः कर्त्री प्रकृतिः प्रवृत्ती रजसा नियमश्चादिनाऽप्रकाशस्तमः-कार्यम्। **अनुवर्तेरन्नि**ति ब्रह्मवादाननुसंधायकोक्तिरतो न समन्वयाधिकरणविरोधः। जायतेऽस्ति विपरिणमति[1] वर्धतेऽपक्षीयते नश्यतीति षड् भावविकाराः प्रकृतिधर्माः सांख्ये। **कर्मण्यपी**ति भाष्यं विवृण्वन्ति न चेयमिति कर्मणीत्यस्यार्थमाह कर्मकाण्ड इति। **श्रुतिस्मृती** विधिपादे श्रुतयः स्मृतिपादे स्मृतयः इति। समवायो नित्यसंबन्धः। धर्मे नित्यधर्मव्यञ्जकक्रियारूपे धर्मे। एवं ब्रह्मेति भाष्यं विवृण्वन्ति एवं ब्रह्मेति। **श्रौतत्वे**ति प्रधानाज्जगज्जायते इति श्रौतत्वं चूलिकोपनिषदाद्युक्तं च

१. विपरिणमते।

ब्रह्म निमित्तकारणमित्येवं प्राप्ते उच्यते । प्रकृतिश्च निमित्तकारणं, समवायिकारणं च ब्रह्मैव । प्रकृतिपदप्रयोगात् स्मृतिसिद्धतृतीयसर्वधर्मापदेशः । चकाराद् यत्रेत्यादिसर्वसंग्रहः । कुत एतत्? । प्रतिज्ञादृष्टान्ताऽनुपरोधात् ।

भाष्यप्रकाशः ।

अत्र सिद्धान्तं वक्तुं सूत्रं व्याकुर्वन्ति प्रकृतिश्चेत्यादि । ईक्षतिना ईक्षत्यादिभिर्वा कर्तृत्वेन ब्रह्म सिद्धमेवेति न तत्रेदानीं शङ्का । अतः परं लोकन्यायेन कर्तुरुपादानोपकरणसापेक्षत्वादिह तदाकाङ्क्षायां पूर्वपक्षिणा प्रकृतिरुपस्थाप्यते । सा निमित्तकारणभूता समवायिकारणभूता च प्रकृतिरत्र ब्रह्मैव । न तु ततोऽतिरिक्ता प्रकृतिशब्दश्च स्वरूपे रूढो मृत्प्रकृतिर्घटः कार्पासप्रकृतिः पट इत्यादिप्रयोगदर्शनात् समवायिकारणमभिधत्ते, प्रकृष्टा कृतिर्येनेति योगमहिम्ना च निमित्तम् । अतः प्रकृतिपदप्रयोगाद् स्मृतिसिद्धा ये तृतीयकारणात्मका असमवायिनः सर्वे धर्माः संयोगादयस्तेषामपदेशः कथनम् । चकारात् पुराणोक्तानां,

'यत्र येन यतो यस्य यस्मै यद् यद् यथा यदा ।
स्यादिदं भगवान् साक्षात् प्रधानपुरुषेश्वरः' ॥

रश्मिः ।

पूर्वोक्तम् । ब्रह्मैवेति आकाशस्तल्लिङ्गादित्यधिकरणे उक्तत्वात् । हन्तैतमेव पुरुषं सर्वाणि नामान्यभिवदन्ति इति माध्वभाष्योक्तवाक्यादेवकारः । प्रतिज्ञासूत्राद्ब्रह्मेत्यनुवर्तते । न त्विति 'स पतिः पत्नी चाभवताम्' इति पुरुषविधब्राह्मणे 'प्राप्तं तन्निजरूपाय गोविन्दाय नमो नमः' इति श्रीविट्ठलेशदीक्षिताः अर्धनारीश्वरोपि । सांख्यमतेनोक्त्वाऽधुना प्रकृतिपदं प्रयुक्तं न प्रधानपदं तदाशयमाहुरित्याशयेन प्रकृतिपदेत्यादिभाष्यं विवृण्वन्ति स्म प्रकृतिशब्द इति । अयमर्थः । सत्यं प्रधानपदं प्रयोक्तव्यं 'प्रधानाज्जगज्जायत इति' क्षीरवचेष्टितं प्रधानस्य' इति चातः पुरुषोऽसङ्गः प्रधानं यत्तदभिन्ननिमित्तोपादानं तद्वाचकं आकाशस्तल्लिङ्गादिति न्याये ब्रह्मवाचकमिति तथापि तस्य न प्रसिद्धमीश्वरवाचकत्वं प्रकृतिपदस्य तु 'प्रणवत्वेन प्रकृतित्वं वदन्ति ब्रह्मवादिनः' इति गोपालतापिनीये 'प्रकृतिमगन् किल यस्य गोपवध्वः' इति च प्रसिद्धमतः प्रधानपदमतिहाय प्रकृतिपदमुपात्तमिति तदेतदुक्तं प्रकृतीत्यारभ्य रूढ इत्यन्तेन । यद्यपि वेदान्ते रूढिर्नास्ति तथापि ब्रह्मवादिनो वदन्तीति संहिताश्रुतेः ब्रह्मवाचकप्रकृतिपदरूढिः । यद्वा । योगमात्रं ब्रह्मज्ञानमित्यदोषः । यद्यपि यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम् । आविर्भावकशक्त्याधारत्वं वा कारणत्वं तद् ब्रह्मसामानाधिकरण्यादुपपन्नं तथापि पोषार्थं प्रयोगावाहुः मृत्प्रकृतिरिति । अभीति । स्वरूपप्रकृतिपदार्थः 'प्रकृतिमगन् किल यस्य गोपवध्वः' इति स्मृतौ । अतः प्रयोगादिप्रसिद्ध्या प्रकृतिपदं ब्रह्मणि प्रयुक्तं न ज्ञानिनामिव घटपटादिपदवत् । प्रकृष्टेति व्यवहारोपयोगित्वं प्रकृष्टत्वं न तु बालक्रीडार्थं सूपादिवद्वा कृतिः । संयोगादय इति सिद्धान्ते विभागात्सृष्टिः सृष्टिभेदवाद एभिः भाष्यप्रकाशकृद्भिरुक्ता सा । तेषां निमित्तान्तर्भूतानाम् । अत्र यद्यपि तृतीयपदार्थः सुषुप्तिः कामश्च संयोगादीनां चकारार्थे संग्रहात् तथा च कामसुषुप्त्योः सर्वधर्मापदेश इति भाष्यार्थो भवेत् कामाकामरूपं ब्रह्मेत्यर्थोपि सोप्युपलक्षणविधयास्तु न च वैराग्याय भाष्यप्रकाशीयोर्थः । स च सुषुप्तिव्याख्यानेपि तुल्ये सुषुप्तिस्वकामरूपो भगवानिति भाष्यादिति वाच्यम् । विरुद्धधर्माश्रयत्वेन कामस्फूर्तेः । चकारादि-

प्रतिज्ञा, 'अपि वा तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतं भवत्यविज्ञातं विज्ञातं भवति' इति । दृष्टान्तो यथा 'एकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्' इत्यादि । प्रतिज्ञादृष्टान्तयोरनुपरोधोऽबाधनं, तस्मात् । समवायिकारणज्ञाने हि कार्यज्ञानम् । उभयोर्ग्रहणमुपचारव्यावृत्त्यर्थम् । उपक्रमोपसंहारवत् ।

भाष्यप्रकाशः ।

इत्याधारादीनां सर्वेषां संग्रहः । तथाच जगतः सर्वविधं कारणं भगवानेवेत्यर्थः । हेतुं व्याकुर्वन्ति प्रतिज्ञेत्यादि । अपि वेत्युतशब्दस्यार्थः पाठान्तरं वा । प्रतिज्ञा तु नियमः । 'संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवा' इति कोशात् । स चात्रैकविज्ञानेन सर्वविज्ञानं भवतीत्याकारको निश्चय इति तद्बोधकं वाक्यमिह वाच्यवाचकयोरभेदविवक्षया प्रतिज्ञापदेनोच्यते । एवं दृष्टान्तवाक्यमपि दृष्टान्तपदेन । दृष्टान्तस्तु श्रोतृबोधसौकर्यहेतुर्वक्तृश्रोत्रोः संप्रतिपत्तिविषयोऽर्थः । तयोर्बोधकं चेदं वाक्यद्वयं तयोरबाधनाद्धेतोस्तथा । तथा च यदि समवायित्वं ब्रह्मणो नाद्रियेत कारकान्तरत्वं च तदिदं वाक्यद्वयं पीड्येत । अतस्तदभावादेव तथाऽभ्युपेयमित्यर्थः । तदाहुः समवायीत्यादि । नन्वेकतरेणापि कार्यसिद्धेः किमित्युभयोरुल्लेख इत्याकाङ्क्षायामाहुः उभयोरित्यादि । यथोपक्रमोपसंहारयोरैकार्थ्येनैकस्यार्थस्य सिद्धौ न तत्रोपचार इति शङ्का, तथाच प्रति-

रश्मिः ।

त्यादिभाष्यं विवृण्वन्ति चकारादिति । आधारेति तेनाधिष्ठानकारणत्वमाचार्यान्तरैरुक्तं तत्स्मारितम् । निमित्तान्तर्गतम् । पाठान्तरमिति अर्थान्वयसहिता श्रुतिरुपन्यस्ता लाघवादित्यर्थः । अत एव भवतिद्वयमन्वयार्थमधिकमुक्तम् । ननु छान्दोग्यीयश्वेतकेतूपाख्यानस्य प्रतिज्ञाविग्रहणं मैत्रेयीब्राह्मणोक्तप्रतिज्ञात्यागस्तत्र को हेतुरितिचेन्न विवादाध्यासितक्लिष्टकल्पनासंभवादुपदेशवाक्यापेक्षया गौणत्वाच्च । संविदागूरिति अयं कोशो धीवर्गेऽमरः दशाङ्गीकारनामानि । उत्तरार्धं तु 'अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः' इति । पक्षभिन्नत्वे सति निश्चितसाध्यवत्त्वं दृष्टान्तत्वम् । अनुमानमात्रविषयमिति दृष्टान्तं लक्षयामासुः श्रोत्रिति । यथा श्रोता यथा महानस इति पञ्चावयवगतावयवं श्रुत्वा सौकर्येण व्याप्तिं गृह्णातीति श्रोतृबोधसौकर्यहेतुर्दृष्टान्तः । एवं वक्तृश्रोत्रोः संप्रतिपत्तिः सम्यक् दृष्टान्तसहितः प्रबोधः संप्रतिपत्तिस्तद्विषयोर्थो भवति । प्रकृतेपि भवति हि मृत्पिण्डं ज्ञानं श्रोतुरेकविज्ञानेन सर्वविज्ञानसंप्रतिपत्तेः सौकर्यहेतुर्भवति च वक्तृश्रोत्रोः संप्रबोधविषयः सामान्यवाक्यवाच्ये विवरणेतिव्याप्तिवारणाय सौकर्यपदम् । सौकर्यं च श्रोतृबोध्यार्थसंस्पर्शित्वे सति तत्सुकरत्वम् । विवरणादौ श्रोतृबोधार्थसंस्पर्शित्वात् नातिव्याप्तिः यथा ब्रह्मविदाप्नोति परमित्यादौ सत्यं ज्ञानमनन्तं ब्रह्मेति विवरणे श्रोतृबोधार्थब्रह्मसंस्पर्शित्वम् । सुगमे दृष्टान्तरहिते वाक्येतिव्याप्तिवारणाय विशेषणदलम् । प्रशस्तस्य विशेष्यगतसमुपसर्गार्थस्य सत्त्वात् । कालेतिव्याप्तिवारणाय विशेष्यम् । 'सम्यग्वाढप्रशंसयोः' इति विश्वः । ननु तथापि नवकृत्व उपदेशे अतिव्याप्तिरितिचेन्न पौनःपुन्योपदेशवाच्यभिन्नत्वेन विशेषणीयत्वात् । एवं च पौनःपुन्योपदेशवाच्यभिन्नत्वे सति श्रोतृबोधसौकर्यहेतुत्वे च सति वक्तृश्रोतृप्रबोधविषयार्थत्वं दृष्टान्तत्वमिति फलितम् । अत्र तथा महानस इत्यत्र साम्यं यथाशब्दोऽमरात् । तथा च समत्वं दृष्टान्तत्वं तथा तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यम् । तदेव दृष्टान्तत्वं यद्यपि तथापि धर्मैः साम्यविशदनार्थं इवार्थभेदार्थमिदमेव लक्षणम् । तयोरिति प्रतिज्ञादृष्टान्तयोः । वाक्यद्वयं प्रतिज्ञावाक्यं दृष्टान्तवाक्यं च । पीड्येत

प्रतिज्ञामात्रत्वे अदृष्टद्वारापि भवेत् । दृष्टान्तमात्रत्वे त्वनुमानविधया स्यात् तथा सति सर्वसमानधर्मवद्ब्रह्म स्यान्न समवायिकारणम् । उभयोर्ग्रहणे तु प्रतिज्ञाया दृष्टमेव द्वारमिति समवायित्वसिद्धिः ।

भाष्यप्रकाशः ।

ज्ञादृष्टान्तयोरैकार्थ्येनेत्यत उभयोर्ग्रहणमित्यर्थः । तदेतदुपपादयन्ति प्रतिज्ञामात्रत्व इत्यादि । हेतोरिति शेषः । तथा च हेतुश्चेत् प्रतिज्ञामात्रमत्रोच्येत तदा अदृष्टा या योगजप्रत्यासत्तिस्त-द्द्वाराऽप्येकविज्ञानेन सर्वज्ञानं भवेत् । यथा, 'विश्वं पश्यति दूरतः' इति ।

'अनागतमतीतं च वर्तमानमतीन्द्रियम् ।
विप्रकृष्टं व्यवहितं सम्यक् पश्यन्ति योगिनः' ॥

इत्यादिवाक्योक्तम् । तथा सति न तेन समवायित्वसिद्धिः । यदि च दृष्टान्तमात्रं हेतुः स्यात् तदा, सर्वं वाच्यं ज्ञेयत्वात् तदेकदेशवत्, घटो वाच्यो ज्ञेयत्वात् पटवदित्यादिवत्, सर्वं सज्ज्ञेयत्वादित्यप्यनुमानं संभवतीत्यनुमानविधया स्यात् । तथा सति सर्वसमानो यो धर्मो ज्ञेय-त्वादिरूपस्तद्वद् ब्रह्म स्यान्न तु समवायिकारणम् । उभयोर्ग्रहणे त्वेकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया दृष्टमेव कार्यैकदेशप्रत्यक्षमेव द्वारं समवायित्वगमकम् । यथा ह्येकस्मिन् मृत्पिण्डे मृद्विकारत्वनिश्चयो-त्तरं सर्वस्मिंस्तत्सजातीये तथा ज्ञानान्मृत्तिकायां तत्समवायित्वज्ञानं तादृशैकदेशप्रत्यक्षादेव भवति, नानुमानात्, तथा प्रकृतेऽप्येकत्र सन्मयत्वे निश्चिते सर्वेषु तत्सजातीयेषु सद्विकारत्वज्ञानात सति सर्वसमवायित्वज्ञानं तादृशप्रत्यक्षादेव भवतीति सति समवायित्वसिद्धिर्न तु स्मृतिसि-द्धायाः प्रकृतेरित्यर्थः । ननु भवत्वेवमेकविज्ञानात् सर्वविज्ञानं, तथापि सा ब्रह्मोपाधिभूतत्वाद्

रश्मिः ।

इति क्लिष्टकल्पकं क्रियेत । योगजेति योगिनो द्विधा युक्ता युञ्जानाश्चातो योगजधर्मस्यापि द्वैविध्यम् । युक्तस्य तावद् योगजधर्मसहायेन मनसाकाशपरमाण्वादिनिखिलपदार्थगोचरं ज्ञानं सर्वदैव भवितुमर्हति द्वितीयस्य चिन्ताविशेषोपि सहकारीति । योगजधर्मप्रत्यासत्तिं प्रकृते वर्णयन्ति यथा विश्वमिति । न तेनेति विषयतासंबन्धेन संबन्धिनि विश्वस्मिन् समवायाभावात् । न च धर्मोदृष्टम् । योगजधर्मेपि धर्म-त्वात् । दृष्टान्तेत्यादि भाष्यं विवृण्वन्ति यदि चेति । सर्वं सदिति सर्वं ज्ञेयत्वेनानुभूतं पक्षः न चिन्नाप्यन्तर्यामी । अतो न साधारण्यं ज्ञेयत्वरूपहेतोः । इत्यपीति ननु किमनुमानान्तरमिति वाच्यम् । ब्रह्मज्ञानं सर्वज्ञानकारणं समवायिविषयकत्वात् मृत्पिण्डज्ञानवदित्यनुमानमस्तु । न त्विति तथाच सर्ववज्ज्ञाने विषयतासंबन्धो न तादात्म्यं समवायापरपर्यायम् । उभयोरिति भाष्यं विवृण्वन्ति उभ-योरिति । दृष्टमिति दर्शनविषयमित्यर्थः । इदमेव विषयविषयकं दर्शनं तदाहुः दृष्टमेव कार्यैकदेश-प्रत्यक्षमिति । दृष्टान्तरूपं तद्द्वारं कथमित्याकाङ्क्षायामाहुः यथा हीति । तथा ज्ञानादिति सामान्य-लक्षणालौकिकप्रत्यासत्त्यामृत्त्वेन ज्ञानात् । स्मृतीति । अनेन विशेषणेन वेदवेदान्तसारे द्वितीयनवमा-ध्याये आनन्दस्य जगत्कर्त्री शक्तिस्तस्याः कर्तृत्वं न विरुद्धम् । आत्मनोर्धत्वात् तेन तत्राभिन्ननिमि-त्तोपादानत्वमविरुद्धम् । समन्वयाधिकरणभाष्यविरोधश्च न । अत्राग्रे भेदाभेदमतनिरासदर्शनाद्विवर्त-विशिष्टाद्वैतमते निरस्यन्तः परिणामसूत्रस्य वक्ष्यमाणत्वाद्ब्रह्मवादाद्वैतं समर्थयितुं चिदचिच्छरीरविशिष्टस्य सत्त्वाद्युपाधिकस्य चोपादानत्वं दूषयितुं समवायिनं विचारयन्ति ननु भवत्विति । एवमिति पूर्वोक्तप्रकारेण केवलस्यैव प्रकृतित्वमित्येकविज्ञानेनेत्यादिः । ब्रह्मोपाधीति शुद्धसत्त्वप्रधाना यामा

भाष्यप्रकाशः ।

ब्रह्माविनाभूता वा, ब्रह्माविभक्ता वास्तीति शरीरद्वारकं ब्रह्मण एव समवायित्वं स्वतश्च कर्तृत्वमित्येव युक्तं पूर्वोक्तश्रुतिभ्यः । न तु केवलस्यैव प्रकृतित्वम् । उक्तव्याकोपात् । न च 'सदेव सोम्येदमग्र आसीद् एकमेवाद्वितीयम्' इत्यादिश्रुतिविरोधः । तत्र हि, सदेवेत्येवकारेणान्ययोगं व्यवच्छिद्याग्रे विघृणोत्येकमेवेति । एकशब्दश्च मुख्ये रूढः । 'एके मुख्यान्यकेवलाः' इति । तथा च मुख्यं ब्रह्मैवास्तीति सिद्ध्यति, न तु तेन तदविनाभूतस्याविभक्तस्य वा शरीरस्यासिद्धिरिति तदविरोधात् । न चैकपदस्य मुख्यार्थत्वमेव, न केवलार्थत्वमित्यत्र किं गमकमिति शङ्क्यम् । सुबालोपनिषदि प्रलयप्रकरणे पृथिवीलयमारभ्याक्षरं तमसि लीयत इत्यन्तेन सर्वस्य तमसि लयमुक्त्वाऽग्रे, 'तमः परे देवे एकीभवति दिव्यो देव एको नारायणः इति तमसो नामरूपविभागानर्हतया ब्रह्माविनाभावेनाविभक्ततया वाऽवस्थितिबोधनस्यैव गमकत्वात् । न च, 'लीङ् श्लेषणे' इति धात्वर्थादक्षरान्तानां तमसा अविभागस्तमसस्तु ब्रह्मणा स्वरूपैक्यमिति शब्दान्तरादवगम्यते, न त्वविनाभावोऽविभागो वेति वाच्यम् । अन्तर्यामिब्राह्मणे, यस्य तेजः शरीरं यस्य तमः शरीरमिति शरीरत्वेन श्रावणात् सुबालोपनिषद्यपि, यो मृत्युमन्तरे संचरन् यस्य मृत्युः शरीरमिति मृत्युपदेन सर्वानर्थमूलतया तस्यैवोल्लेखाच्च तमसः शरीरतयैव सिद्धत्वेन स्वरूपैक्यस्य ग्रहीतुमशक्यत्वात् । तस्मात् सशरीरस्यैव प्रकृतित्वं सच्छब्दवाच्यत्वं च, न केवलस्येति चेन्नैवम् । अद्वितीयपदविरोधापत्तेः । एकमेवेति कथनोत्तरं मुख्यान्यार्थयोर्वा-

रश्मिः ।

सा ब्रह्मोपाधिस्तदवच्छिन्ना चित् सगुणं ब्रह्म तथा च शंकरभाष्यं प्रकृतिश्चोपादानकारणं ब्रह्माभ्युपगन्तव्यं निमित्तकारणं चेति। ब्रह्माविनाभूतेति प्रतिबिम्बपक्षे ब्रह्मसगुणत्वापादिका। ब्रह्माविभक्तत्वेति रामानुजाचार्यमते तथाच भाष्यं प्रकृतिश्च ब्रह्मेति । तथा तत्राप्यविभक्तनामरूपं कारणावस्थं ब्रह्मैव प्रकृतिशब्देनोच्यत इति ब्रह्मविभक्ताप्युक्ता आत्मकृतेरिति सूत्रस्य भाष्ये अविभक्तनामरूप आत्मा कर्ता स एव विभक्तनामरूपः कार्यमिति । शरीरेति प्रकृतिद्वारकं मायायां ब्रह्मप्रतिबिम्बात् प्रकृतेः शरीरं रामानुजाचार्यमते अन्तर्यामिब्राह्मणोक्तं चिदचिच्छरीरं ब्रह्मणः सगुणस्येत्यर्थः । कर्तृत्वं त्वस्या एव स ईक्षांचक्रे स प्राणमसृजत इति श्रुतेः ईक्षापूर्वकं च कर्तृत्वं निमित्तकारणेष्वेव दृष्टं उभयमते । स्वतश्चेति आत्मनः स्वस्य च । अत्र मायाशरीरब्रह्मणः समवायित्वं प्रकृतिद्वारा स्वस्य कर्तृत्वमपि । पूर्वोक्तेति प्रतिज्ञादृष्टान्तोक्त्यादिभ्यः उभयमते । केवलस्येति प्रकृतिपदसामानाधिकरण्यम् । श्रुतीति उभयोः पक्षयोरेवकारेणोपाधिशरीरयोः व्यवच्छेदात् । अग्रे सृष्टेः पूर्वकाल इत्यर्थात् ब्रह्मणः । शुद्धस्य ब्रह्मणः तत्रोपनिषदि सदसती माया पुरुषविधब्राह्मणे च 'स आत्मानं द्वेधापातयदिति ततः पतिः पत्नी चाभवताम्' इति प्रकृतिपदस्वरूपे शक्तिरुक्तैव चूलिकायां तेन ब्रह्मणा अध्यासितां स्वस्यात्मरूपायामध्यासविषयायामहं प्रकृतिरिति परस्मिन्परावभासस्याध्यासत्वादिति नो व्याकोप इति वाच्यम् । उभयोरेकतरपक्षे विशेषात् । विघृणोतीति भगवान् निश्वासद्वारा । एक इति कोशोयम् । गमकत्वेति तथा च यदि केवलार्थः स्यात् तर्हि तमोवस्थितिकथनं न स्यात् । शब्दान्तरादिति लीयत इत्यनुक्त्वा एकीभवतीति कथनादित्यर्थः । यस्य तमः शरीरमिति तेजः शरीरमिति समभिव्याहारात् विरुद्धधर्माश्रयत्वे पर्यवसानात् नावान्तरप्रलयकारणतमोग्रहणम् । तस्यैवेति तमस एवकारेण शान्तस्य मङ्गलरूपस्य व्यवच्छेदः । स्वरूपेति अवान्तरमूलकारणतमसो

भाष्यप्रकाशः ।

रणार्थमेव तत्प्रयोगात् । अन्यथा तद्वैयर्थ्यस्य वज्रलेपायितत्वात् । न चाद्वितीयपदेन मुख्यत मेव विव्रियत इति वाच्यम् । एकमेवेत्यनेनैव समाभ्यधिकराहित्ये सिद्धे व्याख्यानापेक्षा एवाभावात् । तेनासिद्धावनेनाप्यसिद्धा सुतरां तदभावाच्च । एतेनैव, 'नान्यत् किंचन मिष इत्यन्तरनिषेधपरत्वमपि दत्तोत्तरम् । 'साक्षी चेता केवलो निर्गुणश्च,' 'यदा तमस्तन्न दिवा रात्रीर्न सन्न चासन् शिव एव केवलः' इति सर्वभूतवति काले तद्रहिते तमोऽवशेषाङ्किते च का ब्रह्मण एव केवलत्वश्रावणेन, यदा तमस्तत् स्वेनैकीभूतं तदा केवलो न शरीरीत्यर्थव्य क्तेर्द्विसंख्यापूरक एव निषेधपर्यवसानसिद्धेश्च । न च कालोक्तिविरोधः तस्याः सृष्ट्युत्तरव्य वहारे सर्वाधारतया प्रतीयमानकालोपरञ्जनेन पूर्ववृत्तान्तबोधनार्थत्वात् । अन्यथा शिष्य सृष्टिकालस्थत्वेन कालसत्तामनवधारयतः पूर्ववृत्तान्तबोधनाभावप्रसङ्गात् । न च कालसत्ताबोध कत्वे किं बाधकमिति शङ्क्यम् । एतस्य सर्वतः पूर्ववृत्तान्तबोधकत्वेन तत्र च सतोऽन्यस्य व्यव च्छेदे कालावच्छेदकप्रमाणस्यापि व्यवच्छिन्नत्वादत्र कालानुवादस्य वक्तुमशक्यत्वेन स्व भ्रतया कालसत्ताबोधने वाक्यभेदप्रसक्तेरेव बाधकत्वात् । न चात्र कालविशिष्टसत्त्सत्ताबोधक त्वमिति शङ्क्यम् । गौरवप्रसङ्गात् । समानजातीये बृहदारण्यकवाक्ये, सोऽनुवीक्ष्य नान्यदा-

रश्मिः ।

ग्रहणं तमोमवैक्ये भवति । तत्प्रयोगादिति अद्वितीयपदप्रयोगात् । **विवृतमिति** तथा च अद्वितीयत्वरूपं मुख्यत्वमित्यर्थः । **व्याख्यानेति** विवरणेत्यर्थः । नन्वेकमेवेत्यनेन द्वित्वादिवैशिष्ट्यं निषिध्यते इति कथं समाभ्यधिकराहित्यं युगपद्वृत्तिद्वयविरोधात् । इति चेत्तत्राहुः **तेनेति** एकमेवेत्यनेन । **अनेनेति** तद्विवरणेनाद्वितीयमित्यनेन । **तदभावादिति** व्याख्यानापेक्षाभावात् । **एतेनेति** एकपदव्याख्यानत्वेन । **मिषदिति** श्रुत्युत्तरादिति शेषः । **मिषदन्तरेति** व्यापारयन्निषेधपरत्वमद्वितीयपदस्येत्यर्थः । **शिव इति** । तमःपदादवान्तरप्रलयविषयत्वे तमोधिष्ठाता शिवः कृष्णः । **सर्वभूतेति** साक्षित्वं सर्वभूतवति काले सति । **तद्रहित इति** । तन्नेत्यादिनिषेधात् । **तमोऽवशेषाङ्कित** इति कालस्याग्रे विचार्यत्वात् बोधनार्थाय काल इत्यर्थात् तमो न कालविशेषणमपि तु तमः स्वाभाविककृष्णविशिष्टं तत्तदा शिवः सन्नवान्तरप्रलये केवल इत्यर्थः । एवं च तमोवशेष आधारत्वेन संबद्धांशस्तेनाङ्कित इत्यर्थो भवति न तु कालाधिकरणकं तमः इति किंतु कृष्णाधिकरणकं तमः काले तु तमोवशेष इति । **ब्रह्मण इति** शिवस्य चेत्यपि द्रष्टव्यम् । **यदा तम इति** विवृण्वन्ति यदा तम इति । **कालोक्तीति** केवलपदार्थेन सः । **प्रतीयमानेति** । स्थितिकालस्योपरञ्जनं समीपरञ्जनं अभावात्मकप्रलये प्रतियोगिनां कारणत्वेन योग्यं तेन पूर्ववृत्तान्तः । प्रतियोगिवृत्तान्तस्तस्य बोधनं तदर्थत्वात् । अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वात् । नन्वेवमपि सृष्टिवृत्तान्तकथनमस्तु कालोपरञ्जनस्य किं प्रयोजनमितिचेत्तत्राहुः **अन्यथेति** । **बोधाभावेति** । कालाभावे सति बोधाभावेत्यादिः । **व्यवेति** सदेवेत्यवकारेण शिव एवेत्येवकारेण चेत्यर्थः । **वाक्यभेदेति** यदा परामपदाभ्यां बोधितः कालोप्यासीत्तम साक्ष्यप्यासीच्छिवोप्यासीत् सदप्यासीदिति वाक्यभेदप्रसङ्गादित्यर्थः । **अनुवीक्ष्येति** ।

'अनु हीने सहार्थे च पश्चात् सादृश्ययोरनु ।
आयामे च समीपे च लक्षणादावनु क्रमे:' ॥

भाष्यप्रकाशः ।

त्मनोऽपश्यदित्यनुवीक्षाश्रावणस्य बाधापत्तेश्च । तस्माच्चिदचिच्छरीरविशिष्टस्य सत्त्वाद्युपाधिकस्य ब्रह्मोपादानत्वाङ्गीकारे केवलाद्वितीयश्रुत्योर्विरोधो दुर्वार एव । एवं च, तमः परे देवे एकीभवतीति, तमो वा इदमग्र आसीदेकं तत् परे स्यादित्यादावपि य एकीभावः स परस्वरूपत्वमेव, न तु नामरूपविभागानर्हत्वमात्रमित्येवं मन्तव्यम् । लयस्य श्लेषरूपत्वेन विभागाभावात्मकत्वे

रश्मिः ।

इति विश्वः । एतेषु सहार्थे अनु । तथा च अर्धाङ्गत्वेन सह वर्तमानां वीक्ष्यात्मनोन्यन्नापश्यत् किं तु आत्मैवेदमग्र आसीत् इति सृष्टिपूर्वकालेऽग्रे व्यवच्छिन्नात्मरूपेण स्वरूपात्मिकां प्रकृतिमगन्निति वाक्योक्तां प्रकृतिमपश्यत् । तृतीयसर्वधर्मोपदेश इति भाष्यात् । 'प्रणवत्वेन प्रकृतित्वं वदन्ति ब्रह्मवादिनः' इति गोपालतापिनीयाच्च । युक्तं च शब्दार्थयोरैक्यं औत्पत्तिकसूत्रात् । प्रणवस्वरूपं गायत्र्यर्थविवरणकारिकासु श्रीमद्गोस्वामिभिर्निरूपितम् । अनोरन्येर्थाः । हीने रामानुजाः शैवाचार्याश्च । हीनं चिदचिच्छरीरं वीक्ष्यात्मनोन्यन्नापश्यदपि तु चिदचिच्छरीरविशिष्टं आत्मानमद्वैतमपश्यत् विशिष्टाद्वैतमपश्यत् । माध्वनिम्बार्कयोः समीपेऽनुः अनु समीपे वर्तमानं भिन्नं जगद्वीक्ष्य आत्मनः आत्मकार्यात् अन्यन्नापश्यत् तथैव नैयायिकाः । यथा 'अविभक्तं च भूतेषु विभक्तमिव च स्थितम्' इति गीतायां तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वरूपसादृश्यं तत्रापि योज्यम् । ना पुरुषो वाऽन्यदिति छेदः सादृश्ये शंकरपादाः अन्वर्थसादृश्यं ज्ञानकाशायां मायायां विवर्ताद्वैते पश्चादित्यर्थे वानुः तथाऽविभागाद्वैते पश्चादर्थेऽनुः अनुमानसृष्टेः पश्चादनुवीक्ष्यात्मनोन्यत् नापश्यत् किं तु नानावृक्षरसा यथा मधुकृत् मधुभावानन्तरमद्वैतमपश्यत् तथापश्यत् । अविभागाद्वैतमपश्यत् । सादृश्येनुक्रमे भास्कराचार्याः ज्ञानकाशायां सदृश्यां मायायामनुवीक्ष्य भेदवाचकानां पदानां विक्षेपं कार्यात्मना वीक्ष्य यथा कटकं सुवर्णं सुवर्णं कटकं नेत्यत्र आत्मनोऽन्यन्नापश्यत् । ना आत्मनोऽन्यदपश्यदिति तन्मार्गीयोऽन्योर्थोपि ज्ञेयः । लक्षणादौ अनुरिति वैयाकरणाः 'लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः' इतिसूत्रे आयामेपि क्वचिद् द्रष्टव्यः । इति ब्रह्मणो निबन्धोक्तनानावादानुरोधिरूपं सोनुवीक्ष्येत्यत्र । सिद्धमाहुः तस्मादिति । पूर्वग्रन्थात् । एवेति । कालस्य तु श्रुत्यन्यथानुपपत्त्या ब्रह्मत्वं 'कालोऽस्मि लोकक्षयकृत्' इति स्मृतेश्चेति । नोपरञ्जनेनाप्यन्यमतसिद्धिः कालवदित्येवकारः । माया च तमोरूपेति नृसिंहतापिनीयात् । प्रकृतिरूपतमोपि स्वरूपमित्यापत्त्या सुबोधिन्युक्तावान्तरप्रलयविषयत्वं भज्येतेति तदर्थं तत्स्वरूपमाहुः एवं च तम इति अक्षरं तमसि लीयते तमः परे देवे एकीभवतीति वाक्यम् । परस्वरूपत्वमिति समाकर्षादित्यधिकरणोक्तरीत्या तमः स्वार्थात्समाकृष्यते प्रच्याव्यत इत्यनभिव्यक्तस्य तमसः परस्वरूपत्वं तथा च सुबोधिन्यामिष्टापत्त्या न तत्र विरोधः । एकीभावलक्षणं रामानुजभाष्येस्ति तद्विशेष्यीकुर्वन्ति न त्विति तथा च परस्वरूपत्वे सति नामरूपविभागानर्हत्वमेकीभावः । तथा च भाष्यं न तु लय एकीभावः इति तमोभिधानातिसूक्ष्मचिद्वस्तुप्रकारस्य ब्रह्मणो विभक्तनामरूपतयावस्थानमभिधीयते इति रामानुजानाम् । श्लेषेति श्लिष आलिङ्गने । तदक्षरात्मकत्वाज्जगतो ब्रह्मणा सह भवति । श्लेषरूपत्वेन विभागाभावात्मकत्वं न संयुक्तत्वम् । गुणत्वापत्त्या 'नायं गुणः कर्म न सत्र चासन्' इति गुणत्वनिषेधात् । तथा च 'श्रुतिः यथा प्रियया स्त्रिया संपरिष्वक्तः' इति । प्रस्थानरत्नाकरेपि स्पर्शनिरूपणे श्लेषस्तु विभागाभाव एव संयुक्ता अप्यद्रुत्यश्चतस्रो भवन्ति संश्लेषे तु न तथा

भाष्यप्रकाशः ।

एकीभावस्य पृथक्त्वाभावात्मकत्व एव पर्यवसानात् । न च शरीरत्वबोधकश्रुतिविरोधः तस्याः सृष्टिकालीनवृत्तान्तपरत्वात् । अन्तर्यामिब्राह्मणे तथात्वस्य स्फुटत्वात् । सुबालोपनिषद्यपि, 'अन्तःशरीरे निहितो गुहायामज एको नित्यः' इत्युपक्रम्य पृथिव्यादिमृत्य्वन्तानां शरीरत्वकथनेन तत्रापि सृष्टिपूर्वकालाऽलाभात् । प्रलयप्रकरणस्य प्रागेव समाप्तत्वाच्च । तस्मान्नोक्तशरीरविशिष्टस्य प्रकृतित्वम् । नापि प्रधानादेर्गर्तपतितमृतसर्पादिवत् स्थितिरिति निश्चयः ।

रश्मिः ।

यथा मिलिताङ्गुलेरिति । एवेति न चैकत्वरूपसंख्यायामन्तर्भावोऽस्त्विति शङ्क्यम् । 'न पश्यतीत्याहुरेकीभवति' इत्यादि बृहदारण्यके 'ततोन्यद्विभक्तं यत्पश्येत्' इत्यादौ विभक्तपदेन विभागोपस्थित्या एवमन्यत्र शारीरब्राह्मणेऽन्यं नवतरं कल्याणतरꣳरूपं तनुत इत्यत्र पृथक्कुरुते इत्यर्थ इति पार्थक्योपस्थित्या चैवकारः । शारीरत्वेति 'तम आसीत् तमसा गूढमग्रे प्रकेतम्' । तमसस्तन्महानजायतैकम्' इत्यादि श्रुतिविरोधः । रामानुजाचार्यमतेऽस्याः शरीरत्वबोधकत्वं तथा मनुस्मृतेश्च—

'आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः' ॥

इति शरीरत्वबोधकत्वं सिद्धान्ते तस्यास्तस्याश्चावान्तरसृष्टिकालीनेत्यादिः । न तु स्थितिप्रलयकालीनवृत्तान्तबोधकत्वमिति वार्थः । न तु सृष्टिप्राक्कालीनवृत्तान्तबोधकत्वमिति वार्थः । स्फुटत्वादिति पृथिव्यादिशरीराणां सृष्टिकालीनत्वादित्यर्थः । ननु परस्वरूपसत्त्वे इति विशेषणेङ्गीकृते एकीभावलक्षणस्यासंभवः । तमसोऽव्यक्तत्वेन तस्य च महानव्यक्ते लीयते अव्यक्तमक्षरे लीयते इति प्रलयश्रुतेरव्यक्तस्योत्पत्तिप्रलयौ प्रतीयेते तथा च महाभारते

'तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम ।
अव्यक्तं पुरुषे ब्रह्मन् निष्कले संप्रलीयते' ॥

इति परस्वरूपत्वाभावाद्विशेषणाभावप्रयुक्तविशिष्टाभावादिति चेन्न । अत्र हेतुमाहुः प्रलयेति । प्रागेवेति । अक्षरं तमसि लीयते तमः परे देवे एकीभवतीत्यादेः प्रागेवेत्यर्थः । तथा चात्र प्रकरणाभावात् नोत्पत्तिप्रलयौ ततश्चानित्यत्वाभावात् न विशेषणाभावप्रयुक्तविशिष्टाभावः । तस्मादिति ततश्च परस्वरूपत्वात् । नोक्तेति व्याख्यातमेतत् । एवं चिदचिच्छरीरविशिष्टस्वप्रकृतित्वं निवार्य शंकराचार्यमतेपि वारयन्तो भास्कराचार्यमतेप्याहुः नापीति. गर्ते विषयादिदार्ष्टान्तिके । मृतेत्यनेन जडत्वं दार्ष्टान्तिकेपि दृष्टान्तस्तु टीकायां द्रष्टव्यः । तथा च विषयपतितजडप्रधानादेरित्यर्थः । विवर्तात्मन एव परिणामसूत्रे विवर्तः परिणाम इति व्याख्यानात् । गीतायां विद्धनादी उभावपीत्यत्र व्यवहारे वयं भाट्टा इति 'न कदाचिदनीदृशं जगत्' इति पूर्वमीमांसायाः प्रच्छन्नबौद्धत्वाच्च प्रतिबिम्बितसगुणस्यानादित्वम् । अतः सगुणस्यैव निमित्तत्वं उपादानत्वं चेत्यपि न केवलाद्वितीयश्रुत्योर्विरोधादिति । गीतायां कारणताशक्तिः प्रकृतिरिति विशिष्टाद्वैतमिति रामानुजाः । सुबोधिन्यां द्वितीयस्य नवमाध्याये सदानन्दस्य जगत्कर्त्री शक्तिः सा स्वरूपं सद्त्रोपयुज्यते इति 'प्रकृतिं पुरुषं चैव विद्धनादी उभावपि' इत्यत्र तृतीयपुमर्थरूपं केवलं मद्भेवोच्यतेत्रापि । अत्र परिणामस्यात्त्विकोन्यथाभावः इति विशेषः तन्तुनामतन्तुवत् । आदिपदेन भास्कराचार्यभाष्ये शंकराचार्यमतेन आत्मकृतेरिति सूत्रे आत्मकृतेरित्यादि व्याख्याय परिणामो विवर्तत्वेन न स्वीकृतः ततश्चाभेदे त्रैलोक्य-

भाष्यप्रकाशः ।

एवं सति गौरनाद्यन्तवतीत्यादौ, 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि' इत्यादौ च यदनादित्वादिकथनं, तच्चतुर्मुखाऽजत्रिदशाऽमरन्यायेन जगत्साधारणोत्पत्तिनाशनिषेधपरमित्येव मन्तव्यम् ।

'तन्मायाफलरूपेण केवलं निर्विकल्पितम् ।
वाङ्मनोगोचरातीतं द्विधा समभवद् बृहत् ॥
तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका ।
ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयते' ॥

इत्यादिपुराणवाक्येभ्यश्च । तेन, यस्तन्तुनाभ इति वाक्यमपि प्रधानोत्पत्त्यनन्तरकालवृत्तान्तबोधकमेवेत्येव निश्चयः । एषैव परमाण्वादिकारणवादानामपि गतिर्बोध्या । कालः स्वभाव इतिश्रुत्यैव तेषामनादरणीयत्वस्योक्तत्वादिति । तस्मात् केवलस्यैव ब्रह्मणः समवायित्वमिति निश्चयः । एवं सत्येकविज्ञानेन यत् सर्वं विज्ञातं तन्न योगजधर्मादिना, न वा अविनाभाव-

रश्मिः ।

सांकर्यप्रसङ्गः इति भेद आस्थित कार्यात्मना इत्येव । एवं च न त्रैलोक्यसांकर्यप्रसङ्गः इति मतम् । तत्र विक्षिप्तगुणः प्रकृतिः परिणामः । विक्षिप्तगुणा प्रकृतिरित्यादिपदार्थो विक्षिप्तगुणप्रधानं तस्य स्थितिः द्वितीयादिशब्दार्थभूतमुपाधिदृष्टान्तो जलचन्द्रेषु जलं तद्वत् । एवं चेति गौः प्रकृतिः । अनादित्वादीति । आदिशब्देनान्तर्विकृतत्वं च 'विकारांश्च गुणांश्चापि विद्धि प्रकृतिसंभवान्' इत्युत्तरार्धात् । चतुर्मुखे चतुर्मुखश्चासावजश्च त्रिदशाश्च तेऽमराश्चेत्यनेन न्यायेन । अत्र अजशब्देनोत्पत्तिनिषेधो जगत्साधारणः परब्रह्मणस्तूत्पत्तिरस्त्येव नारायणाद् ब्रह्माऽजायत इति श्रुतेश्च । अमरशब्देन नाशनिषेधः सोपि जगत्साधारणः त्रिदशानां प्रलये नाशात् । यथा पश्चाच्छायी प्रथमप्रबोधी तं प्रति लोको वक्ति न स्वपितीति तद्वत् । मन्तव्यमिति शंकररामानुजभास्करादिमतानुयायिभिर्मन्तव्यं कुत इत्यतो हेतुमाहुः तन्मायेति । मायाफलं प्रतिबिम्बादि शंकरभास्करमतयोः । मायाचित् फलं चित् ताभ्यां रूप्यते व्यवह्रियत इति इति रामानुजाचार्यमतोर्थकः । शैवमतेपि चकारादुक्तवाक्यानि । तेनेति उपाधिचिदचित्तां विवक्षणेन । एषैवेति सांख्यमतस्य कारणत्वांशेऽवैदिकत्वप्रतिपादनेन समीपतरवर्तिनि कारणत्वांशेऽवैदिकत्वादिरूपा सा सामान्यतोग्रेधिकरणे विशेषतो द्वितीयाध्याये स्पष्टा । परमाण्वादयः कारणानि तेषां वादानामित्यत्र परमाणवः आद्यो येषां कालादीनामित्यतद्गुणसंविज्ञानोपीत्याशयेनाहुः काल इति । इयं श्वेताश्वतरेस्ति । तद्गुणसंविज्ञानपक्षे परमाण्वादिवादा उपलक्षणविधया ज्ञेयाः

'कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम् ।
संयोग एषां न त्वात्मभावादात्माप्यनीशः सुखदुःखहेतोः' ॥

इति । सिद्धमाहुस्तस्मादिति प्रकृतेः स्वरूपत्वेनोपाध्यायभावात् । सिद्धान्ते तु प्रकृतिं पुरुषं चेति व्युत्पादितम् । श्लोकानन्तरम्

'कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते' ॥

इत्यादिकं द्वितीयस्कन्धनवमाध्यायोक्तरीत्योपपाद्य तन्मायाफलरूपेणेत्यादिसांख्यमतेन वेदान्ते इति च न तदर्थं उच्यते । न योगजेत्यादि नैयायिकादिमते भेदवादा योगजज्ञानलक्षणा

कार्यकारणयोर्भेदाभेदमतनिराकरणाय पिण्डमणिनखनिकृन्तनग्रहणम्। तथा सति यत्र क्वचिद् भगवान् ज्ञातः सर्वत्र ज्ञातो भवति। सर्वं च ज्ञातं भवति

भाष्यप्रकाशः।

महिम्ना, नाप्यविभागादिमहिम्ना श्रुत्यभिप्रेतं, किंतु दृष्टेनैव द्वारेणेति सिद्धम्। अतः परं दृष्टान्ते पिण्डादिपदग्रहणस्य प्रयोजनं विचारयन्ति कार्यकारणयोरित्यादि। कार्यकारणयोरभेदे त्रैलोक्यव्यवहारः संकीर्येत। अत्यन्तभेदे चैकविज्ञानेन सर्वविज्ञानं बाध्येत। अतस्तयोर्भेदाभेद एवाश्रेयः। दृश्यते च तथा। तन्तव एव ह्यातता विततास्च सन्तो लोके पटत्वेन व्यवह्रियन्ते, प्राम्रियन्ते, पटत्वजातिं च बिभ्रति। एवं च प्रतिज्ञादृष्टान्तयोरुभयोरप्युपपत्तिरिति मतनिराकरणाय पिण्डादित्रयग्रहणम्। यदि हि भेदाभेद आद्रियते, तदा येन रूपेण भेदस्तद्रूपं कारणज्ञानेन न ज्ञातं भवेत्। ततो भिन्नत्वात्। अथ ज्ञायते तर्हि न तद्रूपं भिन्नमित्यभेद एवाश्रेयः, कृतं भेदेन। न च सर्वथा अभेदे व्यवहारसांकर्यप्रसङ्गः। अवस्थाभेदादेव तन्निवृत्तेः। अतः कयाचिदवस्थयाऽवस्थितं कारणमेव कार्यं न तु ततो भिन्नाभिन्नमिति बोधनायावस्थारूपाणां पिण्डादीनां ग्रहणमित्यर्थः। एवमङ्गीकारे गुणमाहुः तथा सतीत्यादि। कार्यस्यैव-

रश्मिः।

सामान्यलक्षणा चालौकिक्यः प्रत्यासत्तयः उपाधिवादिनामविनाभावोपि पूर्वं व्याख्यातः। विशिष्टाद्वैतवादिनामविभागादिः। भिक्षुमतेपि। दृष्टेनैवेति शास्त्रदृष्टेन मनसा भक्तिसहकारिकारणकेन भक्तिरेव वा मनःकल्पनरूपा। तथा च बृहदारण्यके मनसैवानुद्रष्टव्यो नेह नानास्ति किंचन। गोपालतापिनीये भक्ती रहस्यभजनं तदिहामुत्रफलभोगनैराश्येनामुष्मिन् मनःकल्पनमेतदेव च नैःकर्म्यमिति। यद्वा दृष्टेन समवाय्येकदेशमृत्पिण्डादिप्रत्यक्षेण द्वारेण। भेदाभेद इति। न भेदाभेदावित्युक्तम्। अत्यन्तभेदस्य प्रतीयमानस्याविवक्षणात् ततः 'समर्थः पदविधिः' इत्यस्याप्राप्तिः। अतः भेदयुक्तोऽभेद इति समासः स त्वत्यन्तभेदे बाधितः। अत्यन्तभिन्नपरनिष्ठभेदेन युक्तो घटप्रतियोगिकभेदाभावो नास्तीति। अतस्त्रैलोक्यव्यवहारसांकर्यनिवृत्तिमात्रप्रयोजकः सुवर्णं कटकं नेत्यादिरूपभेदस्तेन युक्तोऽभेदः कटकं सुवर्णमित्यादिरूपस्तद्वाचकपदैः समासस्त्वेष्टः। ननु द्वन्द्वनियामकोऽवास्तवो भेद इति मुक्तावल्यां विश्वनाथ इति चेन्न भास्कराचार्यमतेऽस्य वास्तवत्वात्। अन्यथैकविज्ञानेन सर्वविज्ञानबाधापत्तेः। जयरामकृतसमासवादे च समासत्वं विभक्तिशून्यपूर्वपदकनामसमुदायत्वम्। अत्र विभक्तिशून्यपूर्वपदकत्वं विभक्तिशून्यपदघटितशाब्दबोधप्रयोजकानुपूर्वीमत्त्वम्। शाब्दबोधे तु ह्यत्यन्तभेदस्याभावाद्भेदाभेदाविति द्वन्द्वे कृतेऽव्याप्तिरतो भेदयुक्तोऽभेद इति समासान्तरं युक्तम्। देवपूजको ब्राह्मणो देवब्राह्मण इतिवत्। भेदस्याभेदो भेदाभेद इति वा सहिष्णुत्वं षष्ठ्यर्थः। भेदसहिष्णुरभेदो भेदाभेद इत्यर्थः। प्रतिज्ञादृष्टान्तयोरिति आत्मा कर्ता प्रधानं समवायि तां शक्तिं विक्षिपति यथा सूर्यो रश्मीनां विक्षेपं करोति तद्वदेव संहरति अत एव प्रतिज्ञा 'उत तमादेशम्' इत्यादिः दृष्टान्तो मृत्पिण्डादिस्तयोरित्यर्थः। उपपत्तिरिति अभेदे प्रतिज्ञोपपत्तिः कार्यकारणयोः सूर्यरश्म्यादिरूपयोर्भेदे पिण्डादिदृष्टान्तोपपत्तिः। अवस्थेति धर्मरूपेणाविर्भवतीति द्वितीयनवमाध्याये इति साऽवस्था तेन भेदाभेदवादे भेदाभेदोप्यनया दिशा समर्थनीय इति सूचितम्। न त्वन्तर्यामिब्राह्मणोक्तपृथिव्यादिशरीरज्ञानेन किं तु तदेकदेशपिण्डादिज्ञानेन सर्वविज्ञानमिति। यद्वा भेदाभेद-

इति सामान्यलक्षणप्रत्यासत्तिनिराकरणाय च, वाचारम्भणं विकारो नामधेय-

भाष्यप्रकाशः।

मवस्थाविशेषविशिष्टकारणरूपत्वे ज्ञाते सति यत्र क्वचित्कार्ये केनचिदवस्थावैशिष्ट्येन भगवान् ज्ञातः सर्वत्र कार्ये तत्तदवस्थाविशिष्टत्वेन ज्ञातो भवति, सर्वं च कार्यं तदभिन्नत्वेन ज्ञातं भवतीति बोधसौकर्यरूपो गुण इत्यर्थः। नन्वत्र सामान्यप्रत्यासत्तिर्नोद्दिष्टेत्यत्र किं गमकमित्यत आहुः सामान्येत्यादि। चोऽवधारणे। यदि हि सामान्यलक्षणात्र विवक्षिता स्यात् तदा, तत् सामान्यादिति वदेन्न तु वाचारम्भणमित्यादि। वदति त्वेवम्। तत्रायमर्थः। यो विकारः पृथुबुध्नोदरादिः स वाचारम्भणं वाचिकक्रियात्मको न तु कारणाद् व्यक्तिभेदापादकः। यथा सुप्त उत्थित उपविष्टे च पुरुषेऽवयवविन्यासभेदोऽतो नामधेयं नैमित्तिकक्रियायाः पदार्थस्वरूपभेदानापादकत्वान्नामैव। तथा चात्र कारणावस्थात्मनैवैकरूप्यस्य विवक्षितत्वाद् व्यक्ति-

रश्मिः।

वादः। संभ्रमात्। भ्रान्तेर्जीवधर्मत्वात्। क्वचित्कार्ये इति क्वचिदिति कार्यानियमः ब्रह्मविदां ज्ञानादिविषयो तेन कारणावस्थायामपि ब्रह्मविदां ज्ञानादिविषयायां बोध्यम्। भगवानिति तथा च सुबोधिन्यां एकैकस्मिन् पदार्थे दशविधलीलासहितो भगवांस्तिष्ठतीति। वदेदिति एकविज्ञानेन सर्वविज्ञानाय वदेत्। वाचिकेति वाचिकेत्यनेन मानस्याः कायिक्याश्च व्युदासः तादृशक्रियाजन्यः 'शब्द इति चेन्नातः प्रभवात्' इति सूत्रोक्तः स वाचिकक्रियात्मकः तथा च तदनन्यत्वसूत्रभाष्यम्। तत्र विकारो वाङ्मात्रेणैवारभ्यते न वस्तुत इत्यर्थः। प्रतिभातीति। एवं च पृथुबुध्नोदरादिरिति यथा श्रुतं चेत् 'मृदादि भगवत्कार्यं घटाद्याकारसंयुतम्' इति निबन्धो विरुध्येतेति पृथुबुध्नोदरादिपदं षड्भावविकारलक्षकं स षड्भावविकारः वाचैवारभ्यते यतः सुवर्णं वस्तु मृत्पिण्डादि च 'जायतेऽस्ति विपरिणमति वर्धतेऽपक्षीयते नश्यति' इत्यादिशब्दविषयकं भवति। न त्विति किं तु कायिकक्रियात्मक एव कारणाद्व्यक्तिभेदापादकः। अत्र दृष्टान्तमाहुः यथेति। अवयवेति षड्भावविकारस्थानापन्नः। नैमित्तिकेति जलाहरणादिनिमित्तैः संपाद्यते या क्रिया तस्याः जननादिषड्रूपायाः। पदार्थेति अन्यथा षड्भावविकारैः देवदत्तादिरूपपदार्थभेदः स्यात् तेन च प्रत्यभिज्ञाबाधप्रसङ्गः स्यात्। नामैवेति तथा च स्वार्थे धेयप्रत्ययः इति भावः। व्यक्तिभेदानादर इति। अयमर्थः। सुकृतं सुवर्णमिति सुवर्णस्य विशेषणविशिष्टस्य वाक्ये ग्रहणात्। सुकृतं समवायि विवक्षितम्। एवं च कटकादिरूपं सुवर्णं जगद्रूपं ब्रह्म घटशरावादिरूपं पिण्डमित्येवं व्यक्तिभेदानादरः स च सामान्यलक्षणप्रत्यासत्त्या न कटकत्वादिरूपया ब्रह्मत्वरूपया घटत्वादिरूपया ज्ञानेन संभवति व्यक्तिभेद एव तत्प्रसरात्। नन्वस्ति व्यक्तिभेदः स्वस्वकारणाभेदेपि अन्यस्मात् स्वस्वकारणभेदभिन्नाद्भेद इति। जगति त्वनुभवेनैव भेद इति चेन्न स्वस्वकारणेत्याद्युक्तानां जगत्यन्तर्भावात् तस्य च ब्रह्मत्वात् तस्य चैकत्वात् तत्र च स्वगतभेदाभावान्मनसा भक्त्या जगदन्तर्गतपदार्थानामेकत्वेन ज्ञानं तत्र भक्तिर्व्यापारो मनःकरणं तथा च भक्तिः प्रत्यासत्तिर्न सामान्यलक्षणेति। इदं बृहदारण्यकोक्तरीत्या मनसैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवमिति गोपालतापिनीये 'भक्तिरस्य भजनं तदिहामुत्र फलभोगनैरास्येनामुष्मिन् मनःकल्पनमेतदेव च नैष्कर्म्यमिति' गीतायां च—

भाष्यप्रकाशः ।

भेदानादर एव सामान्यलक्षणानादरगमकः । यथा बहुसुवर्णाकाङ्क्षायां कटककुण्डलकलशभृङ्गारादिव्यक्त्यनादरस्तथेत्यर्थः । एतदेवैकादशस्कन्धे भगवताप्युक्तम् ।

'यथा सुवर्णं सुकृतं पुरस्तात् पश्चाच्च सर्वस्य हिरण्मयस्य ।
तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत् ॥
न यत् पुरस्तादुत यन्न पश्चान्मध्येऽपि तन्न व्यपदेशमात्रम् ।
भूतं प्रसिद्धं च परेण यद्यत् तदेव तत्स्यादिति मे मनीषा' ॥

इति । यत् परेण भूतं यच्च परेण प्रसिद्धं तत्तदेव स्यादित्यर्थः । अंशे कार्यत्वाभावात् प्रसिद्धमिति पृथग्व्यपदेशः । एवमष्टमस्कन्धेऽपि ।

'यथा हिरण्यं बहुधा समीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु ।
एवं वचोभिर्भगवानधोक्षजो व्याख्यायते लौकिकवैदिकैर्जनैः' ॥ इति ।

एतेनाकारादिभेदकृत एव तत्तल्लौकिकवैदिकव्यवहारभेदो, न वस्तुभेदकृतः । यथा कलशरूपेण सुवर्णेन जलाहरणादिकं, कटककुण्डलादिरूपेण तेन हस्तकर्णादिशोभनमिति । एतेनैव फलभेदोऽपि व्याख्यातः । अन्यच्च तत्रैवाऽमृतमन्थने ब्रह्मस्तुतौ—

'त्वय्यग्र आसीत् त्वयि मध्य आसीत् त्वय्यन्त आसीदिदमात्मतन्त्रे ।
त्वमादिरन्तो जगतोऽस्य मध्यं घटस्य मृत्स्नेव परः परस्मात्' ॥

इति । कुत्सितत्वादिभानं तु दोषदृशामेव, न ब्रह्मविदाम् । यथा साङ्गे पुरुषस्य । प्रसिद्धं तद् ऋषभदेवादिषु । तस्माद् भगवतः समवायित्वमप्रत्यूहम् । ननु यदि विकारस्य वाङ्मात्रत्वं तदैतेन

रश्मिः ।

'सर्वभूतेषु येनैकं भावमव्ययमीक्षते' ।
'अविभक्तं च भूतेषु तज्ज्ञानं विद्धि सात्त्विकम्' ॥

इति सत्त्वं वा प्रत्यासत्तिः 'सत्त्वात्संजायते ज्ञानम्' इति वाक्यात् । अधिकारभेदेन ननु भक्तिसत्त्वयोः प्रत्यासत्तित्वं न प्रसिद्धं इति चेन्न ज्ञानलक्षणप्रत्यासत्तेः प्रसिद्धत्वात् भक्तिर्ज्ञानं सत्त्वं ज्ञानं अतः सामान्यलक्षणानादर इत्यर्थः । यथेति बहु सुवर्णमित्यत्र सुकृतमित्येव तस्याकाङ्क्षायां तत्तद्व्यक्तित्वेनानादरः किं तु सुवर्णत्वेन कटकादिकं सुवर्णमिति प्रत्येति तद्वत् 'भृङ्गारः कनकालुका' इति कोशः । सुकृतमिति विशेषणं कार्यात्मनावस्थितमित्यर्थकं योग्यत्वाय । असुकृतस्य पुरस्तात्त्वाभावात् । अस्येति जगतः । कारणताग्राहकान्वयमुक्त्वा व्यतिरेकबोधकं वाक्यमाहुः न यदिति । प्रसिद्धमिति । अंशत्वेन प्रसिद्धमकार्यम् । अष्टमेति । द्वादशस्कन्ध इत्यपि पाठः । क्रियाभिरिति जलाहरणादिरूपाभिः तत्तदाकारवचनानुकूलाभिर्वा । वचोभिरिति घटपटादिरूपाभिः । अजः शब्दाम्भोकारः । एतेनेति दृष्टान्ते फलभेदेनैव दार्ष्टान्तिक इत्यर्थः । मृत्पिण्डेन सर्वं मृण्मयमिति श्रुत्यनुकूलवाक्यान्तरमाहुः अन्यच्चेति । विकारस्येति षड्भावविकारस्य ।

मिति । अलीकत्वनिराकरणाय च मृत्तिकेत्येव सत्यमिति । ब्रह्मत्वेनैव जगतः सत्यत्वं, नान्यथेति ।

सामान्यलक्षणप्रत्यासत्तिनिराकरणं च स्पष्टमेवाग्रे त्रीणि रूपाणीत्यत्र करिष्यति । अतो ब्रह्मरूपेण सत्यस्य जगतो ब्रह्मैव समवायिकारणम् ।

भाष्यप्रकाशः ।

वाक्येन ब्रह्मणो विवर्तोपादानत्वमुपगम्य प्रपञ्चस्यालीकत्वमेवाद्रियतां तावताऽप्येकविज्ञानेन सर्वविज्ञानसिद्धेरित्यत आहुः अलीकत्वेत्यादि । नान्यथेति न प्रतिनियतेन घटादिरूपेण, न वा जातिरूपेण नाप्यवान्तरोपादानरूपेण । तेषां रूपाणां व्यवहारमात्रार्थत्वादित्यर्थः । एतेन सिद्धान्ते प्रतिनियतरूपेण जगतः सत्यत्वाभावो न तु सत्यत्वेन रूपेण जगदभाव इति बोधितम् । ननु यदि ब्रह्मत्वेनैव जगतः सत्यत्वं तदा तेन रूपेण सामान्यलक्षणैवाद्रियतां, को दोष इत्यत आहुः सामान्येत्यादि । स्पष्टमिति अग्न्यादिविद्युदन्तेषु तेज इत्येव सत्यमित्यकथनात् त्रिवृत्करणस्य

रश्मिः ।

विवर्तेति उपादानविषमसत्ताकोऽन्यथाभावो विवर्तः । सर्वेति सर्वस्यानिर्वचनीयान्यथाख्यातिरूपत्वेपि विशेषदर्शनात्पूर्वं सर्वमस्त्येवेति न निर्विषयकं ज्ञानम् । व्यवहारे वयं भाट्टा इति वदतां जातिरूपसर्वत्वे शक्तिः । तेन सामान्यलक्षणा प्रत्यासत्तिः । अलीकत्वेत्यादीति । भाष्ये । मृत्तिकात्र । यत्र क्वचिद्भगवान् ज्ञातः इत्यादिभाष्यात् ब्रह्मविज्ञानविषयिणी ग्राह्या ब्रह्मापहाय एतस्याग्रहणं ब्रह्मरूपत्वख्यापनाय । भाष्ये । ब्रह्मत्वेनैवेति शुक्तौ रजतं शुक्तित्वेन न भासते परिणामे तु रजतस्थानीयं जगद्ब्रह्मत्वेन भासते इति न प्रच्छन्नबौद्धत्वम् । एवकारव्यावर्त्यमाहुः नान्यथेति । प्रकृते । न प्रतीति जगत्त्वेन षड्भावविकारेणेत्यर्थः । सत्यत्वेनेति जगतः पारमार्थिकेन रूपेण । तदुक्तं पद्यद्वयेन 'सत इदमुत्थितम्' इत्यनेन 'न यदिदमग्र आस' इत्यनेन च । तत्र कारिके

'सद्बुद्ध्या सर्वथा सद्भिर्न सेव्यमखिलं जगत् ।
भ्रान्त्या सद्बुद्धिरत्रेति सन्तं कृष्णं भजेद्बुधः' ॥ इति पूर्वपद्ये ।

द्वितीये तु । 'खपुष्पादिसमत्वाद्धि मिथ्याभूतं जगद्यतः ।
अधिष्ठानाच्च सद्भानं तं कृष्णं नियतं भजेत्' ॥

इति । ब्रह्मत्वेनेति ननु सत्यत्वेनाव्यवहितत्वेपि जगत्त्वसमानाधिकरणसत्यत्वस्योक्तकारिकाभ्यामभावात् । समन्वयाधिकरणोक्तसत्यत्वं तु वर्तत एव ब्रह्मलक्षणान्तर्गतम् । अग्न्यादित्येति चन्द्रमा नोक्तः सामान्यलक्षणप्रत्यासत्तिनिराकरणप्रस्तावात् चन्द्रमस्त्वं न सत्यत्वं किं तु ब्रह्मत्वेनैव जगतः सत्यत्वमित्यादिभाष्योक्तब्रह्मत्वाभिन्नमतो न सामान्यलक्षणप्रत्यासत्तिनिराकरणप्रस्तावेन तदुक्तिः । न च ब्रह्मत्वमेव सामान्यलक्षणप्रत्यासत्तिरस्त्विति शङ्क्यम् । अवान्तरजातिलक्षणप्रत्यासत्तिनिराकरणप्रस्तावात् तस्य सामान्यत्वे द्वैतप्रसङ्गाच्च । तेज इति यथा मृत्तिकेत्येव सत्यमित्यवान्तरोपादाने सत्यत्वं तद्वदकथनात् । तथा च श्रुतिः 'सदेव सोम्येदमग्र आसीत्' इत्यादि । प्रतिज्ञातमेकविज्ञानेन सर्वविज्ञानं देवतासु प्रवृत्तिनिमित्तत्वायोक्त्वा 'तत्तेजोऽसृजत' 'तत्तेज ऐक्षत' इति । त्रिवृत्करणस्येति यथा तु खलु सोम्येमास्तिस्रो देवताः त्रिवृत्त्रिवृदेकैका भवति इति तन्मे विजानीह हीति' 'यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं

भाष्यप्रकाशः ।

च बोधनात् त्रीणि रूपाणीत्येव सत्यमिति सावधारणं कथनाच्च स्पष्टम् । तेन, अपागादग्नेरग्नित्वमित्यादेरयमर्थः । यदग्न्यादौ रोहितादिगुणकं रूपमाकारत्रयं तदनागन्तुकस्वरूपविचारे अत्रिवृत्कृतानां तेजोऽबन्नानामेव, न तु त्रिवृत्कृतस्याग्न्यादेः कार्यस्य । त्रिवृत्करणात् प्रागपि सत्त्वात् । अतस्त्रिवृत्करणोत्तरमागन्तुकमग्नित्वादिकम्, अनागन्तुकरूपविचारे अनागन्तुकानारोपितरूपेणापागाद्, अग्न्यादेः सकाशादपगतम् । यतोऽग्नित्वादिकं वाचारम्भणमवस्थारूपत्वान्नाग्न्यादीनां तेभ्यो

रश्मिः ।

वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् । यदादित्यस्य रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादादित्यादादित्यत्वम् । वाचारम्मणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् । यच्चन्द्रमसो रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाच्चन्द्राच्चन्द्रत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् । यद्विद्युतो रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाद्विद्युतो विद्युत्त्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यमित्येवमित्यर्थः । तेन रूपत्रयं प्रवृत्तिनिमित्तमित्युक्तम् । अत्र पूर्वाङ्गे निरुक्ते त्रिदेवतापक्षः चतुर्थश्चन्द्रमाः तासामपि ब्रह्मत्वेन भानं न वा । मुण्डकेपि क्षरात्सर्वे आत्मानो व्युच्चरन्तीत्यवताराणां जीवजडभिन्नत्वं न व्युच्चरणश्रावणाच्च तेषामपि जगत्त्वेन सत्यत्वं नान्यथेति प्राप्तं तत्र कृष्णाय देवकीपुत्रायेति छान्दोग्ये 'यज्ञेन यज्ञमयजन्त देवाः' इति यज्ञनारायणवाराहविषये महानारायणे तदादौ जगत्त्वेन सत्यत्वं बाधितं तदर्थं निरुक्ते अग्निः स्वाहाकृतिनामसु पठितस्तेन राधाग्निः । आत्मा पुरुषविधब्राह्मणोक्तस्तस्मै स्वाहाकृतिः पशुरूपायाः अग्निः पशुरासीत्तेनायजन्तेति पञ्चमाष्टकसमासिकश्रुतेस्तेन प्रथमं तत्कथा । तदत्रादित्यः पशुरासीत्तेनायजन्त इत्यादित्यः कृष्णः 'कृष्णद्युमणिः' इति वाक्यात् तत्र कृष्णे वक्तव्ये प्रकृतिश्च राधारूपापि स्वाहाकृतिः । रामकृष्णयोः प्रकृतिपुरुषयोः सत्त्वेपि वायुः पशुरासीत्तेनायजन्तेत्यत्र विद्युदत्रोक्ता वायोरग्निरिति श्रुतेः । कार्यात्मत्वेन विद्युदुक्ता 'विद्युद्ब्रह्मेत्याहुः' इति बृहदारण्यकात् । तत्राप्यग्नित्वादीनामपायनं चन्द्रमस्त्वं कृष्णे वर्तते इति त्रयाणां रूपाणामसत्यत्वे शरदादौ रूपत्रयमुपमर्दोपमर्दकभावेन प्रसिद्धम् । अत एव प्रकृतेः सत्त्वरजस्तमसां ते गुणाः । न च द्वैतापत्तिः 'प्रणवत्वेन प्रकृतित्वं वदन्ति ब्रह्मवादिनः' इति श्रुतेः तस्या गुणाः न द्वैतापादकाः । 'प्रकृतिमगन्' इति वाक्यात् । प्रकृतिः स्वरूपमित्युक्तम् । तेन रूपत्रयं प्रकृत्यवशिष्टा ।

'आसन् वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगं तनुः ।
शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः' ॥

इति । त्रिवृत्करणोदाहरणश्रुत्यर्थमाहुः तेनेति । रोहितादीति । रोहितादयो गुणा यत्रेति बहुव्रीहिः । आकारत्रयमिति जगतो ब्रह्मत्वेन सत्यत्वे सति सामान्याभावे प्रवृत्तिनिमित्तमाकृतित्रयम् । अत्रिवृदिति कारणभूतानां तत्तेजो सृजत' 'तत्तेज ऐक्षत' 'बहु स्याम् प्रजायेयेति' 'तदपोऽसृजत' 'ता आप ऐक्षन्त बह्वयः स्याम प्रजायेमहि' । इति 'ता अन्नमसृजन्त' इति श्रुत्युक्तानामित्यर्थः । कार्यस्येति सत्कार्यस्यात्रिवृत्कृतस्याग्न्यादेरित्यर्थः । **अनागन्तुकेति** अनागन्तुकानि अत्रिवृत्कृतात्म्यादिरूपाणि रोहितादीनि तेषां विचारे तत्त्रितयरूपेणानागन्तुकानारोपितरूपेण । विचारस्वरूपमाहुः यत इति वाचारम्भण वाङ्मात्रेणारभ्यते । अवस्थेति षड्भावविकाररूपत्वात् । तेभ्यः स्वकारणेभ्यो,

भाष्यप्रकाशः।

भेदकमतस्त्रीणि रूपाणीत्येव सत्यमनागन्तुकानारोपितं रूपमिति बोध्यः। इदं च मूलकारणस्यात्यन्तपरोक्षत्वादन्त्यकार्यापेक्षया शिष्यविश्वासायोक्तम्। तच्च मूलकारणे ब्रह्मण्येव पर्यव-

रश्मिः।

भेदकं यथा कटकादीनामवस्था न कारणात्सुवर्णात् कार्यं कटकादेर्भेदकं कटकं सुवर्णमिति प्रतीतेः। तथा तेभ्यः पदार्थेभ्यो वा यथा पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वात्। तद्वत्त्र भेदकम्। वाचारम्भणत्वात्। अत इति व्यवहारदशायां भेदकस्य जातिरूपस्यासाधारणधर्मस्य ब्रह्मप्रकृतिगुणरूपस्य विवक्षणात्। अनागन्तुकेति। कारणताशक्तिः प्रकृतिरिति रामानुजभाष्येऽद्वैतांशे। विशिष्टांशे चिज्जडसमुदायः प्रपञ्चः प्रकृतिः। अत्र रोहितादिरूपाणां स्वरूपं मधुब्राह्मणके पञ्चमे उक्तम्। अमृतानीत्यतो घटपटादिद्रव्यमपहाय गुणा जगत्यसाधारणधर्मा भेदका उक्ताः। घटः पटाद्भिद्यते घटत्वादित्येवं तत्र घटत्वादिस्थानापन्नं रोहितादिकं तु ऋग्वेदादिरूपशब्दानां रसाः आस्वादिका शक्तयः व्यामोहिकाः। तदुक्तम्। द्वितीयस्य नवमाध्याये चिद्रूपस्य व्यामोहिका शक्तिरिति। नाम चिद्विवक्तनेति ऋग्वेदान्नाम वेदश्चित् तस्य शक्ती रूपं, रूप विमोहन इति धातुपाठात्। सा प्रतिपाद्यप्रतिपादकभावसंबन्धेनार्थनिष्ठा शब्दप्रवृत्तिनिमित्तमिति मोहकत्वसाम्यात्। तत्रापि रोहितादिरूपं घटादिनिष्ठघटादिशक्तिः स्यादिति चेन्न। शक्तिश्च पदेन सह पदार्थसंबन्धोपि सोपि व्यामोहकत्वाद्रूपं व्यामोहकत्वं शब्दसंबन्धात् स चास्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छानुरूपः सः पदेन सह पदार्थसंबन्धः। अस्माकमिच्छावादः। आधुनिके नाम्नि शक्तिरस्त्येव एकादशेऽहनि पिता नाम कुर्यादिति ईश्वरेच्छायाः सत्त्वात्। आधुनिकसंकेते तु न शक्तिरिति संप्रदायः। नव्यास्तु ईश्वरेच्छा न शक्तिः किं तु इच्छैव तेनाधुनिकसंकेतेपि शक्तिरस्तीत्याहुः। शक्तिग्रहस्तु व्याकरणादिना

'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सांनिध्यतः सिद्धपदस्य वृद्धाः'॥

इति उदाहरणानि सिद्धान्तमुक्तावल्यां न्यायशास्त्रे। तथा च श्रुतिः 'नामानि कृत्वाभिवदन् यदास्ते' इति। अभिशब्दार्थः शक्त्यादिः तदप्युक्तम्

'लोके शब्दार्थसंबन्धो रूपं तेषां च यादृशम्।
न विवादस्तत्र कार्यो लोकोच्छित्तिस्तथा भवेत्'॥

इत्यलं पल्लवितेन। सन्तं कृष्णं भजेद् बुधः इत्युक्तम्। तच्चैकविज्ञानेन। किं च अप्रतीकालम्बनसूत्रे गुरौ प्रतिमायां च भगवान् सांनिध्यं करोतीत्युक्तम्। महानारायणे च 'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात्' इति 'मृदादि भगवद्रूपं घटाद्याकारसंयुतम्' इति निबन्धे। अन्तस्तद्धर्मोपदेशादित्यधिकरणे 'ध्येयः सदा सवितृमण्डलमध्यवर्ती' इति तथात्मोपनिषदन्तरात्मपरमात्मबाह्यात्मप्रतिपादिका इत्यादिकं पूर्वोक्तपक्षे विरुध्यते अत एव 'न यदिदमग्र आस' इति श्लोके निधनादन्वा त्वयि भाति मृषैकरसे इत्यन्तरालिकसृष्टिरुक्तातो ब्रह्मत्वेनैव जगतः सत्यत्वं नान्यथेति भाष्यतात्पर्यं वदन्ति इदं चेति। अन्त्यकार्येति। 'ऐन्द्रजालिकपक्षेपि तत्कर्तृत्वं नटे यथा' इति निबन्धोक्तकार्यापेक्षायाम्। यत्तु अन्त्यस्य मृत्पिण्डस्य कार्यापेक्षया छेदगभिरप्यन्त्यः चिन्तामणिवत्।

भाष्यप्रकाशः ।

सतीत्यभिप्रायेण । तदग्रे च यदुपदिष्टं तत् सर्वं मूलकारणस्य कार्यद्वारा परिचायनार्थम् । अतः सर्वस्य ब्रह्मैव समवायिकारणमिति सर्वं सुस्थम् । ननु जगतो ब्रह्मरूपेण सत्यत्वे तस्मिन्

रश्मिः ।

तत्र नखनिकृन्तनस्यात्यन्तत्वं चिन्त्यमतो यत्र कुत्रचिद्भगवान् ज्ञात इत्यादिभाष्योक्ताभिप्राय एवेति ज्ञेयम् । शिष्यस्य श्वेतकेतोर्विश्वासार्थमारुणिना पित्रोक्तम् । यतः श्वेतकेतुः पित्राज्ञया सर्वान्वेदानधीत्यानूचानमानी स्तब्ध इति तदधिकारेण विश्वासः । मूलकारणे इन्द्रजालकर्तरि । एवं च समवायिनिरूपणे प्रकृतेनाकाङ्क्षितनिमित्तनिरूपणं जातमित्यर्थान्तराख्यनिग्रहस्थानं परिहर्तुं वाचारम्भणस्यार्थमुपक्रान्त 'उत तमादेशः' स उपसंहारे एवं सोम्य स आदेशो भवतीत्यनूदितस्तस्य सर्वस्य तस्याप्यग्रेतनस्य 'सदेव सोम्येदमग्र आसीत्' इत्यादेः अभिप्रायमाहुः एतदग्रे चेति, उपदिष्टम् । 'एवं सोम्य स आदेशो भवतीति सर्वं च सदेव सोम्येदमग्र आसीत्' इत्यादि । आ समाप्ति । तत्र यत्किंचित्पूर्वं व्याख्यातमन्यट्टीकायामस्ति । समवायीति अतो न निग्रहस्थानमितिभावः । प्रकृतानाकाङ्क्षिताभिधानस्यार्थान्तररूपनिग्रहस्थानत्वात् । उपदेशेषु विशेषोपि भाति टीकानुगुणमेव । 'सर्ववादानवसरं नानावादानुरोधि यत्' इतिनिबन्धाट्टीकोक्तसंदेहापनुत्तये उपदेशान्तरावतरणात् । पूर्वोपदेशे परदेवतोक्ता सा माध्वानाम् । तेषां भाष्ये श्रुतिस्मृत्युदाहरणेन विशेषानुपलम्भात् । द्वितीयोपदेशो विज्ञानेन्द्रभिक्ष्वभिमतकः 'यथा मधु मधुकृतो निस्तिष्ठन्ति' इति श्रुतिः तदीयग्रन्थेषु दृश्यते इति । तृतीयोवान्तरकारणादिविषयकः चतुर्थेऽवान्तरकारणादिविषयकः । नमामि यमुनामहमित्याचार्याः । सर्वं जहाति सर्वः शुष्यतीति श्रुतेः । 'आपमापामपः सर्वा' इत्यारण्ये । जैमिन्याचार्यविषयकः वृक्षसौषधिविद्योपयुक्तत्वात् तस्याश्च वेदस्यादौ सत्त्वात् । पञ्चमः जीवब्रह्मवादविषय इति शंकरभाष्यविषयः । 'तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' इत्यष्टपदात्मकोपदेशात् । षष्ठो भेदाभेदविषयको भास्कराचार्यमतकः । यद्दोषा लवणमुदके अवाधा अङ्ग तदाहरेति तद्धावमृश्य न विवेद यथा विलीनमेवेति श्रुतेः । लवणं न समुद्ररूपं जलं । जलं न लवणमिति भेदाभेदौ । सप्तमः समष्टिः साधारणः । पण्डितो मेधावीति स्वस्याधिकारबोधनात् 'आचार्यवान् पुरुषो वेद' इति श्रुतिकथनाच्च । 'यावन्न विमोक्ष्येऽथ संपत्स्ये' इति श्रुतिः । सर्वभाष्यप्रसिद्धत्वाच्च तस्या अत्र सत्त्वात् । अष्टमो रामानुजशैवाज्ञानवादविषयकः तस्य यावन्न वाङ्मनसि संपद्यते इत्यादिना संपत्त्युक्तेः संपत्तेश्चिदचिद्वैशिष्ट्ये संभवः । अथ न जानातीति श्रुत्या अद्वैतमज्ञानवादश्च । नवमः श्रीवल्लभाचार्याणामुपदेशः 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' इत्येकादशपदात्मकः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दाह्यते अथ मुच्यते इति स्वरूपलक्षणोक्तेः सत्येनेत्युपलक्षणं ज्ञानानन्तयोः अतोष्टाक्षरमन्त्रे कृष्णोर्थः सदानन्दरूपः शब्दश्चिदिति सच्चिदानन्दः श्रीः श्रेष्ठश्रितलक्ष्म्याः 'श्रीश्च ते लक्ष्मीश्च पत्न्यौ' इति श्रुतेः । 'शरणं विहितं मुमुक्षुर्वै शरणमनुव्रजेत्' इति । महाराजत्वात् तस्मिन् गृहे समागते शरणमार्गस्तद्गृहे च, स्वगृहे भक्तिमार्गः । ममेति विशेषः । अमुकशर्मण

देहात्मबुद्धिस्तु सत्यां विकारबुद्धौ दोषः । श्रुतिसामर्थ्यं प्रमाणमित्युक्तम् । तस्माद् ब्रह्मैव समवायिकारणं, न प्रकृतिः ॥ २३ ॥

भाष्यप्रकाशः ।

ब्रह्मधर्मविरुद्धधर्माध्यासो न स्याद्, देहादेरप्यात्मत्वेन सत्यता स्यात् । तथा सति देहात्मबुद्धेर्दोषत्वमप्यपेयात् । ततश्चाविद्यानिवर्तकशास्त्रवैयर्थ्यमापद्येतेत्यतो जगन्मिथ्यात्वमेव साधीय इत्यत आहुः देहात्मेत्यादि । वस्तुविचारेण जगतो ब्रह्मरूपत्वेऽपीदानीं बहुजन्माभ्यस्तविकारबुद्धेरनिवृत्तत्वात् तस्यां सत्यां या देहात्मबुद्धिः सा देहाभिन्नत्वेनात्मावगाहिनी, न त्वात्माभिन्नत्वेन देहावगाहिनी । आत्मस्वरूपस्याज्ञातत्वादतो दोषरूपैवेति न कोपि जगतो ब्रह्मरूपत्वे पूर्वोक्तो दोष इत्यर्थः । नन्वेवं व्यवस्थया देहात्मबुद्धेर्दोषत्वे किं मानमित्याकाङ्क्षायां पूर्वोक्तं स्मारयन्ति श्रुतीत्यादि । श्रुतिसामर्थ्यमिति । दृष्टान्ते हि कार्यत्वन्यक्कारेण कारणात्मकत्वमुपदिष्टं, न तु तत्पुरस्कारेण । किंच । कारणात्मना कार्यज्ञानमभिसंहितं, न तु कार्यात्मना कारणज्ञानम् । अतस्तत्सामर्थ्यमेव तादृशव्यवस्थायां प्रमाणमित्यर्थः । सिद्धमाहुः तस्मादित्यादि ॥ २३ ॥

रश्मिः ।

इति । ब्रह्मधर्मेति । ब्रह्मधर्मा अपहतपाप्मत्वव्यापकत्वादयः तद्विरुद्धाः पापित्वाव्यापकत्वादयः तेषां त्वध्यास एवातस्मिन् तत्त्वारोपात् । देहात्मबुद्धेरिति अहं स्थूल इत्यादिरेव देहात्मबुद्धिः । ततश्चेति सार्वविभक्तिकस्तसिः देहात्मबुद्धेर्दोषत्वापाये । अविद्या पञ्चपर्वा देहाध्यासः प्राणाध्यासोन्तःकारणाध्यास इन्द्रियाध्यास इति तन्निवर्तकं शास्त्रं पञ्चपर्वविद्याबोधकम् । 'वैराग्यं सांख्यायोगौ च तपो भक्तिश्च केशवे' इति पञ्चपर्वाणि तद्बोधकं शास्त्रं 'त्रय्या चोपनिषद्भिश्च सांख्ययोगैश्च सात्वतैः उपगीयमानमाहात्म्यम्' इतिवाक्यात् षड् शास्त्राणि । जगन्मिथ्यात्वमिति । शुक्तिकारजतवत् न त्ववान्तरकारणमृत्पिण्डादिदृष्टान्तेन ब्रह्मत्वेन । विकारेति षड्भावविकारबुद्धेः । आत्मावगाहिनीति अतिरिक्तस्यात्मनो दर्शनादिति हेतुः । अज्ञातत्वादिति तथाच विशिष्टज्ञाने विशेषणज्ञानस्य कारणत्वात् विशेषणस्यात्मरूपत्वात् । पूर्वोक्त इति आभासोक्तः । तत्पुरस्कारेणेति । तत्सामर्थ्यमिति श्रुतेः सामर्थ्यम् शब्दव्यापारः तदपि प्रमाणं श्रुतिसंबन्धात् श्रुतिकृतिः प्रमाणं तत्संबधात्कृतिस्तस्येति तृतीयस्कन्धपद्यस्य यतो भवद्भिश्चमित्यस्य कारिकायाम् । तादृशेति दोषो दृश्यते यत्र व्यवस्थायां प्रमाणं समर्था श्रुतिः प्रमाणं व्यापारानाविष्ययाप्रमाणात्वाभावात् करणत्वाभावेन प्रमाणलक्षणाप्रसक्तेः । तस्मादित्यादीति । तस्मात् । अर्धजरतीयेनोभयस्यापन्नपक्षाभावात् ॥ २३ ॥

---

१. सर्वथादरणीयो यः स प्रमाणमिहोच्यते । तत्संबन्धात्कृतिस्तस्य प्रमाणं वाक्यमेव च ॥ भाग० ३।१२।२० श्लोकस्येयं कारिका ।

अभिध्योपदेशाच्च ॥ २४ ॥

लिङ्गान्तरमाह। सोऽकामयत बहु स्यां प्रजायेयेतीत्यत्र कामनं तस्याभिध्यानम्। आप्तकामत्वान्न कामना। तदभिध्यानं स्रष्टावुपदिश्यते। बहु स्यामिति स्वस्यैव बहुरूपत्वाभिध्यानेन सृष्टं स्वयमेव भवति। सुवर्णस्यानेकरूपत्वं सुवर्णप्रकृतिकत्व एव। अध्यासाभावाद् गौणत्वापत्तेश्च। न हि मुख्यं बहुभवनं

भाष्यप्रकाशः।

अभिध्योपदेशाच ॥ २४ ॥ सूत्रमवतारयन्ति। **लिङ्गान्तरमाहेति**। ननु दृष्टान्ते मृत्तिकेत्येव सत्यमिति कारणे सत्यपदमुक्तम्। अतस्तत्सामर्थ्येन कार्ये मिथ्यात्वमपि प्रमातुं शक्यत इति शङ्कायां प्रपञ्चे विवर्तत्वस्य ब्रह्मणि विवर्तोपादानत्वस्य च निरासाय लिङ्गान्तरमाहेत्यर्थः। **अभिध्यानमिति**। एवमेवमिदं करिष्यामीत्यालोचनम्। विचार इति यावत्। **सुवर्णप्रकृतिकत्व इति** अंशकार्ययोस्तथात्वे। नन्वभिध्योपदेशोऽपि न ब्रह्मणः समवायित्वसाधकः। योगिकायव्यूहवदपि बहुभवनाभिध्योपपत्तेरित्याशङ्कायामाहुः **अध्यासेत्यारभ्य नान्यथेत्य-**

रश्मिः।

अभिध्योपदेशाच्च ॥ २४ ॥ चेति अनुक्तसमुच्चये चकारः। पूर्वपक्षनिरासाय च इत्यस्यार्थस्य समुच्चायकः। **प्रमातुमिति** कार्यं मृत्पिण्डादि मिथ्या कृतकत्वात् घटवत् इति। **लिङ्गान्तरमिति** अर्धजरतीयाभावो लिङ्गम्। अभिध्योपदेशोन्यलिङ्गमिति अन्यलिङ्गं लिङ्गान्तरम्। **भाष्ये। कामनमित्यादि** कामयतेत्यस्य विवरणम्। बहु स्यामिति बहुनिष्ठसत्तानुकूलव्यापारोऽधीष्टस्तद्विषयिणी कामनात्र कामनं तस्याभिध्यानं 'प्रजायेय' इत्युक्तम्। अभित उच्चनीचभावेन ध्यानं चिन्तनमुपादानकारणसहितचिन्तनं प्रजायेयेति इत्युक्तप्रजननानुकूलव्यापारोधीष्ट इत्येवम्। ननु ह्यभिध्यान पराभिध्यानसूत्रोक्तं परस्य भगवतो अभितो ध्यानं रमणेच्छेति विहाय कुतोधीष्टे इच्छाविषयो लक्षणया व्याख्यात इति चेन्न तदभिध्यानादेवेति सूत्रे तस्य तस्य कार्यस्योत्पादनार्थं तदभिध्यान ततस्तदात्मकत्वं तेन तद्वाच्यत्वमिति भाष्यात्। ननु स्वरूपे प्रकृतिं निवेश्य मुख्यार्थत्यागे को हेतुरत आहुः। **आप्तेति** आप्तकाम इति श्रुत्यन्तरेणेत्यर्थः। **स्रष्टाविति** सृष्ट्यर्थमेकोहं बहु स्यां प्रजायेयेत्युपदिश्यते। **भवतीति** न तु शुक्तौ रजतवन्मिथ्या। नापि पूर्वपक्षः। **त्वया** पूर्वपक्षिणा प्रकृतेर्जडस्याङ्गीकारादिति भावः। 'क्षीरवच्चेष्टितं प्रधानस्य' इत्यग्रे प्रतिविधास्यते। **प्रकृते। अंशेत्यादि** ननु सुवर्णस्य कार्यरूपस्य सुवर्णपिण्डरूपस्य सुवर्णप्रकृतिकत्व इत्यर्थं इतिचेन्न दार्ष्टान्तिके सुवर्णस्थानापन्नयोरुक्तेः। अंशाः शकलानि सुवर्णस्य भेद्यस्वरूपायां प्रकृतौ भवन्ति जलस्य तु न भवन्ति शकलानि भेदरूपप्रकृत्यभावात् तद्वत्प्रकृतेंशेषु स्वरूपभूतप्रकृतिसत्त्वात् तत्संबन्धे जीवत्वं इवार्थे भेदकवत्त्वं च कार्येषु सुवर्णरूपत्ववत् ब्रह्मत्वं इवार्थभेदकवत्त्वम्। इवशब्दस्त्वेव स्मर्यते 'अविभक्तं च भूतेषु विभक्तमिव च स्थितम्' इति ब्रह्मनिरूपणे गीतायाम्। **तथात्व इति** दार्ष्टान्तिके ब्रह्मप्रकृतिकत्वे ब्रह्मप्रकृतिर्ययोस्तेंशकार्ये तथा सुवर्णांशकार्यत्वेन प्रकारेण यथा तथा ब्रह्मांशकार्यत्वेन प्रकारेण तयोर्भावस्तथात्वं तस्मिन्। अध्यासेत्यारभ्येति इह ब्रह्मण इति शेषं पूरयित्वा तत्र हेतुद्वयं योजनीयम्। कायव्यूहे अध्यासोपयोगः। **मुख्यमिति** समवायिनः स्वस्य विद्यमानत्वे सिंहादिरूपत्वं ब्रह्मसमवायिवत् किंतु स्वस्यैव

योगिनां संभवति । सर्वभवनसामर्थ्यान्मुख्ये संभवति गौणकल्पनाया अन्याय्यत्वात् । चकाराद्, इदं सर्वं यदयमात्मेति कार्यस्य ब्रह्मत्वश्रुतिर्ब्रह्मप्रकृतित्वे संभवति, नान्यथा ।

अथवा 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' इति तस्य जगद्रूपत्वेनाभिध्यानमुपदिश्यते । तद् ब्रह्मसमवायित्वे घटत इति चकारात् 'एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम्' इति ॥ २४ ॥

भाष्यप्रकाशः ।

न्तम् । ननु योगबलेनाभ्यासाभावेऽपि भगवान् नानाभावं कर्तुं शक्नोति, गौणत्वं ब्रह्मणोऽविकृतत्वसाधकत्वाददुष्टम् । अतो नेयमभिध्या समवायित्वसाधने लिङ्गं भवितुं शक्नोतीत्याशङ्क्य व्याख्यानान्तरमाहुः अथवेत्यादि । तत्र हि सर्वस्य ब्रह्मत्वे, तज्जलानित्यनेनोत्पत्तिस्थितिलयाधारत्वं हेतुत्वेनोक्त्वा तथाभिध्यानमुपदिश्यते । यदि समवायित्वं नाभिप्रेयाद्धेतुं न वदेदतस्तथेत्यर्थः ॥२४॥

रश्मिः ।

सिंहत्वादिः । ननु क्षीरवच्चेष्टितं प्रधानस्येति सांख्यसूत्रात् अर्धजरतीयन्याय इति चेत्तत्राहुः सर्वभवनेति मुख्ये बहुभवने । गौणेति प्रकृतिगुणसंसर्गवत्त्वादर्धजरतीयकल्पनायाः । सूत्रीयचकारार्थमाहुः चकारादिति इद सर्वं चिज्जडात्मकम् । ब्रह्मप्रकृतिकत्व इति जीवेषु ब्रह्मोपादानत्वे प्रकृतिरिवांशभेदके । जडेष्वप्येवम् । नान्यथेति प्रकृत्यंशपरित्यागे प्रकारे । प्रकृते । गौणत्वमिति प्रकृतिगुणसंसर्गवत्त्वम् अविकृतस्य चिन्तामण्यादिवदविकृतत्वं यत्तत्प्रकृतिस्वरूपकत्वे इत्यविकृतत्वसाधकत्ववत् । इयमिति अभित उच्चनीचभावेन चिन्तनं स्वस्य रमणेच्छाविषयम् । अभिध्यानमित्युपासनम् । पराभिध्यानात्तु तिरोहितमित्यत्र यद्व्याख्यातं तत्तु पूर्वव्याख्याने हेतुमिति तज्जलानितीतिपदं हेतुवाचक हेतुर्वाच्यः । तथेत्यर्थ इति यो यदंशः स तं भजेदिति वाक्यात् समवायित्वम् । इद ब्रह्मसमवायित्वे घटते इतीति भाष्यस्यार्थः । प्रकृते । किं प्रयोजनमित्याशङ्क्य भाष्ये प्रयोजनमाहुः चकारादिति इयं राजविद्याराजगुह्यनिरूपणेऽस्ति प्रकृतेः स्वरूपत्वे एकत्व एक ब्रह्मप्रकृतिरित्यत्रापाततोभातेनेवार्थपृथक्त्वेनाभेदेपि अत्र शंकराचार्याः प्रकृतिरुपाधिरिति बहु स्यामिति प्रत्यगात्मविषयत्वाज्जीवरूपेण बहुत्वमित्याहुः । किंच सोऽकामयत इति कर्तृत्वम् । तेन सगुणब्रह्मत्वं द्योतितम् । रामानुजभाष्ये विचित्रचिदचिद्रूपेणाहं बहु स्यामिति विशिष्टाद्वैतम् । माध्वभाष्ये तु

'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
महामायेत्यविद्येति नियतिर्मोहिनीति च ।
प्रकृतिर्वासनेत्येव तवेच्छाऽनन्त कथ्यते' ॥

इतिवचनात् तदभिध्यैव प्रकृतिशब्देनोच्यते 'सोभिध्या स जूतिः स प्रज्ञा स आनन्दः' इति श्रुतेरभिध्या च स्वरूपमेव ।

'ध्यायति ध्यानरूपोसौ सुखी सुखयतीव च ।
परमैश्वर्ययोगेन विरुद्धार्थतयेष्यते' ॥

इति ब्रह्माण्डे । एतद्वक्ष्यन्ति चाग्रे भास्करभाष्ये इतश्चापोदानं 'तदैक्षत बहु स्यां प्रजायेय' इति बहु भवामीति सकल्पपूर्विका प्रवृत्तिरभिध्यानमिति प्रकृतिस्तूपाधिरित्येव भाति तन्मते जीवस्य व्यापकत्वात् ॥ २४ ॥

साक्षाच्चोभयाम्नात् ॥ २५ ॥

लिङ्गमुक्त्वा श्रुतिमेव प्रमाणमाह । साक्षाच्छ्रुत्यैव समवायित्वमुच्यते । चकारात् स्मृत्यापि । कथं श्रुत्योच्यते तत्राह उभयाम्नानात् । ब्रह्मणः सकाशाद् ब्रह्मण्येव च सृष्टिप्रलययोराम्नानात् । सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्तीति । 'अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा' इति च । न ह्येतस्मिन्निमित्तत्वे संभवति । सुवर्णादिषु तथोपलब्धेः । लोकवेदन्यायेन साक्षात्त्वम् । तस्माद् भगवानेव समवायिकारणम् ॥ २५ ॥

भाष्यप्रकाशः ।

साक्षाच्चोभयाम्नानात् ॥ २५ ॥ सूत्रमवतारयन्ति लिङ्गमित्यादि । 'मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्' इति स्मृत्या कश्चित् भ्रत्यवतिष्ठेदतस्तन्निरासाय श्रुतिमाहेत्यर्थः । एतस्मिन्निति प्रलयबोधक आकाशवाक्ये । लोकवेदन्यायेनेति लौकिकेन वैदिकेन च न्यायेनेत्यर्थः ॥ २५ ॥

रश्मिः ।

साक्षाच्चोभयाम्नानात् ॥ २५ ॥ लिङ्गमित्यादीति भाष्ये लिङ्गं शब्दस्य सामर्थ्यं सर्वं खल्विदं ब्रह्मेतिशब्दस्य । हेतुं वोक्त्वा । श्रुतिमेवेति आनुमानिकसूत्रोक्तानुमानं व्यवच्छिनत्त्येवकारः । प्रकृते । मयाध्यक्षेणेति इयं राजविद्याराजगुह्ययोगाध्यायेऽस्ति अतोऽन्यथाज्ञाने स्वमार्गीयोपि कश्चित् प्रत्यवतिष्ठेदित्यर्थः । अस्या उल्लेखो भाष्ये सृष्टिद्वयविवरणादत्रापि प्रकृतिं यान्ति मामिकामिति स्वरूपं प्रकृतिरुक्ता विकृतसमवायित्वार्थं नतु विपरिवर्तनार्थम् ।

'यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय' ॥

इति पूर्वमुक्तत्वात् पुनः प्रकृतिं स्वामवष्टभ्य विसृजामि इत्यविकृतसमवायित्वार्थम् । स्वामिति अग्रे आन्तरालिकसृष्ट्यर्थम्—

'मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते' ॥

इति विवर्तकरूपान्तरालिकसृष्टिरुक्तेति । भाष्ये । ब्रह्मणः सकाशादिति कर्तृत्वं कुलालाद् घट इतिवत् ब्रह्मणीति समवायिनि । इह कपालयोर्घटो भविष्यति कपालयोर्घटो ध्वस्त इतिवत् आकाशादिति आकाशस्तल्लिङ्गादिति सूत्रे आकाशो ब्रह्मेति निर्णीतम् । आकाशशरीरं ब्रह्मेति स्मृते । तत्स्वरूपमित्युक्ता प्रकृतिः सा च कर्तृत्वस्य शरीरव्यापकत्वात् अविकृतत्वसाधकत्वेपि स्वरूपं शरीरम् । कर्तृत्वात् कुलालस्य कर्तृत्वाच्छरीरित्वं दृष्टं अस्तं यन्ति लयं यन्ति समवायित्वबोधकम् । प्रभवत्यस्मादिति प्रभवः प्रलीयतेऽस्मिन्निति प्रलयः । प्रकृते । आकाशेति निमित्तत्वं संभवति निमित्तत्व इति पाठे निमित्तत्वे प्रतिपाद्ये सत्यभिन्ननिमित्तोपादानत्वरूपो मुख्यार्थः संभवतीत्यर्थः । कचित्पुस्तके न ह्येतन्निर्निमित्तत्वे संभवतीति पाठः । भाष्ये । सुवर्णादिष्विति सुवर्णं सुवर्णः सुवर्णकारश्च सुवर्णौ निमित्तोपादाने आदी येषां मृत्पिण्डकुलालादीनां ते सुवर्णादयस्तेषु एकैकत्वोपलब्धेः । यद्वा निमित्तत्वमीक्षतिना ईक्षत्यादिभिर्वा ब्रह्मणि सिद्धं तादृशे

आत्मकृतेः परिणामात्॥ २६ ॥

ननु 'स एव सर्वं सृजति स एवावति हन्ति च' इति कर्तृत्वप्रतीतेराकाशादिवाक्यमप्यौपचारिकं भविष्यतीति तन्निराकरणायाह आत्मकृतेः। 'तदात्मानं स्वयमकुरुत' इति स्वस्यैव कर्मकर्तृभावात्। सुकृतत्ववचनाच्चालौकिकत्वम्। तथापि ज्ञानार्थमुपपत्तिमाह परिणामात्। परिणमते कार्याकारेणेति।

भाष्यप्रकाशः।

आत्मकृतेः परिणामात्॥ २६ ॥ परिणामात् प्राप्तस्य विकृतत्वस्य परिहारार्थं युक्ति-

रश्मिः।

निमित्तत्वे न ह्येतत्संभवति यतः सुवर्णादिषु समवायिषु तथास्थापनादि तस्य भावः तस्योपलब्धेरतो ब्रह्मसमवायीत्यर्थः। परंपरयोपलब्धिः। प्रकृते। लोकवेदेति कथमस्याः साक्षात्त्वं तत्राहुरित्यवतरणं पूरणीयम्। स्मृतिर्हि लोकवेदात्मिकेति। गर्भस्तुतिसुबोधिन्याम्। सह अक्षेण प्रत्यक्षमूलवेदन चिद्रूपेण वा यो लोकः। साक्षाच्चेति सूत्ररूपस्मृत्यात्मकः स साक्षस्तमततीति साक्षात् सर्वाणि ह वा इमानीति श्रुतिः तस्य भावः साक्षात्त्वम्। लोकवेदन्यायोप्ययम्। अयं न्यायो लोके भवो वेदे भवो न तु मन्वादिस्मृतिषु भव इत्याहुः लौकिकेनेत्यादि। भवार्थे ठक्। तथा च लोकभवेन न्यायेन वेदभवेन न्यायेनेति भाष्यार्थः। 'मयाध्यक्षेण' इति गीता समाधनं तु व्याख्यानावसरे जातमिति न पुनरुच्यते आन्तरालिकसृष्टेः सिद्धान्तेप्यङ्गीकारात्। भाष्ये। तस्मादिति साक्षाच्छ्रुतिसत्त्वात्। अन्यत्र भाष्ये ब्रह्मणः समवायित्वं रामानुजभाष्ये साक्षादुभयाम्नानं किंस्विद्वनं क उ स वृक्ष आसीत् इत्यादि श्रुतावित्युक्तम्। माध्वभाष्ये पैङ्गिश्रुतिः प्रकृतिपुरुषौ ब्रह्मेति वक्तीत्युक्तम्। तदग्रे वक्ष्यन्ति। भास्कराचार्यभाष्ये सर्वाणि ह वा इमानीति श्रुतिः तत्र स्वस्वमतभेदो ज्ञातव्यः नानावादानुरोधित्वाद् ब्रह्मणः॥ २५ ॥

आत्मकृतेः परिणामात्॥ २६ ॥ भाष्ये। औपचारिकम् आकाशस्तल्लिङ्गादित्यधिकरणस्य विकृतसमवायिब्रह्मपरत्वमौपचारिकम्। प्रकृतिगुणसंसर्गवत्त्वेन।

'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहंकारविमूढात्मा कर्ताहमिति मन्यते'॥

इति गीतायास्तन्निराकरणाय सुकृतत्वेति। सोऽकामयतेति पूर्वसूत्रोक्तश्रुत्यनन्तरं स तपस्तप्त्वा इदं सर्वमसृजतेत्याद्युक्त्वा 'तदप्येष श्लोको भवति' 'असद्वा इदमग्र आसीत् ततो वै सदजायत' 'तदात्मान१ंस्वयमकुरुत तस्मात्तत्सुकृतमुच्यते' इतीति पठ्यते अत्र सच्छब्देन ब्रह्मैवोच्यते 'अहमेवासमेवाग्रे' इत्यस्य सुबोधिन्याम्। सदसदिति सच्छब्देन च ब्रह्मैवोच्यत इत्यर्थः तथा च अः सत् असत् तत्कर्म आत्मा नगः पर्वतः इति पाठान्तरम्। आत्मानमिति पाठः। सुकृतमात्मानं परिणमय्य कृतं तस्य वचनादित्यर्थः। अलौकिकत्वं परिणामित्वेप्यविकृतत्वम्। ज्ञानार्थमिति अविकृतत्वज्ञानार्थम्। कार्यकारणवस्त्वैक्येति वाक्यात् यद्यपि दुग्धं दधि भवतीति प्रत्ययेन दुग्धं न स्यात् चेत्प्रत्यक्षविरुद्धघटादि दधि स्यात् इत्युपपत्तिः। तथा प्रपञ्चो ब्रह्म न स्यान्मनसाप्याकलयितुमशक्यरचनो न स्यात् इति परिणामविषयिणी तथापि विकृतपरिणामविषयिणीति सर्वाणि तैजासानीति वक्ष्यन्ति यदि सुवर्णमविकृतपरिणामि न स्यात् कटकमपि कुण्डलं स्यात् सुवर्णवत्। न

अविकृतमेव परिणमते सुवर्णम्। सर्वाणि च तैजसानि। वृद्धेश्चालौकिकत्वाद् ब्रह्मकारणत्व एव घटते पूर्वावस्थान्यथाभावस्तु कार्यश्रुत्यनुरोधादङ्गीकर्तव्यः।

भाष्यप्रकाशः।

आहुः अविकृतमित्यादि। सर्वाणि च तैजसानीति यद्यविकृतपरिणामस्य बाहुल्यं नाभिप्रेयात् पूर्वं सर्वतैजससाधारणस्य लोहपदस्योक्तत्वेऽपि पुनः कृष्णायसं न दृष्टान्तीकुर्यात्। अतो बाहुल्याभिप्रायेणैव तदुक्तिरसमीचीनत्वेन प्रतीयमानस्यापि ब्रह्मसमवायिकत्वबोधनार्थं च। ननु, तदैक्षत बहुस्यां प्रजायेयेति बहुभवनादिवृद्धेस्तेजःप्रभृतिपूक्तत्वात् तेषामपि विकारित्वं चेत् सुवर्णादीनां का वार्तेत्यत आहुः वृद्धेरित्यादि। तेषां वृद्धिर्न लौकिकी। सर्वतः पूर्वभावित्वेन श्रुत्येकसमधिगम्यत्वात्। अतः सा तेजआदिकर्तृकस्यापीक्षणस्य ब्रह्मकारणत्व एव घटते। तासु जीवानुप्रवेशस्य पश्चादुक्तत्वेनेक्षणदशायामचेतनत्वात्। अतस्तासामपि ब्रह्मवदविकृतत्वान्न सुवर्णादिषु तद्दृष्टान्तेनानुपपत्तिरित्यर्थः। ननु पूर्वावस्थान्यथाभावरूपो विकारस्तु ब्रह्मणोऽप्यायातीति कथं ब्रह्मणोऽप्यविकृतत्वमित्यत आहुः पूर्वेत्यादि। तथा च दधिदुग्धन्यायेन स्वरूपस्य गन्धादिगुणानां चान्यथाभाव एवात्राग्राह्यविकारत्वेनाभिप्रेयते, न तु संख्याद्यन्यथाभावोऽपि. तथात्वेनेति कार्यश्रुत्यनुरोधादङ्गीक्रियते। अत एव वेदस्तुतौ, 'न हि विकृतिं त्यजन्ति कनकस्य तदात्मतया स्वकृतमनुप्रविष्टमिदमात्मतयावसितम्' इति ग्राह्यविकार-

रश्मिः।

त्वेवमिति ब्रह्म न विकृतं परिणामि परिणमत इति, णम प्रह्वत्वे शब्दे च भ्वा. प. से. पर्युपसर्गादात्मनेपदम्। लोहदृष्टान्तानन्तरं नखनिकृन्तनदृष्टान्तसूचितमर्थमाहुः असमीचीनेति। बहुभवनादीति बहुपु भवनं जायते इति भावविकारः आदिशब्देन अस्ति विपरिणमते वर्धते भवनादि वृद्धिः तस्याः। न लौकिकीति परिणामपरित्यागो द्वितीयस्य वृद्धिरूपस्यादिमः उभावेकीकृतो लोके वृद्धिः एवमपक्षीयते इत्यपक्षयः। नश्यतीति नाशः। तदेतद्द्वितीयसुबोधिन्यां दशमेऽस्ति। तेजआदीति। छान्दोग्ये श्वेतकेतूपाख्यान एव 'तत्तेजोऽसृजत' 'तत्तेज ऐक्षत' 'बहु स्यां प्रजायेय' इति 'तदपोऽसृजत' 'ता आप ऐक्षन्त बह्वयः स्याम प्रजामहि' इति 'ता अन्नमसृजन्त'। ब्रह्मेति तत्रैवेत्यस्याः पूर्वं 'सदेव सोम्येदमग्र आसीत्' 'एकमेवाद्वितीयं तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयम्' 'तदैक्षत बहु स्यां प्रजायेय' इति 'तत्तेजोऽसृजत' 'तत्तेज ऐक्षत' इत्येवं ब्रह्मकारणत्वं तस्मिन्। तास्विति तेजोबन्नात्मिकासु देवतासु। पश्चादिति 'सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इत्यनेन जीवानुप्रवेशस्य तत्तेज ऐक्षतेत्यादिनोक्तक्षणात्पश्चात् उक्तत्वेनेत्यर्थः। सेयमित्यस्य सदेवेत्यनेनोक्ता देवतेत्यर्थः। अत्र भाष्ये पूरयन्ति अत इति जडत्वेपि तासामित्यन्वयः। अविकृतेति। ब्रह्मण ईक्षणात्पूर्वं ब्रह्मवत्। तेजआदीनां स्वस्वेक्षणात्पूर्वमविकृतत्वं तस्मात् तद्दृष्टान्तेन तद्देवतादृष्टान्तेन। अनुपपत्तिरविकृतत्वानुपपत्तिः। सुवर्णादिः विकृतं समवायित्वात् तेजआदिदेवतावत्। इत्यनेनानुमानेनेत्यर्थः। अन्यथाभावत्वेनान्यथाभावरूपविकाराभावात् न दोष इत्याहुः तथाच दधीति। गन्धादीति शब्दरूपरसगन्धस्पर्शपरा वृत्तिः कार्येष्वन्यथाभावः। संख्यादीति आदिशब्देन परिमाणम्। तथात्वेन ग्राह्यविकारत्वेन अङ्गीति अन्यथाकार्यश्रुतिविध इति भावः। नहीति कनकार्थिनः कनकस्य विकृतिं कुण्डलादिकं न त्यजन्ति कुतः तदात्मतया कनकात्मतया तद्वत्। स्वकृतमिदं जगत् जीवात्मनानुप्रविष्टं ब्रह्मविद्भि-

वक्ष्यति च, श्रुतेस्तु शब्दमूलत्वादिति । अन्यानि च युक्तिदूषणानि परिहरिष्यति । तस्माद् ब्रह्मपरिणामलक्षणं कार्यमिति जगत्समवायिकारणत्वं ब्रह्मण एवेति सिद्धम् ॥ २६ ॥

योनिश्च हि गीयते ॥ २७ ॥

चेतनेषु किंचिदाशङ्क्य परिहरति । नन्वस्तु जडानां ब्रह्मैककारणत्वम् । चेतनेषु तु योनिबीजयोः समवायित्वदर्शनात् पुरुषत्वाद् भगवतो योनिरूपा प्रकृतिः समवायिकारणं भवतु । शुक्रशोणितसमवेतत्वाच्छरीरस्येत्याशङ्क्य परिहरति

भाष्यप्रकाशः ।

स्वादुष्टत्वमुक्तमिति नायं दोष इत्यर्थः । नन्वयमेव सूत्रकाराशय इत्यत्र किं गमकमत आहुः वक्ष्यतीत्यादि । स्फुटमन्यत् ॥ २६ ॥

योनिश्च हि गीयते ॥ २७ ॥ अत्रापि सर्वं निगदव्याख्यातम् ।

रश्मिः ।

त्मतयावसितमिति । अदुष्टत्वमिति ग्राह्यत्वांशे अन्यथा हानिजनकत्वान्न गृह्णीयुः । अयमिति अन्यथाभावरूपविकाररूपो दोषः । स्फुटमिति । अग्रे इति द्वितीयाध्याये । ब्रह्मपरिणामो लक्ष्यते ज्ञायते अनेन इति करणे ल्युट् । कार्यं मनसाप्याकलयितुमशक्यरचनम् । सिद्धमिति सूत्रान्तरान्तेऽनुक्त्वात्रोक्तम् । जडविचारसंपूर्णता द्योतयति । एवं स्फुटमित्यर्थः । शंकरभाष्ये तु विकृतत्वापत्तिभिया परिणामादिति पृथक् सूत्रमङ्गीकृतं तस्यैषोऽर्थः । इतश्च प्रकृतिर्ब्रह्म यत्कारणं ब्रह्मण एव विकारात्मना परिणामः सामानाधिकरण्येनाम्नायते सच्च त्यच्चाभवन्निरुक्तं चानिरुक्तं चेत्यादिना तत्तु विकारस्य परिहृतत्वात् प्रकृतेः स्वरूपत्वस्योक्तत्वाच्चिन्त्यम् । रामानुजाचार्यास्तु सूत्रद्वयमङ्गीकृत्य पूर्ववद्व्याकुर्वन्ति द्वितीयसूत्रेऽन्तर्यामिब्राह्मणं सर्वं लापयन्ति । माध्वमतमग्रे वक्ष्यन्ति । भास्कराचार्यास्त्वेकसूत्रमङ्गीकृत्य सूत्रकारः श्रुत्यनुसारी परिणामपक्षं सूत्रयांचभूव अयमेव छान्दोग्ये वाक्यकारवृत्तिकाराभ्यां संप्रदीयतेऽतः समाश्रित इत्याहुः ॥ २६ ॥

योनिश्च हि गीयते ॥ २७ ॥ रश्मित्वं भाष्यभास्कराव्यवहितकिरणेषु न तु प्रकाशव्यवहितप्रकाशे अतो यथाबुद्धि व्याख्यायते समवायित्वमीश्वरे समर्थितं तत्तु जन्माद्यस्य यत इत्यत्र तत्तु समन्वयादित्यधिकरणैकवाक्यतया । सूत्रे अस्येति मनसाप्याकलयितुमशक्यरचनस्य प्रपञ्चस्य तस्य समवायित्वमर्धांशस्य जडस्य न चैतन्यस्येति चिज्जडसमुदायेऽर्धजरतीयापत्तिः । तथा च चेतनेषु प्रत्यक्षेण शब्दशतोक्तमपि समवायित्वं नाद्रियत इति प्रत्यक्षदृष्टबीजयोनिसमवायिकत्वमाशङ्क्य कार्ये अर्धजरतीयापत्तिं परिहरतीत्यर्थः । अस्त्विति । 'बीजं माम्' इति वाक्यात् बीजाद्यन्तरापि जडपिप्पलादिवृक्षतृणोत्पत्तिदर्शनात् लाघवादस्तु । योनिरूपेति अक्षररूपा प्रकृतिः न त्वविकृतत्वापादिका स्वरूपरूपा युक्तं चैतत् । संयुक्तकपालद्वयसमवेतघटवत् संयुक्तशुक्रशोणितसमवेतत्वाच्छरीरस्येत्यर्थः । तथा च श्रुतिः 'शुक्रशोणितसंयोगादावर्तते गर्भ इति' गर्भोपनिषदि योनिपदशक्तिर्ब्रह्मणि न प्रकृतौ तदाहुः योनिश्च ब्रह्मैवेति । प्रस्थानरत्नाकरे अमुख्यवृत्त्या ब्रह्मप्रतिपादकानां शक्तिसंकोचलक्षणरूढ्यान्यत्र प्रवृत्तिस्वीकारात् । छन्दोवत्सूत्राणि भवन्तीति न समुदायशक्तिरूपा रूढिः । वेदान्तत्वेन योनिपदे योगमात्रप्रवृत्तेः । नन्वव्यवधानेनोत्पत्तिद्वारत्वं च प्रकृतित्वं तद्विशिष्टा योनिः

योनिश्च ब्रह्मैव। शाक्तवादनिराकरणाय चकारः। तत्र युक्तिश्रुती प्रमाणयति हि गीयत इति। युक्तिस्तावत् 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इति पूर्वमेकमेव प्रतिज्ञातम्। आकाशादेव, आनन्दाद्ध्येवेत्याद्येवकारैश्चानन्यकारणत्वं जगतोऽवगम्यते। इतरापेक्षायां द्वैतापत्तेः। गीयते च 'कर्तारमीशं पुरुषं

रश्मिः।

कर्तारमीशं पुरुषं ब्रह्मयोनिम्' इति श्रावणात् ब्रह्म भवतु परं तु पृथिवीयोनिरोषधिवनानामिति च दर्शनात्। पृथिवी कथं स्वरूपं किं च अथ देव्या अथर्वणशीर्षं व्याख्यास्यामः ॐ सर्वे वै देवा देवीमुपतस्थुः। कासि त्वं महादेवी साब्रवीदहं ब्रह्मस्वरूपिणी ततः प्रकृतिपुरुषात्मकं जगत्। शून्यं चाशून्यं च अहमानन्दानानन्दौ अहं विज्ञानाविज्ञाने अहं ब्रह्माब्रह्मणी द्वे ब्रह्मणी वेदितव्ये इति आथर्वणीश्रुतिः। एवं च शक्तिः समवायिनी इति शाक्तानां वादः तदुक्तं—

'सर्वे शाक्ता द्विजा ज्ञात्या न शैवा न च वैष्णवाः।
यस्मादुपासते नित्यं गायत्रीं वेदमातरम्'॥

इति तस्य वादस्य निराकरणाय चकारः कथं योनिः शक्तिश्च युक्तिश्रुतिभ्यां ब्रह्मेति हि गीयत इति सूत्रार्थात्। योनित्वप्रतिपादनस्यानतिगूढत्वात् युक्तेश्च गूढत्वेनाभ्यर्हितत्वाद् ब्रह्मविदां तां पुरस्कृत्याहुः तत्र युक्तीति हिर्युक्तिवाचकमव्ययमित्याहुः युक्तिस्तावदिति। सदेवेति अयमर्थः। पृथिवीय चानन्तपदाभ्यामुच्यते कोशे पृथिवी अनन्तां विजयां शुद्धामिति यस्या अन्तो न लभ्यते तस्मादुच्यते अनन्तेति च इति देव्याः अथर्वणशीर्षे तथा च यदि शक्तिवादो न निरस्यात् तदा एवकारेण ज्ञानानन्तेन व्यवच्छिन्द्यात्। उपलक्षकं सत्पदं न वदेदद्वितीयपदं चेत्यन्यथाज्ञानं युक्तिः। ननूपलक्षणविधयास्तु शक्तिवाद इति चेत्तत्राहुः पूर्वमेकमिति तथा च वादान्तरमित्यत आपाततः एकमेव विज्ञानं प्रतिज्ञातं बाध्येतेत्यर्थः। ननु देव्या अथर्वणशीर्षे सैषा सत्त्वरजस्तमांसि सैषा ब्रह्मविष्णुशिवरूपिणी सैषा प्रजापतीन्द्रमनव इति श्रावणात् सदपि सास्त्विति चेत्तत्राहुः आकाशादेवेति अस्तु परं त्वाकाशपदवाच्यायास्तद्रूपाया न त्वज्ञग्रन्थस्तुतायाः भगवच्चरिताविष्टाया ब्रह्मवादत्वह्रादेनेति द्योतनाय आकाशादेवेति पूर्वमुक्तम् 'यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता' इति श्रुतेः। अवगम्यत इति। ननु भगवच्चरित्राविष्टायाः 'कृष्णोहं पश्यत गतिम्' इति फलप्रकरणे यथा तस्या एवकारव्यावर्त्याया नावगम्यते अत एव देव्या अथर्वणशीर्षे—

'कालरात्रीं ब्रह्मस्तुतां वैष्णवीं स्कन्दमातरम्।
सरस्वतीमदितिं दक्षदुहितरं नमामः पावनां शिवाम्।
महालक्ष्म्यै च विद्महे सर्वशक्त्यै च धीमहि।
तन्नो देवी प्रचोदयात्'॥ इति।

अत्र अदितिः दुहिता। अदितिर्ह्यजनिष्ट दक्षया दुहितेति श्रुतेः। महालक्ष्मी राधापि। अस्या अर्चास्थापने उपनिषज्ज्ञानमावश्यकमिदमथर्वशीर्षमज्ञात्वा योर्चां स्थापयति शतलक्षं जप्त्वा नार्चा शुद्धिं च विन्दति। नन्वव्यभिचारिभक्तिश्रद्धालुत्वेपि प्रवृत्तवेदान्तशास्त्रसिद्धान्तविरोधस्तु स्यात् तथाच पाक्षिकत्वापत्ती राद्धान्ते स्यादत आहुः इतरापेति ननु सत्यं पाक्षिकत्वापत्तिरिति परं तु द्वैतापत्तिस्तु वारणीया।

ब्रह्मयोनिम्'। 'यद्भूतयोनिं परिपश्यन्ति धीराः' इति च 'मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्' इति। 'तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता' इति च। अक्षरपुरुषोत्तमभावेन तथात्वम्। तस्माद् योनिरपि भगवान् पुरुषोऽपि सर्वं वीर्यं जीवश्च सर्वं भगवानिति। 'इदं सर्वं, यदयमात्मा' इति सिद्धम्। तस्मात् केनाप्यंशेन प्रकृतिप्रवेशो नास्तीत्यशब्दत्वं सांख्यमतस्य सिद्धम् ॥ २७ ॥

इति प्रथमाध्यायस्य चतुर्थपादेऽष्टमं पञ्चसूत्रं प्रकृत्यधिकरणम् ॥ ८ ॥

रश्मिः ।

'रुद्रोऽरुद्रश्च दन्ती च नन्दिः षण्मुख एव च ।
गरुडो ब्रह्म विष्णुश्च नारसिंहस्तथैव च ।
आदित्योऽग्निश्च दुर्गिश्च क्रमेण द्वादशाम्भसि' ॥

इति तैत्तिरीये द्वादशाङ्गः पुरुषः स च महानारायण 'अम्भस्यपारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीयान्' इत्यत्र रामानुजभाष्ये रसरूपः 'रसो वै सः रसꣳह्येवायं लब्ध्वानन्दी भवति' इति तैत्तिरीयादाहृत्य व्याक्रियतेऽतो न द्वैतमिति बोध्यम् । साकारब्रह्मस्थापिका महानारायणे श्रुतिः 'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात्' इति अनन्तरूपेषु द्वादशाङ्गः पुरुषोऽप्यतः 'शाश्वतन्निजरूपाय गोविन्दाय नमोनमः' 'गायत्रीं वेदमातरम्' इति यदुक्तं तत्तु 'पूजां तैः कल्पयेत् सम्यक्संकल्पः कर्मपावनीम्' इति वाक्यात् पूजोपयोगि तदुपासनम् । एवं युक्तिमुक्त्वा श्रुतिं वक्तुमाहुः **गीयते** चेति अक्षरब्रह्मपुरुषोत्तमभावार्थं ब्रह्मणोऽक्षरस्य योनिः पञ्चमहाभूतयोनिम्। ननु भूतयोनिरित्युक्तं न सर्वयोनिरिति चेत्तत्रोपबृंहितश्रुतिः सूत्रे गीयत इत्याशयेनाहुः **मम योनिरिति** । ननु तथापि चेतने तौल्यमिति सिद्धमित्यसिद्धमिति चेत्तत्राहुः **तासामिति** । एवं जडेषु बीजप्रदत्वं चेतनेषु पितृत्वमिति विशेषः । **अक्षरपुरुषोत्तमिति** । ब्रह्मयोनिमित्यत्र व्याख्यातम् । तथात्वं योनित्वम्। बीजप्रदत्वं च । सिद्धमाहुस्तस्मादिति उक्तोपपादनात् । योनिपुरुषौ चरमवाक्ये । *सर्वमिति तृतीये वीर्यं गर्भमिति तृतीये जीवोऽपि महद्ब्रह्मेति तृतीये उक्तेऽर्थे श्रुतिं प्रमाणयन्ति इदं* **सर्वमिति** । **सांख्यमतस्येति** अन्यथा षड्शास्त्रेषु निवेशो न स्यात् । पञ्च चत्वारि वा शास्त्राणि स्युः तथा च ।

'त्रय्या चोपनिषद्भिश्च सांख्ययोगैश्च सात्वतैः ।
उपगीयमानमाहात्म्यं हरिं साऽमन्यतात्मजम्' ॥

इति वाक्यं विरुध्येत । तथा च द्वितीयस्कन्धनवमाध्यायोक्तोर्णनाभिवत्समवायित्वमिति सिद्धम्। तथा सति जडवच्छायवस्तु प्रवर्तते चिन्मनुप्रजापतीन्द्रा य एष स्तन इवालुम्पते सेन्द्रयोनिरिति तैत्तिरीयात् ब्रह्मविष्णुशिवाः नारदः 'उत्सङ्गान्नारदो जज्ञे' इति स्वल्पा अयोनिजाः शंकरभाष्ये तु क्वचित्स्थानवचनोऽपि योनिशब्दो दृष्टः 'योनिष्ट इन्द्रनिषदे अकारीति' सर्वे योनिजा इति बहूनामनुग्रहो न्याय्यः इत्यनेन बाधात् इति बोध्यम् । अन्यत्र स्त्रीयोनेरप्यस्त्येवावयवद्वारेण गर्भे प्रत्युपादानत्वमित्युक्तम्। तच्छुक्रशोणितसमवेतत्वात् शरीरस्येति भाष्यविरुद्धम्। रामानुजभाष्येऽपि योनिशब्दश्च प्रकृतिवचनः इत्यूर्णनाभिदृष्टान्तः । मध्वभाष्ये तु ब्रह्माण्डवाक्ये अप्युक्ते

'व्यवधानेन सूतिस्तु पुंस्त्वं विद्भिरुच्यते ।
सूतिरव्यवधानेन प्रकृतित्वमिति स्थितिः' ॥

भाष्यप्रकाशः ।

माध्वास्तु—प्रकृतिश्चेति सूत्रे, हन्त तमेव पुरुषं सर्वाणि नामान्यभिवदन्ति, 'यथा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रमभिसंविशन्त्येवमेवैतानि नामानि पुरुषमभिसंविशन्ति' इति श्रुतिम्, अभिध्यासूत्रे च, मायां तु प्रकृतिं विद्यादिति,

'महामायेत्यविद्येति नियतिर्मोहिनीति च ।
प्रकृतिर्वासनेत्येवं तवेच्छाऽनन्त ! कथ्यते' ॥

इति वचनम्, 'सोऽभिध्या स जूतिः स प्रज्ञा स आनन्दः' इति श्रुतिम्,

'ध्यायति ध्यानरूपोऽसौ सुखी सुखमतीव च ।
परस्यैश्वर्ययोगेन विरुद्धार्थत्वमेष्यते' ॥

इति ब्रह्माण्डवाक्यम्, साक्षात्सूत्रे चैष स्त्र्येष पुरुष एष प्रकृतिरेष आत्मैष ब्रह्मैष लोक एष आलोको योऽसौ हरिरादिरनादिरनन्तोऽन्तः परमः पराड् विश्वरूप इति पैङ्ग्यश्रुतिं चोपन्यस्य भगवतः सर्वविधशब्दवाच्यत्वं च स्थापयित्वा, आत्मकृतिसूत्रे प्रकर्षेण करोतीति प्रकृतिरिति प्रयोगात् प्रकृतावनुप्रविश्य ता परिणाम्य तत्परिणामनियामकत्वेन तत्र स्थित्वाऽऽत्मनो बहुधाकरणात् प्रकृतिशब्दवाच्यतां स्थापयित्वा, अथ हैष आत्मा प्रकृतिमनुप्रविश्यात्मानं बहुधा चकार तस्मात् प्रकृतिरित्याचक्षत इति माल्लवेयश्रुतिम्—

'अविकारोऽपि परमः प्रकृतिं तु विकारिणीम् ।
अनुप्रविश्य गोविन्दः प्रकृतिश्चाभिधीयते' ॥

रश्मिः ।

'उभयात्मकसूतित्वाद्वासुदेवः परः पुमान् ।
प्रकृतिः पुरुषश्चेति शब्दैरेकोभिधीयते' ॥

इति अग्रेपि वक्ष्यते ग्रन्थकृद्भिः । भास्करभाष्येप्येवं तत्तन्मतभेदेन विशेषः द्विर्हेतौ यतो हेतोः अत्र श्रुतिसंग्रहेपि न युक्तिसंग्रहः मुख्ये कार्यसंप्रत्ययात् जडदेहयोरियान् विशेषो येन चाद्यात्मा जडात्पृथक्कृत्य निरूपणम् । देहे पाञ्चभौतिक इदं निरूप्यते आत्मोपनिषदि त्रिविधात्मनिरूपणे पञ्चमहाभूतात्मको निरूपित इति पृथिवी अस्थीनि यत्कठिनं तत्पृथिवीति श्रुतौ । तेषामात्मत्वे एवास्थि शस्त्रं दधीचेरस्थीनि तेन वृत्रवधः । 'अपां फेनेन नमुचेः शिर आहरत्' इत्यपामात्मत्वं विलक्षणसामर्थ्यात् । तेजः क्रममुक्तौ प्रतिबन्धनिवृत्तिद्वारात्मा । वायुरात्मा प्रसिद्धः । त्वमेव प्रत्यक्षं ब्रह्मासीति श्रुतौ । आकाश आत्मा बृहदारण्यकोक्त आकाशोपासकान् प्रति मांसस्याकाशत्वं संहितायां तस्यात्मत्वं वेनजङ्घागतस्यान्यथा मनूत्पत्तिर्न स्यात् इति जडौषधिषु तु योगेन पृथक्त्वेत्युपवेदवैद्यकगतमिति समवायित्वं माध्वा नाङ्गीकुर्वते तन्निराकर्तुं, तदाहुः अत्रापि सर्वमिति गतं. भाष्यव्याख्यानमधुना प्रकृते भावाद्वैतं परिणामवादे न सिद्ध्यति परिणामश्चेल्लाक्षणिकः तदा कथंभावाद्वैतमिति परिणामं समर्थयितुं विषयादिकं चाधिकरणत्वार्थं सूचयितुं माध्वमतमुपचिक्षिपुः माध्वास्त्विति । प्रकृतिपरिणामो न जगदिति शंकरभाष्ये तत्सूत्रं भङ्क्त्वा सप्रयोजकमित्यन्येषां तु संमतः परिणाम इति माध्वास्त्विति माध्वमतमुपक्षिप्तं हन्त तमिति इयं प्रतिज्ञाबोधिका । यथा नद्य इति दृष्टान्तबोधिकेयम् । अभिध्यापदार्थमाहुः प्रकृतिमिति । साक्षात्पदार्थमाहुः एष स्त्रीति परिणामं विशदयन्ति प्रकृतावन्विति तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतौ समवायित्वाद्यनङ्गीकारे सूत्राणां निर्विषयत्वमित्याशयेनाहुः अभिधीयत इति अभिधानं. क्रियते प्रकृतिरित्यत्र कृञो क्तिच् ।

भाष्यप्रकाशः ।

इति नारदीयवाक्यं च तदुपष्टम्भायोदाहरन्ति । तच्चिन्त्यम् । श्रुतेरप्रसिद्धत्वात् । तादृश्या अपि कथंचित् प्रामाण्योपगमेऽप्यस्या आत्मनो बहुधाकरणबोधकतयाऽऽत्मकृतिबोधकत्वाभावेन विषयतयोपन्यासायोगाच्च । हन्त तमित्यारभ्य विश्वरूप इत्यन्तासु स्वोपन्यस्तासु श्रुतिषु सर्वशब्दवाच्यत्वस्य सर्वरूपत्वस्य च स्वत एव बोधनेन तासां पूर्वकालीनव्यवस्थाबोधकतया, भाल्लवेयश्रुतौ चाथशब्देन पाश्चात्यबोधकतायाः स्फुटं भानेन कालभेदकृतविषयभेदस्य स्फुटतयैतदनुरोधेन तदर्थनिर्णयस्याप्ययुक्तत्वाच्च । ध्यायतीति ब्रह्माण्डवाक्ये ऐश्वर्ययोगेन विरुद्धार्थतया सर्वरूपत्वादेरिष्टताया उक्ततया सर्वानुपपत्तिपरिहारसंभवे प्रकृतिशब्दयोगादरणेन रूढ्युपष्टम्भस्य व्यर्थत्वाच्च ।

यत्तु जयतीर्थः—ब्रह्मणो जगदुपादानत्वे एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया मृत्पिण्डादिदृष्टान्तोक्तेश्च न प्रमाणत्वम् । तस्या अन्यार्थत्वस्य सूत्रव्याख्याने सम्यग्व्याख्याततत्वादित्याह ।

रश्मिः ।

क्तिर्वा कर्तरि । **श्रुतेरिति** भाल्लवेयश्रुतेः समाकर्षादित्यधिकरणे विचारितत्वाच्च । **आत्मनो बहुधेति** आत्मानं बहुधा चकारेति श्रुतौ विषयभूतायाम् । अत्र कर्ताप्यात्माऽत आत्मनः स्वस्याः प्रकृतेः कृतिः आत्मकृतिसूत्रोक्ता तस्या विषयवाक्ये बोधकत्वाभावेन । **विषयतयेति** अनेनास्मिन्नधिकरणे 'सोऽकामयत बहु स्यां प्रजायेय इति स तपोऽतप्यत स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किंच तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत् निरुक्तं चानिरुक्तं च निलयनं चानिलयनं च विज्ञानं चाविज्ञानं च सत्यं चानृतं च सत्यमभवत् यदिदं किंच तत्सत्यमित्याचक्षते तदप्येष श्लोको भवति असद्वा इदमग्र आसीत् ततो वै सदजायत तदात्मानँस्वयमकुरुत तस्मात्सुकृतमुच्यते' इति विषयवाक्यम् । संशयस्तु परिणामः भवति न वेति श्रुतिः अद्वैतस्थापकत्वविशिष्टा चेयमेवेति संशयबीजं नेति पूर्वपक्षः प्रकृतिप्रवेशे सगुणत्वापत्तिः न यत्र मायेति निषेधाच्चेति प्राप्ते सिद्धान्तः । प्रकृतिश्चेति प्रकृतिः स्वरूपमिति न सगुणत्वापत्तिः 'योगमायामुपाश्रितः' इति न मायाविरोधः मायेन्द्रियाणि वा सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितमिति ब्रह्मप्रकरणे गीता । यतः इति स्वमतेऽधिकरणरचना द्योतिता । **उपन्यासायोगादिति** । ननु सत्यमात्मकृतिबोधकत्वाभावः परं त्वपरो हेतुर्भवति तस्मात्प्रकृतिरित्याचक्षते इत्यत्रात्मा प्रकृतिरित्यभिधानात् । तथाच प्रकृतिश्चेति सूत्रभाष्यं माध्वानां प्रकृतिशब्दवाच्योपि स एवेति तथाच कुतो ह्युपन्यासायोग इति चेन्न तथाप्युपन्यासायोगात् । प्रकृतिशब्दवाच्यत्वस्याप्युक्ताधिकरणेनैव लाभात् स्वार्थत्वज्ञापनस्यात्रापि सत्वात् । विषयवाक्य एव नामरूपविश्वात्मकत्वश्रावणे समवायित्वं भाष्य एव श्रावितं भवति इत्याशयेनाहुः **सत्तमित्यारभ्येति** । **स्वोपन्यस्तास्विति** साक्षात्सूत्रमभिव्याप्योपन्यस्तासु । **पूर्वकालीनेति** प्रकृतिप्रवेशपूर्वकालीनेत्यर्थः । **पाश्चात्येति** आनन्तर्यवाचकत्वमथेत्यस्येति भावः । **कालभेदेति** प्रकृतिप्रवेशात्पूर्वकाल उत्तरकालश्च । **एतदन्विति** भाल्लवेयश्रुत्यनुरोधेन । **तदर्थेति** प्रकृतिप्रवेशोत्तरकालीनप्रकृतिशब्दवाच्यत्वरूपो यः प्रकृतिश्चेत्यादित्रिसूत्रीविषयवाक्यार्थस्तस्य निर्णयस्य । **अयुक्तत्वेति** तथा चास्मदीयोर्थः स्फुट इति स युक्त इति भावः । अतः समवायित्वनिरूपणम् । एवं प्रथमकर्तृविषय उक्त्वा अभिध्यासूत्र आहुः **ध्यायतीति** । **विरुद्धेति** ध्यानाश्रयत्वेपि ध्याने रूपत्वरूपविरुद्धार्थतया सर्वानुपपत्तिः सर्वशब्दवाच्यत्वानुपपत्तिः । **रूढ्युपेति** इच्छायां रूढिः

भाष्यप्रकाशः ।

तदपि श्रद्धाजाड्यमात्रम् । सूत्रव्याख्यानस्यैवासंगततायाः प्रदर्शितत्वादिति । यदपि ब्रह्मणः परिणामोक्तिरसंगतैव । एतदध्यायस्याशेषशास्त्रस्य ब्रह्मणि समन्वयप्रतिपादनाय प्रवृत्तत्वादित्याह । तदप्यसंगतम् । अशेषशास्त्रमध्ये, 'स आत्मानꣳ स्वयमकुरुत,' 'खल्विदं', ब्रह्म, तज्जलान् इति', 'स आत्मानमेव द्वेधापातयत्, ततः पतिश्च पत्नी चाभवताम्,' 'हन्ताहं मदेव मन्मात्रं सर्वं यस्मिन्नाकाश ओतश्च' इत्यादिश्रुतीनां, 'विश्वं वै ब्रह्मतन्मात्रम्—

'नैतच्चित्रं भगवति ह्यनन्ते जगदीश्वरे, ।
ओतप्रोतमिदं यस्मिंस्तन्तुष्वङ्ग यथा पटः' ॥

'त्वय्यग्र आसीत्' इत्यादिस्मृतीनां च प्रविष्टत्वात् तासां समन्वयस्यावश्यं प्रतिपाद्यत्वात् परिणामं विना च तदसंभवादिति । यदप्यानुमानिकपादे, प्रकृतेः शब्दप्रतिपाद्यत्वनिराकरणं चेत् प्रकृतिस्वरूपस्यानिराकृतत्वात् तस्या उपादानतया वर्तमानत्वात् प्रकृतित्वेन ब्रह्मण उपादानत्वस्थापनमसंगतमेव । प्रकृतिस्वरूपनिराकरणं चेत् सूत्रेषु तददर्शनात् तदप्यसंगतमिति न ब्रह्मण उपादानत्वे कापि संगतिरित्युक्तं । तदप्ययुद्ध्यैव । प्रकृतेर्मूलकारणतायाः शब्दप्रतिपाद्यत्वस्य निराकरणं सूत्रेषु सिद्धमिति तस्या अवान्तरोपादानतया विद्यमानत्वेऽपि ब्रह्मणि मूलोपादानत्वाबाधात् । एकादशस्कन्धे, 'आसीज्ज्ञानमथो ह्यर्थ एकमेवाविकल्पितम् ।

'यदा विवेकनिपुणा आदौ कृतयुगे युगे ।
तन्मायाफलरूपेण केवलं निर्विकल्पितम् ॥
वाङ्मनोगोचरातीतं द्विधा समभवद् बृहत् ।
तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका' ॥

इत्यादिना भगवतैव तथा निर्णीतत्वात् । अतो ब्रह्मण उपादानत्वानङ्गीकरणमबोधाग्रहयोरन्यतरमूलकमेवेति दिक् ॥ २७ ॥

इत्यष्टमाधिकरणम् ॥ ८ ॥

रश्मिः ।

समुदायशक्तिः तस्या उपष्टम्भस्य । स आत्मानमिति एतच्च समाकर्षादित्यधिकरणे उपपादितम् । **परिणाम**मिति परिणामस्तात्त्विकोन्यथाभावः । **शब्दे**ति वैदिकशब्देत्यर्थः । **सूत्रेषु** रचनानुपपत्तेश्च नानुमानमित्यादिषु । **अवान्तरे**ति । आन्तरालिकसृष्ट्युपादानतया । रजतोपादानतया केषांचित् शुक्तिरुपादानं स्वमते एवमपि प्रकृतिपुरुषपरिणामैरद्वैतेऽधीतिनां विचिकित्सासंभवे भ्रमवारकमेव सांख्यमाहुः **एकादशे**ति । **तथे**ति केवलं निर्विकल्पितम् एकं तन्मायाफलरूपं प्रकृतिमायाफलरूपं प्रतिबिम्बमिति निर्गुणसगुणफलरूपेणेति मायावादो भासते न स प्रकृते सांख्येन समाधानात् । **दिगि**ति अन्यानि दूषणानि प्रसिद्धशक्तिविचारस्य विषयत्वादिरूपाणि सूचयति दिक्शब्दः । तथापि 'पूर्णा भगवदीयास्ते शेषव्यासाग्निमारुताः' इति 'आचार्यवान् पुरुषो वेद' इत्यादिविरोधात् दिक्शब्दार्थ एवम् । यथानेकमार्गेण क्रीडा तेपि शुद्धा युक्ताश्चापेक्षिताः इति 'युक्तं च सन्ति सर्वत्र भाषन्ते ब्राह्मणा यथा' इत्याद्युक्ता यथा विविक्तं यद्वक्ष्ये गृह्णीमो युक्तिसंभवादिति भगवता ग्रहणादिरुक्तेत्यर्थः नाधिकम् ॥ २७ ॥

इत्यष्टमाधिकरणम् ॥ ८ ॥

एतेन सर्वे व्याख्याता व्याख्याताः ॥ २८ ॥ (१।४।९)

ब्रह्मवादव्यतिरिक्ताः सर्वे वादा अवैदिका वेदविरुद्धाश्चेत्याह। एतेन ब्रह्मवादस्थापनपूर्वकसांख्यमतनिराकरणेन सर्वे पातञ्जलादिवादा व्याख्याताः। अवैदिका अनुपयुक्ताश्च। वैदिकानां हि वेदः प्रमाणम्। तस्मिन्नव्याकुले भ्रान्तिप्रतिपन्ना एव सर्वे वादा इति। एतत् सौकर्यार्थं विस्तरेणाग्रे वक्ष्यते। आवृत्तिरध्यायसमाप्तिबोधिका ॥ २८ ॥

इति प्रथमाध्यायचतुर्थपादे नवममेकसूत्रं व्याख्यानाधिकरणम् ॥ ९ ॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये

प्रथमाध्यायस्य चतुर्थः पादः ॥ १ ॥ ४ ॥

॥ प्रथमोऽध्यायः समाप्तः ॥

भाष्यप्रकाशः।

एतेन सर्वे व्याख्याता व्याख्याताः ॥ २८ ॥ सूत्रमवतारयन्ति ब्रह्मवादेत्यादि। एतेन सांख्यमतस्याश्रौतत्वसाधनेन पूर्वपादत्रयोक्तं सर्वं समर्थितं ज्ञेयम्। नन्वेवं मतान्तरनिराससिद्धावग्रिमाध्यायस्य किं प्रयोजनमित्यत आहुः। एतदित्यादि। एतदिति वादान्तरनिराकरणमग्रिमाध्याये बोधसौकर्यार्थं विस्तरेण वक्ष्यत इत्यर्थः। एतेन सामान्यविशेषभावरूपा संगतिरपि दर्शिता ॥ २८ ॥

इति नवमाधिकरणम् ॥ ९ ॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रकिरणनिवारितहृदयान्धकारेण

पीताम्बरात्मजपुरुषोत्तमेन कृते ब्रह्मसूत्राणुभाष्यप्रकाशे

प्रथमाध्यायस्य चतुर्थः पादः समाप्तः ॥ १ ॥ ४ ॥

॥ समाप्तश्चायं प्रथमोऽध्यायः ॥

रश्मिः।

एतेन सर्वे व्याख्याता व्याख्याताः ॥ २८ ॥ सूत्रमेवेति सांख्यमते उक्तमश्रौतत्वं पातञ्जलादिष्वतिदेष्टुं सूत्रात्मकमधिकरणमवतारयन्तीत्यर्थः। न च सूत्रत्वे किं बाधकमिति शङ्क्यम्। अधिकरणप्रायपाठपठितत्वमेव बाधकमिति। भाष्ये। पतञ्जलादीति तेन पातञ्जलादिवादा विषयाः ते व्याख्याता न वेति संदेहः। 'वेदान्तविज्ञानसुनिश्चितार्था' इति 'नानुध्यायाद्बहून् शब्दान्' इति नानुध्यायादित्यस्याः अनूपसर्गेण अन्यथाप्यर्थसंभवात् तथाच शब्दान् प्रतिज्ञातान् च संदेहबीजं नेति पूर्वपक्षः व्याख्यानादर्शनात्। सिद्धान्तस्तु व्याख्यानदर्शनम्। व्याख्याताः वेदान्तविज्ञानेति श्रुतेः। आदिपदेन सामान्यवादः परमाणुवादः ज्योतिषवादः गणपतिवादः सूर्यवादः शून्यवादः स्वभाववादः भूतवादः योनिवादः पुरुषवादः नियतिवादः यदृच्छावादः कालवादः तमोवादः अन्धवादः एते अवैदिकत्वेनानुपयुक्तत्वेन व्याख्याताः। कुत इत्याकाङ्क्षायां हेतुमाहुः वैदिकानां हीति। अव्याकुल इति व्याकुल इति वक्तव्ये, ईषदर्थकनञ्प्रयोगः 'नानावादानुरोधि तत्' इतिनिबन्धात्। ईषद्व्याकुलतामन्तरा नानावादायोगात्। यस्मिन्

रश्मिः ।

प्रतिश्लोकमचद्धवत्यपीति न्यायेन वा नानावादानुरोधिरूपे प्रतिपादनीये तु अव्याकुलेऽभ्रान्तिप्रतिपन्ना इति ईषदुपयुक्तत्वेनैपद्वैदिकत्वेन च प्रकृतिवादवद्व्याख्याताः । भ्रान्तिप्रतिपन्ना ईषद्व्याकुलवैदिकत्वात् । शून्यवादवत् । शून्यवादो हि 'मेनेऽसन्तमिवात्मानं सुप्तशक्तिरसुप्तदृक्' इतिवाक्यानुसंधानमूलकः । एवं सिद्धे भ्रान्तिप्रतिपन्नत्वे विमतभावा अनुपयुक्ताः भ्रान्तिप्रतिपन्नत्वात् शुक्तिरजतवत् । अवैदिकाः अनुपयुक्तत्वात् । अवादवत् । यन्नैवं तन्नैवं ब्रह्मवादवत् । नहि ब्रह्मवादव्यतिरेकेण ब्रह्मज्ञानं भवतीति । बोधिकेति ननु कः शब्द इति चेन्न आवृत्तिबोधकौ शब्दौ आवृत्तिर्योपि व्यञ्जकोध्यायसमाप्तेः । शक्यार्थावृत्तिस्तु भक्तिकर्मभेदेन शक्यद्वैविध्यात् । ज्ञानमार्गे प्रकृत्यादिनिरूपणस्यानतिप्रयोजनत्वात् । ननु तर्हि भक्तिकर्ममार्गयोः व्याख्याता इत्येव सूत्रांशोऽस्त्विति शङ्क्यम् । अवधारणार्थं सर्वस्याप्युक्तस्याध्यायमूलतः । 'द्विरुक्तिं कुर्वते प्राज्ञा अध्यायान्ते विनिर्णये' इति वाराहसंहितावाक्यात् । माध्वैरङ्गीकृतमिदम् । अध्यायान्तो यस्य विनिर्णयस्य । प्रकृते । सामान्येति एकसंबन्धिज्ञानमपरसंबन्धिस्मारकमिति प्रसङ्गसंगतावन्तर्भावः सामान्यः सर्वे वादा विशेषः सामान्यवादादिः । यथा प्रकृतिः सांख्ये समवायिकारणं पुरुषोऽसङ्गः । सिद्धान्ते प्रकृतिः अविकृतत्वसाधकं स्वरूपं 'प्रकृतिमगन् किल यस्य गोपवध्वः' इतिवाक्यात् तेन नार्धजरतीयम् । तथा सामान्यं वाक्यपदीये आत्मा तदेव समवायि स्यात् प्रकृतौ प्रतिफलितमिति मायावादः शून्यवादसदृक्षः । सिद्धान्ते सामान्यं द्वितीयस्कन्धनवमाध्यायोक्तरीत्या धर्मरूपमतो धर्मिणोऽसामान्यं अन्यं धर्मविशिष्टे शक्तावुपयुज्यते इति शक्तिधीविषयत्वसाधकं स्वरूपं समाधिकरणात् तेन नार्धजरतीयम् । तथा नित्या परमाणवः समवायिकारणं ज्ञानाधिकरणमात्मा निमित्तकारणं सिद्धान्ते परमाणवः ईश्वरस्य शरीरैक्यज्ञानजन्याः अन्येषां शरीरैक्यभ्रमजनकाः ।

'चरमः सद्विशेषाणामनेकोऽसंयुतः सदा ।
परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः' ॥

इति तेन नार्धजरतीयम् । तथा ज्योतिषे वासुदेवः सर्वोत्पादक ईश्वरः । सप्तग्रहेषु बलाधिको यः सः शनिर्वा आत्माधिकः कलादिभिर्न भोगः इति जैमिनिसूत्रम् । एवं शनिविषये.........

सिद्धान्ते वासुदेवोवतार उच्यते 'वदन्ति वासुदेवेति वसुदेवसुतं हि माम्' इत्युत्तरार्धवाक्यात् तेन नार्धजरतीयम् । तथा गणपत्युपनिषदि गणपतेर्जगज्जन्मादिकमुक्तमतः स एव समवायीति । सिद्धान्ते गणपत्यथर्वशीर्षे ब्रह्ममय इति शिवसुत इति च कथनात् ब्रह्मचरित्रमिति द्वादशाङ्गे निविष्टो दन्तिः समवायी 'त्वमानन्दमयस्त्वं ब्रह्ममयः' इति गणपत्यथर्वशीर्षवाक्यात् । प्रमथपतये नमस्ते अस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने । शिवसुताय वरदमूर्तये इति वाक्याच्च तेन नार्धजरतीयम् । तथा सूर्योपनिषदि गायत्री प्रसिद्धा सूर्य आत्मा जगतस्तस्थुषश्च सूर्यात् खल्विमानि भूतानि जायन्ते इति सूर्य एव समवायी इति स्मार्ताः—

'स्मृतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम् ।
एतैः सर्वैरादित्यमण्डलमेव विधास्यते' ॥

इत्याररणात् । सिद्धान्ते निरुक्ते सूर्यः देवपत्नी सपत्नीनामसु पठित इति प्रकृतिवन्निर्णयः । असावादित्यो ब्रह्मेति सूर्योपनिषद्वाक्यात् । आदित्योभिरमिरादित्य इति ब्राह्मणम् । तथाच वेदत्रयी

रश्मिः ।

सूर्यश्चिदिति सदानन्दप्रतिपादक इति स्वरूपलक्षणलक्षित सत्यज्ञानानन्तानन्देन्तर्भावात् तत्स्वरूपम्। तेन नार्धजरतीयम् । समवायिकारणं सूर्यः ब्रह्म निमित्तकारणं सिद्धान्ते कालो ब्रह्म बहुबुभूप-गृहीतप्राणगुणकरकारकं रूपं कर्तृ विपयत्वान्न समवायिविपयमिति वा । कालः सूर्यश्चेष्टारूप इति प्रकृतिवदेव । तथा कालोस्मीति भगवद्वाक्यात् तेन नार्धजरतीयम् । तथा स्वभावः समवायी ईश्वरो निमित्तं सिद्धान्ते कृष्णः प्रवर्तकः इति प्रवृत्तिरूपे धर्मे स्वभावपदम् । 'प्रवर्तकत्वं कृष्णस्य' इतिवाक्यात् तेन नार्धजरतीयं प्रकाशाश्रयन्यायात् । तथा नियतिरन्तर्यामिब्राह्मणोक्तं दैवं नियम्यनियामकभावः संबन्धो वा समवायिकारणं ईश्वरः कर्ता सिद्धान्ते दैवं कर्तृसंबन्ध आत्माऽऽत्मस्वरूपे निविष्टत्वात् । ब्रह्मब्रह्मत्वसंबन्धावगाहिज्ञानस्यात्मत्वात् आत्मनः कर्तृ न समवायिविपयः ।

'अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्' ॥
'तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः' ॥

इति । 'दैवादपेतमथ दैववशादुपेतम्' इत्यादिवाक्यनिचयात् । पृथिवीमन्तरो यमयतीति श्रुतेः नियम्यनियामकभावः संबन्धस्तेन नार्धजरतीयम् । तथा यदृच्छा भगवदिच्छा समवायिनी सिद्धान्ते इच्छाशक्त्यधीना अन्या शक्तयः इति शक्तौ निवेशः वाराहपुराणवाक्यात् तेन नार्धजरतीयम् । तथा भूतवादे पञ्चमहाभूतानां ब्रह्माहं प्रपद्ये इति तान्येव समवायीनि सिद्धान्ते वृत्तश्चतुःषोडश पञ्चशक्तिभिरिति द्वितीयस्कन्धनवमाध्यायवाक्याद्वरणशक्तयः उक्तवाक्यात् तेन नार्धजरतीयकम् । तथा योनिः स्थानं अश्वः बृहदारण्यकोक्तः समवायी सिद्धान्ते कर्तृत्वं तत्पुरस्कारेण समवायित्वं उक्तवाक्यात् तेन नार्धजरतीयकम् । पुरुषो ब्रह्माण्डविग्रहः समवायी तज्जनकं महतः स्रष्टृ निमित्त-कारणं सिद्धान्ते महतः स्रष्टृ समवायि निमित्तं च तस्माद्विराडजायत इति श्रुतिवाक्यात् । न च 'एतन्नानावताराणां निधानं बीजमव्ययम्' इति वाक्यात् नैवमिति वाच्यम् । श्वेताश्वतरे कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यमित्युक्त्वा युक्त्या संयोग एषां न त्वात्मभावादिति संयोगः एषां संबन्धः न त्वात्मभावादात्मत्वादित्युक्त्वात्माप्यनीशः सुखदुःखहेतोरिति कृतप्रयत्नापेक्षत्वात् वैषम्यनैर्घृण्ये वारिते तमोवादे आसीदिदं तमोभूतमिति तदेव समवायि सिद्धान्ते अवान्तरप्रलयविषयत्वं तमो ब्रह्मैव वा अहमेवासमेवाग्रे इति वाक्यात् । तमआसीदिति अनभिव्यक्त''''''माधिकरणभाष्यं तेन नार्धजरतीयकम् । आपो वा इदमग्रे सलिलमासीत् इत्यादेऽवान्तरप्रलयविपयः समवायिविपयः सिद्धान्तेप्येवम् । आपमापामपः सर्वा इत्यारणात् । तेन नार्धजरतीयम् । शून्यवादो नास्तिकानां शून्यं विजनं शुने हितं 'शुनः संप्रसारणं वा च दीर्घः' इति यत् शून्यम् विजनं शमून्यमिति पाठे सर्वस्य ज्ञानात्म-कत्वात् असुराणां च असत्यमिति वाक्यात् कायः समवायी सिद्धान्ते शमूनकर्त्रपि ब्रह्म शम् ऊनम् । नास्तिकानामसुराणां च ऊनाय हितं यत् शमून्यं 'शमूनं कुरुते विष्णुरदृश्यः सन् परः स्वयम् । तस्माच्छून्यमिति प्रोक्तः' इति महाकौर्मात् तेन नार्धजरतीयम् । अन्ये तु छान्दोग्यस्थाप्युद्दालक-श्वेतकेतूपाख्यानस्थां न्यग्रोधफलमाहरेति इदं भगव इति भिन्धीति भिन्नं भगव इति किमत्र पश्यसीति

रश्मिः ।

अण्व्य इवेमाधाना भगव इति आसामङ्गैकां भिन्धीति भिन्ना भगव इति किमत्र पश्यसीति न किंचन भगव इति तं होवाच यं वै सोम्यैतमणिमानं न निभालयसे एतस्य वै सौम्यैषोणिम्न एष महान्यग्रोधस्तिष्ठतीति जगतः पूर्वावस्थायां दृष्टान्तः । अथ किंचनाणुपदश्रावणात् शून्यस्वभावाणुकारणवादा भ्रान्त्या प्रतीयन्ते तत्रैतासां तात्पर्यमस्ति न वेति संदेहोस्तीति पूर्वपक्षस्तत्रेदं सूत्रं प्रवर्तते । एतेनेति प्रधाननिराकरणे हेतूनां शब्दत्वादचेतनत्वैकविज्ञानं प्रतिज्ञानुपपत्तीनामण्वादिपक्षसामान्येन सर्वे अण्वादिकारणवादा निराकृतत्वेन व्याख्याता इत्याहुः एतेनेत्यस्य स्वस्वमतानुगुणार्थानाहुः ॥ २८ ॥

इति नवमाधिकरणम् ॥ ९ ॥

इति श्रीविद्वन्मण्डनश्रीविट्ठलेश्वरैश्वर्यनिरस्तसमस्तान्तरायेण श्रीगिरिधार्यात्मजश्रीदामोदरभ्रात्रीयेण श्रीगोविन्दरायपौत्रेण पूर्णवेश्रा श्रीविट्ठलरायभ्रात्रीयश्रीगोकुलोत्सवात्मजगोपेश्वरेण कृते भाष्यप्रकाशरश्मौ प्रथमस्याध्यायस्य तुरीयः पादः संपूर्णतामगमत् ॥ १ ॥ ४ ॥

॥ प्रथमाध्यायः समाप्तः ॥

राग—प्रकटे पूरणपुरुपोत्तम व्रजनाथ ।
दिनदयाल भक्तजनवत्सल सबगुन जिनके हाथ ॥ १ ॥
श्रीवल्लभके पक्षपाततें इनबिन जनम अकाज ।
सुरस्याम तिहारे हित यातें कीने सकलअपात ॥ २ ॥ [अस्मत्कृतिः]

(ग्रन्थकारः समाप्तौ हस्ताक्षरेण लिखति)

एतावतो ग्रन्थस्य श्लोकानां संख्या (१०९००) दशसहस्रनवशतमुच्यते, अस्य ग्रन्थस्य (अस्मिन् प्रकरणे) पद्दशसहस्रश्लोकसंख्याह । द्विशतपञ्चदश पत्राणि ॥ शुभं भवतु ॥

॥ श्रीविट्ठलेशो जयति ॥

३८८ पत्राणि १२ शोधपत्राणि=पत्राणि ४००। पत्र ४ सों पत्र २२ तांई नहि हे आगें संपूर्ण हे.

श्रीमद्वल्लभाचार्यकारिकाः ।

कारिकाः	अ. पा. पृ.
साङ्गो ध्येयस्तथा ज्ञेयो वेदः शब्दाश्च बोधकाः ॥	१।१।१९
निःसंदिग्धं तदर्थाश्च लोकवद्व्याकृतेः स्फुटाः ॥	१।१।१९
अलौकि हिको वेदार्थो न युक्त्या प्रतिपद्यते ॥	१।१।२७
तपसा वेदयुक्त्या तु प्रसादात्परमात्मनः ॥	१।१।२७
संदेहवारकं शास्त्रं बुद्धिदोषात्तदुद्भवः ॥	१।१।४२
विरुद्धशास्त्रसंभेदादङ्गैश्चाशक्यनिश्चयः ॥	१।१।४२
तस्मात्सूत्रानुसारेण कर्तव्यः सर्वनिर्णयः ॥	१।१।४२
अन्यथा भ्रश्यते स्वार्थान्मध्यमश्च तथादिमः ॥	१।१।४२
असंदिग्धेपि वेदार्थे स्थूणाखननवन्मतः ॥	१।१।४३
मीमांसानिर्णयः प्राज्ञे दुर्बुद्धेस्तु ततो द्वयम् ॥	१।१।४३
संदेहवारकं शास्त्रं वेदप्रामाण्यवादिनाम् ॥	१।१।९६
क्रियाशक्तिज्ञानशक्ती संदिह्येते परस्थिते ॥	१।१।९६
उत्पत्तिस्थितिनाशानां जगतः कर्तृ वै बृहत् ॥	१।१।९९
वेदेन बोधितं तद्धि नान्यथा भवितुं क्षमम् ॥	१।१।९९
नहि श्रुतिविरोधोस्ति कल्पोपि न विरुध्यते ॥	१।१।९९
सर्वभावसमर्थत्वादचिन्त्यैश्वर्यवद् बृहत् ॥	१।१।९९
साधनं च फलं चैव सर्वस्याह श्रुतिः स्फुटम् ॥	१।१।१७६
न प्रवर्तयितुं शक्ता तथा चेन्नरको न हि ॥	१।१।१७६
प्रवर्तकस्तु सर्वत्र सर्वात्मा हरिरेव हि ॥	१।१।१७६
यज्ञ एव हि पूर्वत्र बोध्यते स्वर्गसिद्धये ॥	१।१।१७७
सिद्ध एव हि सर्वत्र वेदार्थो वेदवादिनाम् ॥	१।१।१७८
मन्त्राणां कर्मणां चैव दर्शनश्रवणाच्छ्रुतौ ॥	१।१।१७९
कृतिश्च सिद्धतुल्यत्वं वेदः स्वार्थे च संमतः ॥	१।१।१७९
ज्ञापनार्थं प्रमाणानि संनिकर्षादिमार्गतः ॥	१।१।२१८
सर्वथाऽविषयेऽवाच्ये व्यवहार्ये कुतः प्रमा ॥	१।१।२१८
एवंविचारचातुर्यवद्भिः सद्भिर्व्रजाधिपे ॥	१।१।३०२
आनन्दमयतानन्दसंदोहायावधार्यते ॥	१।१।३०२
संदेहवारकं शास्त्रं पदशक्त्या तु निर्णयः ॥	१।२।५१०
जीवादुत्कर्षशब्देन द्वयोर्वाक्येपि न क्षतिः ॥	१।२।५१०
बाधकानां बलिष्ठत्वात्साधकानामभावतः ॥	१।३।६०९
आधारधर्मा वाध्येरन्निति पादोभिधीयते ॥	१।३।६०९
यस्मिन्क्षित्यादिवाक्ये च वाक्यार्थः सर्वबाधितः ॥	१।३।६०९
अर्थात्प्रकरणाल्लिङ्गादिति पूर्वं विचार्यते ॥	१।३।६०९
कठवल्लीविचारेण निश्चिता ह्यधिकारिणः ॥	१।३।७५७
वाक्यान्तरं च तत्रत्यं चिन्त्यते प्रलयावधि ॥	१।३।७५७
ब्रह्मधर्मांश्च ये केचित्सिद्धा युक्त्यापि साधिताः ॥	१।३।७६१
निर्णायकास्ततोप्यन्ये चत्वारोत्र निरूपिताः ॥	१।३।७६१
संदिग्धानां पदार्थानां पौर्वापर्येण निर्णयः ॥	१।४।८३२
न तु संदिग्धवाक्येन सर्वव्याकुलतोचिता ॥	१।४।८३२
जीवप्रकरणं ह्येतन्मुक्त्युपायोस्य रूप्यते ॥	१।४।८३३
योग्यं शरीरमारुह्य गच्छेदिति हरेः पदम् ॥	१।४।८३३
अनेकरूढिशब्दानां वाच्यं ब्रह्मैव नापरम् ॥	१।४।८४२
शक्तितश्चेत्तथा ब्रूयुस्ते सन्मार्गाद्बहिष्कृताः ॥	१।४।८४२
भ्रान्तिमूलतया सर्वसमयानामयुक्तितः ॥	२।१।२
न तद्विरोधाद्वचनं वैदिकं शङ्क्यतां व्रजेत् ॥	२।१।२
वेदोक्तादणुमात्रेपि विपरीतं तु यद्भवेत् ॥	२।२।१०९
तादृशं वा स्वतन्त्रं चेदुभयं मूलतो मृषा ॥	२।२।१०९
अनित्ये जननं नित्ये परिच्छिन्ने समागमः ॥	२।३।३
नित्यापरिच्छिन्नतनौ प्राकट्यं चेति सा त्रिधा ॥	२।३।३
व्यापकत्वश्रुतिस्तस्य भगवत्त्वेन युज्यते ॥	२।३।९८
आनन्दांशाभिव्यक्तौ तु तत्र ब्रह्माण्डकोटयः ॥	२।३।९८
प्रतीयेरन्परिच्छेदो व्यापकत्वं च तस्य तत् ॥	२।३।९८
विस्फुलिङ्गा इवाग्नेर्हि जडजीवा विनिर्गताः ॥	२।३।१३१
सर्वतःपाणिपादान्तात्सर्वतोक्षिशिरोमुखात् ॥	२।३।१३१
निरिन्द्रियात्स्वरूपेण तादृशादिति निश्चयः ॥	२।३।१३१
सदंशेन जडाः पूर्वं चिदंशेनेतरे अपि ॥	२।३।१३१
अन्यधर्मतिरोभावान्मूलेच्छातोस्वतन्त्रिणः ॥	२।३।१३१
सर्वोपनिषदां सिद्धो ह्यविरोधे समन्वयः ॥	३।१।१
कथं बोधकता तासां सा तृतीये विचार्यते ॥	३।१।१
एकं वाक्यं प्रकरणं शाखाः सर्वाः सहैव वा ॥	३।१।२
एकां विद्यामनेकां वा जनयन्तीति चिन्त्यते ॥	३।१।२
ससाधने हि पुरुषे जन्मना कर्मणा शुचौ ॥	३।१।३
केवले वा यथायोगे प्रथमं तद्विचार्यते ॥	३।१।३
विचारपूर्वकं तस्य ब्रह्मभावाप्तियोग्यता ॥	३।१।३
अधिकारे ततः सिद्धा विषयावधृतिस्ततः ॥	३।१।४
अन्तरङ्गविचारेण गुणानामुपसंहृतिः ॥	३।१।४
बहिरङ्गविचारेण कर्मणामिति सा द्विधा ॥	३।१।४
फलतः साधनेभ्यश्च प्रमेयाच्च प्रमाणतः ॥	३।२।१८१
विचारेणाद्बृहत् तच्चेत्कोन्यः साधयितुं क्षमः ॥	३।२।१८१

श्रीमद्विठ्ठलेश्वरकारिकाः ।

कारिकाः	अ. पा. पृ.
भक्तिमार्गप्रचारैकहृदयो बादरायणः ॥	३।४।५०२
मानं भागवतं तत्र तेनैवं ज्ञेयमुत्तमैः ॥	३।४।५०२
समन्वयेनाविरोधात् साधनैर्ब्रह्मविद्यदि ॥	४।१।१
तस्याग्रिमव्यवस्था या सा च तुर्ये विविच्यते ॥	४।१।१
जीवतो म्रियमाणस्य गच्छतः सफलस्य च ॥	४।१।१
अतो ब्रह्मविदा कार्यमेवमेव न चान्यथा ॥	४।१।२
तामसीं बुद्धिमाश्रित्य ये मूढाः सर्वविप्लवम् ॥	४।१।२
वदन्ति शास्त्रनाशाय सद्भिः शोच्याश्च ये नु तान् ॥	४।१।२
ब्रह्मविद्गमनाभावः शतांशेनापि चेद्भवेत् ॥	४।१।३
शास्त्रमेतद्वृथा जातं सर्वसूत्रविनाशतः ॥	४।१।३
स्वाप्ययस्य च संपत्तेरत्र ब्रह्मगतिश्रुती ॥	४।१।३
अन्यथा न श्रुतेरर्थः स्याच्चेद्व्यासो वदेच्च किम् ॥	४।१।४
तामसीं बुद्धिमाश्रित्य या मुक्तिः कैश्चिदुच्यते ॥	४।१।४
सा सुषुप्तिश्रुतेरर्थो मोहादेवान्यथामतिः ॥	४।१।४
अतो ब्रह्मविदः कार्यं जीवतः पूर्वमुच्यते ॥	४।१।५
आवृत्तिः श्रवणादीनां नवकृत्वोपदेशतः ॥	४।१।५
दर्शनार्थत्वतो लिङ्गादपि व्रीह्यवघातवत् ॥	४।१।५
आवृत्तौ श्रवणादीनामात्मेति स्याद् दृढा मतिः ॥	४।१।५
आपाततो दर्शनं तदभेदेनापि बोध्यते ॥	४।१।५
प्रतीकोपासनादीनां नैवंभावो हि जायते ॥	४।१।५
आलम्बनार्थं तत्रापि ब्रह्मदृष्टिर्विशिष्यते ॥	४।१।६
आदित्यादिब्रह्मदृष्टेरङ्गत्वं न स्वतन्त्रता ॥	४।१।६
मनने च निदिध्यासे विशेषश्चोच्यतेधुना ॥	४।१।६
आसनादिपडङ्गैस्तु चित्तं श्रौतार्थ एव हि ॥	४।१।६
धारयेदायतेरेवं ततः सिद्धिमवाप्स्यति ॥	४।१।७
धर्माधर्मभयं तस्य नास्त्येवेति विनिश्चयः ॥	४।१।७
अग्निहोत्रादिकं कार्यं संन्यासः फल एव हि ॥	४।१।७
पोढा चेत्पुरुषो व्यक्तः प्रारब्धान्ते फलं भवेत् ॥	४।१।७
एतावान्प्रथमे पादे निर्णयः सूत्रकृत्कृतः ॥	४।१।७
द्वितीये म्रियमाणस्य सर्वेन्द्रियलयः पुरा ॥	४।१।७
लिङ्गस्यापि शरीरस्यना ह्युत्क्रान्तिरिहोच्यते ॥	४।१।७
दिनायनकृतो नास्य विशेषोस्तीति चोच्यते ॥	४।१।७
तृतीये क्रममुक्तौ यो मार्गो यस्य श्रुतेर्मतः ॥	४।१।७
तन्निर्द्धारोन्यमार्गाणामप्राप्यत्वं च वर्ण्यते ॥	४।१।७
गन्तव्यं च परं ब्रह्म कार्यो लोकस्तु नेति च ॥	४।१।७
तुरीये पुष्टिमर्यादाभेदेन फलमुच्यते ॥	४।१।७
प्रभोरेव फलत्वं तन्निर्दोषत्वं च वर्ण्यते ॥	४।१।७
लीलानित्यत्वतः पूर्णगुणत्वं च ततोखिलम् ॥	४।१।७
जानीत परमं तत्त्वं यशोदोत्संगलालितम् ॥	४।४।२२३
तदन्यदिति ये प्राहुरासुरांस्तानहो बुधाः ॥	४।४।२२३
नानामतध्वान्तविनाशनक्षमो ॥	४।४।२२३
वेदान्तहृत्पद्मविकासने पटुः ॥	४।४।२२३
आविष्कृतोयं भुवि भाष्यभास्करो ॥	४।४।२२३
मुधा बुधा धावत नान्यवर्त्मसु ॥	४।४।२२३
पुरन्दरमदोद्भवप्रचुरवृष्टिसंपीडित ॥	४।४।२२३
स्वकीयवरगोकुलावनपरायणो लीलया ॥	४।४।२२३
सितामृतसुवृष्टिभिः परिपुपोष तान् यो गिरिं ॥	४।४।२२३
दधार च स एव हि श्रुतिशिरःसु संराजते ॥	४।४।२२३
श्रीकृष्णकृपयैवायं सिद्धान्तो हृदि भासते ॥	४।४।२२४
तेनाधिकं वरीवर्ति न वक्तव्यं हरेर्नृणाम् ॥	४।४।२२४
भाष्यपुष्पाञ्जलिः श्रीमदाचार्यचरणाम्बुजे ॥	४।४।२२४
निवेदितस्तेन तुष्टा भवन्तु मयि ते सदा ॥	४।४।२२४

॥ आचार्याणां कारिकाः समाप्ताः ॥

अधिकरणानां सूचीपत्रम् ।

अधिकरणम्	अ. पा. पृ.
१ जिज्ञासाधिकरणम्	१।१।८
२ जन्माद्यधिकरणम्	१।१।९४
३ समन्वयाधिकरणम्	१।१।१४०
४ ईक्षत्यधिकरणम्	१।१।२१९
५ आनन्दमयाधिकरणम्	१।१।२६३
६ अन्तस्तद्धर्माधिकरणम्	१।१।३३७
७ तल्लिङ्गाधिकरणम्	१।१।३६०
८ अतिदेशाधिकरणम्	१।१।३६९
९ ज्योतिश्चरणाधिरणम्	१।१।३७३
१० अनुगमाधिकरणम्	१।१।३९२
११ सर्वत्र प्रसिद्धोपदेशाधिकरणम् ...	१।२।४१५
१२ शब्दविशेषाधिकरणम्	१।२।४६४
१३ अत्ता चराचराधिकरणम्	१।२।४८८
१४ गुहां प्रविष्टावित्यधिकरणम् ...	१।२।५०६
१५ अन्तर उपपत्तेरित्यधिकरणम् ...	१।२।५२४
१६ अन्तर्याम्यधिककरणम्	१।२।५३९
१७ अदृश्यत्वाधिकरणम्	१।२।५५४
१८ वैश्वानराधिकरणम्	१।२।५७२
१९ द्युभ्वाद्यायतनाधिकरणम् ...	१।३।६०७
२० भूमाधिकरणम्	१।३।६२४
२१ अक्षराधिकरणम्	१।३।६३३
२२ ईक्षतिकर्माधिकरणम्	१।३।६४५
२३ दहराधिकरणम्	१।३।६५३
२४ अनुकृत्यधिकरणम्	१।३।६८८
२५ शब्दादेव प्रमिताधिकरणम् ...	१।३।६९३
२६ तदुपर्यपीत्यधिकरणम्	१।३।६९६
२७ शुगस्येत्यधिकरणम्	१।३।७३८
२८ कम्पनाधिकरणम्	१।३।७५७
२९ ज्योतिर्दर्शनाधिकरणम्	१।३।७६०
३० अर्थान्तरव्यपदेशाधिकरणम् ...	१।३।७६४
३१ सुषुप्त्युत्क्रान्त्योरित्यधिकरणम् ...	१।३।७७३
३२ आनुमानिकाधिकरणम्	१।४।८२९
३३ चमसवदित्यधिकरणम्	१।४।८६८
३४ न संख्योपसंग्रहाधिकरणम् ...	१।४।८८५
३५ यथाव्यपदिष्टाधिकरणम्	१।४।९०७
३६ समाकर्षाधिकरणम्	१।४।९१२
३७ जगद्वाचित्वाधिकरणम्	१।४।९२०
३८ वाक्यान्वयाधिकरणम्	१।४।९३१
३९ प्रकृतिश्चेत्यधिकरणम्	१।४।९५७
४० व्याख्यानाधिकरणम्	१।४।९८७
४१ स्मृत्यनवकाशदोषप्रसंग इत्यधिकरणम्	२।१।१
४२ इतरेषामित्यधिकरणम्	२।१।७
४३ एतेन योग इत्यधिकरणम् ...	२।१।१३
४४ न विलक्षणत्वाधिकरणम्	२।१।१६
४५ असदिति चेत्यधिकरणम्	२।१।३६
४६ एतेनेत्यधिकरणम्	२।१।४७
४७ भोक्त्रापत्तेरित्यधिकरणम्	२।१।४८
४८ तदनन्यत्वाधिकरणम्	२।१।५५
४९ असद्व्यपदेशाधिकरणम्	२।१।७७
५० इतरव्यपदेशाधिकरणम्	२।१।८७
५१ उपसंहारदर्शनाधिकरणम् ...	२।१।९०
५२ सर्वोपेताधिकरणम्	२।१।९७
५३ रचनानुपपत्तेरित्यधिकरणम् ...	२।२।१
५४ पुरुषाश्मवदित्यधिकरणम्	२।२।२२
५५ महद्दीर्घवद्वेत्यधिकरणम्	२।२।३१
५६ समुदाय उभयहेतुकेपीत्यधिकरणम् ...	२।२।५८
५७ नाभाव उपलब्धेरित्यधिकरणम् ...	२।२।८८
५८ नैकस्मिन्नसंभवादित्यधिकरणम् ...	२।२।९९
५९ पत्युरसामञ्जस्याधिकरणम् ...	२।२।१०८
६० उपपत्त्यसंभवादित्यधिकरणम् ...	२।२।११६
६१ न वियदित्यधिकरणम्	२।३।१
६२ एतेन मातरिश्वेत्यधिकरणम् ...	२।३।१६
६३ असंभवाधिकरणम्	२।३।१७
६४ तेजोत इत्यधिकरणम्	२।३।२०
६५ आप इत्यधिकरणम्	२।३।२२
६६ पृथिव्यधिकारेत्यधिकरणम् ...	२।३।२३
६७ तदभिध्यानादेवेत्यधिकरणम् ...	२।३।२८
६८ विपर्ययेणेत्यधिकरणम्	२।३।२९
६९ अन्तरा विज्ञानमनसी इत्यधिकरणम्	२।३।३२
७० नात्मा श्रुतेरित्यधिकरणम् ...	२।३।४५
७१ ज्ञोत एवेत्यधिकरणम्	२।३।४५
७२ उत्क्रान्तिगत्यागतीनामित्यधिकरणम्	२।३।५५
७३ तद्गुणसारत्वाधिकरणम्	२।३।८०
७४ कर्ता शास्त्रार्थवत्त्वादित्यधिकरणम् ...	२।३।१०४
७५ परात्तु तच्छ्रुतेरित्यधिकरणम् ...	२।३।१२५
७६ अंशो नानाव्यपदेशात्यधिकरणम् ...	२।३।१३०
७७ तथा प्राणा इत्यधिकरणम् ...	२।४।१५१
७८ इन्द्रादय इत्यधिकरणम्	२।४।१६५
७९ भगवश्चेत्यधिकरणम्	२।४।१६९
८० श्रेष्ठश्चेत्यधिकरणम्	२।४।१७३

		अ. पा. पृ.
८१	चक्षुरादिवत्त्वित्यधिकरणम् ...	२।४।१८६
८२	ज्योतिराद्यधिष्ठानं त्वित्यधिकरणम्...	२।४।१८१
८३	प्राणवतेत्यधिकरणम्	२।४।१८६
८४	तदिन्द्रियाणि तद्व्यपदेशादित्यधिकरणम्	२।४।२०७
८५	संज्ञामूर्तिक्लृप्तिस्त्वित्यधिकरणम् ...	२।४।२०८
८६	मांसादिभौममित्यधिकरणम् ...	२।४।२११
८७	तदन्तरप्रतिपत्तावित्यधिकरणम् ...	३।१।१
८८	कृतात्ययाधिकरणम्	३।१।३२
८९	अनिष्टादिकारिणामित्यधिकरणम् ...	३।१।४४
९०	विद्याकर्मणोरित्यधिकरणम् ...	३।१।५१
९१	शब्दावरोधाधिकरणम्... ...	३।१।५६
९२	अन्याधिष्ठित इत्यधिकरणम् ...	३।१।६१
९३	रेतःसिग्योगाधिकरणम्... ...	३।१।६४
९४	योनेः शरीरमित्यधिकरणम् ...	३।१।६७
९५	संध्याधिकरणम्	३।२।७५
९६	तदभावो नाडीष्वित्यधिकरणम् ...	३।२।९०
९७	अतः प्रबोध इत्यधिकरणम् ...	३।२।९५
९८	उभयलिङ्गाधिकरणम्	३।२।१०५
९९	अरूपवदेव हीत्यधिकरणम् ...	३।२।११३
१००	अम्बुवदग्रहणादित्यधिकरणम् ...	३।२।१२५
१०१	तदव्यक्तमाह हीत्यधिकरणम् ...	३।२।१३७
१०२	प्रकाशादिवच्चेत्यधिकरणम् ...	३।२।१४०
१०३	प्रकाशाश्रयवद्वेत्यधिकरणम् ...	३।२।१४५
१०४	परमतः सेतून्मानेत्यधिकरणम् ...	३।२।१७९
१०५	फलमत इत्यधिकरणम्... ...	३।२।१८९
१०६	सर्ववेदान्तप्रत्ययाधिकरणम् ...	३।३।१९३
१०७	आत्मगृहीत्यधिकरणम्	३।३।२५५
१०८	कार्याख्यानाधिकरणम्... ...	३।३।२५८
१०९	पुरुषविद्यायामित्यधिकरणम् ...	३।३।२७३
११०	वेधाद्यधिकरणम्	३।३।२७५
१११	संपरायाधिकरणम्	३।३।२८९
११२	गतेरर्थवत्त्वमित्यधिकरणम् ...	३।३।२९५
११३	उपपन्नाधिकरणम्	३।३।३०६
११४	अनियमाधिकरणम्	३।३।३१३
११५	आधिकारिकाधिकरणम् ...	३।३।३१५
११६	अक्षरधियामित्यधिकरणम् ...	३।३।३१८
११७	अन्तरा भूतग्रामवदित्यधिकरणम् ...	३।३।३३१
११८	सैव हीत्यधिकरणम्	३।३।३२९
११९	आदरादित्यधिकरणम्	३।२।३४५
१२०	तन्निर्धारणाधिकरणम्	३।३।३५१
१२१	प्रदानवदित्यधिकरणम्... ...	३।३।३५६
१२२	लिङ्गभूयस्त्वाधिकरणम् ...	३।३।३६३
१२३	व्यतिरेकाधिकरणम्	३।३।४१२
१२४	भूम्न इत्यधिकरणम्	३।३।४१८
१२५	नाना शब्दादिभेदादित्यधिकरणम्...	३।३।४२२
१२६	विकल्प इत्यधिकरणम्... ...	३।३।४२४
१२७	काम्यास्त्वित्यधिकरणम्... ...	३।३।४२५
१२८	अङ्गेष्वित्यधिकरणम्	३।३।४२६
१२९	समाहाराधिकरणम्	३।३।४२८
१३०	न वा तत्सहभावाश्रुतेरित्यधिकरणम्	३।३।४२९
१३१	पुरुषार्थोत इत्यधिकरणम् ...	३।४।४३३
१३२	सर्वापेक्षेत्यधिकरणम्	३।४।४८०
१३३	विहितत्वाच्चाश्रमकर्मेत्यधिकरणम्...	३।४।४८४
१३४	तद्भूतस्येत्यधिकरणम्	३।४।४९४
१३५	न चाधिकारिकमित्यधिकरणम् ...	३।४।४९६
१३६	बहिस्तूभयथेत्यधिकरणम् ...	३।४।४९७
१३७	सहकार्यन्तराधिकरणम् ...	३।४।५०४
१३८	गृहिणोपसंहार इत्यधिकरणम् ...	३।४।५०५
१३९	एवं मुक्तिफलानियम इत्यधिकरणम्	३।४।५१३
१४०	आवृत्त्यधिकरणम्	४।१।८
१४१	आत्माधिकरणम्	४।१।१३
१४२	आदित्याद्यधिकरणम्	४।१।२९
१४३	यत्रैकाग्रताधिकरणम्	४।१।३७
१४४	आ प्रायणाधिकरणम्	४।१।३७
१४५	तदधिगमाधिकरणम्	४।१।३९
१४६	अतोन्याधिकरणम्	४।१।४७
१४७	वाङ्मनोधिकरणम्	४।२।५५
१४८	भूताधिकरणम्	४।२।५६
१४९	समानाधिकरणम्	४।२।७३
१५०	अविभागाधिकरणम्	४।२।८२
१५१	तदोकोधिकरणम्	४।२।८५
१५२	रश्म्यधिकरणम्	४।२।८८
१५३	निश्यधिकरणम्	४।२।९०
१५४	अर्चिराद्यधिकरणम्	४।३।९७
१५५	आतिवाहिकाधिकरणम् ...	४।३।१०८
१५६	कार्याधिकरणम्	४।३।११४
१५७	अप्रतीकाधिकरणम्	४।३।१४०
१५८	विशेषाधिकरणम्	४।३।१४८
१५९	संपद्याविर्भावाधिकरणम् ...	४।४।१५५
१६०	ब्राह्माधिकरणम्	४।४।१५९
१६१	तत्त्वभावाधिकरणम्	४।४।१८६
१६२	प्रदीपाधिकरणम्	४।४।१९२
१६३	जगद्व्यापाराधिकरणम्	४।४।१९७

श्रीमद्वाल्लभभाष्यपाठानुसारतः श्रीमद्बादरायणप्रणीत-ब्रह्मसूत्राणां वर्णानुक्रमः।

सूत्रम्	अ. पा. सू.
अ	
१ अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ...	२।३।३२०
२ अकरणत्वाच्च न दोषस्तथाहि दर्शयति	२।४।१७७
३ अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ...	३।३।३१८
४ अक्षरमम्बरान्तधृतेः	१।३।६२३
५ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्	४।२।४६
६ अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्	३।१।२१
७ अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम्	३।३।४१५
८ अङ्गित्वानुपपत्तेश्च	२।२।२४
९ अङ्गेषु यथाश्रयभावः	३।३।४२६
१० अचलत्वं चापेक्ष्य	४।१।३५
११ अणवश्च	२।४।१६९
१२ अणुश्च	२।४।१७९
१३ अत एव नित्यत्वम्	१।३।७१८
१४ अत एव च सर्वाण्यनु	४।२।६२
१५ अत एव चाग्नीन्धनाद्यनपेक्षा ...	३।४।४७८
१६ अत एव चानन्याधिपतिः ...	४।४।१७९
१७ अत एव चोपमा सूर्यकादिवत् ...	३।२।१२३
१८ अत एव न देवता भूतं च ...	१।२।५९१
१९ अत एव प्राणः	१।१।३६९
२० अतः प्रबोधोऽस्मात्	३।२।९५
२१ अतश्चायनेऽपि दक्षिणे	४।२।९१
२२ अतस्त्वितरज्यायो लिङ्गाच्च ...	३।४।४९१
२३ अतिदेशाच्च	३।३।३७८
२४ अतोऽनन्तेन तथा हि लिङ्गम् ...	३।२।१४१
२५ अतोऽन्यापि ह्येकेषामुभयोः ...	४।१।४७
२६ अत्ता चराचरग्रहणात्	१।२।४८८
२७ अथातो ब्रह्मजिज्ञासा	१।१।८
२८ अदृश्यत्वादिगुणको धर्मोक्तेः ...	१।२।५५४
२९ अदृष्टानियमात्	२।३।१४१
३० अधिकं तु भेदनिर्देशात् ...	२।१।८८
३१ अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्	३।४।४३९
३२ अधिष्ठानानुपपत्तेश्च	२।२।११२
३३ अध्ययनमात्रवतः	३।४।४४४
३४ अनभिभवं च दर्शयति	३।४।४९०
३५ अनवस्थितेरसंभवाच्च नेतरः ...	१।२।५३४
३६ अनारब्धकार्ये एव तु पूर्वे तदवधेः ...	४।१।४४
३७ अनाविष्कुर्वन्नन्वयात्	३।४।५०९
३८ अनावृत्तिः शब्दादनावृत्तिः शब्दात्...	४।४।२०९
३९ अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम्	३।३।३१३
४० अनिष्टादिकारिणामपि च श्रुतम् ...	३।१।४४
४१ अनुकृतेस्तस्य च	१।३।६८८
४२ अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत्	२।३।१३६
४३ अनुपपत्तेस्तु न शारीरः	१।२।४५६
४४ अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम्	३।३।३९८
४५ अनुष्ठेयं बादरायणः साम्यश्रुतेः ...	३।४।४६०
४६ अनुस्मृतेर्बादरिः	१।२।५९७
४७ अनुस्मृतेश्च	२।२।८०
४८ अनेन सर्वगतत्वमायामशब्दादिभ्यः	३।२।१८७
४९ अन्तर उपपत्तेः	१।२।५२४
५० अन्तरा चापि तु तद्दृष्टेः... ...	३।४।४९०
५१ अन्तरा भूतग्रामवत्स्वात्मनः ...	३।३।३३१
५२ अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात्	२।३।३२
५३ अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्	१।२।५३९
५४ अन्तवत्त्वमसर्वज्ञता वा	२।२।११५
५५ अन्तस्तद्धर्मोपदेशात्	१।१।३३७
५६ अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः	२।२।१०७
५७ अन्यत्राभावाच्च न तृणादिवत् ...	२।२।२०
५८ अन्यथात्वं शब्दादिति चेन्नाविशेषात्	३।३।२३३
५९ अन्यथानुमितौ च ज्ञशक्तिवियोगात्	२।२।२६
६० अन्यथाभेदानुपपत्तिरिति चेन्नोपदेशान्तरवत्	३।३।३३३
६१ अन्यभावव्यावृत्तेश्च	१।३।६४७
६२ अन्याधिष्ठिते पूर्ववदभिलापात् ...	३।१।६१
६३ अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके	१।४।९२८
६४ अन्यार्थश्च परामर्शः	१।३।६८६
६५ अन्वयादिति चेत्स्यादवधारणात् ...	३।३।२५७
६६ अपरिग्रहाच्चात्यन्तमनपेक्षा ...	२।२।५७
६७ अपि सप्त	३।१।४९
६८ अपि स्मर्यते	१।३।६९१
६९ अपि स्मर्यते	२।३।१३४

अ. पा. पृ.

७० अपि स्मर्यते ... ... ३।४।४८७
७१ अपि स्मर्यते... ... ... ३।४।४९१
७२ अपि चैवमेके ... ... ३।२।११२
७३ अपि संराधने प्रत्यक्षानुमानाभ्याम् ३।२।१३८
७४ अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ... २।१।५०
७५ अप्रतीकालम्बनान्नयतीति बादरायण उभयथादोषात्तत्क्रतुश्च ... ४।३।१५०
७६ अबाधाच्च ... ... ३।४।४८७
७७ अभावं बादरिराह ह्येवम् ... ४।४।१८०
७८ अभिध्योपदेशाच्च ... ... १।४।९७६
७९ अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् २।१।२०
८० अभिव्यक्तेरित्याश्मरथ्यः ... १।२।५९६
८१ अभिसंध्यादिष्वपि चैवम् ... २।३।१४२
८२ अभ्युपगमेऽप्यर्थाभावात् ... २।२।२१
८३ अम्बुवदग्रहणात्तु न तथात्वम् ... ३।२।१२५
८४ अरूपवदेव हि तत्प्रधानत्वात् ... ३।२।११३
८५ अर्चिरादिना तत्प्रथितेः ... ... ४।३।९७
८६ अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ... १।२।४७५
८७ अल्पश्रुतेरिति चेत्तदुक्तम् ... १।३।६८८
८८ अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि... ... ... २।३।६७
८९ अवस्थितेरिति काशकृत्स्नः ... १।४।९५५
९० अविभागेन दृष्टत्वात् ... ... ४।४।१५९
९१ अविभागो वचनात् ... ... ४।२।८२
९२ अविरोधश्चन्दनवत् ... ... २।३।६६
९३ अशुद्धमिति चेन्न शब्दात् ... ३।१।६३
९४ अश्मादिवच्च तदनुपपत्तिः ... २।१।८९
९५ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ३।१।२७
९६ असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा २।२।७३
९७ असदिति चेन्न प्रतिषेधमात्रत्वात् ... २।१।२६
९८ असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् ... ... २।१।७७
९९ असंततेश्चाव्यतिकरः ... ... २।३।१७९
१०० असंभवस्तु सतोऽनुपपत्तेः ... २।३।१७
१०१ असार्वत्रिकी... ... ... ३।४।४४३
१०२ अस्ति तु ... ... २।३।५
१०३ अस्मिन्नस्य च तद्योगं शास्ति ... १।१।३२५
१०४ अस्यैव चोपपत्तेरूष्मा ... ... ४।२।७७

आ

१०५ आकाशस्तल्लिङ्गात् ... ... १।१।३६०
१०६ आकाशे चाविशेषात् ... ... २।२।७८
१०७ आकाशोऽर्थान्तरत्वादिव्यपदेशात् ... १।३।७६४
१०८ आचारदर्शनात् ... ... ३।४।४३७
१०९ आतिवाहिकास्तल्लिङ्गात् ... ४।३।१०८
११० आत्मकृतेः परिणामात् ... ... १।४।९७९
१११ आत्मगृहीतिरितरवदुत्तरात् ... ३।३।२५५
११२ आत्मनि चैवं विचित्राश्च हि ... २।१।९४
११३ आत्मशब्दाच्च ... ... ३।३।२५२
११४ आत्मा प्रकरणात् ... ... ४।४।१५८
११५ आत्मेति तूपगच्छन्ति ग्राहयन्ति च ४।१।१३
११६ आदरादलोपः ... ... ३।३।३४५
११७ आदित्यादिमतयश्चाङ्ग उपपत्तेः ... ४।१।२९
११८ आध्यानाय प्रयोजनाभावात् ... ३।३।२५१
११९ आनन्दमयोऽभ्यासात् ... ... १।१।२६३
१२० आनन्दादयः प्रधानस्य... ... ३।३।४४६
१२१ आनर्थक्यमिति चेन्न तदपेक्षत्वात् ३।१।३८
१२२ आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च १।४।८२९
१२३ आपः ... ... २।३।२२
१२४ आ प्रायणात्तत्रापि हि दृष्टम् ... ४।१।३७
१२५ आभास एव च ... ... २।३।१३९
१२६ आमनन्ति चैनमस्मिन्... ... १।२।६००
१२७ आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ... ... ३।४।५०१
१२८ आवृत्तिरसकृदुपदेशात् ... ४।१।८
१२९ आसीनः संभवात् ... ... ४।१।३५
१३० आह च तन्मात्रम् ... ... ३।२।११८

इ

१३१ इतरपरामर्शात्स इति चेन्न संभवात् १।३।६७२
१३२ इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः २।१।८७
१३३ इतरस्याप्येवमसंश्लेषः पाते तु ... ४।१।४२
१३४ इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् ... ... २।२।६२
१३५ इतरे त्वर्थसामान्यात् ... ... ३।३।२५०
१३६ इतरेषां चानुपलब्धेः ... ... २।१।७
१३७ इयदामननात् ... ... ३।३।३२९

ई

१३८ ईक्षतिकर्मव्यपदेशात्सः ... १।३।६४५
१३९ ईक्षतेर्नाशब्दम् ... ... १।१।२१९

उ

१४० उत्क्रमिष्यत एवंभावादित्यौडुलोमिः १।४।९५४
१४१ उत्क्रान्तिगत्यागतीनाम् ... २।३।५५
१४२ उत्तराच्चेदाविर्भूतस्वरूपस्तु ... १।३।६७४
१४३ उत्तरोत्पादे च पूर्वनिरोधात् ... २।२।६४
१४४ उत्पत्त्यसंभवात् ... ... २।२।११६

	अ. पा. पृ.
१४५ उदासीनानामपि चैवं सिद्धिः ...	२।२।८८
१४६ उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्	१।१।३८७
१४७ उपपत्तेश्च	३।२।१८७
१४८ उपपद्यते चाप्युपलभ्यते च ...	२।१।१०१
१४९ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्	३।३।३०६
१५० उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम्	३।४।४९७
१५१ उपमर्दं च	३।४।४५४
१५२ उपलब्धिवदनियमः	२।३।११५
१५३ उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि	२।१।९०
१५४ उपसंहारोऽर्थाभेदाद्विधिशेषवत् समाने च	३।३।२२८
१५५ उपस्थितेऽतस्तद्वचनात्	३।३।३४८
१५६ उपादानात्	२।३।१०७
१५७ उभयथापि च दोषात्	२।२।५५
१५८ उभयथा च दोषात्	२।२।७७
१५९ उभयथापि न कर्मातस्तदभावः ...	२।२।३७
१६० उभयव्यपदेशात्त्वहिकुण्डलवत् ...	३।२।१४२
१६१ उभयव्यामोहात्तत्सिद्धेः ...	४।३।१११
ऊ	
१६२ ऊर्ध्वरेतःसु च शब्दे हि ...	३।४।४५५
ए	
१६३ एक आत्मनः शरीरे भावात् ...	३।३।४०९
१६४ एतेन मातरिश्वा व्याख्यातः ...	२।३।१६
१६५ एतेन योगः प्रत्युक्तः	२।१।१३
१६६ एतेन शिष्टापरिग्रहा अपि व्याख्याताः	१।२।४७
१६७ एतेन सर्वे व्याख्याता व्याख्याताः	१।४।९८७
१६८ एवं चात्मा कार्त्स्न्यम्	२।२।१०५
१६९ एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः	३।४।५१२
१७० एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः...	४।४।१६२
ऐ	
१७१ ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्	३।४।५१०
क	
१७२ कम्पनात्	१।३।७५७
१७३ करणवच्चेन्न भोगादिभ्यः ...	२।२।११४
१७४ कर्ता शास्त्रार्थवत्त्वात्	२।३।१०४
१७५ कर्मकर्तृव्यपदेशाच्च	१।२।४५९
१७६ कल्पनोपदेशाच्च मध्वादिवदविरोधः	१।४।८८०
१७७ कामकारेण चैके	३।४।४५३
१७८ कामाच्च नानुमानापेक्षा... ...	१।१।३२४
१७९ कामादीतरत्र तत्र चायतनादिभ्यः...	३।३।३४२
१८० काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्	३।३।४२५
१८१ कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः	१।४।९०७
१८२ कार्यं बादरिरस्य गत्युपपत्तेः ...	४।३।११४
१८३ कार्याख्यानादपूर्वम्	३।३।२५८
१८४ कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्...	४।३।११६
१८५ कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः	२।३।१२६
१८६ कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च	३।१।३२
१८७ कृत्स्नभावात्तु गृहिणोपसंहारः ...	३।४।५०५
१८८ कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा	२।१।९१
१८९ क्षणिकत्वाच्च	२।२।९५
१९० क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात्	१।३।७४३
ग	
१९१ गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च	१।३।६६१
१९२ गतिसामान्यात्	१।१।२३८
१९३ गतेरर्थवत्त्वमुभयथाऽन्यथा हि ... विरोधः	३।३।२९५
१९४ गुणसाधारण्यश्रुतेश्च	३।३।४२८
१९५ गुणाद्वाऽऽलोकवत्	२।३।६९
१९६ गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्	१।२।५०६
१९७ गौणश्चेन्नात्मशब्दात्	१।१।२३१
१९८ गौण्यसंभवात्	२।३।५
१९९ "	२।४।१५४
च	
२०० चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ...	२।४।१७६
२०१ चमसवदविशेषात्	१।४।८६८
२०२ चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः	३।१।३६
२०३ चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ...	२।३।४०
२०४ चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः	४।४।१६२
छ	
२०५ छन्दत उभयाविरोधात् ...	३।३।२९२
२०६ छन्दोभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात्तथा हि दर्शनम् ...	१।१।३८५

अ. पा. सू.

ज

२०७ जगद्वाचित्वात् ... ... १।४।१२०
२०८ जगद्व्यापारवर्जं प्रकरणादसंनिहि-
तत्वाच्च ... ... ४।४।१९७
२०९ जन्माद्यस्य यतः शास्त्रयोनित्वात् ... १।१।१४
२१० जीवमुख्यप्राणलिङ्गाचेति चेत्तव्याख्या-
तम् ... ... १।४।१२७
२११ जीवमुख्यप्राणलिङ्गाचेति चेन्नोपासा-
त्रैविध्यादाश्रितत्वादिह तद्योगात् १।१।४०४
२१२ ज्ञेयत्वावचनाच्च ... ... १।४।८४३
२१३ ज्ञोत एव ... ... २।३।४९
२१४ ज्योतिराद्यधिष्ठानं तु तदामननात् ... २।४।१८१
२१५ ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके १।४।८७५
२१६ ज्योतिर्दर्शनात् ... ... १।३।७६०
२१७ ज्योतिश्चरणाभिधानात् ... ... १।१।३१२
२१८ ज्योतिषि भावाच्च ... ... १।३।७२८
२१९ ज्योतिषैकेषामसत्यन्ने ... ... १।४।९०५

त

२२० तदिन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् २।४।२०७
२२१ तच्छ्रुतेः ... ... ३।४।४३८
२२२ तडितोधिवरुणः संबन्धात् ... ४।३।१०७
२२३ तत्तु समन्वयात् ... ... १।१।१४०
२२४ तत्पूर्वकत्वाद्वाचः ... ... २।४।१५९
२२५ तत्प्राक्श्रुतेश्च ... ... २।४।१५७
२२६ तत्रापि च तद्व्यापारादविरोधः ... ३।१।५०
२२७ तथा च दर्शयति ... ... २।३।७८
२२८ तथा चैकवाक्यतोपबन्धात् ... ३।४।४७६
२२९ तथान्यप्रतिषेधात् ... ... ३।२।१८७
२३० तथा प्राणाः ... ... २।४।१
२३१ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ
तद्व्यपदेशात् ... ... ४।१।३९
२३२ तदधीनत्वादर्थवत् ... ... १।४।८३९
२३३ तदनन्यत्वमारम्भणशब्दादिभ्यः ... २।१।५५
२३४ तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः
प्रश्ननिरूपणाभ्याम् ... ... ३।१।१
२३५ तदभावो नाडीषु तच्छ्रुतेरात्मनि च ३।२।१०
२३६ तदभावनिर्धारणे च प्रवृत्तेः ... १।३।७४८
२३७ तदभिध्यानादेव तु तल्लिङ्गात्सः ... २।३।२८
२३८ तदव्यक्तमाह हि ... ... ३।२।१३७
२३९ तदापीतेः संसारव्यपदेशात् ... ४।२।७४
२४० तदुपर्यपि बादरायणः संभवात् ... १।३।६९६
२४१ तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो
विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृति-
योगाच्च हार्दानुगृहीतः शताधिकया ४।२।८५
२४२ तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् २।३।८०
२४३ तद्धेतुव्यपदेशाच्च ... ... १।१।३१०
२४४ तन्निष्ठस्य तु नातद्भावो जैमिनेरपि
नियमात्तद्रूपाभावेभ्यः ... ३।४।४९४
२४५ तद्वतो विधानात् ... ... ३।४।४३८
२४६ तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्य-
प्रतिबन्धः फलम् ... ... ३।३।३५१
२४७ तन्निष्ठस्य मोक्षोपदेशात् ... १।१।२३२
२४८ तन्मनः प्राण उत्तरात् ... ४।२।६२
२४९ तन्वभावे संध्यवदुपपत्तेः ... ४।४।१८६
२५० तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति
चेदेवमप्यविमोक्षप्रसङ्गः ... २।१।४५
२५१ तस्य च नित्यत्वात् ... ... २।४।१८९
२५२ तानि परे तथा ह्याह ... ... ४।२।८१
२५३ तुल्यं दर्शनम् ... ... ३।४।४४३
२५४ तृतीये शब्दावरोधः संशोकजस्य ... ३।१।५६
२५५ तेजोतस्तथा ह्याह ... ... २।३।२०
२५६ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ... १।४।८४६
२५७ त्र्यात्मकत्वात्तु भूयस्त्वात् ... ३।१।१७

द

२५८ दर्शनाच्च ... ... ३।१।५५
२५९ ,, ... ३।२।१३२
२६० ,, ... ३।३।३९१
२६१ ,, ... ३।३।४२९
२६२ ,, ... ४।३।११७
२६३ दर्शयतश्चैवं प्रत्यक्षानुमाने ... ४।४।२०६
२६४ दर्शयति च ... ... ३।३।२२४
२६५ ,, ... ३।३।२६८
२६६ दर्शयति चाथो अपि स्मर्यते ... ३।२।११९
२६७ दहर उत्तरेभ्यः ... ... १।३।६५३
२६८ दृश्यते तु ... ... २।१।२१
२६९ देवादिवदपि लोके ... ... २।१।९१
२७० देहयोगाद्वा सोपि ... ... ३।२।८७
२७१ द्युभ्वाद्यायतनं स्वशब्दात् ... १।३।६०७
२७२ द्वादशाहवदुभयविधं बादरायणोतः ४।४।१८१

ध

२७३ धर्मं जैमिनिरत एव ... ... ३।२।१९०
२७४ धर्मोपपत्तेश्च ... ... १।३।६२९
२७५ धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ... १।३।६७०
२७६ ध्यानाच्च ... ... ४।१।३५

न

२७७ न कर्माविभागादिति चेन्नानादित्वात् २।१।१००
२७८ न च कर्तुः करणम् ... ... २।२।११८

		अ. पा. पृ.
२७९	न च कार्ये प्रतिपत्त्यभिसंधिः ...	४।३।१३७
२८०	न च पर्यायादप्यविरोधो विकारादिभ्यः	२।२।१०६
२८१	न च स्मार्तमतद्धर्माभिलापात् ...	१।२।५५१
२८२	न चाधिकारिकमपि पतनानुमानात्तद्योगात्	३।४।४९६
२८३	न तु दृष्टान्तभावात्	२।१।४१
२८४	न तृतीये तथोपलब्धेः	३।१।५२
२८५	न प्रतीके न हि सः	४।१।२०
२८६	न प्रयोजनवत्त्वात्	२।१।९८
२८७	न भावोऽनुपलब्धेः	२।२।९४
२८८	न भेदादिति चेन्न प्रत्येकमतद्वचनात्	३।२।११०
२८९	न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन्	१।१।२९४
२९०	न वा तत्सहभावाश्रुतेः ...	३।३।४२९
२९१	न वा प्रकरणभेदात्परोवरीयस्त्वादिवत्	३।३।२३४
२९२	न वायुक्रिये पृथगुपदेशात् ...	२।४।१७४
२९३	न वा विशेषात्	१।३।२६६
२९४	न वियदश्रुतेः	२।३।१
२९५	न विलक्षणत्वादस्य तथात्वं च शब्दात्	२।१।१६
२९६	न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च	१।४।८८५
२९७	न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः	३।३।४०५
२९८	न स्थानतोपि परस्योभयलिङ्गं सर्वत्र हि	३।२।१०५
२९९	नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्	२।३।६४
३००	नातिचिरेण विशेषात्	३।१।६०
३०१	नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः ...	२।३।४५
३०२	नाना शब्दादिभेदात्	३।३।४२२
३०३	नानुमानमतच्छब्दात्	२।३।६४
३०४	नाभाव उपलब्धेः	२।२।८८
३०५	नाविशेषात्	३।४।४४६
३०६	नासतोऽदृष्टत्वात्	२।२।८२
३०७	नित्यमेव च भावात्	२।२।४९
३०८	नित्योपलब्ध्यनुपलब्धिप्रसङ्गोन्यतरनियमो वान्यथा	२।३।१०१
३०९	नियमाच्च	३।४।४३९
३१०	निर्मातारं चैके पुत्रादयश्च ...	३।२।७६
३११	निशि नेति चेन्न संबन्धस्य यावद्देहभावित्वाद्दर्शयति च	४।२।९०
३१२	नेतरोनुपपत्तेः	१।१।३२३
३१३	नैकस्मिन् दर्शयतो हि	४।२।६९
३१४	नैकस्मिन्नसंभवात्	२।२।९९
३१५	नोपमर्देनातः...	४।२।७७
	प	
३१६	पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ...	४।२।१७८
३१७	पटवच्च	२।१।८६
३१८	पत्यादिशब्देभ्यः	१।३।८२५
३१९	पत्युरसामञ्जस्यात्	२।२।१०८
३२०	पयोम्बुवच्चेत्तत्रापि	२।२।१४
३२१	परं जैमिनिर्मुख्यत्वात्	४।३।११७
३२२	परमतः सेतून्मानसंबन्धभेदव्यपदेशेभ्यः	३।२।१७९
३२३	परात्तु तच्छ्रुतेः	२।३।१२५
३२४	पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ	३।२।८६
३२५	परामर्शं जैमिनिरचोदना चापवदति हि	३।४।४५८
३२६	परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः	३।३।४०७
३२७	पारिप्लवार्था इति चेन्न विशेषितत्वात्	३।४।४७४
३२८	पुंस्त्वादिवत्तस्य सतोभिव्यक्तियोगात्	२।३।१००
३२९	पुरुषविद्यायामिव चेतरेषामनाम्नानात्	३।३।२७३
३३०	पुरुषार्थोतःशब्दादिति बादरायणः	३।४।४३३
३३१	पुरुषाश्मवदिति चेत्तथापि ...	२।२।२२
३३२	पूर्वं तु बादरायणो हेतुव्यपदेशात्...	३।२।१९२
३३३	पूर्ववद्वा	३।२।१५१
३३४	पूर्वविकल्पः प्रकरणात्स्यात्क्रियामानसवत्	३।३।३७७
३३५	पृथगुपदेशात्	२।३।७९
३३६	पृथिव्यधिकाररूपशब्दान्तरेभ्यः ...	२।३।२३
३३७	प्रकरणाच्च	१।२।४९५
३३८	प्रकरणात्	१।३।६१९
३३९	प्रकाशवच्चावैयर्थ्यात्	३।२।११७
३४०	प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात्	३।२।१४०
३४१	प्रकाशादिवन्नैवंपरः	२।३।१३४
३४२	प्रकाशाश्रयवद्वा तेजस्त्वात् ...	३।२।१४५
३४३	प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्...	१।४।९५०
३४४	प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः	३।२।१३७
३४५	प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ...	१।४।९५३
३४६	प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ...	२।३।९
३४७	प्रतिषेधाच्च	३।२।१५४
३४८	प्रतिषेधादिति चेन्न शारीरात् ...	४।२।७८
३४९	प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्	२।२।७५

अ. पा. पृ.

३५० प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ... ... ४।४।१९९
३५१ प्रथमे श्रवणादिति चेन्न ता एव ह्युपपत्तेः ३।१।२४
३५२ प्रदानवदेव तदुक्तम् ... ... ३।३।३५६
३५३ प्रदीपवदावेशस्तथाहि दर्शयति ... ४।४।१९२
३५४ प्रदेशादिति चेन्नान्तर्भावात् ... २।३।१४३
३५५ प्रवृत्तेश्च ... ... २।२।९
३५६ प्रसिद्धेश्च ... ... १।३।६७१
३५७ प्राणगतेश्च ... ... ३।१।१९
३५८ प्राणभृच्च ... ... १।३।६१७
३५९ प्राणवता शब्दात् ... ... २।४।१८६
३६० प्राणस्तथानुगमात् ... ... १।१।३९२
३६१ प्राणादयो वाक्यशेषात्... ... १।४।८९३
३६२ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ... ... ३।३।२४७

फ

३६२ फलमत उपपत्तेः ... ... ३।२।१८९

ब

३६४ बहिस्तूभयथापि स्मृतेराचाराच्च ... ३।४।४९७
३६५ बुद्ध्यर्थः पादवत् ... ... ३।२।१८५
३६६ ब्रह्मदृष्टिरुत्कर्षात् ... ... ४।१।२३
३६७ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ... ४।४।१५९

भ

३६८ भाक्तं वाऽनात्मवित्त्वात्तथा हि दर्शयति ३।१।१८
३६९ भावं जैमिनिर्विकल्पामननात् ... ४।४।१८०
३७० भावं तु बादरायणोऽस्ति हि ... १।३।७२८
३७१ भावे चोपलब्धेः ... ... २।१।७५
३७२ भावे जाग्रद्वत् ... ... ४।४।१८८
३७३ भूतादिपादव्यपदेशोपपत्तेश्चैवम् ... १।१।३८९
३७४ भूतेषु तच्छ्रुतेः ... ... ४।२।६५
३७५ भूमा संप्रसादादध्युपदेशात् ... १।३।६२४
३७६ भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति ३।३।४१८
३७७ भेदव्यपदेशाच्च ... ... १।१।३२३
३७८ भेदव्यपदेशाच्चान्यः ... ... १।१।३४९
३७९ भेदव्यपदेशात् ... ... १।३।६१८
३८० भेदश्रुतेः ... ... २।४।२०८
३८१ भेदान्नेति चेदेकस्यामपि ... ३।३।२०१
३८२ भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत् २।१।४८
३८३ भोगमात्रसाम्यलिङ्गाच्च ... ... ४।४।२०७
३८४ भोगेन त्वितरे क्षपयित्वाथ संपद्यते ४।१।५१

म

३८५ मध्वादिष्वसंभवादनधिकारं जैमिनिः १।३।७२५
३८६ मन्त्रवर्णात् ... ... २।३।१३४
३८७ मन्त्रादिवद्वाऽविरोधः ... ... ३।३।४१६
३८८ महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् २।२।३१
३८९ महद्वच्च ... ... १।४।८६७
३९० मांसादिभौमं यथाशब्दमितरयोश्च... २।४।२११
३९१ मान्त्रवर्णिकमेव च गीयते ... १।१।३११
३९२ मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ... ... ३।२।७८
३९३ मुक्तः प्रतिज्ञानात् ... ... ४।४।१५७
३९४ मुक्तोपसृप्यव्यपदेशात्... ... १।३।६१२
३९५ मुग्धेऽर्धसंपत्तिः परिशेषात् ... ३।२।१००
३९६ मौनवदितरेषामप्युपदेशात् ... ३।४।५०८

य

३९७ यत्रैकाग्रता तत्राविशेषात् ... ४।१।३७
३९८ यथा च तक्षोभयथा ... ... २।३।१२४
३९९ यथा च प्राणादि ... ... २।१।८६
४०० यदेव विद्ययेति हि ... ... ४।१।५०
४०१ यावदधिकारमवस्थितिराधिकारिकाणाम् ३।३।३१५
४०२ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् २।३।९६
४०३ यावद्विकारं तु विभागो लोकवत् ... २।३।११
४०४ युक्तेः शब्दान्तराच्च ... ... २।१।८०
४०५ योगिनः प्रति स्मर्यते स्मार्ते चैते ... ४।२।९२
४०६ योनिश्च हि गीयते ... ... १।४।९८१
४०७ योनेः शरीरम् ... ... ३।१।६७

र

४०८ रचनानुपपत्तेश्च नानुमानम् ... २।२।१
४०९ रश्म्यनुसारी... ... ... ४।२।८८
४१० रूपादिमत्त्वाच्च विपर्ययो दर्शनात्... २।२।५९
४११ रूपोपन्यासाच्च ... ... १।२।५६९
४१२ रेतःसिग्योगोऽथ ... ... ३।१।६४

ल

४१३ लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ... ३।३।३६३
४१४ लिङ्गाच्च ... ... ४।१।९
४१५ लोकवत्तु लीलाकैवल्यम् ... २।१।९८

व

४१६ वदतीति चेन्न प्राज्ञो हि प्रकरणात् ... १।४।८४५
४१७ वरुणाद्याश्चेन्द्रप्रजापती ... ... ४।३।१०७
४१८ वाक्यान्वयात् ... ... १।४।९२१
४१९ वाङ्मनसि दर्शनाच्छब्दाच्च ... ४।२।५५
४२० वायुमब्दादविशेषविशेषाभ्याम् ... ४।३।१३०
४२१ विकरणत्वान्नेति चेत्तदुक्तम् ... २।१।९७
४२२ विकल्पो विशिष्टफलत्वात् ... ३।३।४२४
४२३ विकारावर्ति च तथाहि स्थितिमाह ... ४।४।२०४

अ. पा. पृ.

४२४ विकारशब्दान्नेति चेन्न प्राचुर्यात् … १।१।२०३
४२५ विज्ञानादिभावे वा तदप्रतिषेधः … २।२।११८
४२६ विद्याकर्मणोरिति तु प्रकृतत्वात् … ३।१।५१
४२७ विद्यैव तु निर्धारणात् … … ३।३।३७९
४२८ विधिर्वा धारणवत् … … ३।४।४६७
४२९ विपर्ययेण तु क्रमोऽत उपपद्यते च २।३।१२९
४३० विप्रतिषेधाच्च … … २।२।११९
४३१ विप्रतिषेधाच्चासमञ्जसम् … २।२।२७
४३२ विभागः शतवत् … … ३।४।४४४
४३३ विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् … … … १।३।७०६
४३४ विवक्षितगुणोपपत्तेश्च … … १।२।४५२
४३५ विशेषं च दर्शयति … … ४।३।१३८
४३६ विशेषणभेदव्यपदेशाभ्यां च नेतरौ १।२।५६५
४३७ विशेषणाच्च … … … १।२।५१७
४३८ विशेषानुग्रहश्च … … ३।४।१९१
४३९ विशेषितत्वाच्च … … ४।३।१०५
४४० विहारोपदेशात् … … २।३।१०६
४४१ विहितत्वाच्चाश्रमकर्मापि … ३।४।४८७
४४२ वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् … … ३।२।१२९
४४३ वेधाद्यर्थभेदात् … … ३।३।२७५
४४४ वैद्युतेनैव ततस्तच्छ्रुतेः … … ४।३।११३
४४५ वैधर्म्याच्च न स्वप्नादिवत् … २।२।९१
४४६ वैलक्षण्याच्च … … … २।४।२०८
४४७ वैशेष्यात्तु तद्वादस्तद्वादः … २।४।२१३
४४८ वैश्वानरः साधारणशब्दविशेषात् … १।२।५७२
४४९ वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति … … … २।१।९९
४५० व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् … … … ३।३।४१२
४५१ व्यतिरेकानवस्थितेश्चानपेक्षत्वात् … २।२।१७
४५२ व्यतिरेको गन्धवत् … … २।३।७३
४५३ व्यतिहारो विशिंषन्ति हीतरवत् … ३।३।३२६
४५४ व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः … … … २।३।१११
४५५ व्याप्तेश्च समञ्जसम् … … ३।३।२४०

श

४५६ शक्तिविपर्ययात् … … २।३।११६
४५७ शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम् … … १।३।७०९
४५८ शब्दविशेषात् … … १।२।४६४
४५९ शब्दश्चातोऽकामकारे … … ३।४।४६०
४६० शब्दाच्च … … … २।३।७
४६१ शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न तथादृष्ट्युपदेशादसंभवात्पुरुषमपि चैनमधीयते … … १।२।५१८
४६२ शब्दादेव प्रमितः … … १।३।६९३
४६३ शमदमाद्युपेतः स्यात्तथा तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् … ३।४।४८४
४६४ शारीरश्चोभयेऽपि हि भेदेनैनमधीयते १।२।५५२
४६५ शास्त्रदृष्ट्या तूपदेशो वामदेववत् … १।१।२९६
४६६ शिष्टेश्च … … … ३।३।४२७
४६७ शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि… … … १।३।७३८
४६८ शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः … … … ३।४।४३६
४६९ श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च … १।३।७४९
४७० श्रुतत्वाच्च … … … १।१।२४०
४७१ ,, … … … ३।२।१९०
४७२ श्रुतेश्च … … … ३।४।५०२
४७३ श्रुतेस्तु शब्दमूलत्वात् … … २।१।९२
४७४ श्रुतोपनिषत्कगत्यभिधानाच्च … १।२।५३२
४७५ श्रुत्यादिबलीयस्त्वाच्च न बाधः … ३।३।३९१
४७६ श्रेष्ठश्च … … … २।४।१७३

स

४७७ संज्ञातश्चेत्तदुक्तमस्ति तु तदपि … ३।३।२३७
४७८ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् … … … २।४।२०८
४७९ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् … … ३।१।४५
४८० संस्कारपरामर्शात्तदभावाभिलापाच्च १।३।७४७
४८१ स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ३।२।९८
४८२ संकल्पादेव च तच्छ्रुतेः … ४।४।१७८
४८३ सत्त्वाच्चावरस्य … … २।१।७१
४८४ संध्ये सृष्टिराह हि … … ३।२।६३
४८५ सप्तगतेर्विशेषितत्वाच्च … … २।४।१६०
४८६ समन्वारम्भणात् … … ३।४।४३८
४८७ समवायाभ्युपगमाच्च साम्यादनवस्थितेः … … … २।२।४३
४८८ समाकर्षात् … … … १।४।४१२
४८९ समाध्यभावाच्च … … २।३।११६
४९० समान एवं चाभेदात् … … ३।३।२९६
४९१ समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च … … १।३।७२१

	अ. पा. पृ.
४९२ समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य	४।२।७३
४९३ समाहारात्	३।३।४२८
४९४ समुदाय उभयहेतुकेपि तदप्राप्तिः...	२।२।५८
४९५ संपत्तेरिति जैमिनिस्तथाहि दर्शयति	१।२।५९८
४९६ संपद्याविर्भावः स्वेन शब्दात् ...	४।४।१५५
४९७ संबन्धादेवमन्यत्रापि	३।३।२६४
४९८ संबन्धानुपपत्तेश्च	२।२।११२
४९९ संभृतिद्युव्याप्त्यपि चातः ...	३।३।२६८
५०० संभोगप्राप्तिरिति चेन्न वैशेष्यात् ...	१।२।४७९
५०१ सर्वत्र प्रसिद्धोपदेशात्	१।२।४१५
५०२ सर्वथानुपपत्तेश्च	२।२।९८
५०३ सर्वथापि त एवोभयलिङ्गात् ...	३।४।४८८
५०४ सर्वधर्मोपपत्तेश्च	२।१।१०२
५०५ सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्	३।३।१९३
५०६ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्	३।४।४८५
५०७ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ...	३।४।४८०
५०८ सर्वाभेदादन्यत्रेमे	३।३।२४२
५०९ सर्वोपेता च तद्दर्शनात्... ...	२।१।९७
५१० सहकारित्वेन च	३।४।४८८
५११ सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्	३।४।५०४
५१२ साक्षाच्चोभयाम्नानात्	१।४।९७८
५१३ साक्षादप्यविरोधं जैमिनिः ...	१।२।५९२
५१४ सा च प्रशासनात्	१।३।६४२
५१५ सामान्यापत्तिरुपपत्तेः	३।१।५७
५१६ सामान्यात्तु	३।२।१८४
५१७ सामीप्यात्तु तद्व्यपदेशः ...	४।३।११५
५१८ सांपराये तर्तव्याभावात्तथा ह्यन्ये ...	३।३।२८९
५१९ सुकृतदुष्कृते एवेति तु बादरिः ...	३।१।४१
५२० सुखविशिष्टाभिधानादेव च ...	१।२।५३०
५२१ सुषुप्त्युत्क्रान्त्योर्भेदेन	१।३।७७२
५२२ सूक्ष्मं तु तदर्हत्वात्	१।४।८३८
५२३ सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ...	४।२।७५
५२४ सूचकश्च हि श्रुतेराचक्षते च तद्विदः	३।२।८४
५२५ सैव हि सत्यादयः	३।३।३३९
५२६ सोध्यक्षे तदुपगमादिभ्यः ...	४।२।६२
५२७ स्तुतयेऽनुमतिर्वा	३।४।४५२
५२८ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्	३।४।४७२
५२९ स्थानविशेषात्प्रकाशादिवत् ...	३।२।१८५
५३० स्थानादिव्यपदेशाच्च	१।२।५२८
५३१ स्थित्यदनाभ्यां च	१।३।६२३
५३२ स्पष्टो ह्येकेषाम्	४।२।७९
५३३ स्मरन्ति च	२।३।१३६
५३४ ,, ...	३।१।४९
५३५ ,, ...	४।१।३६
५३६ स्मर्यते च	४।२।८१
५३७ स्मर्यतेपि च लोके	३।१।५५
५३८ स्मर्यमाणमनुमानं स्यादिति ...	१।२।५८८
५३९ स्मृतेश्च	१।२।४६९
५४० ,, ...	४।३।११६
५४१ स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ...	२।१।१
५४२ स्याच्चैकस्य ब्रह्मशब्दवत् ...	२।३।८
५४३ स्वपक्षदोषाच्च	२।१।४१
५४४ ,, ...	२।१।९६
५४५ स्वशब्दोन्मानाभ्यां च	२।३।६५
५४६ स्वात्मना चोत्तरयोः	२।३।५८
५४७ स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ...	३।३।२०५
५४८ स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि	४।४।१९४
५४९ स्वाप्ययात्	१।१।२३६
५५० स्वामिनः फलश्रुतेरित्यात्रेयः ...	३।४।४९९
ह	
५५१ हस्तादयस्तु स्थितेतो नैवम् ...	२।४।१६५
५५२ हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दःस्तुत्युपगानवत्तदुक्तम् ...	३।३।२८१
५५३ हृद्यपेक्षया तु मनुष्याधिकारत्वात्	१।३।६१४
५५४ हेयत्वावचनाच्च	१।१।२३४

श्रीमदणुभाष्योद्धृतानां प्रमाणवाक्यानां सूचीपत्रम्।

[सर्वत्र अध्यायपादपृष्ठाङ्काः निर्दिष्टाः]

उपरिनिर्दिष्टस्थूलाक्षरग्रन्थस्थान्तरसंकेतसूचका आङ्ग्लाङ्काः

अथर्ववेदः।

वैश्वानरो न ऊत्या० १,२,५९१ 6.35.1

आदित्यहृदयम्।

ध्येयः सदा० १,१,२४८ 55

आपस्तम्बधर्मसूत्रम्।

न ददाति० ३,४,५०१ 10.14.6.7

आपस्तम्बश्रौतसूत्रम्।

अग्निष्टोमेन यजेत० ३,३,२०० 10.2.1
अग्निष्टोमेन स्वर्गकामो यजेत० ३,२,१९१ 10.2.1
अथातो दर्शपूर्णमासौ० १,१,४७ 1.1
एतया निषादस्थपतिं० १,३,७३८ 9.14.12
ब्रह्मिष्ठो ब्रह्मा० ३,४,४३८ 3.18.1
यमृत्विजं कामयेतायम्० ३,३,३२३ 11.1.4
यथा पृथिवी० ४,३,१०४ 1.13.5
श्वोभूते ब्रह्माणं वृणीते० ३,२,९९ 4.4.1

ईशावास्यम्।

अन्धं तमः० १,३,८१५ 12
असुर्या नाम ते० ३,४,४६० 3
तांस्ते प्रेत्य ३,४,४६५ 3

ऋक्संहिता।

अत्राह ४,२,८२।४,४,२०६ 2.2.24
अभि त्वा शूर० ३,३,२८३ 5.3.21
आनीदवातम्० २,४,१७३ 8.7.17
आस्य जानन्त.० ३,३,३४७ 2.2.26
एतावानस्य० १,१,३८६ 10.9.3
क इह प्रवोचत्० १,४,९१५ 3.54.5
चन्द्रमा मनसः० ३,१,२५ 10.90.13
तम आसीत्० १,४,९१२ 10.129.1
तमु स्तोतारः० ३,३,३४७ 2.2.26
तां वा ४,२,८२।४,४,२०६ 2.2.24
दिवीव चक्षुराततम्० ४,४,१९८ 1.22.20
पादोस्य विश्वा० २,३,१३४ 10.90.3
पुरुष एवेदम्० २,३,१३४ 10.90.2
यज्ञेन यज्ञमयजन्त० १,३,७०८ 10.91.16
विश्वतश्चक्षुः० ३,२,१३७ 10.81.3

ऐतरेयोपनिषद्।

अग्निर्वाग्भूत्वा० २,१,२०।२,४,१८२ 2.4

आत्मा वै० १,१,२१९।१,१,२३१ 1.1.1
तद्योहं सोसौ० ३,३,३३६ 2.12.2
नान्यत्किंचन० १,१,२१९ 1.1.1
स इमान्० १,१,२१९ 1.1.2
स ऐक्षत० १,१,२१९।१,१,२३१ 1.1.1

ऐतरेयब्राह्मणम्।

नापुत्रस्य लोकोस्ति० ३,४,४३४ 7.13.12

कठोपनिषद्।

अनाद्यनन्तम्० १,४,८४५ 2.3.15
अन्यत्र धर्मात् १,४,८५१ 1.2.14
अशब्दमस्पर्शम्० १,४,८४५ 2.3.15
अस्पर्शमगन्धम्० ३,२,१३७ 3.15
अङ्गुष्ठमात्रः पुरुषः १,३,६९३ 2.4.13
आत्मानं रथिनं विद्धि० १,४,८३२ 1.1.3
आत्मेन्द्रियमनोयुक्तं० १,४,८३२ 1.3.4
आसीनो दूरम्० ३,२,११७ 1.2.20
इन्द्रियाणि हयान्० १,४,८३२ 1.3.4
इन्द्रियेभ्यः परा ह्यर्थाः० १,४,८३०,४६,५५ 1.3.10
ऋतं पिबन्तौ० १,२,५०६ 1.3.1
एकस्तथा २,३,१३६ 2.5.11
एष सर्वेषु भूतेषु० १,४,८३६,८४७ 1.3.12
कश्चिद्धीरः ३,२,१३७ 2.4 1
गुहां प्रविष्टौ० ४,२,८७ 3.1
तयोर्ध्वमायन्० १,३,६६० 6.16
दृश्यते त्वग्र्यया० १,४,८३६ 1.3.12
देवैरत्रापि १,४,८५१ 1.1.22
न जायते० १,२,४९४।३,३,४७ 1.2.18
न तत्र सूर्यो भाति० १,३,६८८ 2.5.15
न स पुनः० ४,४,१५५ 2
नैषा तर्केण० १,१,३७।३,२,१५२।४,४,२०६ 1.2.9
पुरुषान्न परं किंचित्० १,४,८३१ 1.3.10
प्र ते ब्रवीमि० १,४,८४८ 1.1.14
बुद्धिं तु सारथिं० २,४,८३२ 1.3.3
मनसस्तु परा बुद्धिः० १,४,८३० 1.3.10
मनसैव ३,२,११७।३,२,१२७।३,४,५०४ 4.11
महतः परमव्यक्तं० १,४,८३१ 1.3.11
महान्तं विभुम्० १,४,८६७ 1.2.22
मृत्योः सः० ३,२,११२ 4.11

मृत्युर्यस्योपसेचनं० १,२,४८८ 1.2.25
य एष सुप्तेषु० ३,२,७६,९० 2.5.8
यदिदं किंच० १,३,४५७ 2.6.2
यस्य ब्रह्म च क्षत्रं च० १,२,४८८ 1.2.25
येयं प्रेते० १,२,५१६।१,४,८५१ 1.1.20
स त्वं किमध्येपि० १,४,८४८ 1.1.13
सर्वे वेदाः० १,१,२४२।१,४,८५१,९१५।३,२,१३७
1.2.15
सोऽध्वनः पारं० १,२,५१७ 1.3.9

कालाग्निरुद्रोपनिषद् ।

न स पुनरावर्त्तते २,३,८८ 30

केनोपनिषद् ।

अविज्ञातम्० ३,२,१०९ 2.11

कौषीतक्युपनिषत् ।

अग्निलोकं ४,३,१०५ 1.3
अथ खलु प्राण एव० १,१,४०४ 3.3
अथ खलु यथा प्रज्ञायां० १,१,४०८ 3.3
अथास्मिन्प्राणः० ३,२,९० 4.19
आनन्दोऽजरोऽमृतः १,१,३९४,३९६ 3.9
एष उ एव साधु० ३,२,११२ 3.9
एष उ एवासाधु० १,१,२६८ 3.9
एष लोकपालः० १,१,३९२ 3.8
एष लोकाधिपतिः १,१,३९४ 3.9
एष ह्येव साधु कर्म कारयति० २,१,१०० 3.9
क्वैष एतत्० १,४,९२३ 4.19
त्वमेव मे वृणीष्व० १,१,३९४ 3.1
न वाचं विजिज्ञासीत० १,१,३९६,४०४ 3.8
न हि प्रज्ञापेतोऽर्थः० १,१,४०८ 3.3
प्रज्ञया शरीरं० २,३,७९ 3.6
प्रतर्दनो ह वै० १,१,३९२।३,४,४७४ 3.1
प्राणेन ह्येवामुष्मिन्० १,१,३९२ 3.2
प्राणो व अहं १,१,४०७ 3.2
यत्रैष एतत् १,४,९२९ 4.19
यमधो निनीषति० ३,२,११२ 3.9
ये के चास्मात्० २,३,५५ 3.3
ये वै के चास्माद्० ३,१,४४,५१ 1.2
यो वै प्राणः १,१,४०४,४०८ 3.4
वक्तारं विद्यात्० १,१,३९६,४०४ 3.8
स एतं देवयानं ४,३,९८,१०१,१०३,१०४,११७ 1.3
स प्रजापतिलोकं ४,३,१२० 1.3
स म आत्मेति० १,१,३९६ 3.9
स यदास्मात् २,३,५५ 3.3
सह ह्येतावस्मिन् १,१,४०८ 3.4
साधुं न कर्म्मणा० ३,२,९० 4.19

गोपालपूर्वतापनीयोपनिषत् ।

चिन्तयंश्चेतसा ३,३,३१३ 3
पञ्चपदीं जपन् ३,३,३१४ 2
परमद्वैतयो धारयति० ३,३,३१३ 3

गोपालोत्तरतापनीयोपनिषत् ।

यत्रासौ संस्थितः कृष्णः० ३,३,३१७ 2
स होवाच तं हि ३,३,३१७ 1

गौतमसूत्रम् ।

उदाहरणे जिह्वाच्छेदः० १,३,७४९ 12.4

छान्दोग्योपनिषत् ।

अर्चिषोऽहरहः ४,३,१०३ 5.10.2
अथ खलु क्रतुमयः १,२,४४० 3.14.1
अथ य आत्मा १,३,६७० 8.4.1
अथ य आत्मा स सेतुः १,३,६७० 8.4.1
अथ य इहात्मानं ३,२,१८१ 8.1.6
अथ य एतानेवं० ३,३,१९५ 5.10.10
अथ य एषोऽन्तरक्षिणि १,१,३३७।१,२,५३० 4.15.1
अथ यदतः परः १,१,३७७ 3.13.7
अथ यदिदमस्मिन् ब्रह्मपुरे १,३,६५३ 8.1.1
अथ यत्रैतदस्मात् ४,२,९८ 8.6.5
अथ य एष संप्रसादः ४,२,८८४।४,३,९८,१०० 8.3.4
अथ योऽयं भगवः १,२,५३० 8.7.4
अथ वा सर्वम् १,४,९७७ 3.14.1
अथ ह शौनकं च कापेयं १,३,७४४ 4.3.5
अथ होवाच सत्ययज्ञं० ४,१,२९ 5.13.1
अथात्मादेशः ३,३,४१९ 7.25.1
अथैतयोः पथोः ३,१,५२।४,३,१०१ 5.10.8
अधीहि ३,४,४७४,४७६ 7.1.1
अधीहि भगव इति १,३,७४७ 7.1.1
अध्यात्मम् १,१,३३७ 1.7.1
अनेन जीवेनात्मना १,४,८७८।२,१,८८,१०२।२,३,५८।
२,४,१८५ 6.3.2
अन्नमयं हि सोम्य २,४,२११ 6.5.4
अपि वा समादेशम् १,४,९६१ 6.2.1
अयमात्मापहतपाप्मा २,३,५४ 8.1.5
अशरीरं वाव० ४,४,११२ 8.12.1
असौ वा आदित्यः १,१,७२५।४,१,२९,३१ 3.1.1
अ ह हारे त्वा १,३,७४० 4.2.3
आकाशशरीरं ब्रह्म १,४,९३० 6.8.1
आकाशो वै १,३,७६४ 8.14.1
आकाशो ह्येवैतेभ्यः १,१,३६० 1.9.1
आचार्यवान् ३,४,५०५ 8.15.1
आचार्यकुलात्० ३,४,४७६,४८०।४,१,४४ 6.14.2
आत्मत एवेदं सर्वम् ४,४,१८२ 7.26.1

आत्मत एवेदं सर्वम् ३,३,३७४ 7.26.1
आत्मरतिरात्मक्रीडः ३,३,४८१,४,४,१८२ 7.25.2
आत्मानं स्वयम् ३,२,८० 6.2.2
आत्मैवेदं सर्वम् १,१,१९६,२८१।३,३,३९९ 7.25.2
आदित्याचन्द्रमसम् ४,३,१०७ 4.15.5
आदित्यो वै देवमधु० १,४,८८४ 3.1.1
आहारशुद्धौ० ३,४,४८५ 7.26.2
इत्यधिदैवतम् १,१,३३७ 1.6.8
इमं मानवम् १,२,५३३ 4.15.5
उदेति ह वै १,१,३३७ 1.6.7
उभावप्यस्मिन् ३,२,१८३ 8.1.3
एकमेवाद्वितीयम् १,१,१९६,२१९।३,२,१४६ 6.2.1
एकशतं १,३,७०७ 8.11.3
एतदमृतम् १,२,५३० 4.15.1
एतमितः प्रेत्य १,२,४५९ 3.14.4
एतेन प्रतिपद्यमानाः ४,४,२१० 4.15.6
एतं संयद्वाम० १,२,५२८ 4.15.4
एवं पश्यन्नेवं ३,३,४०१ 7.25.2
एष आत्मापहत० १,२,५३१।१,३,६६१ 8.3.4
एष आत्मेति होवाच १,२,५२४ 4.15.1
एष उ एव० १,२,५२८ 4.15.4
एष देवपथः १,२,५३३ 4.15.5
एष सर्वेभ्यः पाप्मभ्यः १,१,३३७।१,१,३४३ 1.6.7
ऐतदात्म्यमिदं ३,२,८०।४,१,८ 6.8.5
ॐमित्येतदक्षरम् ४,१,५० 1.1.1
कतमा सा देवता १,१,३६९ 1.11.5
गायत्री वा इदम् १,१,३७५,३८५ 3.12.1
चाक्रायणः ३,४,४८५ 1.10.5
जानश्रुतिर्हि पौत्रायणः १,३,७३९ 4.2.3
जायस्व ४,३,९९ 5.10.8
ज्यायान्दिवः ३,२,१८८ 3.14.3
ज्ञानादेव तु कैवल्यम् ३,३,३१८ 7.1.3
तत्तेज ऐक्षत २,१,२०।१,१,२१९।१,४,९०७ 6.2.3
तत्तेजोसृजत १,४,९०७ 6.2.3
तत्त्वमसि १,१,२९६ 6.9.4
तत्पुरुषोऽमानवः ४,३,१०७ 4.15.5
तत्राश्ममयं हि २,३,२५ 6.5.4
तत्सत्यम् ३,२,८० 6.8.5
तदन्वेष्टव्यम् १,३,६७० 8.1.1
तदैक्षत १,१,२१९।२,३,३ 6.2.3
तद्देवानामन्नम् ३,१,२८ 5.10.4
तद्धैक आहुः १,४,९१२ 6.2.1
तद्य इत्थं विदुर्ये ३,१,१०।४,३,९८ 5.3.10
तद्य इह रमणीयचरणाः ३,१,३६ 5.10.7
तद्यथेषीकातूलम् ४,१,४० 5.24.3
तद्यद्यथापि हिरण्य० ४,४,१९५ 8.3.2
तद्यद्भक्तं १,२,५९० 5.10.1
तद्यदस्मिन् १,२,५२५ 4.15.1
तमभितः ४,२,८८ 8.6.5
तयोर्ध्वमायन् ४,४,२१० 8.6.6
तरति शोकम् १,३,६२४।३,३,३१८ 7.1.3
तस्माद्यत्र क्व च वर्षति ३,१,५६ 6.2.3
तस्माद्यत्र क्व च शोचति ३,१,५६ 6.2.4
तस्य तावदेव चिरम् १,४,५१४ 6.14.2
तस्य सर्वेषु लोकेषु ३,३,४०५ 7.25.2
तस्य ह वा एतस्यैवं० १,१,३७७।३,३,३७४,३९०,४२१।
४,४,१८२ 7.26.1
तस्य हैतस्य ४,२,८६ 4.4.2
त्रिपादस्य १,१,३८० 3.12.6
त्वं कमात्मानम् ४,१,२९ 5.14.1
ता अन्नमसृजन्त २,३,२३ 6.2.4
ता आप ऐक्षन्त २,३,२३ 6.2.4
तान्ब्रह्मानुपनीय १,३,७४७ 5.11.7
तावानस्य १,१,३७४,३८५ 3.12.6
तासां त्रिवृतम् १,४,८७६ 6.3.3
तेर्चिषम् ४,३,९८ 5.10.1
देवा अन्नं ३,१,६३ 5.7.2
नच पुनः ४,४,२१० 8.15.1
न पश्यः ४,२,७८ 7.26.2
न पश्यो मृत्युं० ३,३,४०७ 7.26.2
न स पुनः १,१,२०४।३,४,५१६ 8.15.1
न ह वा एवंविदि ३,४,४८५ 5.2.1
नात्मविच्छ्रुतं ह्येव ३,३,३६४ 7.1.3
नात्मवित् ३,३,३९५ 7.1.3
नान्यत्पश्यति ३,३,४०६ 7.24.1
नैतदब्राह्मणः १,३,७४८ 4.4.5
पञ्च पुरुषास्ततः १,१,३८० 3.12.6
पञ्चम्यामाहुतावापः ३,१,६,१५ 5.3.3
पादोस्य विश्वा १,१,३८७ 3.12.6
पादोस्य सर्वा १,१,३७४ 3.12.6
प्रस्तोतर्या देवता १,१,३६९ 1.11.4
प्राणबन्धनं हि ४,२,६३ 6.8.2
बहु स्याम् १,१,२१९ 6.2.3
भूमैव ४,४,१९८ 7.23.1
मनोमयः १,२,४४० 3.14.2
य एतमेव विद्वान् ४,१,२९ 3.19.4
य एषोन्तरक्षिणि ३,२,१८३ 1.7.5
य एषोन्तरादित्ये ३,२,१८३ 1.7.5

यत्र नान्यत्पश्यति १,१,२८१।१,३,६२४।३,३,२६६,३९०, ४१८।३,४,४३४।४,४,१८२,१९८,२०० 7.24.1
यत्रैतत्पुरुषः १,१,२३६ 6.8.1
यथा कप्यासं पुण्डरीकं १,१,३३७ 1.6.7
यथा शकुनिः ४,२,६३ 6.8.2
यथैकेन मृत्पिण्डेन १,४,९६१ 6.1.4
यथैवेह कर्मजितः १,३,६६६ 8.1.6
यदग्ने रोहितं रूपम् १,४,८७८ 6.4.1
यदा कर्मसु ३,२,८५ 5.2.2
यदिदं किंच तत्सत्यमित्याचक्षते २,१,७७ 6.2.1
यदिदमस्मिन्नन्तः १,१,३७३ 3.13.7
यदेव विद्यया १,१,७६,१२०,१८६।३,३,२७८।४,१,५०, ५० 1.1.10
यद्वेत्थ तेन ३,३,३६४।३,४,४४५ 7.1.2
यस्येतमेवं १,२,५७५ 5.18.2
यावान्वा अयमाकाशः १,३,६७०,६८८।३,२,१८२ 8.1.3
ये चेमे ४,३,११९ 5.10.1
येनाश्रुतम् २,३,११।४,४,१८१
यो वै भूमा १,३,६२४
यो वै भूमा तत्सुखं ३,३,३६६,३८९,४१८,४,४,१८१ 7.23.1
यो वै भूमा तदमृतम् ३,३,४१८ 7.24.1
यः सर्वज्ञः २,१,९७।२,३,५४।३,२,११८ 3.14.2
लोकं वाव १,२,५२६ 4.14.3
वाङ्मनसि ४,२,६२ 6.8.6
वाचारम्भणम्-१,१,१८६।१,४,९१२,१,५५।४,४,१८१ 6.1.4
शतं च दश च ४,२,२०३ 7.26.2
शतं चैका ४,२,८७।४,३,७ 8.6.6
शुचौ देशे ३,४,५०९ 8.15.1
स एनान्ब्रह्म ४,३,११४,११७ 4.15.5
स एवाधस्तात् ३,३,४१८।४,४,१८२ 7.25.1
स एष संप्रसादः १,३,७६० 8.12.3
सता सोम्य १,३,७६२ 6.9.2
सति संपद्य १,३,७६२।३,२,९१ 6.9.2
सति संपद्यामहे १,३,७६२।३,२,९१ 6.9.2
सत्यकामो ह जाबालः १,३,७४८ 4.4.1
सदेव सोम्य १,१,२१९।१,४,९८२।२,३,३।२,३,५३।२, ४,१५०।३,१,५६ 6.2.1
स भगवः कस्मिन् ३,३,३१८ 7.24.1
समृद्धिं तत्र ३,२,८५ 5.2.2
स यावदस्मात् ४,२,८८ 8.6.5
स यो नाम ४,३,२४२ 7.1.1
सर्वमाप्नोति ४,४,२०३।२०५ 7.26.2
सर्वरसः ३,३,२४० 3.14.2
सर्वमाप्नोति सर्वशः ३,३,४०७ 2.6.2
सर्वकर्मा ३,२,१०६ 3.14.2
सर्वरूपः ३,२,१३७ 3.14.2
सर्वाणि ह वा इमानि भूतानि १,१,२६९।१,४,९७८ 1.9.1
स वा एष एवं पश्यन् १,१,२८१।१,३,६३२।३,३,४१८, ४२३।४,४,१८२ 7.25.2
स वा एष ३,३,३९९ 7.25.2
सर्वेषु लोकेषु ३,२,१८१ 8.1.6
सर्वं ह पश्यति ४,४,२०० 7.26.2
सर्वं खलु ४,१,२२ 3.14.1
सहस्राणि च १,३,६३२ 7.26.2
सुखं त्वेव विजिज्ञासितव्यम् ३,३,३८९ 7.22.1
सैषा चतुष्पदा षड्विधा १,१,३८५ 3.12.5
सोऽहं भगवो मन्त्र० ३,३,३६४,३७७ 7.1.3
सोऽहं भगवः शोचामि ३,३,३६४,३९१ 7.1.3
सोऽहं मन्त्रवित् ३,४,४४५ 7.1.3
स्मरो वाव १,३,३३४ 7.13.1
स्वमपीतः ४,४,१९५ 6.8.1
स्वे महिम्नि ३,३,३९८ 7.24.1
स्वं ह्यपीतः १,१,२३६।१,४,९३० 6.8.1

जाबालोपनिषद्।

एषोऽनन्तोऽव्यक्तः० १,२,६०१ 1
गृहाद्वा० ३,४,४३९ 4
ब्रह्मचर्यादेव ३,४,४५५,४६० 4
यदहरेव विरजेत्० ३,४,४३९,४५०,४५५,४६३ 4

जैमिनीयसूत्रम्।

अथातो धर्मजिज्ञासा १,१,६६ 1.1.1
श्रुतिलिङ्गवाक्य ३,३,३९३ 3.3.13

तैत्तिरीयारण्यकम्।

अग्निः पुच्छस्य १,३,७२८ 2.19
एको देवः ४,४,१९२ 3.14
तमेवं विद्वान्० ३,३,२९५ 3.13
भर्ता सन् ध्रियमाणः ४,४,१९२ 3.14
यदर्वाचीनम्० ३,१,४६ 2.8
ये चेह सत्येनेच्छन्ते० ३,१,४७ 6.5
सूर्याचन्द्रमसौ० १,३,७२४ 10.1.2

तैत्तिरीयोपनिषद्।

अथ सोऽभयं १,१,२३३ 2.7
अद्भ्यः पृथिवी २,३,२३ 2.1
अधीहि भगवो ब्रह्म १,१,२८४,२८८ 3.1
अनेन जीवेनात्मना २,३,५९ 3.10

अन्नवानन्नादः १,१,१८८ 3.6
अन्नात्पुरुषः ३,३,२५८।१,३,२५५,२५८ 2.1
अन्नं ब्रह्म ३,३,२५५,२५८,२५८ 3.2
अप्राप्य मनसा सह ३,२,१२५,३७ 2.9
असद्वा इदमग्र आसीत् १,४,९१२।२,१,७७ 2.7
असद्ब्रह्मेति ४,३,१४१ 2.6
असन्नेव स भवति १,४,९१५।४,३,१४१ 2.6
अस्माल्लोकात् १,१,२९१ 2.8
आकाशशरीरं ब्रह्म 1.6.2
आत्मन आकाशः १,१,३६११।१,४,९०७ 2.1.1
आत्मानं स्वयमकुरुत २,१,७९ 2.7
आनन्दाद्ध्येव १,४,९४५ 3.6
आनन्दो ब्रह्म ३,३,२५६ 3.6
आनन्दं ब्रह्मणो विद्वान् ३,२,१३५।३,३,३५१,३,२,१८२ 2.4
एतᳬ ह वा न तपति ३,३,३५१।२,१,२९६।३,४,४७५
एतं ह ४,२,७६ 2.9
एतमानन्दमयम् १,१,२८८,३२५,३३९।३,२,१८२ 3.5
एतमानन्दमयम् १,१,२६३,२८८ 3.5
एष ह्येव १,१,८८।३२३ 2.7
एष ह्येवानन्दयाति १,१,२६५।१,४,९४९।४,१,७७,७९ 2.7
कामरूप्यनुसंचरन् २,३,५९ 3.10
किमहं पापमकरवम् ३,३,३५१ 2.9
को ह्येव १,१,२६५,३०५ 2.7
तत्सृष्ट्वा २,१,८८ 2.6
ततो वै सत् १,१,२२३ 2.7
तदात्मानम् १,१,२२३।१,४,९७९।२,१,७९ 2.7
तदेषाभ्युक्ता १,१,२७१,२८०।३,३,४०९।४,३,१३७ 2.1
तपसा ब्रह्म २,३,८।१,१,२०४ 3.2
तस्माद्वा एतस्मात् १,१,२६३ 2.5
तस्य यजुरेव शिरः २,४,१५९ 2.3
तस्यैष एव १,१,२८६ 2.5
तस्यैष एव शारीर आत्मा ३,३,२५५,२५६ 2.3
ते ये शतम् ३,३,३२९ 2.8
परात्परं यन्महतः ३,३,२११ 1.5
पृथिव्या ओषधयः ३,३,२५८ 2.1
प्रजया पशुभिः १,१,१८८ 3.6
ब्रह्मविदाप्नोति परम् १,१,९८,२०३,२५९।१,१,२८८।१,४,८३९।२,३,४,३,३,२७३,३२०।३,३,३२५,३८१,४०९,४१२।३,४,४३४।४,४,१५५,१५७,१५८,१५९,१६०,१६३,१९५,२१० 2.1
ब्रह्मणा विपश्चिता ४,३,१४८ 2.1
भृगुर्वै वारुणिः ४,१,९९।३,४,४७४ 3.1
महान् कीर्त्या १,१,१८८ 3.6
महान् भवति १,१,१८८ 3.6
य एवं वेद १,१,१८८ 3.6
यतो वा इमानि १,१,९६,१०९,१२८,२३० 3.1
यतो वाचो निवर्तन्ते १,१,२१७।१,२,४१८।३,२,११७।४,३,४७५।४,१,१५।४,२,७६ 2.9
यदा ह्येवैष एतस्मिन्नदृश्ये १,१,२३३ 2.7.1
यदा ह्येवैष एतस्मिन्नुदरम् ३,३,२२४ 2.7.1
यदेष आकाशः १,१,२६५,२८६ 2.7
येन्नं ब्रह्म ३,३,२५८ 2.1
ये प्राणं ब्रह्मोपासते २,४,१५४ 2.3
यो वेद निहितं १,१,९८,२७२।३,३,३८१,४०९।४,३,१३७।४,४,१६३ 2.1
रसो वै सः १,१,२८६।३,३,२४३,२५२।४,२,७९ 2.7
रसं ह्येवायम् १,१,२२३।४,२,८० 2.7
वायोरग्निः २,३,२० 2.1
विज्ञातं चाविज्ञातं च २,१,१६ 2.6
विज्ञानं ब्रह्म १,२,४४४ 2.5
विज्ञानं यज्ञम् २,३,१११ 2.5
स आत्मानम् १,१,१५२,१९६।१,१,२३० 2.7
स एको ब्रह्मणः १,१,३३२।३,३,३९९ 2.8
स तपोतप्यत १,१,२२४।१,१,९५ 2.6
सत्यं ज्ञानमनन्तं ब्रह्म १,१,९५,९८,२७२।३,३,२९५,३२४,३८१।३,३,४७५।४,३,१३७ 2.1
स यश्चायम् १,१,२८८,३३९ 2.8
सर्वं एवात्मनः १,४,९४९ 2.7
स वा एष पुरुषः ३,३,२५८,२७३ 3.2
सुकृतमपि ब्रह्म १,२,५१४ 2.7
सोकामयत १,१,३२४।१,४,९७६।२,३,४ 2.6
सोश्नुते १,१,२७२,२९१,३११।३,३,३८१,४०९।३,४,४९२,४९७।४,१,५२।४,३,१३८,१५०।४,४,१५५,१८९,२००,२०७ 2.1
सैषानन्दस्य ३,३,३२८ 2.8

तैत्तिरीयब्राह्मणम्।

आनीदवातम्० २,४,१७३ 8.7.17
तस्य तान्तस्य १,३,७९८ 1.1.3
पृथिवी दीक्षा० ४,३,१०४ 3.7.7
प्रजापतिरकामयत० १,३,७२८ 2.1.2
ब्रह्मज्येष्ठा० ३,३,२६८ 2.4.6
ब्रह्म भूतानां प्रथमम्० ३,३,२६८ 2.4.6
यद्वसूनाम्० १,३,७३४ 1.5.11
यद्वैश्वदेवेन यजेत अग्निमेव० ३,३,२३१ 1.4.11
यद्वैश्वदेवेन यजते प्रजा एव ३,३,२३१ 1.4.11
यः कामयेत० ३,२,९९ 2.2.1

तैत्तिरीयसंहिता ।

अनाधृष्टमसि ३,३,२२ 2.1.10
अनु मे दीक्षां ३,३,३२३ 2.1.10
अमृतं वै प्राणाः १,३,७५७ 2.6.8
असिन्मे ३,३,२३४ 6.2.3
आश्विनं धूम्रललामम् ३,४,४३९ 2.1.10
एक एव यजेत ३,२,९८ 5.5.6.7
ऐन्द्राग्नं पुनः ३,४,४३९ 2.1.15
गृह्णान् त्वा अनु १,४,२०९ अ. 6.5 अ. रश्मौ
तरति ब्रह्महत्याम् ३,१,४६ 5.3.12
तदुरुगायस्य ३,४,४९४ 1.3.6
तदेव भूतम् ३,३,३२५ 10.1.1
तद्विष्णोः ३,४,४९४।४,२,८३।४,४,१८९ 1.3.6.2
ते ते ४,४,१८९ 1.3.6.1
ते ते धामान्युश्मसि ३,४,४९४ 1.3.6.1
दर्शपौर्णमासाभ्याम् ३,२,१९१ 1.6.9
देवा वै सत्रमासत १,३,७०७,७२९ 2.3.3
द्वादश रात्रीः ३,२,९९ 5.5.6.7
द्विरात्रेण यजेत ४,४,१८४ 7.1.4
भौम्यात् शुचि चमसे ३,३,३३२
परमेष्ठिनो वा एषः ३,२,१९१ 1.6.9
परोवरीयसीम् ३,३,२३५ 6.2.3
पुरुष एवेदम् ३,३,२७३ 3.12.1
परमेष्ठिनो वा ३,३,४१८ 1.6.9
प्रजापतिरकामयत १,१,१७८
ब्रह्मा देवानां १,३,७२९ 3.4.11
भूर्लोकादुपरि ४,३,१०४ 3.4.5
यमन्त.समुद्रे ३,३,३२५ 10.1.1
यः सिफरेताः स्यात् १,३,७११ 5.5.4
यदाक्ष्ठे चक्षुरेव ३,४,४३७ 6.1.1
य एवं विद्वान् दर्शपूर्णमासौ ३,३,४१८ 1.6.9
यत्प्रयाजानुयाजौ ३,४,४३७ 2.6.1
यस्य पर्णमयी जुहूः ३,४,४३७ 3.5.7
येनावृतं खं च ३,३,३२५ 10.1.1
य एवं विद्वांसः ४,४,१८४ 7.5.1
यः कामयेत ४,४,१८४ 7.2.9
यस्मिन्निदं संचाति ३,३,३२५ 10.1.1
विष्णोः कर्माणि ३,४,४९४।४,२,३८३।४,४,१८९
1.3.6.2
वीरहा वा एषः ३,४,४६० 1.5.2
श्वो भूते ३,२,९९ 5.5.6.7
षष्ठ वै दीर्घंश्वाः २,४,१६३ 5.1.7.1
साध्या वै देवाः १,१,३०० 7.2.1
सदा पश्यन्ति ३,४,४९५।४,२,८३ 1.3.6
सूर्यो दिवोधिपतिः ४,३,१०४ 3.4.5

ऋक्संहिता ।

तद्विप्रासः ४,४,१८९ 1.22.21

ताण्ड्यब्राह्मणम् ।

एतेन वै चित्ररथं १,३,७४४ 20.12.5

नारायणोपनिषद् ।

अतः परं नान्यत्० ३,४,४३६ 1.1
अम्भस्यपारे० ३,३,२९४,४१४ 1.1
तदेव भूतम्० ३,३,४१४ 1.1
तस्यान्ते सुषिरम्० १,२,६०२ 1.3.2
तस्यैवं विदुषः ३,४,४७८ 80
यथा वृक्षस्य० २,३,७६ 11
यदेकमव्यक्तम्० ३,४,४३६ 1.1
यमन्तःसमुद्रे० ३,३,४१४ 1.1
संन्यासयोगात् ३,४,४५६ म. ना. 10.6

निरुक्तम् ।

दिवो दानाद्वा० ४,४,१९३ 7.15

नृसिंहपूर्वतापनीयोपनिषद् ।

तमेवं विद्वान्० ३,४,४३४,४५७ 1.6
य एवं वदति० ३,३,२९० 2.1

पद्मपुराणम् ।

अतथ्यानि वितथ्यानि० २,२,८४ उ.
स्वागमैः कल्पितै० २,२,८४

पाणिनीयधातुपाठः ।

दिवु क्रीडा० ४,४,१९३

पाणिनीयशिक्षा ।

अनर्थज्ञश्चाल्पकण्ठश्च १,१,२१ } 32
गीती शीघ्री १,१,२१ }

पाणिनीयसूत्रम् ।

तत्प्रकृतवचने मयट् १,१,३०३ 5.4.21
तस्य निवासः १,२,५८३ 7.3.21
मयचश्छन्दसि १,१,३०६ 4.3.150
देवताद्वन्द्वे च १,२,५८३ 7.3.21
मयड्वैतयोः० १,२,३०६ 4.3.143
व्यत्ययो बहुलम् १,१,२७९ 3.1.85

पाराशरस्मृतिः ।

वेदाक्षरविचारेण० १,३,७४९ 1.73

प्रश्नोपनिषद् ।

अहमेवैतत्पञ्चधा० २,४,१७८ 2.3
उपस्थश्च० २,४,१६५ 4.8
एतद्वै सत्यकाम० १,३,६४५ 5.2
तस्मिन्नुत्क्रामत्यथेतरे० २,४,१७८ 2.4
परात्परं पुरिशयं० १,३,६४५ 5.5

पादौ च० २,४,१६५ 4.8
पायुश्च० २,४,१६५ 4.8
मा मोहं० १,१,४०४ 2.3
स ईक्षांचक्रे० १,१,२२२ 6.3
स तेजसि परे० १,३,६४५ 5.5
स प्राणमसृजत १,१,२२२ 6.3
हस्तौ चादातव्यं च० २,४,१६५ 4.8

बृहदारण्यकोपनिषद् ।

अगृह्यो नहि गृह्यते ३,२,१३९,१४० 3.9.26
अग्राह्यो न हि ३,४,४६९ 3.9.36
अत्र ब्रह्म ३,४,४९७ 4.4.7
अत्र भिक्षाचर्यम् ३,४,५०६ 4.4.22
अथ मर्त्यः ३,४,४९५ 4.4.7
अथ योन्यां देवतां ३,१,३० 1.4.10
अथवा स नैव रेमे १,१,२६८ 1.4.3
अथ हैनं जारत्कारवः ३,१,२२ 3.2.1
अथाकामयमानः ४,२,५७ 4.4.6
अथात आदेशः ३,२,१२०,१२२ 2.3.6
अथारूपज्ञो २,४,१६० 4.4.2
अथेतरे दुःखम् ३,४,४८१ 4.4.14
अथैनमासन्यम् ३,३,२७६ 1.3.3
अनन्तरोबाह्यः २,१,९५. 4.5.13
अभयं वै १,३,८२१ 4.2.4
अयमात्मा १,१,३९६।१,३,६५७।२,३,४७ 4.4.5
अयमेव स योयं ३,२,११० 2.5.1
अर्वाग्बिलः १,४,८७३ 2.2.3
अष्टौ महाः० २,४,२६३
असद्वा इदमग्रे २,४,१५७ 2.2.3
असङ्गो ह्ययं पुरुषः १,१,२३०।१,३,७९८ 4.3.15
अस्थूलमनणु ३,२,१०६।४,४,१९४ 3.8.8
अस्यैव आनन्दस्य १,१,३३२।३,४,४७५ 4.3.32
आकाश ओतः ३,२,१३५ 3.8.11
आत्मकामः ४,२,५७ 4.4.6
आत्मानं श्लोक० १,१,६६ 1.4.25
आत्मा वा अरे १,१,६६ 2.4.5
आत्मा वा अरे १,१,६६।४,१,८,९ 3.4.5
आत्मेत्येवोपासीत १,१,६६।३,३,२६० 1.4.7
आप्यायस्व ३।१।२८ 6.2.16
आहर सौम्य ४,२,७४ 3.2.13
इदं सर्वमसृजत १,४,९०८ 1.2.5
इदं सर्वं यदयमात्मा १,१,१९६।१,४,९३२,९७७ 2.4.6
इयं पृथिवी ३,२,११० 2.5.1
इहैव समवनीयन्ते ४,४,१८० 4.4.22
उभे उ हैवैष एते तरति ४,१,४३ 4.4.22
एतद्ध स्म वै तत्पूर्वे ३,४,४४३।३,४,४९८ 4.5.15
एतद्विदित्वा ३,२,१३५ 3.8.10
एतद्विदुरमृताः ३,४,४८१ 4.4.14
एतद्वै तदक्षरम् ३,३,२२० 3.8.8
एतस्य वा अक्षरस्य १,३,६४२ 3.8.10
एतस्यैवानन्दस्य १,१,२६९,२८६।३,४,४४४ 4.3.32
एतस्यैव प्रशासने ३,२,१३५ 3.8.9
एतावदरे १,४,९३१ 4.5.15
एवमेवायं पुरुष ४,१,१२ 4.4.4
एवमेवायं शारीरः ४,१,१२।२,३,८३ 4.3.36
एष नित्यो महिमा ३,३,२८९।३,४,४५३,४६६,४६८ 4.4.23
एष वायुः २,४,१७४ 1.5.3
ओषधीर्लोमानि ३,१,२१ 3.2.13
कतम आत्मा १,३,७७४ 4.3.7
कस्मिन्नु खल्वाकाशः १,३,६३२ 3.8.7.8
किंज्योतिरयम् १,३,७७४ 4.3.2
किं प्रजया ३,४,४५८ 4.4.22
कीटः पतङ्गो यदि ३,१,५३ 6.2.16
कार्यं तदा ४,२,६९ 3.2.13
क्वैष तदाभूत् ३,२,९८ 2.1.16
गुहायां परमे व्योम्नि ४,३,१५० 4.4.22
चक्षुषो वा मूर्ध्नो वा ३,१,२३ 4.4.2
जनको ह २,४,१८७ 3.1.1
जनको ह वैदेहः २,४,१८७।३,४,४३८,४६४ 3.1.1
तदेतत् प्रेयो वित्तात् ३,३,२६० 1.4.8
तदेषां प्राणानाम् २,३,१०७ 2.1.17
तद्देवा ज्योतिषां ज्योतिः १,४,९०५ 4.4.16
तद्ध स्म वै तत्पूर्वे ३,४,५०६ 4.4.22
तद्धैतत्पश्यन् ३,१,२९ 1.4.10
तद्धैतत् पश्यन्नृषिः १,१,३९७ 1.4.10
तद्ब्रह्म १,१,६६ 3.10.4
तद्यथा तृणजलायुका ४,१,१२ 4.4.3
तद्यथा प्रियया २,३,८३ 4.3.21
तद्यो यो देवानाम् १,३,७२८ 1.4.10
तद्वा अस्यैतत् २,३,८४ 4.3.22
तद्वा अस्यैतदात्मकामम् ३,२,९१,९५ 4.3.21
तमुत्क्रामन्तम् ३,४,१६०,२०८।३,१,११।४,२,६९ 4.4.2
तमेतं वेदानुवचनेन १,१,१२०।२,४,४४०,४६१,४७० ४,१,४६ 4.4.22
तमेव धीरः ३,४,४८९ 4.4.21
तमेव मन्य आत्मानम् १,४,८८५ 4.4.17
तमेव विदित्वा मुनिर्भवति ३,४,४३७,४४०,४७० ४,२,९० 4.4.22

तस्य वा एतस्य पुरुषस्य ३,२,७४ 4.3.9
तस्मादेकाकी १,१,१६८।३,४,५०१ 1.4.3
तस्मादेवंविच्छान्तः ३,४,४८४,४८७,५०४।३,४,४६४। ३,३,२८९ 4.4.23
तस्माल्लोकात् पुनः ४,१,१२ 4.4.6
तस्मात्ते १,४,८७३ 2.2.3
तान्वैद्युतान् ४,३,११३ 6.2.15
ता वा अस्यैताः ३,२,९२ 4.3.21
ते ह देवा ऊचुः ३,२,२७५ 1.3.1
ते ह वाचमूचुः २,१,२० 1.3.2
ते ह स्म पुत्रैषणायाश्च ३,४,४३७ 4.4.22
तौ ह यदूचतुः ४,२,६६ 3.2.13
तं त्वौपनिषदम् १,१,४०,४४,१३४।१,२,४७०।३,२,११७। ३,३,२६३ 3.9.26
तं विदित्वा ३,४,४६९ 4.4.23
तं विद्याकर्मणी ३,४,४३८।३,१,१५,२० 4.4.2
दश वै पशोः प्राणाः २,४,१६३ 3.9.4
द्वया ह २,४,१८७ 1.3.1
द्वया ह वै ३,३,२७५ 1.3.1
द्वे वाव ब्रह्मणः ३,२,१२० 2.3.1
ध्यायतीव १,३,७७९।२,३,११९ 4.3.7
न तत्र रथा ३,२,७४।४,४,१८८ 4.3.10
न तदश्नोति कंचन १,१,२७९ 3.8.8
न तदश्नोति कश्चन ४,४,१९४ 3.8.8
न तस्मात् प्राणाः ४,३,११६।४,२,५६,५८ 4.4.22
न पुनरावृत्तिरस्ति ४,४,१५५ 6.2.15
न प्रेत्य संज्ञास्ति १,१,२३९ 2.4.12
न याद्यं किंचन ३,२,९० 4.3.21
नव वै पुरुषे प्राणाः २,४,१६३ 3.9.4
न वा अरे पत्युः कामाय १,४,९३१।३,३,२६१ 4.5.6
न स्वपते ३,३,२८९ 3.9.26
न ह वै देवान् पापं गच्छति २,४,१८८ 1.5.20
न ह वास्तानप्रम् ३,४,४८५ 6.1.14
नानुध्यायात् ३,४,४८९ 4.4.21
नान्योतोऽस्ति २,३,१२५ 4.3.22
नैनं पाप्मा तपति ३,४,४९० 4.4.23
नैनं पाप्मा तरति ३,४,४९० 4.4.23
पुण्यः पुण्येन कर्मणा ३,२,९८ 4.4.5
पुण्यो वै पुण्येन २,१,१००।४,२,९८ 3.2.13
पुरश्चक्रे १,१,२८५,९४ 2.5.18
पुरः स पक्षी १,१,२८५ 2.5.18
पूर्णमदः पूर्णम् १,१,२४० 5.1.1
पूर्णस्य पूर्णम् १,१,२४० 5.1.1
पृथिव्यां तिष्ठन् ३,२,१२१ 3.7.3
प्रतियोन्याद्रवति ३,२,९५ 4.3.15
प्राज्ञेनात्मना ३,२,९० 4.3.21
प्राणस्थैव प्राणः ३,३,२६१।२६३ 1.4.7
प्राणस्य प्राणम् १,४,८९४ 4.4.18
प्राणा वै यशः १,४,८७५ 2.2.3
प्राणोऽपानः २,४,१७४ 1.5.3
प्राप्यान्तम् ४,१,१२ 4.4.6
प्रेयोऽन्यस्मात् ३,३,२६० 1.4.8
ब्रह्म तं परादात् १,१,१९६ 4.5.7
ब्रह्म लोकान् गमयति ४,३,११३।११५ 6.2.15
ब्रह्मैव सन् १,१,३२५।४००।२,३,१०१।४,२,५६।५८। 4.4.6
भवत्यात्मना परास्य ३,३,२८० 1.3.7
मासेभ्यो देवलोकम् ४,३,१०६ 6.2.15
य आदित्ये तिष्ठन् १,१,३४९ 3.7.9
य इमं च लोकं च १,२,५३९ 3.7.1
य एवं विदुरमृता ३,४,४५७।४,१,१५ 4.4.22
य एवं वेद ३,३,२९० 4.4.25
य एषोऽन्तर्हृदये १,४,९३० 2.1.17
यत्र त्वस्य १,१,२८०।४,४,१८० 4.2.14
यत्र सुप्तो न ३,२,९२ 4.3.19
यत्र हि द्वैतमिव १,१,२३९,२८०।१,३,६३२।४,४,१८० 2.4.14
यत्रास्य पुरुषस्य मृतस्य ३,१,२१।४,२,६६ 3.2.13
यथाकारी ३,४,४८१।४,१,१३,४६ 4.4.5
यथा सर्वासामपाम् १,१,२३८ 2.4.13
यदा सर्वे ३,४,४९५ 4.4.7
यदेव भगवान् वेद १,४,१३१ 4.5.4
यस्य सर्वाणि भूतानि १,१,२९६ 3.7
यस्यात्मा शरीरम् १,१,२९७ 3.7
याज्ञवल्क्य किंज्योतिः १,३,७७३ 4.3.2
ये तद्विदुरमृताः ३,४,४६०,४६५ 4.4.14
येनाहं नामृता स्याम् १,४,९३१ 4.5.4
यो यो देवानाम् १,३,७०२ 1.4.10
यो वा एतदक्षरम् १,२,६४४ 3.8.10
यः पृथिव्याम् १,२,५३९ 3.7.3
यः प्राणः २,४,१७४ 1.5.3
रेतश्च ४,२,६६ 3.2.13
लोकैषणायाश्च व्युत्थाय ३,४,४३८ 4.4.22
वागेकायनम् १,१,२३८ 2.4.11
वाचं धेनुम् १,४,८८४ 5.8.1
वायुश्चान्तरिक्षम् २,३,७ 2.3.3
विज्ञानेन विज्ञानम् २,३,११२ 2.1.17
विद्वांसः प्रजाम् ३,४,४६४ 4.4.22

धूमो रात्रिः ४,२,९२ 8.25
न तद्भासयते सूर्यः १,३,६९२ 15.6
नमस्यन्तश्च ३,४,४९० 9.14
नाहं वेदैः १,१,२७७ 11.53
नियतस्य तु संन्यासः ३,४,४३९ 18.7
नैव किंचित् १,१,७७ 5.8
परस्तस्मात्तु ३,३,३२३ 8.20
पश्यन् शृण्वन् १,१,७७ 5.8
पुरुषः स परः पार्थ ३,३,३२४ 8.22
प्रभवन्त्यहरागमे ३,३,३२३ 8.18
प्रलपन् विसृजन् १,१,७७ 5.9
प्राणापान० १,२,५८९ 4.29
ब्रह्मण्याधाय १,१,७ 5.10
ब्रह्मभूतः प्रसन्नात्मा ३,३,३२१ 18.54
ब्रह्मार्पणं० १,१,१८९ 4.24
भक्त्या त्वनन्यया १,१,२७७।३,२,१३९ 11.54
भक्त्या मामभिजानाति ३,३,२९६,२९८।३,३,
३२०,३४७।३,२,१०८ 18.55.
भवन्ति भावा भूतानाम् ३,२,१९० 10.4
मनुष्याणां सहस्रेषु ३,४,४७० 7.3
मम योनिर्महद्ब्रह्म १,४,९८३ 14.3
ममैवांशो २,३,१३४ 15.7
मय्यावेश्य ४,३,१४५ 12.2
मामेव ये ३,४,४८६ 7.14
मामात्मपरदेहेषु ४,४,१८८ 16.18
मोहात्तस्य परित्यागः ३,४,४३९ 18.7
यततामपि ३,४,४७० 7.3
यदादित्यगतं १,३,६९२।३,२,१८६ 15.12
यत्र काले ४,२,९२ 8.23
यथैधांसि ४,१,४१ 4.37
यदक्षरं वेदविदो वदन्ति ३,३,३२३ 8.11
ये त्वक्षरं ४,३,१४९ 12.ʃ
ये यथा मां प्रपद्यन्ते ३,३,३०७ 4.11
योगी प्राप्य निवर्तते ३,१,१० 8.25
यो यच्छ्रद्धः स एव सः ३,१,२७ 17.3
यं प्राप्य न निवर्तन्ते ३,३,४१४,३२४ 8.21
लिप्यते न सः ३,४,४८७।१,१,७७ 5.10
वेदैश्च सर्वैः १,३,७१० 15.15
सक्ताः कर्मणि ३,३,३५२ 3.25
सततं कीर्तयन्तः ३,४,४९० 9.14
स याति परमां गतिम् ३,३,३२३,३२४ 8.13
सर्वतःपाणिपादान्तम् ३,२,१८८।३,३,२४०,२५४
13.13
सर्वतः पुर्तिमत् ३,२,१८८ 3.16
सर्वं समाप्नोषि १,१,२०० 11.40
सर्वेन्द्रियविवर्जितम् ३,२,११९ 13.14
सहस्रयुग० ३,३,३२३ 8.17
सुखं दुःखं भवो भावः ३,२,१९० 10.4

भागवतम् ।

अथ ह वा तव ३,४,४९७।४,२,३६।४,४,२०७ 6.9.39
अथो अमुष्यैव १,२,६०२।३,२,१३३ 10.8.40
अन्ये मूढधियः ३,४,४३४ 11.12.8.9
अहं भक्तपराधीनः १,१,२७८।३,३,३८४,४०४,४९१।
४,१,३६ 9.4.63
आश्रमात् ३,४,४९८ 11.17.38
इहागतोहम् ३,३,३३४ 3.4.20
उपभोगेन ४,१,४५ 5.10.14
ऋषयोपि देव युष्मत् ३,३,३४७ 3.9.10
ऋते विदन्ति ३,४,४८६ 2.6.39.40
एकादशामी २,४,१७७ 5.11.9
एताः परं ४,२,८१ 10.47.58
एते चांशकलाः पुंसः ३,३,२१७ 1.3.28
कर्ममोक्षाय ४,१,१७ 11.3.44
केचित्स्वदेहे १,२,५८८ 2.2.8
केवलेन हि भावेन ३,३,३१४।३,४,४३४ 11.12.8.9
चतुर्भुजं १,२,५८८ 2.2.8
ज्ञात्वाऽज्ञात्वा च ३,३,२७८ 10.24.6
त एव पश्यन्ति २,४,४६८,४८९ 1.9 36
तथापि चित्तवडिशं ३,४,४६७ 3.28.34
तमेव पुरुषं यज्ञं १,३,७०९ 2.6.27
तथा तथा पश्यति ४,१,९ 11.14.26
तपसैव यथापूर्वम् २,१,२०१ 2.12.18
तयैव परया निर्वृत्या ३,४,४९५ 5.6.17
तस्मात्त्वमुद्धवोत्सृज्य ३,३,३५६ 11.12.14
तस्मान्मद्भक्तियुक्तस्य १,१,२७७।३,४,४९१।४,४,२१०
11.20.39.6. 4.6
तस्मै स्वलोकं भगवान् ३,३,४१४ 2.9.9
ता मन्मनस्काः ४,२,८१ 10.46.1
तावत्कर्माणि ३,४,४५० 11.20.9
तेनाजनाभे ३,१,३४ 5.20.28
तैनैव दातुं ब्रहि १,१,२९९ 6.11.20
दानव्रततपोहोम० ३,४,४६८ 10.47.24
दीयमानं न ३,३,३०८ 3.29.13
दुःसहप्रेष्ठ ३,३,२९२ 10.29.10
देहेन्द्रियासु ३,४,४९२।४,२,५६।४,४,१८६ 7.1.39
देहोऽसवोऽक्षा १,२,५४५ 6.4.25
त्वं तु सर्वं ३,४,४९८ 11.7.6
धारयन्त्यति ४,२,८१ 10.46.6

अंगुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्० १,३,६९३।२,३,६२ 3.297.17
योऽन्यथा सन्तमात्मानम् १,१,३७ 1.74.22
माया ह्येषा मया सृष्टा० १,१,३४८ 12 339.45

मत्स्यपुराणम् ।

अचिन्त्याः खलु ये भावाः० २,१,९२ 113.7

मार्कण्डेयपुराणं देवीमाहात्म्यम् ।

ज्ञानिनामपि ३,४,४८६ 2.54
बलादाकृष्य० ३,४,४८६ 1.54

मुण्डकोपनिषद् ।

अक्षरात्संभवति० १,२,५५९ 1.1.7
अग्निर्मूर्धा० १,२,५५५ 2.1.4
अथ परा यया० ३,३,३२०।१,२,५५५ 1.1.5.6
अद्रेश्यमग्राह्यम्० ३,३,२३४ 1.1.6
अनश्नन्० १,३,६२३ 3.1.1
अप्राणो ह्यमनाः १,२,५५५ 2.1.2
एतस्माज्जायते प्राणः १,२,५५५।१,४,९०८।२,४,१५९,१७४,१८४,२०७ 2.1.3
एतैरुपायैः० ३,३,२८६,२९३ 3.2.4
कर्तारमीशम्० १,४,९८२ 3.1.3
कस्मिन्नु भगवः० २,१,५५४ 1.1.3
क्षीयन्ते चास्य० १,१,३९४।४,१,४३ 2.2.8
खं वायुर्ज्योतिः २,४,१७५ 2.1.3
ततस्तु तम्० ३,२,१३९ 3.1.8
तदा विद्वान्पुण्यपापे० ३,३,२८२ 3.1.3
तमेवैकं जानथ० १,३,६०९,६१८ 6.2.5
तस्य भासा० १,३,६९० 2.2.10
तस्यैष आत्मा० ३,३,३८० 3.2.3
ते ब्रह्मलोके० ४,३,११६,१२६ 3.2.6
दिव्यो ह्यमूर्तः १,२,५५५ 2.1 2
द्वे विद्ये० १,२,५५४ 1.1.4
न चैतद्विद्वांस्तपसः० ३,३,२१५ 3.2.11
न चक्षुषा० २,३,१३० 3.1.8
नापि पापा० २,३,१३० 3.1.8
नायमात्मा प्रवचनेन० ३,३,३५८।३,४,४३४,४६५।४,२,१५।४,३,२४८।४,४,१८० 3.2.3
नायमात्मा बलहीनेन० ३,३,३९३,३८४।३,४,४९९।४,२,१५ 3.2.4
प्रोवाच तां० १,२,११९ 1.2.13
ब्रह्म वेद० १,१,१०१ 3.2.9
ब्रह्मैवेदममृतम्० १,३,६११ 2.2.11
मनोमयः० १,३,६१० 2.2.7
यद्भूतयोनिम्० १,४,९८२ 1.1.6
यमेवैषः० ३,२,१३८।३,३,२९६।३,३,३५८।३,४,४३४।४,४,१७८।३,३,३९३।३,३,४१३ 3.2.3
यस्मिन्द्यौः० १,३,६०९ 2.2.5
येनाक्षरम्० १,२,५६७ 2.1.3
यः सर्वज्ञः १,२,५६७ 1.1.9
सच्चिदानन्दविग्रहम्० १,१,२७३ 1.4
सप्त इह लोकाः० २,४,१६४ 2.1.8
सप्त प्राणाः० २,४,१६३ 2.1.8
सूर्यद्वारेण ते विरजाः ४,३,९९ 1.2.13

मैत्रेय्युपनिषद् ।

द्वे ब्रह्मणी० १,२,५६६ 6.22
सर्वमात्मा० २,३,१५ 6.7

याज्ञवल्क्यस्मृतिः ।

अयं हि परमो धर्मः० १,१,६६

योगसूत्रम् ।

अथ योगानुशासनम् १,१,४४ 1.8

रामोत्तरतापनीयोपनिषत् ।

यो वै ये मत्स्य० ३,३,२०८,२२८ 5

वराहपुराणम् ।

त्वं च रुद्र महाबाहो० २,२,८४ 70.36

वसिष्ठस्मृतिः ।

आचारहीनं न पुनन्ति वेदाः० ३,१,३२

शतपथब्राह्मणम् ।

आपोऽब्रुवन्० २,१,२० 6.1.3.2.4
तं त्वौपनिषदं० १,३,७४७ 11.5.3.13
पुरुषेन्द्रःप्रतिष्ठितं वेद० १,२,५९० 10
सृदमब्रवीत्० २,१,२० 6.1.3.2.4.6.1.11
यथा व्रीहिर्वा यवो वा १,२,४६४ 10.6.3.2
यदा वै पुरुषः० १,१,३७० 10.3.3.6
स एषोऽग्निर्वैश्वानरः० १,२,५९१ 10.6.1.11

शुक्लयजुर्वेदसंहिता ।

अतो ज्यायांश्च १,१,२८१ 31.3
एतावानस्य० १,१,२८० 31.3
पुरुष एवेदं० १,१,२८० 31.2

श्वेताश्वतरोपनिषद् ।

अजामेकाम्० १,४,८८६ 4.5
अजो ह्येकः० १,४,८८६ 4.5
अपाणिपादो जवनः० ३,२,११७,१३० 3.19
आदित्यवर्णम्० १,४,९१४ 3.8
आराग्रमात्रः० २,३,५६,६६ 5.8
ऋचो अक्षरे १,३,३४६ 4.8
ऋषिं प्रसूतम्० १,४,८०३ 5.2
किं कारणं ब्रह्म० 1.1

ज्ञाज्ञौ द्वावजौ० १,४,८७३ 1.9
तद्वाक्षिः १,४,८७७ 4.2
तमेव विदित्वा० ३,३,११८।१,३,६६८।१,४,९४५।२,२,
१०८ 3.8
तयोरन्यः० २,३,१३६ 4.6
ते ध्यानयोगानुगताः० १,४,८७२ 1.3
न तत्समश्चाभ्यधिकश्च ३,२,१८७।३,३,२८३।४,२,१४२।
४,४,२०८ 6.8
न तत्र सूर्यो भाति० १,३,६८८ 6.14
निष्कलं निष्क्रियम्० १,१,२२०।२,१,९१ 6.19
द्वा सुपर्णा० १,४,८७७ 4.6
परास्य शक्तिर्विविधैव श्रूयते ४,४,१९२।४,४,२०६ 6.8
यो योनिम्० १,४,८७३ 5.2
वालाग्रशतभागस्य० २,३,६५ 5.8
वृक्ष इव स्तब्धः ३,२,१८८ 3.9
वेदाहमेतं० १,४,८६७ 3.8
साक्षी चेता केवलः ४,४,१९० 6.11
एष उ एव साधु० ३,३,२९९ 3.8

सर्वसारोपनिषत् ।

सत्यं विज्ञान० १,१,२७३ 3

कठोपनिषत् ।

शतायुषः पुत्रपौत्रान् ३,२,७७ 23

सांख्यकारिका ।

मूलप्रकृति० १,४,८९२ 3
सामान्यकरणवृत्तिः० २,४,१७४ 29

कूर्मपुराणम् ।

मया सह ते सर्वे ३,३,११७,४,३,११५
पृ. सं. १२,२६९

अनिर्दिष्टस्थलानि वाक्यानि ।

अग्निहोत्रं जुहोति प्रजाकामः ३,२,१९१
अणुः स्थूलः १,३,६७०
अविद्यया मन्यते ३,२,८१
अस्थि चैव तेन मांसं० वेदे ३,१,१७
आकाशवत्सर्वगतश्च ३,२,८८
आरोहणं गोवृष० ३,२,८५
इन्द्रो वैवस्वतः ३,४,४७८
कर्ता कारयिता हरिः १,१,१०२
कश्चित्कल्याण्यो दक्षिणाः० ३,४,५०२
कषाये कर्मभिः पक्के० ३,४,४८२
जन्मान्तरसहस्रेषु० ३,३,२९२
ज्ञेयश्च १,१,१
तत्र तथा तं न जनयन्ति ३,१,१६
तत्र यः परमात्मा हि० २,३,१३६
तस्य पुत्रा दायमुपयन्ति० ४,१,४७
तस्याभिध्यानात्तृतीयं० ३,२,८८
तस्याग्निरेवाग्निः ३,३,१३४
तं यथा यथोपासते० ३,३,२०७
तं विदित्वा ब्राह्मणो भवति ३,४,४७३
तृतीयं सर्वभूतस्थं १,२,५९५
प्रथमां पिबते वह्निः ३,१,३०
प्रथमं महतः १,२,५९५
मनुर्वैवस्वतः ३,४,४७८
यन्न दुःखेन ३,४,४६१
यमो वैवस्वतः ३,४,४७८
यदस्य कर्मणा ३,३,२०६
यमहरहर्वा० १,२,६८६
यज्ञो यजमानः २,३,११३
यस्य वेदश्च वेदी च ३,१,४५
यावज्जीवमग्निहोत्रं जुहुयात् ३,४,४३९
विष्णोस्तु त्रीणि रूपाणि० १,२,५९५
सर्वाण्याख्यानानि परिप्लवे० ३,४,४७५
स सर्वं भवति ३,१,२९
संसर्गजैः कर्मदोषैः० ३,१,६१